श्रीमन्मोहनयशःस्मारक ग्रन्थमाला–ग्रन्थाङ्क–२६

मलधारगच्छमण्डनआचार्यप्रवरश्रीमद्धेमचन्द्रसूरिसंगुम्फितं, श्रीखरतरगच्छविभूषणश्रीमत्साधुसोमगणिवर
विहितया लघुवृत्त्या समलङ्कृतं

# पुष्पमाला–प्रकरणम् ।

सम्पादकः संशोधकश्च—
श्रीखरतरगच्छमण्डनमहाशासनप्रभावकक्रियोद्धारकश्रीमन्मोहनलालजीमुनीश्वरप्रशिष्यरत्न–
स्व० अनुयोगाचार्य श्रीमत्केशरमुनिजीगणिवरविनेयो
बुद्धिसागरो गणिः ।

प्रकाशकः —
सहायकसुविनिर्दिष्टमहानुभाववितीर्णार्थिकसाहाय्येन मुंबई–पायधुनि महावीरजिनालयस्थजिनदत्तसूरि-
ज्ञानभाण्डागारप्रधानकार्यवाहको झवेरी केसरीचन्द्रात्मजो झवेरचन्द्रः ।

वीरसं० २४८७ निष्क्रयः सार्धं रूप्यकद्वयम् रु० २॥) । विक्रमसं०

अच्छा प्रचार हुआ, उन पर अनेकों संस्कृत एवं लोक भाषाओंमें टीकाएं की गई। प्रस्तुत पुष्पमाला ग्रन्थ उन्हींमेंसे एक है। जिसकी रचना प्रश्नवाहन कुलके हर्षपुरीय गच्छके मलधारीय हेमचन्द्रसूरिने प्राकृत ५०५ गाथाओंमें की है। और सं० ११७५ में उन्होंने स्वयं इस ग्रन्थ पर संस्कृतमें १३८६८ श्लोक परिमित विशद् टीका बनाई। यह ग्रन्थ मूल रूपमें जैन श्रेयस्कर मंडल, महेसाणासे सन १९११ में प्रकाशित हुआ था। इसके २५ वर्ष बाद उक्त ग्रन्थ स्वोपज्ञ बृहद्वृत्तिके साथ ऋषभदेव केशरीमल संस्था, रतलामसे प्रकाशित हुआ था। उसके सम्पादक सुप्रसिद्ध जैनागमोंके सम्पादक सागरानन्दसूरि थे। उन्होंने इसके उपोद्‌घातमें ग्रन्थके महत्व और विषयोंका सुन्दर परिचय दिया ही है अतः उसके सम्बन्धमें यहां नहीं लिखा जा रहा है।

पुष्पमालाके रचयिता हेमचन्द्रसूरिने इस ग्रन्थका नाम उपदेशमाला व पुष्पमाला दोनों दिये हैं, यद्यपि प्रधानरूपसे उपदेशमाला नामही उनको अभीष्ट रहा है पर इसी नामका अन्य प्राचीन ग्रन्थ प्रसिद्ध होनेसे उससे भिन्नता सूचक पुष्पमाला नामही अधिक प्रसिद्ध हुआ। ग्रन्थ कर्ता आचार्य अपने समयके बहुत बड़े विद्वान थे। उनके रचित अन्य अनेक मौलिक व टीकाग्रन्थ प्राप्त हैं। उनका विशेष परिचय पं. दलसुख मालवणीयाने 'गणधरवाद' नामक ग्रन्थमें दिया है अतः यहां दोहराना आवश्यक नहीं समझा। केवल प्रस्तुत लघु टीकाके कर्ताका परिचयही आगे दिया जा रहा है।

प्रस्तुत पुष्पमाला लघुवृत्ति, मूल ग्रन्थकारकी स्वोपज्ञ बृहत् टीका परही आधारित है। वह टीका बहुत विस्तृत होनेसे पढ़नेमें बहुत समय लगता, इससे ग्रन्थके प्रचार व पठन पाठनमें असुविधाका अनुभव करके यह लघुवृत्ति खरतर गच्छके साधुसोमगणिने ५३०० श्लोक परिमित बनाई। इसकी रचना सं. १५१२ में अहमदाबादके खीमराजकी शालामें हुई। इस

टीकामें प्रासंगिक कथाएंभी दी गई है इससे संक्षेप होने परभी ग्रन्थकी उपयोगिता एवं प्रचारमें वृद्धि ही हुई है।

इस लघुवृत्तिके कर्ता खरतर गच्छीय साधु समाजमें सुप्रसिद्ध जैसलमेर आदि भण्डारोंके संस्थापक, सैंकडों प्रतिमाओंके प्रतिष्ठापक, युगप्रवर जिनभद्रसूरिजीके प्रशिष्य और महोपाध्याय सिद्धान्त रुचिजीके शिष्य थे। सं. १४८४ में उपाध्याय जय-सागरके जिन भद्रजीको प्रेषित 'विज्ञप्ति त्रिवेणी' नामक (महत्त्वपूर्ण 'नगरकोट्ट' तीर्थयात्राके वर्णन वाले) ग्रन्थ में जिनभद्र सूरिजीके साथ पं. सिद्धान्तरुचि गणिका नामभी उल्लिखित है। अतः उस समय उनकी उम्र २४ वर्षके लगभग मानें तो सिद्धान्तरुचिजीका जन्म सं. १४६० के आसपास सम्भवित है। ये बहुत उच्च कोटिके विद्वान और प्रतिष्ठावान थे, मांडवगढके ग्यासदीन बादशाहकी सभामें इन्होंने किसी वादीको परास्त कर विजयपद प्राप्त किया था और इसका उल्लेख साधुसोम और सुमतिसोमने इस प्रकार किया है :—

श्रीखरतरगच्छेश–श्रीमज्जिनभद्रसूरिशिष्याणाम्। श्रीजीरापल्लीपार्श्वप्रभु–लब्धवरप्रसादानाम् ॥ १ ॥
श्रीग्यासदीनसाहे–र्महासभालब्धवादिविजयानाम्। श्रीसिद्धान्तरुचिमहोपा–ध्यायानां विनेयेन ॥ २ ॥ (साधु सोम)

× × ×

ग्यासदीनसुरत्राण–गोष्ठाप्तजैत्रपत्रकाः। शिष्याः श्रीजिनभद्राणां, सिद्धान्तरुचिवाचकाः ॥ ६७६ ॥ (सुमतिसोम)

प्रस्तुत टीकामें भी राजसभामें वादी वृन्दों पर विजय प्राप्त करनेका उल्लेख है पर उसमें किसकी राजसभामें राजाका नाम नहीं दिया है। जैसलमेर भंडारमें संग्रहणी सावचूरिकी प्रति मांडवगढमें प्रस्तुत लघुवृत्तिके रचयिता साधुसोम लिखित

१० पत्रोंकी है। पुण्यविजयजीकी जे. भं. की नई सूचि अनुसार इसका लेखन समय १५०१ ठीक हो तो सिद्धान्तरुचिजीको महोपाध्याय पद इससेभी पूर्व मिल चुका था। खरतर गच्छमें यह पद उन उपाध्यायको मिलता है जो अपने समयके उपाध्यायोंमें सबसे बड़ा हो। अतः सिद्धान्तरुचिजीकी आयु उस समयभी काफी बड़ी होनी चाहिए और इसके बादभी सं० १५३२ से ४० तक वे शायद् जीवित रहे हों तो वे काफी दीर्घायु होंगे। खरतर गच्छ पट्टावलीमें जिनभद्रसूरिजीके १८ शिष्योंमें इनका नाम सबसे पहले व प्रधान रूपमें दिया है।

साधुसोम गणि उन्हीं महोपाध्यायजीके शिष्य थे। इनके अतिरिक्त अभयसोम, विजयसोम, मुनिसोम नामक आपके अन्य शिष्योंकाभी उल्लेख मिलता है। इनमेंसे अभयसोमके शिष्य हर्षराज उपाध्यायने संघपट्टककी लघुवृत्ति बनाई, जो जिनदत्तसूरि ज्ञानभण्डार सूरतके ग्रन्थांक ६१ के रूपमें प्रकाशित हो चुकी है। विजयसोमकी सहायतासे महो० सिद्धान्तरुचिजीने मांडवगढ़के श्रीमाल ठक्कुर गोत्रीय संघपति मंडन द्वारा भगवतीसूत्र आदि लिखवाये थे। उसका उल्लेख विज्ञप्ति त्रिवेणीके पृष्ठ ७१ में मांडवगढ़के ज्ञान भण्डारके लिए सं १५३२ के आश्विनमें लिखित भगवतीसूत्रकी पुष्पिका प्रकाशित है। अन्य शिष्य मुनिसोम रचित रणसिंह चरित्रकी एक मात्र प्रति उनके स्वयंके सं. १५४० के अक्षय तृतीयाको लिखित हमारे संग्रहमें है। यह चरित्र ६८० श्लोकों में सिणधरास्थल दुर्गके तोडा कारित शालामें रह कर वाचनाचार्य हेमध्वजकी अभ्यर्थनासे रचा गया है। मैंने अपनी प्रति भेजकर उपा. सुखसागरजी द्वारा जिनदत्तसूरि ज्ञान भण्डार सूरत से सं० २००४ में प्रकाशित करवा दिया। इनके रचित संसारदावा पादपूर्ति रूप पार्श्व स्तोत्र १७ श्लोकोंका प्राप्त है।

हृदय किस प्रकार सहज और अमिटरूपमें स्पर्श कर सकेगा, इसका उन्होंने बहुत ही ध्यान रखा है विधि-निषेधके वाक्य उतने सफल नहीं होते जितने कि उनके साथ विधेयक कार्योंके सुफल और निषेधात्मक कुकृत्योंके दुष्परिणामको बतानेवाले दृष्टान्त। कथाओंका प्रभाव बहुत शीघ्र व स्थायी पड़ता है अतः लोक मानसके पारखी जैन धर्म प्रचारकोंने बिना किसी भेदभावके पौराणिक और लौकिक कथा दृष्टान्तोंको अपनाया, उन कथानकोंको किसी धर्मके माहात्म्यके उदाहरणमें गूंथकर अपने उपदेशोंको प्रभावशाली बनाया, इस विषयमें वे बहुत उदार रहे हैं। खरतर गच्छीय उपाध्याय सूरचन्दने तो कुरानकी कथाको भी अपने 'पदैकविंशति' ग्रन्थमें उद्धृत की है। लोककथाएं तो सैंकड़ों उन्होंने अपने ढांचेमें ढाली है। इनमेंसे कई लोककथाएं तो बहुत ही लोकप्रिय हुई। उनके सम्बन्ध में सैंकड़ों स्वतंत्र रास चौपाई आदि रचे गए।

जैन औपदेशिक साहित्यकी परम्परा बहुत पुरानी है। इसका स्वतंत्र सबसे प्राचीन ग्रंथ 'उपदेशमाला' एक विशेष शैलीमें प्राकृत पद्यबद्ध रचा गया। इसके रचयिता धर्मदासगणि, श्रुति-परंपराके अनुसार तो भगवान महावीरके शिष्य माने जाते हैं पर ऐतिहासिक विचारणा द्वारा विद्वानोंने इनका समय ४-५ वी शती तक माना है। इस ग्रन्थ का श्वेताम्बर जैन समाजमें बहुत अधिक प्रचार हुआ। इसकी सैंकड़ों हस्तलिखित प्रतियां समय समय पर लिखी जाती रही और सिद्धर्षि जैसे प्रतिभाशाली अनेकों टीकाकारोंने संस्कृत एवं राजस्थानी भाषामें इस ग्रन्थकी टीकाएं बनाई। जिनमें कई टीकाएं तो १०-१२ हजार श्लोककी विशद है। उनमें अनेकों दृष्टान्त कथाएं गुम्फित की गई। इस ग्रन्थके व्यापक प्रचार और लोकप्रियताके कारण शीलोपदेशमाला और पुष्पमाला आदि औपदेशिक ग्रन्थोंकी रचना समय समय पर विभिन्न जैन विद्वानों द्वारा हुई और उन ग्रन्थोंकाभी बहुत

परिमाण ग्रन्थ औरभी लिखाए थे। दूसरी प्रतिभी मंत्री बाछाकीही लिखी हुई है। उसके लिखाने वाले भंडसाली श्रीधरनेभी इससे पूर्व लाख श्लोक परिमित प्रतियां लिखवाई थी।

साधुसोमजीकी विद्वत् परम्परा आगेभी चलती रही। उनके शिष्य वा० कमललाभके शिष्य चरणधर्मके शिष्य मुनिप्रभके धर्ममेरुने सं. १६०४ ? बीकानेरमें 'सुखदुख विपाक सन्धि'की रचनाकी, जिसकी प्रशस्ति इस प्रकार है :—

" हिव खरतर गच्छपति, श्रीजिनभद्रसूरीन्द्र। जेहना पय सेवइ, भावइ सुरनर वृन्द ॥ २१ ॥
पाठक वर श्रीसिद्धान्त–रुचिहिं तसु सीस। चउदह विद्यानऊ, जगमांहि तेह अधीस ॥
तसु सीस थयउ वाचक, साधुसोम उदार। श्रुतसागरनउ हेलइं, लियउ तिणि पार ॥
तसु सीस कमललाभ, वाचक मुनि आ(आ)णउ। तसु सीस चरणधर्म, महीयल मांहइ वखाणउ ॥ २२ ॥
जिहि तणइ प्रसादइं, पाम्यउ मइं श्रुतसार। तेहना पय भवि भवि, होज्यो मुझ सुखकार ॥ २३ ॥
हिव संप्रति श्रीजिन–माणिक्य सूरि सुजाण। जिणि राजइ खरतर, दीप्यउ संघ जिम भाण ॥ २४ ॥
ढाल–चरणधर्म तणउ मुनिप्रभ, सीस अभिनव सुरतरो चिर जयउ महीयलि भुवनी परि, य दिन ए मुनिवरो ॥
मुनि धर्ममेरु भणंति जे नर, संधि हियइ धरइ। ते लहई समकित सुणउ भविअण, भवसमुद्र सुखइ तरइ ॥ २५ ॥"

यह धर्ममेरु बहुत अच्छे विद्वान थे। जिनकी रचित रघुवंश वृत्तिकी एक प्रति जैसलमेर भण्डारमें है। टीकाका परिमाण ८ हजार श्लोकों ( मूल सहित १० हजार ) का है। प्रशस्ति इस प्रकार है—

इति श्रीवाचनाचार्य सुमतिगम गणि शिष्य धर्ममेरु विरचितायां रघुकाव्य टीकायां वंशप्रतिषेध राज्ञी राज्यनिवेशो नामैकोनविंशतितमस्सर्गः ॥ १९ ॥ इति श्रीरघुवंशटीकासमाप्तेति ॥ श्रेयो भूयात ।

भन्डारकर ओरियन्टल इन्स्टीट्यूट पूना, आमेर दिगम्बर भण्डार+, ओरियन्टल कालेज लाहोर, और हमारे संग्रहमेंभी इसकी प्रतियां है ।

धर्ममेरुने शिशुपालवधकी टीकाभी बनाई है। जिसकी एक मात्र प्रति श्रीविनयसागरजीके संग्रहमें ( पत्र १४ से १९५ ) देखनेको मिली थी, इनकी रचित ' एकविंशतिस्थानप्रकरणावचूरि ' जैनरत्न पुस्तकालय, जोधपुरमें देखनेको मिली थी। इसके आगे इनकी परम्परा और कबतक चली ? प्रमाणाभावसे नहीं कहा जा सकता ।

पुष्पमाला ग्रन्थ पर स्वोपज्ञ बृहद्वृत्ति और साधुसोमकी इस लघुवृत्तिके अतिरिक्त सं. १४६२ में अंचलगच्छीय जयशेखर रचित अवचूरि ( ग्रन्थाग्रन्थ १९०० ) का उल्लेख जैन ग्रन्थावली और उसीके आधारसे जैनरत्न कोशमेंभी हुआ है। अन्य एक अज्ञात टीकाकी कई प्रतियोंका उल्लेखभी जैनरत्न कोशमें है। उनमें क्या भिन्नता है ? यह प्रतियोंको देखने परही कहा जा सकता है।

पुष्पमालाकी राजस्थानी भाषा टीका, जो बालावबोधके नामसे प्रसिद्ध है। खरतर गच्छके वाचनाचार्य रत्नमूर्तिके शिष्य मेरुसुन्दर रचित मिलती है, जो ६००० श्लोक परिमित है, इसकी सं. १५२३ में लिखित प्रति प्राप्त होनेका उल्लेख जैनरत्नकोशमें किया गया है। अतः उसकी रचनाभी इसी समयके आसपास हुई है। हमारे संग्रहमें इस बालावबोधकी पांच

---

+ सूचिमें चरणधर्मको कर्ता लिखा है, पर उनके प्रशिष्य धर्ममेरु रचित होनाही संभव है।

अपूर्ण प्रतियां है, इससे इसके प्रचारका अनुमान लगाया जा सकता हैं। इस बालावबोधके रचयिता मेरुसुन्दर बहुत बड़े भाषा टीकाकार थे। इनके अनेक जैन जैनेतर छन्द, अलंकार, काव्य, सिद्धान्त व धर्मग्रन्थोंके बालावबोध मिले हैं जिनमें कथाएंभी प्रचुर परिमाणमें दी गई है। उनमेंसे षष्टिशतक बालावबोध छपभी चुका है।

पुष्पमाला प्रकरणमें हिंसा, अहिंसा, विविध प्रकारके दान, शील, तप, भाव, सम्यक्त्व, व्रत, समिति, गुप्ति, स्वाध्याय, विहार, कृत्य, अकृत्य, मोक्ष हेतु, उत्सर्ग–अपवाद, इन्द्रियजय, कषाय निग्रह, गुरु शिष्य स्वरूप, आलोचना या दोष निवारण वैराग्य, विनय, वैयावृत्य, आराधना, विराधना आदि विषयोंका दृष्टान्त कथाओंके साथ बड़ाही सुन्दर विवेचन मिलता है। अतः यह ग्रन्थ हर व्यक्तिके लिए पठनीय और लाभप्रद है पर खेद है अभीतक ऐसे उपयोगी व महत्वपूर्ण ग्रन्थका राष्ट्रभाषा–हिन्दी आदिमें अनुवाद प्रकाशित नहीं हुआ। इससे जन साधारण इसके महत्वसे अपरिचित रहा और जो लाभ उसे मिलना चाहिए था, नहीं मिल सका।

इसी प्रकारके अन्य ग्रन्थरत्नोंसे जैन साहित्य भण्डार भरा पड़ा है। पर वे अधिकांश ग्रन्थ अप्रकाशित हैं और जो थोड़ेसे प्रकाशित हुए हैं वे भी प्राकृत संस्कृत या पुरानी लोक भाषाओंमें हुए हैं जिससे विद्वानों तकही उनकी जानकारी सीमित हैं। केवल साधु–साध्वियोंके व्याख्यानमेंही कुछ ग्रन्थोंका उपयोग यदा कदा होता है।

वर्तमान युगमें नैतिक और धार्मिक ग्रन्थोंके स्वाध्यायकी रुचि निरन्तर घटती जा रही है। वर्तमान शिक्षामें तो उनका स्थान रहा ही नहीं और मुनि यति गणभी आगे जैसे स्वाध्यायशील नहीं रहे। यद्यपि पहले की अपेक्षा अब ग्रन्थ बहुत सुलभ

महो० सिद्धान्तरुचिके शिष्योंमें प्रस्तुत लघुवृत्तिके रचयिता वाचक साधुसोमकी ही रचनाएं सबसे अधिक मिलती है। संग्रहणी अवचूरी इनकी सबसे पहली रचना है, इसकी प्रशस्ति जैसलमेर भण्डारकी नवीन सूचिके पृष्ठ २६९ में इस प्रकार छपी है—

अन्त—श्रीखर(तर)गच्छे श्रीजिनभद्रसूरि शिष्य श्रीसिद्धान्तरुचि महोपाध्याय शिष्येण साधुसोमगणिना परोपकृतये अवचूरिरियं लिखिता चिरं नन्दतात् संवत् १५०१ वर्षे श्रीमालवदेशे श्रीमंडपदुर्गे श्रीसिद्धान्तरुचि महोपाध्यायपादाम्बुजचंचरीकेण साधुना यथावबोधं लिखितेयं सतां हर्षाय भूयात् ॥ श्रीगुरुभ्यो नमः ॥ श्री ॥

इनकी अन्य रचनाओंमें जिनवल्लभसूरि कृत चरित्रपंचक वृत्ति सं० १५१९, नन्दीश्वरस्तव वृत्ति तथा जिनेश्वरसूरिकृत चंद्रप्रभ स्तव वृत्तिकी अपूर्ण प्रति बीकानेरके खरतर आचार्य शाखा भण्डारमें प्राप्त हैं, वे भी आपकी ही रचनाएं लगती हैं। पंचायती भंडार, बड़ा उपासरा जैसलमेरमें आपके रचित स्तोत्रोंके संग्रहकी ६ पत्रोंकी प्रति देखी थी। नागद्रह पार्श्वस्तोत्र, संसारदावास्तुति अर्थ ( केशरियानाथ भण्डार जोधपुर ) का उल्लेख भी हमारे खरतर गच्छ साहित्य सूचिमें है।

स्वर्णाक्षरी कल्प सूत्रकी दो प्रतियां भावनगर और जैसलमेरके तपागच्छीय भण्डारमें सं० १५१७ और १५२४ की पाटणमें लिखित प्राप्त हैं। उनकी २८ और २(३)६ श्लोकोंकी प्रशस्तियां वा० साधुसोमगणिनेही रची थीं। जिनमेंसे प्रथम प्रशस्ति जैन सत्य प्रकाश वर्ष ८ अंक १० पृष्ठ २९२ में प्रकाशित है और दूसरी ऐतिहासिक महत्वपूर्ण प्रशस्ति ३(२)६ श्लोकोंकी हमने जैन सत्य प्रकाश वर्ष २० अंक ७ पृष्ठ १५६ में प्रकाशित कर दी है। इनमेंसे भावनगर संघ भण्डारकी स्वर्णाक्षरी प्रति महो० सिद्धान्तरुचिजीके उपदेशसेही वाछा सेर शाह मल्लकी भार्या माणकदेने लिखाई थी। उससे पूर्वभी मल्लने एक लाख श्लोक

## सम्पादकीयनिवेदनम् ।

भो भो विचारचतुराः विचक्षणचणाः पाठकप्रवराः ! समादीयतां भवत्कै करपङ्केरुहे समर्प्यमाणमेतदन्वर्थनामकमुपदेशमाले-त्यपराभिधानं पुष्पमालाप्रकरणरत्नं । प्रणेतारश्चास्य मूलग्रन्थस्य स्वोपज्ञभवभावनाद्यनेकग्रन्थरत्ननिर्मापकाः श्रीमलधारगच्छनभोऽङ्गणनभोमणयः श्रीमद्धेमचन्द्रसूरिपादाः । विवृतमप्येतत्स्वयमेव सूरिवरैः । तच्च सवृत्तिकं संशोध्य प्रकाशितं सततमागमादिसाहित्यप्रकाशनबद्धकक्षैः श्रीसागरानन्दसूरिभिः । सा च वृत्तिरतीव विस्तृता गहना चापि, अतो मन्दमेधसां नात्युपकारिणीति विभाव्येयं लघुवृत्तिस्तामेव बृहद्वृत्तिमुपजीव्य संक्षिप्ता सरला संक्षिप्तवरसंस्कृतकथानकान्विता च सन्दृब्धा श्रीमत्साधुसोमगणिभिः । अस्यैका प्रतिर्नातिप्राचीना शुद्धप्राया च दृक्पथेऽवतीर्णा आचार्यप्रवरश्रीमज्जिनरत्नसूरिवराणामन्तिके शरनवाङ्केन्दु(१९९५)मिते वैक्रमे तीर्थाधिराजश्रीशत्रुंजयस्य पवित्रच्छायावर्त्तिपादलिप्तपुरीयचातुर्मास्यां । तामवलोक्य स्वल्पमेधाविनामपि सहजबोधोत्पादिकेयमिति मत्वाऽस्या मुद्रणाभिलाषः समजनि मम हृदये । अतस्तदैव कर्त्तुमारब्धा मुद्रणार्हा प्रतिः, समापिता च कतिपयमासाभ्यन्तरे । ततः सुरेन्द्रनगरस्थ श्रीसङ्घसत्कचित्कोषीया प्रतिः प्राचीना शुद्धप्रायापि च सम्प्राप्ता श्लोकबद्धशत्रुंजयमाहात्म्याद्यनेकग्रन्थप्रकाशने सततोद्यमिनां श्रीमतां मुनिप्रवरश्रीमन्मङ्गलविजयानां साम्निध्यतः । तस्याः प्रान्ते निम्नलिखिता पुष्पिकाऽस्ति—

संवत् १६३८ वर्षे जेष्ठवदिसप्तमीतिथौ रविवारे श्रीखरतरगच्छे श्रीजिनचन्द्रसूरिविजयराज्ये श्रीविक्रमनगरे साध्वी प्रवर्तिनी सुवर्णलक्ष्मीशिष्यणी प्रवर्त्तिनी रत्नसिद्धि, तच्छिष्यणी प्रवर्तिनी लावण्यसिद्धिगणिनीप्रतिरियं मुंहती भगतादे विहराविते स्वपुण्याय

न्या[श्रा]नतिमित्तं । चिरं नन्दतु ॥ पत्र १११ ।

एवं प्रतिद्वयाधारेण संशोधितेयं मुद्रणार्हा प्रतिः । ततो मुनिनवाङ्केन्दु(१९९७)मिते वैक्रमे प्रारब्धं मुद्रणकार्यमस्याः, परं भवितव्यतानियोगेन मुद्रणाधिपतेरव्यवस्थावशादियद्विलम्बोऽजनि प्रकाशनेऽस्याः ।

प्रस्तुतलघुवृत्तिनिर्मापकाः श्रीमत्साधुसोमगणयः कदेमं भूमण्डलं मण्डयामासुः स्वपादविन्यासेन ? कस्मिन् गच्छे कस्य च विनेयवरा अभूवन् ? के के चान्ये ग्रन्थाः सन्दृब्धाः ? इत्यादिवृत्तस्तस्या एव बीकानेरवास्तव्य साहित्यरत्न श्रीमान् अगरचन्द्रजी नाहटा लिखितप्रस्तावनातोऽवसेयः ।

अस्याः प्रकाशने द्रव्यसहायकानां नामसूचिः पृथग्निर्दिष्टाऽस्ति, ये ये महानुभावा अस्मिन् शुभकार्ये उदारवृत्त्या स्वद्रव्यप्रदानेन सहायकाः सञ्जातास्ते सर्वेऽपि शतशो धन्यवादार्हा अनुकरणार्हाश्चान्येषामपि धनिकानां ।

विहितेऽप्यायासतः प्रूफसंशोधने छद्मस्थस्वभावसुलभत्वान्मतिमान्द्याद्दृष्टिदोषाद्वा सञ्जातास्त्रुटयो या दृक्पथमायाता मे, तासां शुद्धिपत्रकमुपन्यस्तं, तदतिरिक्ता अपि याः काश्चनस्खलना दृक्पथमवतरेयुस्ताः सम्मार्जनीयाः प्रकृतिकृपालुभिः सज्जनैरित्यभ्यर्थ्यते ।

सं. २०१७ श्रा. कृ. पञ्चम्यां
कल्याणभुवन–धर्मशाला
पादलिप्तपुरे

स्वर्गीयानुयोगाचार्य श्रीमत्केशरमुनिजी
गणिवरचरणेन्दीवरद्विरेफो
बुद्धिसागरो गणिः ।

# स्थूलविषयानुक्रमः ।


| विषयनाम | पृष्ठ |
|---|---|
| टीकाकृत्कृतं मङ्गलाचरणम् । | १ |
| ग्रंथकारकृतं मङ्गलाचरणम् । | २ |
| मनुष्यभवदुर्लभत्वे दृष्टान्तसूचकश्लोकाः । | ४ |
| **दानाधिकारः प्रथमस्तत्राभयदानद्वारम्—** | |
| अहिंसाधर्मोपदेशः । | ७ |
| जीवरक्षायां वज्रनामदृष्टान्तः । | ९ |
| जीववधविपाके मृगापुत्रकथानकम् । | १३ |
| **२ ज्ञानदानद्वारम्—** | |
| ज्ञानस्य भेदप्रभेदाः । | १८ |
| ज्ञानदातुः स्वरूपम् । | १९ |
| श्रुतप्ररूपकत्वे उदाहरणम् । | २१ |
| सूत्रज्ञानग्रहणविधिस्तत्रास्खलितादिगुणे विद्याधरकथानकम् । | २२ |

| विषयनाम | पृष्ठ |
|---|---|
| ज्ञानग्रहणयोग्यतानिदर्शकं पुरन्दरनृपपुत्रकथानकम् । | २४ |
| सूत्रग्रहणे गुणाः । | २९ |
| ज्ञानस्यैकाक्षिकाबुद्धिमत्कगुणे सागरचन्द्रकथा । | ३३ |
| **३ उपष्टम्भदानद्वारम् ।** | |
| सुपात्रदाने नृपसूरसेनसुतयोर्दृष्टान्तः । | ४१ |
| पथ्यान्नादेर्दानस्य महत्फलत्वं । | ४५ |
| दानान्तरायकर्मणो दारिद्र्यादिफलत्वं । | ४६ |
| दानादायकानामशोभनीयत्वे धनसारश्रेष्ठिकथा । | ४७ |
| **२ शीलाधिकारः ।** | |
| शीलमाहात्म्यवर्णनम् । | ४९ |
| शीलरक्षणे रति–ऋद्धि–बुद्धि–गुणसुन्दरीकथानकानि । | ५२ |
| शीलफलत्वे सीताऽऽख्यानम् । | ५७ |

हो गए हैं अतः उनका स्वाध्याय बढ़ना चाहिए था। ऐसे प्रेरणा दायक ग्रन्थोंके प्रचाराभावसेही आज भारतमें अनैतिकताका बोलबाला है, जो हमारे उज्वल भविष्यके लिए बहुतही चिन्तनीय विषय है। अध्यात्मप्रधान भारतका इस प्रकार नैतिक पतन सर्वथा शोचनीय और बहुतही अखरने वाला है। यदि हमें विश्वमें अपनी पूर्व प्रतिष्ठा बनाये रखनी है बढ़ानी है तो हमारे जीवनमें घुसे हुए व बढ़ते हुए दोषोंको दूर करना होगा और वह मानवीय सद्गुणोंके विकास द्वाराही होना सम्भव है। आशा है राष्ट्रके कर्णधार, विचारक एवं–हितैषी व्यक्ति इस गम्भीर समस्याकी ओर शीघ्रही ध्यान दे कर और हमारे मुनि गण ऐसे सद्गुण प्रस्थापक ग्रन्थरत्नोंके स्वाध्याय और प्रचारमें अधिकाधिक मनोयोग दे कर राष्ट्रके गौरवको समुज्वल करेंगे।

ले० अगरचंद नाहटा।

| विषयनाम | पृष्ठ |
| --- | --- |
| इच्छामिच्छादिदशविधसामाचारी । | ९६ |
| सामायिकादिचारित्रपञ्चकस्वरूपम् । | ९७ |
| दीक्षानर्हा अर्हाश्च । | १०१ |
| चारित्रप्रतिपत्तिविधिः । | १०५ |
| तत्र विनीतस्य स्वरूपम् । | १०५ |
| चारित्रप्रदाने शुभतिथ्यादिविचारः । | १०६ |
| उपस्थापनाविधिः । | १०७ |
| उपस्थापनाप्रदाने कालक्रमः । | १०८ |
| षड्जीवनिकाययतनासु धर्मरुच्यनगारवृत्तम् । | ११० |
| सत्यासत्यवादिनोर्गुणदोषनिरूपणम् । | ११२ |
| सत्यवादित्वे कालिकाचार्यकथानकम् । | ११२ |
| असत्यवादित्वे वसुनृपाख्यानम् । | ११५ |
| अदत्तपरिहारे नागदत्तकथानकम् । | ११६ |
| नवगुप्तिविशुद्धब्रह्मचर्यपालनोपदेशः । | ११७ |
| ब्रह्मचर्यरक्षणे सुदर्शनदृष्टान्तः । | ११९ |
| अत्रैव स्थूलभद्रकथानकम् । | १२१ |

| विषयनाम | पृष्ठ |
| --- | --- |
| परिग्रहस्यासारतानिदर्शनम् । | १२१ |
| परिग्रहस्य त्यागे कीर्तिचन्द्रनृपवृत्तम् । | १२४ |
| रात्रिभोजनपरिहारोपदेशः । | १२५ |
| रात्रिभोजनलम्पटत्वे रविगुप्तविप्राख्यानम् । | १२७ |
| एतद्व्रतषट्करक्षणे कष्टार्जितरत्नरक्षकदरिद्रद्विजकथानकम् । | १२९ |
| प्रवचनमातृपालनोपदेशस्तत्स्वरूपं च । | १३० |
| तत्रेर्यासमितिनिश्चलत्वे वरदत्तमुनिवृत्तम् । | १३४ |
| भाषासमितौ संगतमुनिकथा । | १३६ |
| एषणासमितिवर्णनम् । | १३७ |
| आहारशुद्धिस्वरूपम् । | १३७ |
| अप्रासुकाहारत्यागे धनशर्ममुनिवृत्तम् । | १३८ |
| अनेषणीयाहारत्यागे धर्मरुचिमुनिकथा । | १३९ |
| तुरीयसमितिपालनोपदेशः । | १४० |
| तत्र सोमिलमुनिवृत्तान्तम् । | १४० |
| पारिष्ठापनिकासमितौ धर्मरुचिकथानकम् । | १४२ |
| मनोगुप्तिस्वरूपम् । | १४३ |

| विषयनाम | पृष्ठ |
| --- | --- |
| अथ जिनदासकथानकम् । | १४३ |
| वचनगुप्तौ गुणदत्तसाधुकथा । | १४५ |
| कायगुप्तिस्वरूपे कायगुप्तसाधुकथानकम् । | १४६ |
| विधिपूर्वकं सूत्रमधीत्य देशान्तरे विहरेत्साधुः । | १४७ |
| तत्र पार्श्वस्थादिकुशीलजनसङ्गवर्जनोपदेशः । | १४८ |
| पार्श्वस्थादीनां स्वरूपवर्णनम् । | १४९ |
| मनोनिग्रहानिग्रहे प्रसन्नचन्द्रराजर्षिकथा । | १५४ |
| मनोनिग्रहाभावे वेषमात्रस्य विडम्बकत्वमेव । | १५७ |
| व्यवहारनिश्चययोर्द्वयोरपि माननीयता । | १५७ |
| तत्रापि व्यवहारस्य बलवत्त्वम् । | १५८ |
| तीर्थकरोपदेशेनापि संयमशिथिलीकरणे दोषः । | १५८ |
| चैत्यकारापणादपि संयमपालनस्य बहुगुणत्वम् । | १५९ |
| देशविरतानां द्रव्यस्तवस्यापि करणीयता । | १६० |
| शक्रादिभ्योऽप्यनन्तगुणत्वं साधुसुखस्य । | १६१ |
| सम्यक्सामायिकस्यापि राज्यसम्प्रापकत्वम् । | १७० |

| विषयनाम | पृष्ठ |
| --- | --- |
| **६ करण[इन्द्रिय]जयद्वारम् ।** | |
| इन्द्रियभेदप्रभेदौ तासां स्वरूपं च । | १७२ |
| इन्द्रियस्वामित्वद्वारम् । | १७३ |
| इन्द्रियाणामाकृतयः । | १७४ |
| तासां बाहल्यादिमानम् । | १७४ |
| तासां विषयद्वारम् । | १७४ |
| इन्द्रियवशगानां दुःखफलत्वम् । | १७६ |
| श्रोत्रेन्द्रियविपाके सुभद्राकथानकम् । | १७७ |
| चक्षुरिन्द्रियविपाके लोलाक्षाख्यानकम् । | १७९ |
| घ्राणेन्द्रियविपाके राजसुतकथा । | १७९ |
| जिह्वेन्द्रियविपाके रसलोलुपकथा । | १८० |
| स्पर्शनेन्द्रियविपाके सुकुमालिका[राज्ञिजितशत्रु]नृपकथा । | १८२ |
| **४ कषायनिग्रहद्वारम् ।** | |
| कषायशब्दार्थः | १८३ |
| तेषां भेदाः । | १८४ |

| विषयनाम | पृष्ठ |
| --- | --- |
| तेषां स्वरूपं । | १८५ |
| सञ्ज्वलनादीनां तेषां कालमानम् । | १८६ |
| चतुर्ष्वपि तेषु न्यूनाधिक्यम् । | १८७ |
| क्रोधविपाके अचङ्कारितभट्टिकाकथा । | १८९ |
| क्रोधदुष्टत्वे क्षपकसाधुदृष्टान्तः । | १९० |
| माने मदाष्टकस्य त्याज्यत्वम् । | १९२ |
| जातिमदे महादेवद्विजकथा । | १९४ |
| मायाविपाके वणिक्सुतावसुमतीकथा । | १९६ |
| शेषकषायेभ्यो लोभस्याधिक्यं तन्निग्रहोपायश्च । | १९७ |
| लोभाधिक्ये कपिलकेवलीकथा । | १९९ |
| तत्रैव क्षुल्लकाषाढभूतिकथा । | २०१ |
| सामान्येन कषायाणां दुरन्तत्वम् । | २०४ |
| रागद्वेषमयत्वं कषायाणाम् । | २०६ |
| दृष्टि-स्नेह-विषयानुरागेषु द्वैधे च लक्ष्मीधरादिभ्रातृचतुष्कवृत्तम् । | २०६ |

| विषयनाम | पृष्ठ |
| --- | --- |
| **५ गुरुकुलवासद्वारम्** | |
| गुरुलक्षणे गुरुगुणषट्त्रिंशिका । | २०९ |
| ,, ,, अष्टविधगणिसम्पदादिकापि गुरुगुणषट्त्रिंशिका । | २१० |
| सारणावारणाद्यप्रदातुर्गुरोः शरणागतस्य मस्तकच्छेदकोपमा । | २१२ |
| तत्रैव जननीपुत्रयोरुदाहरणे । | *२१३ |
| विनयप्राधान्ये सुशिष्यलक्षणे । | २१५ |
| विनयाविनये राजसूरेश्च संवादः । | २१६ |
| कुशिष्यस्वरूपम् । | २१७ |
| गुरुकुलवासे वसतां गुणोपदर्शनम् । | २१७ |
| गुरुकुलवासगुणे धन्यकसाधुकथा । | २१८ |
| गुरुकुलवासत्यागे दोषास्तत्र कूलवालकसाधुकथा । | २२० |
| **६ आलोचनाद्वारम्** | |
| तत्र द्वारषट्कम् । | २२२ |

* इतः प्रारभ्य ४५ पत्रकपर्यन्तं प्रूफसंशोधनस्यासावधानता ।

| विषयनाम | पृष्ठ |
| --- | --- |
| शीलनिश्चलत्वे दैवसिकाचरितम् । | ५५ |
| शीलविराधनविपाके मणिरथनृपचरितम् । | ५७ |
| **३ तपोऽधिकारः ।** | |
| तपोमाहात्म्ये नन्दिषेणमुनिवृत्तम् । | ६२ |
| ,, ,, दृढप्रहारीचरितम् । | ६५ |
| तपःप्रभावकत्वे विष्णुकुमारमुनिचरितम् । | ६६ |
| तपःप्रभावे स्कन्दकमुनिचरितम् । | ६९ |
| **४ भावनाऽधिकारः ।** | |
| **१ सम्यक्त्वशुद्धिद्वारम्–** | |
| आद्यद्वारे सम्यक्त्वस्वरूपम् । | ७२ |
| द्वितीयद्वारे तद्भेदक्रमः । | ७३ |
| केषां सम्यक्त्वं भवतीति तृतीयं द्वारम् । | ७५ |
| तुर्यद्वारे सर्वगुणाधारत्वं सम्यक्त्वस्य । | ७६ |
| सम्यक्त्वनिश्चलत्वेऽमरदत्तभार्यादृष्टान्तः । | ७७ |
| ,, ,, नृपविक्रमाख्यानकम् । | ७८ |
| सम्यक्त्वमाहात्म्ये पुद्गलपरावर्तस्वरूपम् । | ८० |
| पञ्चमद्वारे सम्यक्त्वपञ्चकस्वरूपम् | ८३ |
| सम्यक्त्वस्य लिङ्गचतुष्कम् । | ८६ |
| **२ चरणशुद्धिद्वारम् ।** | |
| चरणस्य द्विभेदत्वम् । | ८९ |
| देशविरतौ संक्षेपेण द्वादशव्रतस्वरूपम् । | ९० |
| तत्रेत्वरसामायिकस्वरूपम् । | ९० |
| तस्य करणे शास्त्रीयो विधिः (टिप्पणि) । | ९० |
| पौषधस्वरूपम् । | ९० |
| तस्याष्टम्यादिपर्वैकसंबद्धता । | ९० |
| अपर्वस्वपि तत्कर्तव्यताप्रतिपादकैः कृतं शास्त्रपाठपरावर्तनम् (टिप्पणि) । | ९० |
| त्रिविधाहारोपोषितस्यैव देशत आहारपौषधो भवतीति (टिप्पणम्) | ९० |
| सर्वचरणे चरणसप्ततिकास्वरूपम् । | ९५ |
| तदन्तर्गतं द्वादशभावनास्वरूपम् । | ९५ |
| द्वादशभिक्षुप्रतिमास्वरूपम् । | ९५ |
| पिण्डविशुद्ध्यादिका करणसप्ततिका । | ९६ |

| विषयनाम | पृष्ठ |
|---|---|
| उत्कृष्टजघन्यस्वाध्यायप्रमाणम् । | २६३ |
| अन्तसमये नमस्कारमन्त्रस्यैव स्मरणीयत्वम् । | २६५ |
| नमस्कारस्यैहिकफले शिवकुमारकथानकम् । | २६६ |
| देवसान्निध्ये श्रीमतीश्राविकाकथा । | २६६ |
| ,, ,, बीजपूरफलप्रापकश्राद्धोदाहरणम् । | २६७ |
| पारत्रिके फले चण्डपिङ्गलचौरकथानकम् । | २६८ |
| ,, ,, हुण्डिकयक्षकथानकम् । | २६९ |
| **११ अनायतनत्यागद्वारम् ।** | |
| स्वाध्यायेऽनायतनत्यागोपदेशः । | २७० |
| विभूषास्त्रीसंसर्गादीनामनायतनत्वम् । | २७० |
| अतिदुष्टत्वं स्त्रीसंसर्गस्य । | २७० |
| स्त्रीसङ्गदुष्टत्वेऽर्हन्नकमुनिकथा । | २७३ |
| अतिदारुणत्वं संयतीसङ्गस्य । | २७४ |
| अतिभयङ्करत्वं चैत्यद्रव्यविनाशादेः । | २७४ |
| चैत्यद्रव्यविनाशफले सङ्काशश्राद्धकथा । | २७६ |

| विषयनाम | पृष्ठ |
|---|---|
| महानर्थफलत्वं संयतीसेवनस्य । | २७७ |
| परतीर्थिकादीनामप्यनायतनत्वम् । | २७७ |
| कुसङ्गत्यागे चित्रभानुसोमादृष्टान्तौ । | २७८ |
| **१२ परपरिवादनिवृत्तिद्वारम् ।** | |
| लघुत्वमकीर्तिश्च परपरिवादनिरतस्य स्वोत्कर्षपरस्य च । | २७९ |
| महाघोरकर्मबन्धफलत्वं परपरिवादस्य । | २८० |
| परपरिवादे क्षपककुन्तलादेव्युदाहरणौ । | २८२ |
| [illegible]रिवादत्यागे [illegible]दाहरणम् । | २८३ |
| **१३ धर्मस्थिरताद्वारम् ।** | |
| सर्वविरतिग्रहणाशक्तस्य जिनपूजोपदेशः । | २८४ |
| अष्टविधपूजायाः वर्णनम् । | २८४ |
| अष्टविधपूजाफले कीरयुगलाद्युदाहरणाष्टकम् । | २८४ |
| साधुश्राद्धधर्मे दृढत्वोपदेशः । | २८७ |
| विनाधर्मेण वाञ्छितार्थाप्राप्तिः । | २८८ |

| विषयक्रम | पृष्ठ |
|---|---|
| धर्मश्रवणे धनमित्रकथानकम् । | २८९ |
| **१४ परिज्ञाद्वारम् ।** | |
| दशान्तिमाराधनोपदेशः । | २९० |
| दुर्लभत्वं समाधिमरणस्य । | २९१ |
| सपराक्रमादिभेदचतुष्कं मरणस्य । | २९१ |
| तत्र जीतकल्पभाष्योक्तचत्वारिंशतिद्वाराणि । | २९२ |

| विषयक्रम | पृष्ठ |
|---|---|
| **५ शास्त्रोपसंहाराधिकारः** | |
| स्वल्पेनापिनिमित्तेन बोधे समरनृपकथानकम् । | ३०२ |
| प्रकरणोक्तबोधनेऽधिकारिणः । | ३०४ |
| प्रकरणकर्तृनामसूचनम् । | ३०४ |
| प्रकरणेऽधिकाराणां गाथानां च सङ्ख्या । | ३०४ |
| प्रकरणकारकृतान्तिममङ्गलम् । | ३०५ |
| टीकाकृत्प्रशस्तिः | ३०६ |

# शुद्धिपत्रकम् ।

| पृ. | पं० | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| १ | ८ | विमूला | विमुला |
| ४ | ७ | अम्म | जम्मं |
| ८ | ४ | होइ | होइ |
| ८ | १० | कुट्टादि° | कुड्डादि° |
| १२ | १३ | विसेयो | विसेयो |
| १६ | ७ | १ | १४ |
| २३ | ११ | °पयुक्त- | °पयुक्तं- |
| ३४ | १२ | °चमूस्त | °चमूस्तो |
| ३६ | १ | चताढ्ये | वैताढ्ये |
| ३७ | १३ | ज्ञान° | ज्ञानदान° |
| ५७ | ६ | सील | शीलं |
| ५८ | १४ | सञ्जाल | सञ्चार |
| ५९ | ९ | °धन्स्वे | °धन्स्वेव |
| ६१ | ३ | सम्भिश्वा | सम्भिश्व |
| ६९ | ५ | सिद्दे चि | सिद्धे चि |
| ७० | ९ | सिज्झइ | सिज्झइ |
| ७१ | ९ | घोसाण | घोसाण |
| ७३ | १ | °परावस: | परावर्स: |
| ७५ | १४ | हौंति | हुंति |
| ७८ | ७ | रञ्जिते | रञ्जितै |
| ८७ | १४ | स्पृष्टेश्च | स्पृष्टैश्च |
| ९० | १० | °सेन | °सेवन |
| ९१ | ३ | ाळने | पालने |
| ९६ | ४ | °स्यादिनै | °स्या दिनै |
| ११७ | १३ | पापविति | पापमिति |
| ११५ | १२ | नियेसा° | नियेसता° |

| विषयनाम | पृष्ठ |
| --- | --- |
| आलोचनाचार्यकगुरोर्गुणाष्टकम् । | २२२ |
| तत्रैव व्यवहारपञ्चकस्वरूपम् । | २२३ |
| आलोचकस्य जातिकुलसम्पन्नत्वाद्या गुणाः । | २२६ |
| आलोचनाविधिद्वारम् । | २२७ |
| सूक्ष्मेऽपि दोषानालोचने कटुकविपाकत्वम् । | २२८ |
| रज्जार्द्रकुमारकथा । | २२८ |
| इलापुत्रकथानकम् | २३३ |
| **७ भवविरागद्वारम्** | |
| चातुर्गतिकजीवानां दुःखमेव बाहुल्येन । | २३८ |
| जननीजनकादिप्रेम्णोऽस्थिरत्वम् । | २४१ |
| जननीप्रेम्णि चूलनीकथानकम् । | २४२ |
| पितृप्रेम्णि कनकरथनृपकथानकम् । | २४३ |
| भ्रातृप्रेम्णि भरताख्यानकम् । | २४३ |
| भार्याप्रेम्णि सूर्यकान्ताराज्ञीकथा । | २४४ |
| पुत्रप्रेम्णि अशोकचन्द्र(कूणिक)नृपाख्यानकम् । | २४५ |

| विषयनाम | पृष्ठ |
| --- | --- |
| विषयासारतानिदर्शनम् । | २४६ |
| विषयगृद्धौ परिहारे च जिनपालित-जिनरक्षितदृष्टान्तः । | २४६ |
| मनुजेषु यावद्देवेष्वपि वास्तविकसुखाभावनिरूपणम् । | २४८ |
| **८ विनयद्वारम्** | |
| विनयशब्दार्थस्तत्प्रकाराश्च । | २५० |
| पञ्चविधस्यापि विनयस्य पृथक् २ स्वरूपम् । | २५० |
| विनयस्यैहिकामुष्मिकफले सिंहरथराजकथा । | २५५ |
| **९ वैयावृत्त्यद्वारम्** | |
| दशविधत्वं वैयावृत्त्यस्य । | २५६ |
| सर्वतोऽपि गरिष्ठत्वं वैयावृत्त्यस्य । | २५७ |
| तत्र चन्द्रराजसुतकथानकम् । | २५९ |
| गृहस्थवैयावृत्त्ये साधूनां दोषनिरूपणम् । | २६० |
| तत्र सुभद्रासाध्वीकथा । | २६१ |
| **१० स्वाध्यायरतिद्वारम् ।** | |
| स्वाध्यायस्य परममोक्षाङ्गत्वम् । | २६२ |

| पृ. | पं० | अशुद्धम् | शुद्धम् |
| --- | --- | --- | --- |
| १६९ | १० | °द्वारभ्या | °द्वारभ्या |
| १६९ | १० | प्रशमसुख | प्रशमसुखं |
| १६९ | ११ | °रमसात्र | °रमणमात्र |
| १६९ | ११ | समवंतीति | समवेतीति |
| १७१ | ५ | धर्मदेशनां | धर्मदेशनां |
| १७१ | ६ | य ग्यकुलानां | योग्यकुलानां |
| १७३ | ६ | भा ंद्रियमिति | भावेन्द्रियमिति |
| १७३ | ९ | [illegible] | ऐंमणिका |
| १७३ | ११ | श्रीण | श्रीणि |
| १७५ | ७ | मोर्स | मोर्स्तु |
| १८० | ५ | प्रोक्तौऽपि | प्रोक्तोऽपि |
| १८० | ७ | भुक्ते | भुङ्क्ते |
| १८० | ११ | भुञ्जन् | भुञ्जम् |
| १८१ | ४ | सवत्र | सर्वत्र |
| १८१ | १२ | वक्तुं | पक्तुं |
| १८२ | १ | स्पशाने° | स्पर्शने° |
| १८३ | ३ | पृथ्वीवृत्तम् | हरिणीवृत्तम् । |
| १८७ | ३ | य `यानां | यद्यानां |
| १८८ | १४ | अ--थं° | अ--र्थं° |
| १८९ | २ | मोक्ष | मोक्षं |
| १८९ | १४ | प्रार्थय | प्रार्थयते |
| १९२ | ३ | प्रासर्दैयाम° | प्रासर्दोयाम° |
| १९३ | १० | सयलोण | सयलाण |
| १९४ | ६ | शाश्वत | शाश्वतं |
| १९४ | १ | °समंतु° | °समत्तु° |
| १९४ | ११ | सुंबा तण | सुंबयणं |
| १९७ | १ | °सपणार्थं | °साधणार्थं |
| १९९ | ५ | ष्वहिये° | विहयेणु° |
| १९९ | ८ | भाहियं | अहियं |
| २०१ | ५ | सस्वैः | सत्कैः |

| पृ. | पं० | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| २०१ | ६ | अधुवेसा° | अधुवे असा° |
| २०१ | ६ | हीअ | होअ |
| १०२ | ४ | कत्तुं | कत्तुं |
| २०३ | ९ | °बन्भूरि | °बद्भूरि |
| २०३ | ९ | गहीत | गृहीत |
| २०३ | १० | भागर- | नागरजनै- |
| २०५ | २ | सज्वलन्नानां | सम्ज्वलनानां |
| २०५ | १२ | विगिम्मंहो | विग्गिम्गहो |
| २०६ | २ | वर्ण्णिओ | वण्णिओ |
| २०६ | ७ | ससुरासूरं | ससुरासुरं |
| २०६ | १३ | °नन्दाहूणे | नंदाहूणो |
| २०८ | १२ | अविद्वार | अविद्वारं |
| २०९ | ३ | °महमाहु | °महगाथामाहु |
| २०९ | १४ | गभीरो | गंभीरो |
| २११ | ९ | °निवाहिणामा | °निवाहिण |
| २११ | १० | सुकार्ण | सुकाणं° |
| २१२ | १० | बुत्ता | वुत्ता |
| २१२ | १४ | °भ्भूतो | °भ्भूते |
| २१४ | ४ | °करिष्य | करिष्यं |
| २१४ | ५ | कत्तव्यं | कर्त्तव्यं |
| २१६ | २ | पृच्छेद् | पृच्छेत् |
| ३२४ | ४ | प्रायश्चित्त | प्रायश्चित्तं |
| ३३० | ६ | तुरगान् | तुरगान् |
| ३३१ | ११ | श्रद्धा | श्रद्धया |
| ३३२ | ५ | : `णिका | श्रेणिका° |
| ३३७ | १ | ससारं | संसारं |
| २४५ | १० | [सङ्कुचिता] | [सङ्कुचिता] |
| २४५ | १२ | भुआनस्पो° | भुआनस्पो° |
| २४७ | ६ | मीताभ्या° | भीताभ्या° |
| २४७ | १२ | कथमन्य° | कथमन्य° |
| २४९ | १३ | एवं | एव |
| २५१ | १ | स्वरूरस्तु | स्वरूपस्तु |

| पृ. | पं० | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| २५२ | ७ | सुभूषणं | सुभूषकं |
| २५८ | ७ | सियन त्थि | सिय नत्थि |
| २६० | ७ | शुभ | शुभे |
| २६१ | ३ | उत्पादयेति | उत्पादयति |
| २६२ | ३ | °मोक्षाङ्गस्य | °मोक्षाङ्गत्वे |
| २६३ | २ | सालज्झेयं | सावज्जेयं |
| २६४ | १० | °ष्क्रियते | °स्क्रियते |
| २६५ | १२ | म ° म° | मूलं नम° |
| २६६ | ६ | °स्थिवर्त | स्थितवर्त्म |
| २६६ | ६ | °प्रभ(के)सथैवा° | °प्रभ(व)सथैवा° |
| २६८ | ४ | घनं घनं | घनं धनं |
| २७४ | ५ | °घथा | °कथा |
| २७४ | ८ | शुक्त° | उक्त |
| २७९ | ४ | वाक्यैस्तुष्ट° | °वाक्यैस्तुष्ट° |
| २७९ | १२ | परदोस° | परद्रोस° |

| पृ. | पं० | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| २९० | ८ | °करणमूलं | °करणभूतं |
| २९१ | १२ | °मपकर्मा | °मपकर्म |
| २९२ | ५ | °निरसण° | °निस्सरण° |
| २९३ | ३ | हुति | हुंति |
| २९४ | ५ | प्रत्याख्यान | प्रत्याख्यानं |
| २९४ | ५ | सामर्थ्यां: | सामर्थ्याः |
| २९४ | ६ | अन्यथ ऽऽर्त° | अन्यथाऽऽर्त° |
| २९५ | १ | °क्रीकसंव्याः | °क्रीकर्तव्याः |
| २९५ | ३ | मानायि | मांनायि |
| २९५ | ९ | द्वोफा° | श्रोफा° |
| २९६ | १४ | बृहद्वत्ति | बृहद्वृत्ति |
| पत्रांक | २९७ स्थाने २९८ | | इत्येवमवगम्यम् । |
| ,, | २९८ स्थाने २९७ | | |
| ३०० | ८ | नान्ये | नाम्ये |
| ३०० | ११ | एव | एवं° |
| ३०४ | १२ | °सुद्धा | सुद्धे |

| पृ. | पं० | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| ११९ | १२ | स्वग | स्वर्ग |
| १२२ | १३ | वदन्ते | वम्पुते |
| १२४ | ८ | वर्षाकाले | वर्षाकाले |
| १२४ | ११ | परीकर | परिकर |
| १३० | ११ | कल्गोय | कर्णपीर्य |
| १३२ | टुंकी ५ | °भाविः | °भावित्वम् |
| १३८ | १ | दोसणो | दोसेणं |
| १३८ | १० | कडहिय | कंडहिय |
| १४१ | ८ | संपेहणाइ° | संपेहणाइ |
| १४३ | ४ | गु भाणरू वि | गुरुकाण वि |
| १४६ | ४ | °सुर्ज | °सेवं |
| १४८ | २ | निप्पकमो | निप्पकंपो |
| १५१ | १४ | मार्ग | मार्गे |
| १५४ | २ | विभक्ति | विभक्ति |
| १५४ | १० | पलित | पलितं |
| १५५ | १० | रोध | रोधं |
| १५५ | १० | अत्वा | श्रुत्वा |
| १५६ | १ | °रकत्व | °रकत्वं |
| १५७ | ३ | प्रासयादिका | प्राप्त्यादिका |
| १५८ | ११ | तीथकरो° | तीर्थकरो° |
| १६३ | १४ | भमो | भमी |
| १६३ | १४ | कृत्वा | कृत्वाद् |
| १६४ | १ | °नहमाः | °न हिमाः |
| १६४ | १३ | °दुशोधा | °दुशो |
| १६५ | ५ | प्रत्ययाद्धा° | प्रत्ययादूध्वा° |
| १६६ | ६ | क्षायन्ते | क्षीयन्ते |
| १६६ | १४ | पायसंखए | ण उ संखए |
| १६८ | ८ | सत्यवीर्यं | स स्ववीर्यं |
| १६८ | ९ | °ऽशठ | °ऽशठो |
| १६९ | ८ | °लोकाल्यो | °लोकाल्यो |

॥ ॐ अर्हं नमः ॥

लक्षाधिकनूतनश्राद्धकर्तृशासनप्रभावकश्रीमज्जिनदत्त–कुशलसूरीश्वर–क्रियोद्धारकश्रीमन्मोहनमुनीश्वरक्रमकजेभ्यो नमो नमः ॥

मलधारगच्छगगनाङ्गणनभोमणि**श्रीमदभयदेवसूरि**शिष्य**श्रीमद्धेमचन्द्रसूरि**सङ्कलिता श्रीमत्खरतरगच्छालङ्कारहार– जेसलमेरुज्ञानावलि-
पुण्यानेकचित्कोशसंस्थापक–**श्रीजिनभद्रसूरिवरा**न्तेवासि–महोपाध्याय**श्रीसिद्धान्तरुचि**विनेय–**श्रीमत्साधुसोम**गणिवर-
गुम्फितया लघुवृत्त्या समलङ्कृता **उपदेशमाले**त्यपरनामधेया–

# पुष्पमाला

जयति जगदेकभानुः, प्रकटितसकलार्थसार्थपरमार्थः । प्रहतनमाः परमात्मा, प्रभाम्बुधिर्मुनिजनकृतार्थः ॥ १ ॥
श्रीहेमचन्द्रगुरुणा, विवृत्तामपि विस्तरेण विततार्थाम् । विवृणोमि पुष्पमाला–मल्पाक्षरमल्पकल्पितुष्ट्यै ॥ २ ॥

इह हि पुरुषार्थेषु प्रधानतमो धर्मः, धर्मे चोपकारस्तस्मिन्नपि भावोपकारः, तत्रापि स्वपरोपकारः । स च भगवद्भक्तिभावितस्य सम्यक्त्वोपदेशसुसाध्यः, स च शास्त्ररूपापन्न एव स्वस्य स्मृतिद्वारेण परेषां च ज्ञाताज्ञातहिताहितप्रवृत्तिनिवृत्तिस्थापनज्ञापनद्वारेण चिरं स्वसाध्यं साधयितुमलं, इति परिभाव्य भगवान् ग्रन्थकारः पुष्पमालेत्युपमाननाम्ना प्राप्तप्रसिध्युपदेशमालाख्यं प्रकरणं चिकीर्षु-

सदादौ प्रत्यूहव्यूहव्यपोहेन चिकीर्षितशास्त्रपरिसमाप्तये श्रोतृप्रवृत्तये शिष्टसमयप्रतिपत्तये च विशिष्टेष्टदेवतानमस्काररूपभावमङ्गलगर्भां तावदिमां गाथामाह—

**सिद्धमकम्ममविग्गह--मकलंकमसंगमक्खयं धीरं । पणमामि सुगइपच्चल--परमत्थपयासणं वीरं ॥ १ ॥**

व्याख्या—इह "संहिता च पदं चैव, पदार्थः पदविग्रहः । चालना प्रत्यवस्थानं, व्याख्या तन्त्रस्य षड्विधा॥१॥" इति, तत्र संहितोक्तैव, पदविभागस्तु सुगमः, चालनाप्रत्यवस्थाने दुर्घटत्वप्रायसङ्कटे, न तु प्रस्खलच्चलनोऽल्पधीनात्र सञ्चारमारचयितुं पटीयानिति ते उपेक्ष्य पदार्थादिनैव मन्दमतिसत्त्वोपकृतये यथाप्रतिज्ञं व्याख्यायते—तत्र विशेषत ईर्ते—परमपदं गच्छतीति "पचाद्यच्"[पा॰ ३-१-१३४] विधानाद्वीरः, यदि वा 'ईरणमीर' इति भावे घञ्, ततश्च विशिष्ट ईरो—गमनं "सर्वे गत्यर्था ज्ञानार्थाः" इति ज्ञानं वा यस्य स वीरः, अथवा विशिष्टा तपोरूपा तीर्थकृन्नामकर्मोदयसमुद्भूतातिशयलक्षणा वा ईर्लक्ष्मीस्तया राजते—शोभते, इत्यन्यतोऽपि चेति 'ड' प्रत्यये वीरस्तं वीरं—श्रीवर्द्धमानं वर्त्तमानतीर्थाधिपतिं प्रणमामीति क्रियासम्बन्धः । कथम्भूतमित्याह—सिद्धं। सितं—बद्धं, ध्मातं—दग्धं कर्म येन स तथा, पृषोदरादित्वात्सिदादेशधकारौ। अथवा 'षिधू गत्यां' सेधति स्म—सिद्धः, निर्वृतिप्रासादोपरि गत इत्यर्थः । अथवा सिद्धस्त्रिभुवनख्यातः, अथवा 'षिधू शास्त्रे माङ्गल्ये वा' सेधति स्म सिद्धः, शिक्षयति स्मेत्यर्थः, कृतमङ्गलो भवतीति वा, आजन्मदेवासुरविधीयमाननानोत्सवत्वात् । यद्वा 'षिधू संराद्धौ' सिध्यति स्म सिद्धः, परिनिष्ठितार्थो भवतीत्यर्थः, तं सिद्धं । तथा अकर्माणं—निष्ठितज्ञानावरणीयादिनिःशेषकर्माणं, अथवा अक्रम्यं—रागादिभिरनाक्रमणीयं । तथा अविग्रहं—सर्वतः साग्रयोजनशतक्षेत्रक्षिप्तसमस्तजन्तुविरोधं अशरीरं वा, अथवा अत्र अविः—मेरुः, ग्रहाः—सूर्यादयस्तद्वत्स्थैर्यतेजः सोमतादिप्रवरो विग्रहो—देहो यस्य स तथा, इति विग्रहशब्दावृत्त्या व्याख्यायते, तं [अविग्रहविग्रहं]।

तथा अकलङ्कं-रोगजतुरमाद्यनाक्रमणीयसिंहलाञ्छनं, यद्वा अकलङ्कं-अविद्यमानव्रतलोपादिवचनीयं । तथा असङ्गं-सबाह्याभ्यन्तरपरिग्रहरहितं । तथा अक्षदं, अक्षाणि-इन्द्रियाणि, द्यति-खण्डयति स्वेच्छाप्रवृत्तिप्रतिरोधेनेत्यक्षदं, यद्वा अक्षयं-अविनाशिमुक्तिपर्यायं । तथा धीः-सकलावरणविप्रमुक्ता समस्तवस्त्ववबोधशक्तिः, तया राजते तां राति वा तत्प्रापणप्रवणोपदेशद्वारेणेति धीरस्तं धीरं, यद्वा तथाविधपरीषहोपसर्गसंसर्गेऽप्यप्रकम्पं, अनन्तवीर्यत्वात् । तथा सुगतिप्रत्यलपरं, सुदेवत्वसुमनुजत्वसिद्धिलक्षणायाः सुगतेः प्रापणे [ये] प्रत्यलाः-समर्थास्तेषु परं उत्कृष्टं । तथा अर्थप्रकाशनं, अर्था ज्ञानादयो जीवादयो वा, तान् प्रकाशयतीत्यर्थप्रकाशनः, "कृत्ययुटोऽन्यत्रापि चे"ति ["कृत्यल्युटो बहुलं" पा०-३-३-११३] कर्तरि युट्, तं अथवा सुगतेः प्रापणे 'प्रत्यलाः' परमाः-सद्युक्तिरिक्तपरपरिकल्पितपदार्थेभ्यो व्यतिरिक्तत्वेन उत्कृष्टा अर्था-ज्ञानादयो जीवादयो वा, तान् प्रकाशयतीत्येकमेव विशेषणम् । अत्र च अकर्माणमित्यनेनापायापगमातिशयो धीरमित्यनेन ज्ञानातिशयः सुगतिप्रत्यलेत्यादिना वचनातिशयः साक्षादाख्यातः,एतादृग्गुणग्रामरमणीयश्चावश्यं भक्तिभरनिर्भरसुरासुरनिकरकोटीरकोटिघृष्टपादपीठोपकण्ठ एव स्यादिति पूजाऽतिशयोऽप्यर्थादुक्त एव,इत्यनन्यसाधारणमतिशयचतुष्टयं भगवतः प्रकटितमिति । तथा अत्र स्वपरोभयार्थसम्पत्तयस्तदुपायाश्च भगवतः प्रेक्षावद्भिर्विशेषणव्याख्यानुरोधेन स्वयं परिभावनीया इति गाथार्थः ॥ १ ॥ अथ ग्रन्थकारः कतिचित्सुकृतोपदेशरचनं प्रतिजानीते—

**जिणवयणकाणणाओ, चिणिऊण सुवण्णमसरिसगुणड्ढं । उवएसमालमेयं, रएमि वरकुसुममालं व ॥२॥**

व्याख्या—जिनवचनमेव काननं-वनं, तस्मात् "चिणिऊण" चित्वा-सङ्गृह्य, अर्थाद्धर्मोपदेशान्, शोभना वर्णा-अक्षराणि यस्यां सा सुवर्णा, तां । तथा असदृशाः-सिद्धिसाधकत्वेनानन्यतुल्या गुणा ज्ञानादयस्तैराढ्या-परिपूर्णा, तां । उपदिश्यन्त इत्युपदेशाः-वाक्यवि-

शेषाः, ते चेह धर्मविषया द्रष्टव्याः, जिनवचनोद्धृतत्वादेव, तेषां मालां–परिपाटीं, एतां वक्ष्यमाणां, रचयामि–करोमि, कामिव ?, वर-कुसुममालामिव, यथा कश्चित्कुतश्चित् काननात्कुसुमान्यादाय श्वेतादिवर्णविशिष्टां दृढसूत्रतन्तुप्रधानां कुसुममालां रचयति तथाऽहमपीति। अत्र चोपदेशमालां रचयामीत्यभिधेयाभिधानं, प्रयोजनं तु कर्तुरनन्तरं सत्त्वानुग्रहः, श्रोतुश्च दानादिधर्मपरिज्ञानं, परम्परन्तूभयोर्निःश्रेयसावाप्तिः, सम्बन्धस्तूपायोपेयरूपः शास्त्रधर्मोपदेशयोः सिद्ध एव, जिज्ञासितधर्ममर्माणश्चेहाधिकारिणः, एतच्च त्रितयमपि सूत्रे साक्षादनाख्यातमपि सुप्रतीतमेव, मङ्गलं तु त्रिभुवनगुरुनमस्करणलक्षणं प्रथममेव दर्शितमिति सकलशास्त्रकारप्रवृत्तिरनुसृतेति गाथार्थः ॥ २ ॥

अथ ये मनुजजन्मनो धर्मस्य च सुलभत्वमाकलय्य प्रमादनिद्रामुद्रितनयनास्तांस्तद्दुर्लभत्वोपदेशेन जागरयति—

**रयणायरपब्भट्ठं, रयणं व सुदुल्लहं मणुयजम्म । तत्थवि घोरस्स निहिव्व, दुल्लहो होइ जिणधम्मो ॥ ३ ॥**

व्याख्या—रत्नाकरप्रभ्रष्टं अब्धौ पतितं रत्नमिव सुदुर्लभं–अतिदुर्लभं मनुजजन्म–मनुष्यभवो जीवेन, एतेन च "चुल्लगपासगधन्ने, जूए रयणे य सुमिणचक्के य । चम्मजुगे परमाणू, दस दिट्ठंता मणुयलंभे ॥ १ ॥" एते दशापि सिद्धान्तप्रसिद्धा मानुषजन्मातिदुर्लभत्वदृष्टान्ताः सूचिताः, तत्र "चोल्लग" इति देशीयभाषया भोजनं, 'चर्म' शब्देन महाजलाशयोपरिवर्तिघननिबिडसेवालमिहाह।

एतत्कथासूचकानि चामूनि काव्यानि—

१—विप्रः प्रार्थितवान् प्रसन्नमनसः श्रीब्रह्मदत्तात्पुरा, क्षेत्रेऽस्मिन् भरतेऽखिले प्रतिगृहं मे भोजनं दापय । इत्थं लब्धवरोऽथ तेष्वपि कदाऽप्यश्नात्यहो!! द्विः स चेत्, भ्रष्टो मर्त्यभवात् तथाप्यसुकृती भूयस्तमाप्नोति न ॥१॥ २—सिद्धद्यूतकलाबलाज्जनिजनं जित्वाऽथ हेम्नां भरै–श्चाणाक्येन नृपस्य कोशनिकरः पूर्णीकृतो हेलया । दैवाल्लब्धजनेन तेन स पुनर्जीयेत मन्त्री क्वचिद्, भ्रष्टो मर्त्यभवात्

तथाऽप्यसुकृती भूयस्तमाप्नोति न ॥२॥ ३—वृद्धा काऽपि पुरा समस्तभरतक्षेत्रस्य धान्यावलिं, कृत्वैकत्र च तत्र सर्षपकणान् क्षिप्त्वा-
ऽऽढकेनोन्मितान् । प्रत्येकं हि पृथक्करोति किल सा धान्यानि सर्वाणि चेद्, भ्रष्टो मर्त्यभवात् तथाऽप्यसुकृती भूयस्तमाप्नोति न ॥३॥
४—अष्टसहस्रस्तम्भै-रष्टसहस्रास्त्रिभिः सभा तस्याः । एकैकास्रिर्जेया, सहस्रमष्टाधिकां वेलाम् ॥ ४ ॥ इत्येवं सर्वसभां, जित्वा राज्यं
पितुर्गृहीतव्यं । एकामपि चेद्वेलां, हारयति पुनर्नयेन्मूलात् ॥ ५ ॥ अपि सम्भवेदिदं खलु, विधिनाऽनेनापि कश्चिदिह राज्यं । शुद्धी-
यात्रहि जीवो, लभते मानुष्यमिह भूयः ॥ ६ ॥ ५—रत्नान्याढ्यसुतैर्वितीर्य वणिजां देशान्तरं जग्मुषां, पश्चात्तापवशेन तानि पुनरादातुं
कृतोपक्रमैः । लभ्यन्ते निखिलानि दुर्घटमिदं दैवाद्घटेत्तत् क्वचिद्, भ्रष्टो मर्त्यभवात् तथाप्यसुकृती भूयस्तमाप्नोति न ॥७॥ अथवा—
महार्णवजलान्तर-स्फुटितयानपात्रच्युतो; गतोऽम्बुनि पुनश्चिरा-दपि मणिव्रजो लभ्यते । भवेदपि न चाङ्गिनां, भवसमुद्रमध्येऽभितो;
मुहुर्विपरिवर्त्तिनां, भवति मानुषत्वं किल ॥८॥ ६—स्वप्ने कार्पटिकेन रात्रिविगमे पूर्णेन्दुबिम्बं मुखे, व्यालोक्य प्रविशत् कुनिर्णयवशा-
दल्पं फलं प्राप्य च । स्वप्नस्तेन पुनः स तत्र शयनादालोक्यते क्वापि चेद्, भ्रष्टो मर्त्यभवात् तथाऽप्यसुकृती भूयस्तमाप्नोति न ॥९॥
७-सव्यापसव्यं भ्रमतोऽतिवेगा—च्चक्राष्टकस्योर्ध्वविचालमाप्य । अप्यस्य विद्धिध्यति कोऽपि राधां, न मानुषत्वं पुनरेति जन्तुः ॥ १० ॥
८—चन्द्रं शैवलवल्लरीभिरभितश्छन्नेऽतिनिम्ने ह्रदे, कूर्मः कोऽपि हि कार्त्तिकीनिशि महाछिद्रेण दृष्ट्वा गतः । पातालात्स सबन्धुरेत्य
सुचिरात् द्रष्टुं तदा न क्वचि-च्चन्द्रच्छिद्रमथो तथैव भविनां भूयो न मानुष्यकम् ॥११॥ ९—शम्या पूर्वपयोनिधौ निपतिता भ्रष्टं युगं
पश्चिमा-म्भोधौ दुर्धरवीचिभिश्च सुचिरं संयोजितं तद्द्वयं । सा शम्या प्रविशेद्युगस्य विवरे तस्य स्वयं क्वापि चेद्, भ्रष्टो मर्त्यभवात्
तथाऽप्यसुकृती भूयस्तमाप्नोति न ॥ १२ ॥ १०—स्तम्भं रत्नमयं महान्तममरः सञ्चूर्ण्य सूक्ष्माणुशः, कश्चिन्मेरुशिरःस्थितो नलिकया

फूत्कृत्य दिक्षु क्षिपेत् । अप्येषा परमाणुसंहतिरिहानन्तैः परावर्त्तितै–स्तां स्तम्भाकृतिमेति नैव भविनां भूयोऽपि मानुष्यकम् ॥ १२ ॥

इति दशापि दृष्टान्ता मनुष्यभवदुर्लभत्वे दर्शिताः, तत्रापि प्राप्ते मनुजजन्मनि रोरस्य–अतिनिष्पुण्यकप्राणिनो रत्नादीनां निधिरिव दुर्लभो–दुरवापो भवति जिनधर्मो दानशीलतपोभावरूप इति । ननु निर्हेतुकस्य कार्यस्यासम्भवान्मनुजत्वजिनधर्मदुर्लभत्वे को हेतुरिति चेत् ?, उच्यते–"आदौ सूक्ष्मनिगोदे, जीवस्यानन्तपुद्गलावर्त्तान् । तस्मात्कालमनन्तं, व्यवहारवनस्पतौ वासः ॥१॥ उत्सर्पिणीरसङ्ख्याः, प्रत्येकं भू–जला–ग्नि–पवनेषु । विकलेषु च सङ्ख्येयं, कालं भूयो भ्रमणमेवम् ॥२॥ तिर्यक्पञ्चेन्द्रियता, कथमपि मानुष्यकं ततोऽपीह । क्षेत्रकुलारोग्यायु–र्बुद्ध्यादि यथोत्तरं दुरवापम् ॥३॥" इति । आह च भाष्यकारः–"दसहिं उदाहरणेहिं, दुलहं मणुयत्तणं जहा भणियं । तह आइकुलाईणि वि, दसदिट्ठंतेहिं दुलहाइं ॥१॥ एत्थं पुव्वं पुव्वं, लद्धंपि तदुत्तरं पुणो दुलहं । जम्माणुसाईणं, अइदुलहो तेण जिणधम्मो ॥ २ ॥" अतो दुर्लभावेव मानवभवजिनधर्माविति गाथार्थः ॥३॥ अथ दुर्लभमनुजत्वजिनधर्मयोः प्राप्तयोर्यत्कर्त्तव्यं तदाह—

**तं चेव दिव्वपरिणइ–वसेण कह कहवि पाविउं पवरं । जइयव्वं एत्थ सया, सिवसुहसंपत्तिमूलम्मि ॥४॥**

व्याख्या–तं चेति, तत्पुनरनन्तरोक्तं सजिनधर्मं मनुजजन्म । एव शब्दोऽयं द्वितीयार्थे "एत्थ"त्ति पदे योज्यते । "दिव्व"त्ति दैवं, प्रस्तावान्मनुजत्वजिनधर्मप्राप्त्यनुकूलं कर्म, तस्य परिणति–र्विपाकः, तद्वशत्वेन–आयत्ततया, कथं कथमपि–महता कष्टेन प्राप्य–लब्ध्वा प्रवरं–प्रधानं यतितव्यं–यत्नः कर्त्तव्यः । क्व ? इत्याह—"एत्थ"त्ति एतस्मिन्नेव जिनधर्मे सदा–सर्वकाले । जिनधर्म एव कुतो यतितव्यं ? इत्याह–शिवसुखसम्पत्तिमूलत्वात्–मोक्षसुखप्राप्तिकारणत्वात् , नान्यत्रेति गाथार्थः॥४॥ अथ च जिनधर्मोऽपि दानधर्मप्रधानस्तत्रापि "दाणाणमभयदाणं" इति [अत्रैव चतुष्पञ्चाशदधिकशततमगाथायामुक्तत्वात्] प्रथमतोऽभयदानोपदेशमाह—

सो य अहिंसामूलो, धम्मो जियरागदोसमोहेहिं । भणिओ जिणेहिं तम्हा, सविसेसं तीएँ जइयव्वं ॥५॥

व्याख्या—स चानन्तरं कर्त्तव्यतयोपदिष्टः श्रीजिनधर्मः अहिंसामूलो—जीवदयामूलो जितरागद्वेषमोहै-र्भग्नरागद्वेषाज्ञानैर्जिनै-स्तीर्थकृद्भिर्भणितः, यथा "धन्नाणं रक्खणट्ठा, कीरंति वईओ जह तहेवेत्थ । पढमवयरक्खणट्ठा, कीरंति वयाइं सेसाइं ॥ १ ॥" ततश्च किं कर्तव्यं? इत्याह—तस्मात्सविशेषं तस्यामेवाहिंसायां यतितव्यमिति गाथार्थः॥५॥ अथाहिंसातोऽन्यधर्मस्य गरीयस्त्वाशङ्कां निरस्यन्नाह—

किं सुरगिरिणो गरुयं, जलनिहिणो किं व होज्ज गंभीरं । किं गयणाओ विसालं, को वा अहिंसासमो धम्मो॥६॥

व्याख्या—इहायं किं शब्दोऽपलापे, ततोऽयमर्थः—किं सुरगिरेर्मेरोः सकाशाद् गुरुकं—बृहत्तरं वस्त्वस्ति ?, किं वा समुद्रादपि गम्भीरं ?, किं गगनाद्विशालं—विपुलं ?, को वा अहिंसया समो धर्मः समस्ति ?, नास्तीत्यर्थः, अयम्भावः—अहिंसासमोऽप्यपरो धर्मो नास्ति, किं पुनर्गुरुरिति, तथा चाहुस्तीर्थान्तरीयाः—"हेमधेनुधरादीनां, दातारः सुलभा भुवि । दुर्लभः पुरुषो लोके, यः प्राणि-ष्वभयप्रदः ॥१॥ महतामपि दानानां, कालेन क्षीयते फलं । भीताभयप्रदानस्य, क्षय एव न विद्यते ॥२॥ दत्तमिष्टं तपस्तप्तं, तीर्थसेवा तथा श्रुतं । सर्वाण्यभयदानस्य, कलां नार्घन्ति षोडशीम् ॥ ३ ॥ एकतः क्रतवः सर्वे, समग्रवरदक्षिणाः । एकतो भयभीतस्य, प्राणिनः प्राणरक्षणम् ॥ ४ ॥ सर्वे वेदा न तत्कुर्युः, सर्वे यज्ञा यथोदिताः । सर्वे तीर्थाभिषेकाश्च, यत्कुर्यात्प्राणिनां दया ॥ ५ ॥ ददातु दानं विदधातु मौनं, वेदादिकं चापि विदाङ्करोतु । देवादिकं ध्यायतु सन्ततं वा, न चेद्दया निष्फलमेव सर्वम् ॥ ६ ॥ सकमलवनमग्नेर्वासरं भास्वदस्ता—दमृतमुरगवक्त्रात्साधुवादं विवादात् । रुगपगममजीर्णाज्जीवितं कालकूटा—दभिलषति वधाद्यः प्राणिनां धर्ममिच्छेत् ॥ ७ ॥"

इति । तथा "किं तीए पढियाए, पयकोडीए पलालभूयाए । जइ इत्तियं न नायं, परस्स पीडा न कायव्वा ॥ ८ ॥ दीर्घमायुः परं रूप-मारोग्यं श्लाघनीयता । अथाहिंसायाः फलं सर्वं, किमन्यत्कामदैव सा ॥१॥" तस्मात्कीतिदानाभ्यधिकोऽस्ति धर्म इति गाथार्थः।

अथाहिंसायाः सर्वधर्माभ्यधिकत्वमेव हेतुगर्भैर्विशेषणैर्द्रढयति—

**कल्लाणकोडिजणणी, दुरंतदुरियारिवग्गनिट्ठवणी । संसारजलहितरणी, एक्कच्चिय होइ जीवदया ॥ ७ ॥**

व्याख्या—कल्याणानि—मङ्गलानि, तेषां कोटयस्तासां जननीव जननी, उत्पत्तिहेतुत्वात् । तथा दुरन्तानि—चिरभोग्यानि दुरितानि—पापानि तत्कार्याणि वा नानादुःखानि, तान्येवैकान्ताहितत्वेनारयः—शत्रवस्तेषां वर्गः—समुदायस्तस्य निष्ठापनी—पर्यन्तकर्त्री । तथा संसार एव जलधिः—समुद्रः, स तीर्यतेऽनयेति तरणी—नौः, इत्थम्भूता एकैव भवति जीवदया, नान्यत्, तस्मात्सैव सर्वधर्माभ्यधिकेति गाथार्थः ॥ ७ ॥ कल्याणकोटिजनकत्वमेव प्रकटयन्नाह—

**विउलं रज्जं रोगेहिं, वज्जियं रूवमाउयं दीहं । अन्नंपि तं न सोक्खं, जं जीवदयाइ न हु सज्झं ॥ ८ ॥**

व्याख्या—विपुलं—विस्तीर्णं, राज्यं चक्रवर्त्यादिसम्बन्धि, तथा रोगैः कुष्टादिभिर्वर्जितं—रहितं, रूपं—लक्षणोपपन्नसर्वशरीरावयवात्मकं, तथा दीर्घं—चिरकालसम्भावि त्रयस्त्रिंशत्सागरोपमादिकमायुः । किं सर्वं जीवदयायाः साध्यमिदमेव ? इत्याह अन्यदपि—सुखयतीति सुखं, सुखमेव सौख्यं—इन्द्रपदादि मोक्षादि वा, तन्नास्ति यज्जीवदयाया नैव साध्यमिति गाथार्थः ॥ ८ ॥

ननु जीवदयातः किं कस्यचिद्राज्यप्राप्तिर्मोक्षप्राप्तिश्च जाता ?, येन सर्वमिदं तत्साध्यमुच्यते ? इत्याह—

**देविंदचक्कवट्टि—त्तणाइ भुत्तूण सिवसुहमणंतं । पत्ता अणंतसत्ता, अभयं दाऊण जीवाणं ॥ ९ ॥**

व्याख्या—देवेन्द्रचक्रवर्तित्वानि भुक्त्वा अनन्तं शिवसुखं—मोक्षसुखं प्राप्ता अनन्ताः सत्त्वाः-प्राणिनः। किं कृत्वेत्याह—अभयं समस्तप्राणरक्षणरूपं दत्वा जीवानां—प्राणिनामिति। इदमत्र तात्पर्यं—कर्ममलप्रक्षालनजललीलावलंबिनीं समस्तजन्त्वभयदानरूपां परिपाल्य प्रव्रज्यां तदनुभावादनुभूय देवेन्द्रत्वं, ततः सम्प्राप्य चक्रवर्तित्वं पुनः पर्यन्ते प्रतिपद्योक्तरूपां प्रव्रज्यां विमलकेवलालोकमासाद्य सिद्धा अनेनापि क्रमेणानन्ताः प्राप्यन्ते, ये पुनरमात्यादिसामान्यविभूतीरनुभूय ततः सिद्धास्ते प्रभूता एवेति गाथार्थः ॥ ९ ॥

यद्येवं ततः किं कर्तव्यमित्याह—

**तो अत्तणो हिएसी, अभयं जीवाण देज निच्चंपि। जह वज्जाउहजम्मे, दिण्णं सिरिसंतिनाहेण ॥ १० ॥**

व्याख्या—ततः—पूर्वोक्तात्कल्याणकोटिजनकत्वाद्धेतोः, आत्मनः—स्वस्य हितैषी—हितेच्छुः सन्नभयं जीवानां नित्यमेव दद्याः, मरणभीरून् जन्तून् सदैव रक्षेस्त्वमिति शिष्योपदेशः, अथ उपदेशोऽपि सदृष्टान्त एवोक्तः कर्त्तव्यतया सम्यक्परिणमतीत्यतस्तमाह—यथे-त्युदाहरणे, यथाऽष्टमे वज्रायुधजन्मनि श्रीशान्तिनाथेन—षोडशतीर्थकरेणाभयं दत्तं तथा त्वयाऽपि देयमित्यक्षरार्थः। भावार्थस्तु कथा-नकगम्यस्तच्च विस्तरतः श्रीशान्तिचरित्रादेः सुगममिति नेह प्रपञ्च्यते, केवलं स्थानाशून्यार्थं किञ्चिदुच्यते, यथा—

जम्बूद्वीपाभिधानेऽस्मिन्, द्वीपेऽस्ति प्राग्विदेहगः। सीताया दक्षिणे भागे, विजयो मङ्गलावती ॥ १ ॥ तत्रास्ति नगरी रत्न-सञ्चया रत्नसञ्चया। तत्र क्षेमङ्करो राजा, योगक्षेमङ्करः सताम् ॥ २ ॥ रत्नमाला प्रिया तस्य, रत्नमालेव निर्मला। सद्गुणा हृदयान्नैव, जह्नुर्यां केऽपि सज्जनाः ॥ ३ ॥ अन्यदा देवदेवीषु—पयाचितशतैस्तयोः। नाम्ना वज्रायुधः पुत्रः, पूर्वपुण्योदयादभूत् ॥ ४ ॥ स्पर्द्धयेव

गुणैस्सार्द्धं, वर्द्धमानः सुधोज्ज्वलैः । कामक्रीडावनक्रोडं×, क्रमाद्यौवनमाप सः ॥ ५ ॥ ऊढवान् प्रौढराजादि-दत्ता विस्तरतस्तदा । सौभाग्यभाग्यभूमीभि-रप्सरोभिः समाः कनीः ॥ ६ ॥ सप्रियः सोऽन्यदोद्याने, करोति जलखेलनं । ग्रीष्मर्त्तौ शक्रवच्चन्दी-[ श्वरे ]-सरे सरसि तावता ॥ ७ ॥ विद्युद्दंष्ट्राभिधः प्रेक्ष्य, कुमारं तं तथाविधं । क्रुद्धो युद्धाय चाह्वास्त, खेचरः प्राग्भवासुहृत् ॥८॥ रे रे दुष्ट ! स्मर स्वेष्ट-देवतां पूर्वसेवितां । हा॰ऽम्भे हा॰ऽम्भ यमसाध-बलेर्योग्यस्त्वमेव (मे) हि ॥ ९ ॥ मा भणिष्यसि नाख्यात-मिति सज्जीभवेद्धवान् । कुमारः प्राह किं कुन्थु-काथे* काऽप्यस्ति सज्जता ? ॥१०॥ ततश्च खेचरः क्रूर-रूपैर्भापयति स्म तं । क्षुभ्यति स्म कुमारो न, निर्मलहृद्वन्मनाक् ॥ ११ ॥ विद्युद्दंष्ट्रस्ततो रुष्टो, गरिष्ठमक्षुचद्गिरिं । कुमारोऽचूरयद्वज्र-प्रष्ठाभिर्मुष्टिभिश्च तम् ॥ १२ ॥ खेचरः पुनरप्युच्चैः, कोपाद्वज्रायुधाभिधं । बबन्ध पाशैर्नागाद्यै-श्चन्दनद्रुमिव द्रुतम् ॥१३॥ कुमारेण पुनः स्वाङ्गो-द्वसनादेव ÷सर्वतः । बन्धनं खण्डशश्चक्रे, दण्डघाताद्यथा घटः ॥ १४ ॥ कुमारस्य बलं वीक्ष्य, विलक्षः खचरस्ततः । जीवग्राहं स दुर्ग्राह्यो, भयभीतः पलायितः ॥ १५ ॥ अत्रान्तरेऽद्भुतं दृष्ट्वा, कुमारचरितं तदा । ज्ञानाल्लोकं लोकमान-स्तत्रागादच्युताधिपः ॥१६॥ भविष्यत्तीर्थनाथोऽय-मिति मत्वैकभक्तिभाक् । वज्रायुधं नमस्कृत्य, स्तुत्वा चेन्द्रो दिवं ययौ ॥ १७ ॥ कुमारोऽपि सहर्षः सन्, निजं धाम जगाम च । रथयात्राजिनार्चादि-धर्मकर्मसु तत्परः ॥ १८ ॥ दत्ते दानं सुपात्रेभ्यो, वन्दनार्हेषु वन्दनं । अभयं सर्वसत्त्वेभ्यः, सविशेषमहर्निशम् ॥१९॥ अन्यदाऽसौ सभामध्ये, सौधर्मेन्द्रेण वर्णितः । यथा वज्रायुधो धर्मा-द्देवैरपि न चाल्यते ॥२०॥ इत्येतच्च वचः कश्चि-दसहिष्णुः सुरस्तदा । पौषधागारसंस्थस्य, कुमारस्यान्तिकं ययौ ॥ २१ ॥ परीक्षाक्षिप्तचेतस्कः, स पारापतरूपभाक् । मनुष्यभाषया दक्षो, रक्ष रक्षेति

× क्रोडः-सूकरस्तस्य । * मारणे । ÷ शरीरस्य बलकरणादेव, न तु शस्त्रादिना ।

गाङ्गगौ ॥ २२ ॥ पादमूले निलीनश्च, तिष्ठेद्यावदसौ ततः । विस्मितेन कुमारेण, तस्याङ्गीकरणं कृतम् ॥ २३ ॥ तीक्ष्णचञ्चुर्महाश्येनः, समागात्तत्र तावता । कुमारं प्रति चाचख्यौ, पक्षी [श्येनो] मानुषभाषया ॥२४॥ महाभाग ! मया ह्येष, क्षुत्क्षामेण घनैर्दिनैः । प्राप्तः पारापतो भैक्ष्यं, दे(ह्येनं)स्त्वहं न क्षणं क्षमे ॥ २५ ॥ कुमारः प्राह किं हंहो !, भक्ष्यमन्यच्च भक्ष्यते ? । पूपखण्डोदनादि त्वां, क्षुधा चेद्बाधतेतमाम् ॥ २६ ॥ उवाच शकुनिर्नान्यत्, तृप्त्यै मांसाशिनो मम । स्वव्यापादितमांसान्य–द्रोचते च न कर्हिचित् ॥ २७ ॥ कुमारः प्राह न प्राणि–प्राणापहरणं शुभं । दारुणानन्तदुःखानां, जनकत्वाद् भवे भवे ॥ २८ ॥ अतो रक्षैव सर्वेषां, सत्त्वानामुचिता शुभा । स्वर्गापवर्गसंसर्गि–सुखवर्गविधायिनी ॥ २९ ॥ एतज्जानाम्यहमपि, भवदुक्तं परं शृणु । क्षुधिताः किं न कुर्वन्ति ?, पापानि पुरुषोत्तम ! ॥३०॥ अथ कारुण्यतः पारा–पतं चेद्रक्षसि स्वयं । तन्मां हंसीति विज्ञाय, यद्युक्तं तद्विधेहि भोः ! ॥ ३१ ॥ कुमारः प्राह चेदेवं ?, तर्हि दत्वा स्वजाङ्गलं । त्वां तर्पयामि चैतेन, तोलयित्वा गृहाण तत् ॥३२॥ ओमिति प्रतिपन्नेऽस्मि–स्तुलायां रोपितं पलं । एकतः परतः पारा–पतो नैव तु तोलयेत् ॥ ३३ ॥ वर्द्धते सुतरां पारा–पतो भारेण यावता । अनन्यगतिको धीरः, स्वमप्यारोपयत्तुलाम् ॥ ३४ ॥ एतच्चानन्यसामान्यं, कौमारं प्रेक्ष्य साहसं । विस्मितः त्रिदशः साक्षाद्–भूत्वा नत्वेत्युवाच च ॥ ३५ ॥ तस्मै तुभ्यं नमो यस्य, गुणान् वर्णयति स्वयं । शक्रोऽपि स्वसभामध्ये, प्रोक्तवान् वृत्तमप्यदः ॥ ३६ ॥ कुमारगुणपूर्णायां, वसुधायाममानिव । जगाम त्रिदिवं देवो, शुक्लके वज्रायुधः सुखम् ॥ ३७ ॥ अन्यदा नृपतिः क्षेम–ङ्करो राज्ये निवेश्य तं । दीक्षां कक्षीचकारोच्चै–र्देशस्तीर्थकरान्तिके ॥ ३८ ॥ स जातो गणभृद्भूरि–गुणाधारः पटादिवत् । राज्ञो वज्रायुधस्यापि, पुत्रः पौत्रोऽप्यजायत ॥ ३९ ॥ राज्ये न्यस्य ततः पौत्रं, प्रवव्राज सपुत्रयुक् । वज्रायुधः पितुः क्षेम–ङ्कराचार्यस्य सन्निधौ ॥ ४० ॥ ततस्तीव्रं तपस्तप्त्वा, कृत्वाऽन्त्याराधनां वरां । ग्रैवेयके समुत्पन्नो,

नवमे शुभभावतः ॥ ४१ ॥ ततोऽपि जम्बूद्वीपेऽस्मिन्, प्राग्विदेहेषु विश्रुता। विजये मङ्गलावत्यां, नगरी पुण्डरीकिणी ॥ ४२ ॥ राजा घनरथस्तीर्थ-ङ्करः पद्मावती प्रिया। पुत्रस्तयोर्मेघरथो, राजा न्यायवनाम्बुदः ॥ ४३ ॥ प्राज्यं राज्यं परित्यज्या-न्यदाऽसौ जीर्णपर्णवत्। दीक्षामुपाददे स्वस्य, पितुस्तीर्थकृतः क(रात्)रे ॥ ४४ ॥ अत्युत्कृष्टं तपः कृत्वा, तीर्थकृच्चक्रभृच्छ्रियं। अर्जयित्वा शुभ-ध्यानात्, सर्वार्थे त्रिदशोऽजनि ॥४५॥ ततोऽत्र जम्बूद्वीपेऽस्मिन्, हस्तिनापुरभूभुजः। विश्वसेनस्य जायायाः, अचिरायाः सुनन्दनः ॥ ४६ ॥ पञ्चमश्चक्रिणां तीर्थ-कराणां षोडशश्च सः। जातः श्रीशान्तिनाथोऽयं, सिद्धिश्रीसङ्गरङ्गभृक् ॥ ४७ ॥

**॥ इति श्रीशान्तिनाथचरित्रं समाप्तम् ॥**

तदेवं यथा भगवता शान्तिनाथेनाष्टमे वज्रायुधभवे पारापतस्याभयदानमदायि तथाऽन्येनापि तत्सर्वजीवेभ्यो दातव्यमिति गाथार्थः ॥ १० ॥ य एव चाऽभयप्रदाननिरतो धर्मस्थितोऽपि स एवोच्यते, न शेष इति दर्शयन्नाह—

**जह मम न पियं दुक्खं, जाणिय एमेव सयलजीवाणं। न हणइ न हणावेइ य, धम्मम्मि ठिओ स विण्णेओ॥**

व्याख्या—यथा मम न प्रियं दुःखं, एवमेव अप्रियं सकलजीवानामपीति ज्ञात्वा "यत्तदोर्नित्याभिसम्बन्धा"द्यो न हन्ति तथा न घातयति परैः। कान्?, "जीवाणं" इति षष्ठ्यन्तमपि "अर्थवशाद्विभक्तिपरिणाम" इति जीवान्, 'च' शब्दाद् घ्नन्तश्च परानानुजानीते, धर्मे स्थितः स एव विज्ञेयो, नान्य इति गाथार्थः ॥ ११ ॥

तदेवमभयदाननिरतानां विस्तरतो गुणान् दर्शयित्वा सम्प्रति विपर्ययवतां दोषान् दिदर्शयिषुराह—

जे उण छज्जीववहं, कुणंति असंजया निरणुकंपा । ते दुहलक्खाभिहया, भमंति संसारकंतारे ॥ १२ ॥

व्याख्या—ये पुनः षड्जीववधं–षड्जीवकायघातं कुर्वन्ति । किंविधाः सन्तः ? इत्याह–असंयताः–अनिगृहीतमनोवाक्कायाः, तथा निरनुकम्पा–जन्तुरक्षापरिणामवर्जिताः, ते मानसिकादि–कुष्ठज्वरदाहादि–अनिष्टसंयोगेष्टविप्रयोगादिदुःखलक्षाभिहताः संसारकान्तारे भ्रमन्तीति गाथार्थः ॥ १२ ॥ अमुमेवार्थं सोदाहरणं दिदर्शयिषुराह—

वहबंधमारणरया, जियाण दुक्खं बहुं उईरंता । होंति मियावइतणउव्व, भायणं सयलदुक्खाणं ॥ १३ ॥

व्याख्या—वधो–जन्तुताडनादिपीडारूपः, बन्धो–रज्ज्वादिभिर्जन्तोः संयमनं, मारणं–जन्तूनां प्राणवियोजनारूपं, तेषु निरताः–सदोद्युक्ताः, तथा जीवानां पैशून्याभ्याख्यानादिभिर्मानसं दुःखं बहूदीरयन्तो–घनं जनयन्तो, 'जीवा' इति विशेष्याध्याहारः, भवन्ति । कथम्भूता? इत्याह–भाजनं–पात्रं, केषां ? इत्याह–नारकतिर्यगादिभवभाविनां शारीरमानसानां सकलदुःखानां । क इव ?, "मियावइ-तणउव्व" त्ति । 'वइ'त्ति पूरणे श्रुतिसुखार्थं, ततश्च मृगासूनुरिवेत्यक्षरार्थः । भावार्थस्तु कथानकगम्यस्तच्चेदम्—

जम्बूद्वीपभरते मृगाग्रामे श्रीवीरः समवासार्षीत् , राजाद्यागमनं, धर्मं श्रुत्वा स्वस्थानगमनं । तत्र चैकं [नरं]जात्यन्धबधिरं जराजीर्ण-मनाथं कम्पमानकरचरणशीर्षं क्षुत्क्षामं पुरतो दण्डेनाकृष्यमाणं दृष्ट्वा श्रीगौतमो वीरं पप्रच्छ–किं भगवन्नेतादृशोऽप्यन्योऽप्यस्ति दुःखी ?, भगवानाह–"गोअमा ! इहेव मियागामे णयरे विजयस्स रण्णो मियाए देवीए मियाउत्ते दारए जाइअंधे जाइमूए जाइपंगुले हुंडे, नत्थि णं तस्स हत्था वा पाया वा कन्ना वा अच्छी वा नासा वा । केवलं से तेसिं अंगोवंगाणं आगइमित्ते आवि वट्टइ, तेणं से लोढागइमित्ते अईव दुक्खिए अच्छइ"। ततो भगवद्वचनगाढप्रत्ययोऽपि साक्षाद्वलोकनोत्पन्नकौतुको भगवदनुज्ञया मृगादेवीसदनमासाद्य तत्कृतोचि-

तद्विनयप्रतिपत्त्यनन्तरं श्रीगौतमस्तामाह—'हे देवानुप्रिये ! अहं त्वत्पुत्रं द्रष्टुमागतः' इति। ततः सा मृगादेवी मृगापुत्रानुजन्मनः सर्वालङ्कारालङ्कृतान् श्रीगौतमचरणरेणुतिलकितान् कृत्वा आह—'भगवन्नेते ते मत्पुत्राः पश्यते'ति । ततः श्रीगौतमस्तामेवमवादीत्—'नाहमेतांस्ते तनयान् द्रष्टुमायातः, किन्तु ज्येष्ठं वीरनिर्दिष्टं राहसिकं तादृशं मृगापुत्राख्यं' इति । तावता जाता तद्भक्तवेला । ततः सा मृगादेवी परावर्तितवेषाऽशनादिभृतकाष्ठशकटीमनुकर्षन्ती श्रीगौतममाहूय भूमिगृहद्वारे स्वयं चतुष्पटपटेन भगवता च मुखपोतिकया सघ्राणं मुखं बन्धयित्वा पराङ्मुखी तद्द्वारमुद्घाटयामास, तत्समकमेव च करितुरगगवादिमृतकेभ्योऽप्यनिष्टतरो गन्धो नशापुटं पाटयन्प्रासार्षीत् । ततः स मृगापुत्रोऽशनपानखादिमस्वादिमगन्धेनाभिभूतो मूर्च्छितो गृद्धस्तदास्येनाहरत्क्षिप्रमेव च पूतिशोणिततया परिणमय्य षोडशनाडीभिः परिस्रवति, तदपि च पूतिशोणितमाहारयति । ततोऽहो !! खल्वयं नैरयिकप्रतिकृतिरिति चिन्तयन्मृगामापृच्छय श्रीवीरान्तिकमागत्य त्रिःप्रदक्षिणीकृत्य नमस्कृत्य सर्वं पूर्वोक्तं निवेद्य नानालोकोपकाराय भगवन्तं मृगापुत्रपूर्वभवं पप्रच्छ श्रीगौतमः, भगवानाह—"गोयमा ! इहेव जंबूदीवे दीवे भारहे वासे सयदुवारपुरे धणवई राया, तया तस्स विजयवद्धमाणपामुक्खपंचसयगामाहिवई अहम्मिए अभिमहे अहम्मनन्नू अहम्मऽक्खाई बहूणं जीवाणं वहबन्धमारण(रए)परे रट्ठऊडे नामं खसिए होत्था, से य ताणि गमाणि बहूहिं करेहिं भरेहि य निद्धणे करेमाणे उचालेमाणे विहरइ । अन्नं च सव्वेसिं सव्वत्थ ववहारेसु सुणमाणे भणइ—न सुणेमि, असुणमाणे वि भणइ—सुणेमि । एवं पस्समाणे भासमाणे गिह्णमाणे जाणमाणे वि विवरीए भणियव्वे । तए णं से रट्ठऊडे एयसमायारेसुं बहुं पावं समज्जिणमाणे विहरइ । अन्नया तस्स सरीरगंसि समगं चेव सोलस रोगायंका पाउब्भूया, तं जहा—"[1]सासे [2]कासे [3]जरे [4]दाहे, [5]कुच्छिसूले [6]भगंदरे। [7]अरिसा[8]अजीरए [9]दिट्ठी—[10]मुद्धसूले [11]अकारए ॥१॥ अच्छि[12]वेयणा कण्ण—[13]वेयणा [14]कंडू [15]उदरे

११कोढे ।" से य बहूहिं विज्जाईहिं रोगोवसमोवाएहिं विगिंछिए, न य इक्केण वि रोगायंकेण मुक्के। तए णं से तेहिं रोगायंकेहिं अभिभूए समाणे अट्टवसट्टोवगए अड्ढाइज्जाइं वाससयाइं परमाउयं पालइत्ता कालगए रयणप्पभाए उक्कोसट्ठिइएसु नेरइएसु उववण्णे । तओ य उव्वट्टित्ता मियादेवीए गब्भंसि पुत्तत्ताए उववण्णे । तओ देवीए तिव्वा वेयणा दोहग्गं रण्णो अणिट्ठत्तणं च जायं, तओ तीए अणेगहा साडिज्जमाणे वि गब्भे न सडेइ । अण्णं च तस्स गब्भगयस्सेव अट्ठ नाडीओ गब्भंतरप्पवहाओ अट्ठ बाहिरंतरप्पवहाओ अट्ठ पूइसोणियप्पवहाओ । दुवे दुवे कण्णंतरे अच्छिअंतरे नहंतरे नासंतरे अभिक्खणं अभिक्खणं पूयं च सोणियं च परिस्सवेमाणी परिस्सवेमाणी चिट्ठंति । अण्णं च तस्स गब्भगयस्सेव अग्गिवए नामं वाए पाउब्भूए, जण्णं से दारए आहारेइ तण्णं खिप्पामेव विद्धंसइ, पूयत्ताए सोणियत्ताए परिणमइ । तं पि य णं पूयं च सोणियं च परिस्सवमाणं आहारेइ । तएणं सा मियादेवी पुव्वुत्तरूवं दारगं पसूया भीयासमाणी तं दारगं उज्झाविंती पढमावच्चणओ राइणा निसिद्धा तं दारगं तहा पडिजागरमाणी विहरइत्ति। से णं भंते! दारए कालं किच्चा कहिं गच्छिही ?, गोयमा ! इहं छव्वीसं वासाइं परमाउं पालइत्ता वेयड्ढे सीहो भविस्सइ, तओ उक्कोसट्ठिइए रयणप्पभाए नेरईए, तओ सरिसवेसु उववज्जित्ता सक्करप्पभाए, तओ पक्खी, तओ तईयाए, तओ सीहे, तओ चउत्थीए, तओ उरगे, तओ पंचमाए, तओ इत्थी, तओ छट्ठीए, तओ पुरिसे होऊण सत्तमाए पुढवीए उववज्जिही । तओ उव्वट्टित्ता जलयरअद्धतेरसकुलकोडिलक्खेसु एगमेगंसि जोणिविहाणंसि अणेयसयसहस्सखुत्तो उद्दाइत्ता उद्दाइत्ता तत्थेव भुज्जो भुज्जो पच्चाइस्सइ । तओ उव्वट्टित्ता एवं चउप्पएसु उरपरिसप्पेसु भुयपरिसप्पेसु खहयरेसु चउरिंदिएसु तेइंदिएसु बेइंदिएसु कडुयरुक्खेसु वाउ–तेउ–आउ–पुढविकाइएसु अणेयसयसहस्सखुत्तो उववज्जिही । अविय–"इय हिंडिऊण संसार–सायरं सुप्पइट्ठियपुरम्मि । होही दिट्ठो वसहो, दुप्पेच्छो इयरवसभाणं ॥१॥"

तत्थय सिंगेहिं गंगाकूलं उक्खणंतो पडियभि[त्ति]डेण संचुण्णिओ मरिउं तत्थेव पुरे सिट्ठिसुओ, पव्वज्जं पडिवज्जिय सोहम्मे सुरो होऊण विदेहे सुकुले माणुसत्तं लहिउं पव्वज्जं पडिवज्जिय धुअकम्मरओ केवली सिद्धिं गमिस्सइ ।

"इय सोऊणं सिरिगोय-माइणो जंति परमसंवेगं । पिच्छइ परसंतावो, कित्तियमित्तं जणइ दुक्खं ॥ १ ॥"

तम्हा परो न तप्पिअइ । इति मृगापुत्रकथा समाप्ता ॥

तदेवं जन्तूनां वधादिविधानान्मृगापुत्र इव सर्वदुःखभाजनं जीवा भवन्तीति गाथार्थः ॥ १३ ॥

अथेदमहिंसाद्वारमुपसंहर्तुकामोऽत्रैव रहस्योपदेशमाह—

**नाऊण दुहमणंतं, जिणोवएसाउ जीववहयाणं । होज्ज अहिंसानिरओ, जइ निव्वेओ भवदुहेसु ॥ १ ॥**

अस्या अक्षरगमनिका—एवमुक्तविधिना जिनोपदेशाज्जीववधकानामनन्तं दुःखं ज्ञात्वा त्वमहिंसानिरतो भवेः, यदि निर्वेद—उद्विग्नताऽस्ति भवदुःखेषु—संसारदुःखेषु इति गाथार्थः ॥ १४ ॥

भव्या! एवं विभाव्य, व्यसनघनशत-प्रापिकैकक्षणेन;संसाराम्भोधिहेतु-र्भवति हि विहिता,प्राणिनोऽल्पाऽपि हिंसा॥ संसारं वाऽपहाय, प्रभवति भवता-मक्षते मोक्षसौख्ये,काङ्क्षा चेत्प्राणिरक्षां, कुरुत शिवगते-र्दानदक्षां सदैव ॥१॥

इति पुष्पमालाविवरणे (आद्ये) दानाधिकारे प्रथममभयदानद्वारं समाप्तम् ॥ १ ॥

अथ ज्ञानदानद्वारं विवक्षुः सूत्रकारस्तस्य चोक्तद्वारेण सम्बन्धं रचयन्नाह—

**इच्छंतो य अहिंसं, नाणं सिक्खिज्ज सुगुरुमूलम्मि । सच्चिय कीरइ सम्मं, जं तव्विसयाइविन्नाणं ॥१५॥**

व्याख्या—इच्छन्, कर्तुमिति शेषः, चकारोऽन्यत्र योज्यते, अहिंसां च प्राणिवधनिवृत्तिरूपां, आदित एव ज्ञानं शिक्षेत् । क ? इत्याह–सुगुरुमूले–वक्ष्यमाणसंविग्नत्वादिगुणयुक्तगुरुसमीपे । इह ज्ञानमिति सामान्योक्तावपि श्रुतज्ञानमेवाधि(क्रियते)क्षिप्यते, तस्यैव गुरुपरतन्त्रत्वात्, शेषज्ञानानां तु स्वस्वावरणक्षय–क्षयोपशमाभ्यां स्वत एव जायमानत्वात् "एत्थं पुण अहिगारो [सुयनाणेणं]"इत्यादि वक्ष्यमाण [ अष्टादशमगाथा ] वचनत्वाच्च । कुतो ज्ञानमेव शिक्षणीयं ? इत्याह—"सच्चिय"त्ति । यत्–यस्मात्सैव अहिंसा सम्यक् क्रियते । क सति ? इत्याह–"तव्विसय"त्ति । तस्या–अहिंसाया विषयादे–र्विषयभेदफलादेर्विज्ञाने सति, नान्यथा, तथाहि–हिंसायास्तावद् द्विविधो विषयो, जीवाजीवभेदात्, स्थाण्वादौ स्खलनादिसम्भवेऽजीवेऽपि संक्लेशविषयतायाः सम्भवात्, "तप्पज्जायविणासो, दुक्खुप्पाओ य संकिलेसो य"इति वचनात् । अतः प्राणिवधनिवृत्तिरूपाया अहिंसाया अपि स एव द्विविधो विषयः । तथा विवक्षितमनुष्यत्वादिपर्यायविनाशस्य दुःखोत्पादस्य सङ्क्लेशस्य च निवृत्तौ सत्यां चाहिंसायास्त्रिविधो भेदः । अस्याश्च फलादिकं स्वर्गापवर्गादि । एतच्च सर्वं ज्ञानेनैवावगम्यते, अतोऽहिंसार्थिना ज्ञानमेव प्रथमं शिक्षणीयं । यदुक्तं सूत्रे–" पढमं नाणं तओ दया, [ एवं चिट्ठइ सव्वसंजए । अन्नाणी किं काही ?, किं वा नाहि य छेयपावगं ॥१॥" दश० ४–१०] इत्यादि । आह–यद्येवं तर्ह्यत्र प्रथमं ज्ञानद्वारमेव किं नोक्तं ? इत्यत्रोच्यते—महाव्रताणुव्रतरूपस्य धर्मस्याहिंसामूलत्वाज्ज्ञानस्यापि च प्रथमं शिक्षणीयत्वेऽप्यहिंसाऽर्थमेव व्याप्रियमाणत्वात्तस्या एव प्राधान्यमाकलय्यात्र प्रथमं तद्द्वारमुपन्यस्तमिति गाथार्थः ॥ १५ ॥ यदिह ज्ञानद्वारे वक्तव्यं तत्संग्राहिकां द्वारगाथामाह—

**किं नाणं? को दाया?, को गहणविही? गुणा य के तस्स?। दारकमेण इमिणा, नाणस्स परूवणं वुच्छं ॥१६॥**

व्याख्या—प्रथमं किं ज्ञानं? इति वाच्यं, ततस्तस्यैव ज्ञानस्य को दाता समुचितः? इति भणनीयं, ततस्तस्यैव को ग्रहणविधिः? इति ख्यापनीयं, ततस्तस्यैव को गुणः? इति प्ररूपणीयं, द्वाराणां क्रमेणानेनोक्तस्वरूपेण ज्ञानस्य प्ररूपणां स्वरूपनिर्णयात्मिकां वक्ष्ये इति गाथार्थः ॥ १६ ॥ तत्र प्रथमद्वारमाह—

**आभिणिबोहियनाणं, सुअनाणं चेव ओहिनाणं च। तह मणपज्जवनाणं, केवलनाणं च पंचमयं ॥ १७ ॥**

व्याख्या—अभीत्याभिमुख्ये, नि इति नैयत्ये, ततश्चा[illegible]ऽर्थग्रह[illegible] नियत इन्द्रियाण्याश्रित्य स्व-स्वग्रहणपरिणतो बोधोऽभिनिबोधः, स एवाभिनिबोधिकं, तच्च तज्ज्ञानं चाभिनिबोधिकज्ञानं, इन्द्रियपञ्चक-मनोनिमित्तो वस्त्ववबोध इत्यर्थः। श्रवणं श्रुतं—अभिलापप्लावितार्थोपलब्धिविशेषः, तच्च तज्ज्ञानं च श्रुतज्ञानं, इन्द्रियपञ्चक-मनोनिमित्त एवाभिलापारोपितो बोध एवेत्यर्थः। अवधि-मर्यादा, तेनावधिना रूपिद्रव्यग्रहणात्मकेन ज्ञानमवधिज्ञानं, इन्द्रिय-मनोनिरपेक्ष आत्मनः साक्षाद्रूपिवस्तुग्रहणात्मको बोध इति भावः। संज्ञिभिर्जीवैः काययोगेन मनोवर्गणाभ्यो गृहीतानि मनोयोगेन मनस्त्वेन परिणमितानि वस्तुचिन्ताप्रवर्त्तकानि द्रव्याणि मनांसीत्युच्यन्ते, तानि पर्येति-अवगच्छतीति मनःपर्यायमिति कर्मण्यण् [३-२-१५।०]। तच्च तज्ज्ञानं च मनःपर्यायज्ञानं, अर्द्धतृतीयद्वीपसमुद्रान्तर्वर्तिसंज्ञिजीवचिन्तितार्थप्रकटनपटुरिन्द्रिय-मनोनिरपेक्ष आत्मनः साक्षात्प्रवृत्तो बोध एवेति हृदयम्। केवलं-असाधारणं सम्पूर्णज्ञेयग्राहित्वात्सम्पूर्णं वा, तच्च तज्ज्ञानं च केवलज्ञानं रूप्यरूपिवस्तुग्राहकं पञ्चमज्ञानमिति गाथासंक्षेपार्थः। व्यासार्थस्त्वावश्यकादिभ्योऽवसेय इति। अत्र च 'च-एव-तथा, शब्दाः पादपूरणे ॥१७॥ अथैतज्ज्ञानपञ्चके येनेहाधिकारस्तदाह—

एत्थं पुण अहिगारो, सुअनाणेणं जओ सुएणं तु । सेसाणमप्पणोऽवि य, अणुओगपईवदिट्ठंतो ॥ १८ ॥

व्याख्या—अत्र पुनः प्रकृतोऽधिकारः श्रुतज्ञानेन, कुतः ? इत्याह—"जओ"त्ति, यतः श्रुतेनैव शेषाणां मत्यादिज्ञानानामात्मनोऽपि चानुयोगो—व्याख्यानं क्रियत इति शेषः । तु शब्द एवार्थे, स च व्याख्यात एव । अत्र चार्थे प्रदीपदृष्टान्तः—यथा हि प्रदीप आत्मानं शेषान् घटादींश्च प्रकाशयति, तथेदमपीति । अयम्भावः-इह ह्यहिंसापरिज्ञानार्थं ज्ञानं शिक्षणीयमित्युपदेशः प्रक्रान्तः, अहिंसायाश्च स्वरूपज्ञापने श्रुतज्ञानमेव मुखरं, न शेषज्ञानानि, तेषां मूककल्पत्वात् , ततस्तेनैव श्रुतज्ञानेनात्राधिकार इति गाथार्थः ॥१८॥

ननु यदि श्रुतज्ञानेन शिक्षितेनाहिंसापरिज्ञानं, ततः कार्यसिद्धिस्तर्हि वर्त्तमानकालभाविनां तथाविधमेधाऽभावात्सर्वस्य श्रुतस्य शिक्षितुमशक्यत्वादशक्यानुष्ठानोपदेश एवायं भविष्यतीत्याशङ्क्याह—

एक्कम्मि वि मोक्ख-पयम्मि होइ जो एत्थ निच्चमाउत्तो । तं तस्स होइ नाणं, छिंदइ सो तेण दुहजालं ॥१९॥

व्याख्या—एकस्मिन्नपि मोक्षकारणभूते अहिंसादिपदे जिनोक्ते योऽत्र लोके नित्यमायुक्तः—अङ्गाङ्गिभावेन परिणततदर्थो भवति, तदेकमपि मोक्षपदं "तस्स" इति मोक्षपदे आयुक्तस्य ज्ञानं भवति, छिनत्ति च स तेन कारणभूतेन, दुःखयति संसारिणः प्राणिन इति दुःखं, तस्य जालं, कारणे कार्योपचाराद्वाऽष्टविधं कर्मसमूहं । इदमुक्तं भवति-न वयं सम्पूर्णश्रुताध्ययनादेव स्वकार्यसिद्धिं ब्रूमः, अपि तु रौहिणेयतस्करेन्द्र-चिलातीपुत्रादीनामिव यो यावति श्रुते नित्यमायुक्तस्तस्य तदपि श्रुतं स्वकार्यसिद्धये स्यादिति गाथार्थः ॥ १९ ॥

उक्तं किं ज्ञानमिति प्रथमं द्वारं, इदानीं ज्ञानदातृद्वारं विभणिषुराह—

संविग्गो गीयत्थो, मज्झत्थो देसकालभावन्नू । नाणस्स होइ दाया, जो सुद्धपरूवओ साहू ॥ २० ॥

व्याख्या—यः संविग्न—उद्यतविहारी, स च स्वाचारावष्टम्भेनार्हद्वचनं यथावत्प्ररूपयत्यादेयवाक् च स्यादत इदं विशेषणं, यदुक्तं—

"**गुणसुट्ठियस्स वयणं, महुघयसित्तोव्व पावओ भाइ। गुणहीणस्स न सेहइ, नेहविहूणो जह पईवो ॥ १ ॥**"

संविग्नश्च गीतार्थस्य गुरोः शिक्षका(शिष्या)दिरपि स्यादित्याह–गीतार्थः–अधीतच्छेदग्रन्थादिसूत्रार्थः, अयं चोत्सर्गापवादौ वेत्तीत्ये-तद्विशेषणं। अगीतार्थो हि ज्ञानदानेऽनधिकार्येव, यतः—

"**सावज्जऽणवज्जाणं, वयणाणं जो न जाणइ विसेसं। वोत्तुं पि तस्स न खमं, किमंग पुण देसणं काउं ? ॥ १ ॥**"

गीतार्थोऽपि रागद्वेषाभिनिवेशतो गोष्ठामाहिलादिवदर्हद्वचनमन्यथाऽपि प्ररूपयेदित्याह—मध्यस्थो रागद्वेषाभिनिवेशवर्जितः। पुनः कथम्भूतः ? इत्याह–'देस"इत्यादि, देशः–पार्श्वस्थादिभावितक्षेत्ररूपः, कालः–सुभिक्षदुर्भिक्षादिः, भावः–परचित्ताभिप्रायादिलक्षणस्तान् जानातीति देशकालभावज्ञः, यथोक्तदेशाद्यभिज्ञो हि तदनुसारेणैव शुद्धोञ्छदेशनादौ यतते इतीत्थं विशेषणं। ननु गीतार्थत्वेन देशाद्य-भिज्ञता लब्धैव, किं पृथग्ग्रहणेन ? इति चेदुच्यते–गीतार्थो हि कश्चिच्छास्त्रनिर्णीतं देशादिस्वरूपं विदन्नपि कर्मक्षयोपशमवैचित्र्यात्तथा-विधदक्षता-स्मृतिपाटवाद्यभावात् व्यवहारकाले पराभिप्रायादेरनुचितभाषणादौ प्रवर्तेत, इति व्यवहारकालेऽपि तदौचित्यप्रवृत्तिवैशिष्ट्य-ख्यापनार्थं पृथगेतद्विशेषणोपादानं, अत एव षट्त्रिंशदाचार्यगुणेषु सूत्रार्थोभयज्ञतायाः सकाशाद्देशकालभावज्ञतादिगुणः पृथगुपात्त इति। पुनः कथम्भूतः ? इत्याह–शुद्धं–यथावस्थितं जिनवचनं प्ररूपयतीति शुद्धप्ररूपकः। ननु यथोक्तगुणविशिष्टः शुद्धप्ररूपक एव भवि-ष्यति, किमनेन ?, सत्यं, (किन्तु) ज्ञानदातुः कदाचिदशेषगुणाभावेऽपि तीर्थप्रवृत्तिहेतोर्यथावज्जिनवचनप्ररूपकत्वस्य गुणस्य प्राधान्या-दवश्यान्वेषणीयत्वख्यापनार्थं पृथगुपादानं, अन्यथा विपर्ययसम्भवात्। यत्तदोर्नित्याभिसम्बन्धात्स एवंविधगुणविशिष्टस्साधुर्ज्ञानस्य

दाता भवति। इह च साधुग्रहणेनाचार्यादेरपि ग्रहण, साधुत्वस्य सर्वत्रानुगमादिति गाथार्थः ॥ शुद्धप्ररूपकस्यैव महात्म्यं प्रकटयन्नाह—

**ओसन्नोऽवि विहारे, कम्मं सोहेइ सुलहबोही य । चरणकरणं विसुद्धं, उववूहंतो परूवंतो ॥ २१ ॥**

व्याख्या—विहारे–यथोक्तसंयममार्गप्रवर्त्तनरूपे अवसन्नोऽपि–शिथिलीभूतोऽपि अशुभं कर्म शोधयति–निर्जरयति, जन्मान्तरे सुलभबोधिश्च–सुखप्राप्यजिनधर्मश्च स्यात् । किं कुर्वन् ? इत्याह–चरणकरणं–महाव्रतपिण्डविशुद्ध्यादिगुणसन्दोहरूपं, विशुद्धं–अर्हद्भिर्यथा गदितं, उपबृंहयन्–प्रशंसन् , तथा प्ररूपयंश्चेति। एतेन च यथावदुपबृंहितेन आत्मनिन्दापरगुणोत्कीर्त्तनरतो 'वंदइ न य वंदावेइ''इत्यादिलक्षणयुक्तः संविग्नपाक्षिक उक्तः, अस्य च कर्मशुद्धिस्सुलभबोधित्वं चोपलक्षणं, यावदैहिकामुष्मिको जनानुरागादिको गुणग्रामोऽन्योऽपि जायते, विपर्यये तु विपर्ययसद्भावात् । तथा चात्र पिण्डनिर्युक्त्युदाहृतमुदाहरणं सङ्क्षिप्योच्यते—

महर्षिमेकमायान्तं, दृष्ट्वा काचिद् गृहे निजे । अन्नाद्याद्या(नमाद्या)य दानीयं, निर्गताऽगान्मुनिस्ततः ॥ १ ॥
नीचद्वारे गृहे तस्मि-न्न शुध्यत्येषणेत्यतः । तदा सविस्मयं श्राद्धी, किञ्चिद् ध्यायति यावता ॥ २ ॥
तावदन्यो मुनिस्तत्र, समागात्संयमालसः । अशनादि तया तस्य, तद्दत्वेति स जल्पितः ॥ ३ ॥
पूर्वागतो मुनिः किं न, जग्राहैतदुवाच सः । नीचद्वारे भवद्गेहे, भिक्षा साधोर्न कल्पते ॥ ४ ॥
अधर्मोऽहं तु तेनेमां, गृह्णामीत्युदितेति सा । स्मरेत् स्वनिन्दकोऽस्त्ययम्–गुणग्राही गुणी ततः ॥ ५ ॥
अतो दत्तं पुनस्तस्या-शनादिविपुलं तया । तावदन्योऽपि तत्रैकः, समागात्संयमालसः ॥ ६ ॥
तदा तस्यापि सा सर्वं, तं वृत्तान्तं तथाऽवदत् । स प्राह मायया तेन, भिक्षा नोपादवे तदा ॥ ७ ॥

चीर्णव्रतास्तु गृह्णीमो, वयं स्वेनाभिमीलिते । चिन्तयेत्सा अधमोऽप-मल्पदत्तं च निन्दति ॥ ८ ॥
तदपात्रमिदं नूनं, इत्येषा कुपिता सती । न किञ्चित्तस्य तद्दत्त-वती दानविवेकिनी ॥ ९ ॥

इति शुद्धप्ररूपकत्वगुणे ज्ञानदातृभिरवश्यं सविज्ञानमिति गाथार्थः ॥ २१ ॥ उक्तं ज्ञानदातृद्वारं, इदानीं तद्ग्रहणविधिद्वारमाह–

**अक्खलियमिलियाइगुणे, कालग्गहणाइओ विही सुत्ते । मज्जणनिसेज्जअक्खा, इच्चाइकमो तयत्थम्मि ॥२२॥**

व्याख्या—श्रुतं द्विधा–सूत्रतोऽर्थतश्च, तत्र सूत्रे आचाराङ्गोत्तराध्ययनादिसम्बन्धिनि कालग्रहणादिको विधिः, कालश्च समयप्रसिद्धः क्रियाविशेषः, आदिशब्दादुद्देशसमुद्देशानुज्ञाप्रमार्जनादिपरिग्रहः । कथम्भूते सूत्रे ? इत्याह–उच्चरतः स्खलनं–स्खलितं, पदादिविच्छेदशून्यं यत्तन्मिलितं, तयोर्भावः स्खलितमिलितत्वं, न स्खलितमिलितत्वं–अस्खलितमिलितत्वं, तदादिर्येषामहीनाक्षरानधिकाक्षरादीनां ते अस्खलितमिलितत्वादयः, एवम्भूता गुणा यत्र तत्तथा, तस्मिन् । एतेन च अहीनाक्षरानधिकाक्षरास्खलितामिलितत्वादिगुणयुक्तं सूत्रं पठनीयमिति विधिरेवोक्तः, अक्षरहीनत्वाद्युपेतं तूच्चार्यमाणं विद्यामन्त्रादिकमपि विवक्षितफलवैकल्यमनर्थावाप्तिं च जनयेत्, किं पुनः परममन्त्रकल्पं श्रीजिनप्रणीतं सूत्रं ? । तथा चात्रानुयोगद्वारचूर्णावुक्तं कथानकं सङ्क्षिप्योच्यते—

"इह मगहे रायगिहे, पुरम्मि वीरे जिणे समोसरिए । सेणिय–अभयाईया, समागया वंदणनिमित्तं ॥ १ ॥"
"धम्मं सोऊण गिरि–गयाए परिसाए खेयरो एक्को । उप्पडइ पडइ धरणिं, सेणिओ तो जिणं पुच्छई ॥ २ ॥"
"किं एस खेयरो नाह !, उप्पइ निवए ? जिणो भणइ एवं । जह नहगामिणिविज्जा–क्खरमेगमेयस्स पम्हुसियं॥३॥"
"तेणं इमो न हु गच्छइ, एयं सोचा जिणोवएसेणं । खिप्पं गंतूणाभय–कुमारो तं खेयरं भणइ ॥ ४ ॥"

"तुह विज्ञाए पम्हुट्ठ-मक्खरं जाणिऊण जिणकहियं । पुच्छामि देइ जइ मह, विज्जं पडिवज्जियं तेण ॥ ५ ॥"
"तो कहइ अभयकुमारो, लद्धीए पयाणुसारिणीए य । अक्खरमिमस्स खयरो, विज्जं दाऊण उप्पइओ ॥ ६ ॥"

इत्येवं यथा हीनाक्षरत्वात्खेचरस्य विद्याकार्यविघातः तत्क्रमस्तथा सूत्रेऽप्यक्षरादिहीनतायामभिधेयभेदसद्भेदे क्रियाविघातस्तद्विघाते चरणविसंवादस्तद्विसंवादे निर्वाणाभावस्तदभावे च दीक्षावैयर्थ्यमिति, एवं अधिकाक्षरादावपि दोषा वाच्याः, अतो यथोक्तगुणयुक्तमेव सूत्रं पठनीयम् । अर्थगतं तु विधिमाह-तस्य सूत्रस्य अर्थस्तदर्थस्तस्मिन् श्रूयमाणे मार्जनं-शोधनं भुवः कर्त्तव्यं, निषद्या गुरोर्विरचनीया, अक्षा-श्चन्दनकास्तत्स्थापना कार्या, इत्यादिकः क्रमो-विधिः, आदिशब्दाद्वन्दनकदानादिपरिग्रह इति गाथार्थः॥२२॥

अथ श्रवणगतमेव विधिमाह—

निद्दा-विगहा-परिव-ज्जिएहिं गुत्तेहिं पंजलिउडेहिं । भत्तिबहुमाणपुव्वं, उवउत्तेहिं सुणेयव्वं ॥ २३ ॥

व्याख्या—निद्रा-निद्रादिभेदात्पञ्चधा, विकथा-स्त्रीकथाद्याश्चतस्रस्ताभिः परिवर्जितैः, तथा गुप्तै-निगृहीतमनोवाक्कायैः, तथा प्राञ्जलिपुटैः-संयोजितकरकमलैः, तथा भक्ति-र्बाह्यप्रतिपत्तिलक्षणा बहुमान-श्चित्तानुरागरूपस्तौ पूर्वं यत्र तत्तथेति क्रियाविशेषणम्, तथैवोपयुक्त-र्दत्तावधानैः, एवम्भूतैः किं ? इत्याह-श्रोतव्यं-आकर्णनीयं गुरूक्तमिति शेषः, इति गाथाऽक्षरार्थः ॥ २३ ॥

पुनः कथम्भूतैः श्रोतव्यमित्याह—

अभिकंखंतेहिं सुहा-सियाइं वयणाइं अत्थसाराइं । विम्हियमुहेहि हरिसा-गएहिं हरिसं जणंतेहिं ॥२४॥

व्याख्या—अभिकाङ्क्षद्भि-र्वाञ्छद्भिः, सुभाषितानि-मधुराणि वचनानि, अर्थसाराणि-महार्थानि, तथा विस्मितमुखै-र्नेत्रविका-

सोल्लासादिना सकौतुकाननैः, 'हरिसागएहिं'ति आगतहर्षैः, हर्षं च जनयद्भिराचार्यादीनामिति गाथार्थः ॥ २४ ॥

एवं च श्रवणे श्रोतारो यल्लभन्ते तदाह—

**गुरुपरिओसगएणं, गुरुभत्तीए तहेव विणएणं । इच्छियसुत्तत्थाणं, खिप्पं पारं समुवयंति ॥ २५ ॥**

व्याख्या—गुरुपरितोषगतेन-गुरुपरितोषजातेन सता, गुरौ परां प्रीतिं गतेनेत्यर्थः, गुरुपरितोषप्रकारेण वा, गुरुभक्त्या-तत्सेवारूपया, तथैव विनयेनासनदानादिरूपेण । किमेतैर्हेतुभिः स्यात् ? इत्याह—ईप्सितसूत्रार्थयोः क्षिप्रं-शीघ्रं पारं-निष्ठां समुपयान्ति । "सुत्तत्थाण"मिति सूत्रे बहुत्वं य(त्त)द् "दुव्वयणे बहुवयण"मिति प्राकृतलक्षणादिति गाथार्थः ॥ २५ ॥

सम्प्रति यस्य सूत्रार्थौ देयौ तद्दर्शनपूर्वं विध्यन्तरमाह—

**समयभणिएण विहिणा, सुत्तं अत्थो य दिज्ज जोग्गस्स । विज्जासाहगनाएण, होंति इहरा बहू दोसा॥२६॥**

व्याख्या—समयभणितो विधिर्लेशतो दर्शित एव, विस्तरस्तु स्थानान्तरादवसेयः । तेन समयभणितेन विधिना सूत्रं अर्थं च दद्यात्स्वयं, कस्य ? इत्याह—योग्यस्य अर्हस्य, न त्वपात्रस्य । कुतः ? इत्याह—यतो विद्यासाधकज्ञातेन भवन्ति इतरथा दायकग्राहकयोः सूत्रार्थयोश्च बहवोऽवर्णवादादयो दोषा इति गाथाऽक्षरार्थः । भावार्थस्तु कथानकगम्यस्तच्चेदम्—

वाराणस्यां विजयसेननृप-कमलमालादेव्योरमङ्गुरसौभाग्यभूमिः सकलकलाकेलिगृहं पुरन्दरः कुमारः । अन्यदा तस्यैव राज्ञो राज्या मालतीनाम्न्या कुमारं स्म(मा)रानुकारं विलोक्य विह्वलया विलज्जया चतुरचेष्टया प्रकटितः स्वाभिप्रायः कुमारस्य पुरः । तं चाऽऽकर्ण्य कुमारेण चिन्तितं-"अहो !! मोहस्य माहात्म्यं, किञ्चित्पश्यत पश्यत । लोकद्वयविरुद्धेऽपि, यतो जन्तुः प्रवर्तते ॥१॥"

प्रकाशितं च—" नाभिलाषः कुलस्त्रीणां, युक्तोऽपि पुरुषान्तरे । पुत्रे कामानुरागस्तु, पशुस्त्रीणां पुनर्यदि ॥ २ ॥ "
"अन्याऽन्ययुवतिसङ्गम-रसिकेषु ध्वजपटाञ्चलेषु । पुरुषेषु कोऽनुरागः ?, अपरक्तविरक्तचित्तेषु ॥ ३ ॥" तथा–
"अंधो पंगुव्व अजं-गमोव्व जरविहुरिओ भुयंगुव्व । आलविउं पि न जुत्तो, परपुरिसो सुकुलनारीणं ॥ ४ ॥"

इति मद्वचसा तां तथा संस्थापय यथा न स्वप्नेऽपि चिन्तयतीदमिति। चेटी विसृष्टा, सा च कुमारोक्तं सविशेषं स्वस्वामिन्यै न्यवेदयत् । तथाप्यनिवृत्तमारविकारा साऽन्यान्यचेटीसञ्चारणान्न निवर्त्तते यावत्तावत्तत्परिणामस्यानिवार्यत्वं स्वस्य च तदकार्यं विचार्य राज्ञस्तत्स्वरूपमनिवेद्य देशान्तरं परिभ्रमन् कुमारो मार्गमिलिते कस्मिंश्चिद्विप्रे निर्गुणेऽपि वाचालतया मार्गश्रममपहरति बहुस्नेहं बबन्ध । पल्लीपथेषु च प्रत्यर्थितयोपस्थितान् पल्लिनाथान् प्रमथ्य कश्चिन्नन्दिपुरासन्नोद्याने विश्राम्यति, तावता सिद्धकूटशैलादागत्य भूतानन्दाभिधः सिद्धपुरुषः कुमारं प्राह–'भो महासत्त्व ! प्रतिदिनमुच्छीर्षके कनकसहस्रस्थापन-सङ्ग्रामाभङ्गुरत्व-त्रिकालविषयविज्ञानाद्यनेकफलविद्याया योग्यस्त्वमेव मे देवतयाऽभिहितः' इत्युक्त्वा तेन दत्तां तां महाविद्यां सपूर्वोत्तरसेवाविधि लब्धवान् कुमारः अयोग्यस्यापि तस्य द्विजस्य महाग्रहात्तां विद्यां तस्माद्दापयच्च । ततो गुरूक्तविधिना विद्यां सम्यक् साधयित्वा नन्दिपुरे चन्द्रकान्तागणिकागृहे विद्याप्रभावात्पूर्यमाणसर्वसमीहितः स्थितः । विद्यां गुरुं चोपहसन् विप्रस्तु क्वापि गतः । कुमारस्य तु तत्र मतितिलकामात्यपुत्रेण श्रीनन्दनेन सह मैत्री जाता । अन्यदा कश्चित्प्रासादे कौतुकोपविष्टः स तत्पुरप्रभोः प्रासादे सकलपुरक्षोभकरमतुच्छमुच्छलितं कलकलमाकर्ण्य तज्ज्ञानाय प्रेषितः कोऽपि क्षणादागत्य कुमारमाह, यथा—'एतत्पुरप्रभोः सूर(सेन)नृपतेः प्राणेभ्योऽपि प्रिया रतेरप्यधिकरूपा चतुःषष्टिकलाकौशलवती बन्धुमती नाम तनया केनाऽप्यपहृता, तेनायं तुमुल' इति । ततश्चिन्तयति कुमारः–अहो !! अस्माकमिह तिष्ठतामपि सा केनाप्यपहृता,

यदेतत्संवदितं, यदभिहितं केनापि—

"निबं सन्निहियाणं. विभोगङ्गाणं न कमलिणी जाया। सालूराणं दूरा—गया वि भुंजंति तं भमरा॥ १॥"

इत्यादि चिन्तयन् गतः कुमारः स्वस्थानं। इतश्च बहुधा विलोकिताऽपि न क्वचित्प्राप्ता वार्ताऽपि कन्यायाः, ततस्तद्विरहेण व्याकुलीभूते विलपति नृपतौ मन्त्रिपुत्रेण श्रीनन्दनेनोक्तं—'हे देव! अत्र पुरे वैदेशिकोऽस्त्येकः कलावान्, स निर्द्रव्योऽपि परमैश्वर्यवान् दाता भोक्ता च, इति विद्यासिद्धः सम्भाव्यते, इति स पृच्छयते,। ततः सम्भावनयाऽपीषदुच्छ्वसितेन राज्ञा मतितिलकप्रमुखप्रधानपुरुषैः सानुनयमानायितस्तत्र कुमारः, सबहुमानं दृष्टः पृष्टश्चोचितं कुशलादि। ततो राज्ञाऽऽदिष्टेन श्रीनन्दनेन बन्धुमतीस्वरूपं पृष्टः कुमारश्चिन्तितवान्—

"व्यसनार्त्तोऽभ्यर्थितार्थं, जीवितं चेदपि व्रजेत्। यातु यातु फले लाते, शाखेः शोषो न दुःखकृत्॥ १॥"

"कस्य न स्युः प्रियाः प्राणाः?, लक्ष्मीः कस्य न वल्लभा?। सतामवसरे प्राप्ते, द्वयमेतत्तृणायते॥ २॥"

इति विचिन्त्य 'देव! महत्साध्येऽप्यस्मिन्कार्ये यदि देवस्य मयि सम्भावना? तर्हि दशदिवसमध्ये चेत्कन्यां नानयामि तर्हि ज्वलज्ज्वलनं प्रविशामी'ति प्रतिज्ञां चकार कुमारः, ततो राज्ञा सम्मान्य विसृष्टः। स्वस्थानं प्राप्तं विधिस्मृता विद्या तं प्राह—अत्रैव भरते वैताढ्यगिरौ पञ्चविंशतियोजनोच्चैः रजतमये गन्धसमृद्धनगरे मणिकिरीटो विद्याधरः, तेन नन्दीश्वरयात्रां कृत्वा वलमानेन रूपमोहितेन बन्धुमती हृता, स सम्प्रति गङ्गातटे धवलकूटगिरौ तस्याः पाणिग्रहणसामग्रीं कुर्वन्नस्ति, एहि तत्र यामि' इति। एवं भवत्विति प्रतिपन्ने विमाने निवेश्य विद्यादेवतया कुमारस्तत्र नीतः। तत्र परिणयनसामग्रीं कुर्वाणो हक्कितः कुमारेण मणिकिरीटः—'रे! किमारब्धं? तस्करनरोचितं'। ततः प्रवृत्तं द्वयोर्दिव्यास्त्रैर्युद्धं, ततस्सर्वथाऽजेयपराक्रमं कुमारं ज्ञात्वा त्यक्ताहङ्कारः प्रणतः खेचरः, ततो द्वयोर्मैत्री, विद्या-

धरप्रार्थितः कुमारो बन्धुमतीसहितो वैताढ्ये गतः। तद्गौरवेण कियन्ति दिनानि स्थितः। ततो दशमदिने विद्याधरैः परिवृतो बन्धुमतीं लात्वा नन्दिपुरे महामहोत्सवेन गतः। ततो गुणाकृष्टचित्तेन सूर(सेन)नृपतिना दत्तां स्वस्मिन्ननुरक्तां बन्धुमतीं परिणीतवान्। कालेन पित्रा दूतेनाहूतो दशसहस्राणि गजान्–दशसहस्राणि रथान्–लक्षं अश्वान्–कोटिद्वयपदातीन् दत्वा सूरसेननृपेण विसृष्टो बन्धुमत्या सह विजयसेनेन राज्ञा कारितप्रवेशमहोत्सवः स्वपुरमगात्। अन्यदा श्रीविजयसेननृपो भार्यामालती-पुत्रपुरन्दर-वधूबन्धुमत्यादिभिः सहान्तरङ्गमुपमितिकथोपदेशं श्रीविमलबोधकेवलिमुखात् श्रुत्वा गृहीतगृहिव्रतमनिच्छन्तमपि पुरन्दरं कुमारं राज्ये निवेश्य मालतीयुतस्तत्समीपे दीक्षामादायोत्पन्नकेवलः कैवल्यमलभत। पुरन्दरराजा तु न्यायेन राज्यं पालयन्नन्यदा गवाक्षे पुरीं पश्यंस्तं पूर्वपरिचितं विप्रं उन्मत्तं धूलिधूसरं लोकैर्लेष्टुभिर्हन्यमानं चतुर्दिक्षु धावन्तमुपलक्ष्य दुःखी जातः, ततो विद्यां स्मृत्वा 'अवज्ञां कुर्वन् मयैवायं ग्रहिलीकृत' इति तन्मुखेन ज्ञात्वा तां बहुशोऽभ्यर्थ्य विप्रं सज्जी चक्रे। ततः श्रीपुरन्दरनृपोऽपि चिरं राजसुखमनुभूय बन्धुमतीतनयं श्रीगुप्तं राज्ये संस्थाप्य बन्धुमत्या सह विमलबोधकेवलिसमीपे दीक्षां जग्राह। बहुश्रुतो गुर्वादेशादेकाकिप्रतिमया विहरन् कश्चिद्दुपग्रामं प्रेतवने ग्रीष्मे मध्याह्ने निरावरणमातापनां करोति। तदा च पूर्वप्रमथितपल्लीपतिना स्मृतप्राक्पराभवेन तालादिगर्भशणतृणादिना तं वेष्टयित्वाऽग्निः प्रोद्दीपितः। तं चोपसर्गं तितिक्षमाणः शुक्लध्यानाग्निना तत्स्पर्द्धयेव निर्दग्धसकलकर्म(मलो)जालोऽन्तकृत्केवली सिद्धः। पल्लीपतिस्तु महापाप इति सर्वपरिवारेण निर्वासितः क्वापि रजन्यामन्धतमसेऽन्धकूपे पतितः खदिरकीलकप्रोतजकृद्रौद्रपरिणामः सप्तमपृथिव्यामुत्कृष्टायुरप्रतिष्ठाने समुत्पन्नः। बन्धुमत्यपि च तीव्रं तपस्तप्त्वा सिद्धा, इति पुरन्दरचरितं समाप्तम्॥

तदेवं यथा योग्यस्य पुरन्दरकुमारस्य दत्ता विद्या सफलतां गता, अयोग्यस्य तु विप्रस्य अनर्थफला सञ्जाता, एवं सूत्रार्थावपीति

विभाव्य योग्यस्यैव तौ देयौ, न त्वयोग्यस्य, बहुतमदोषसम्भवादिति गाथार्थः ॥ २६ ॥ अथामुमेवार्थं दृष्टान्तेन दृढयन्नाह—

**आमे घडे निहित्तं, जहा जलं तं घडं विणासेइ । इय सिद्धंतरहस्सं, अप्पाहारं विणासेइ ॥ २७ ॥**

व्याख्या—यथा आमे—अपरिपक्वे घटे निक्षिप्तं जलं तमेव घटं विनाशयति, भूमिगमनादिभ्यः स्वयमपि तोयं विनश्यतीत्यपि द्रष्टव्यं, एवं सिद्धान्तरहस्यमप्यल्पाधारं तुच्छप्राणिलक्षणं दीर्घरोगोन्मादादिभ्यो विनाशयति, स्वयमपि तत्सिद्धान्तरहस्यमुपहासाप्रीत्यादिभ्यो विनश्यतीत्यत्रापि स्वयं ज्ञेयमिति गाथार्थः ॥ २७ ॥

योग्येनापि शिष्येण ज्ञानं जिघृक्षता 'मम तथाविधा मेधा नास्त्यतो नेदं मया ग्रहीतव्यं' इति न चिन्तनीयमित्याह—

**मेहा हुज्ज न होज्ज व, लोए जीवाण कम्मवसगाणं । उज्जोओ पुण तह वि हु, नाणम्मि सया न मोत्तव्वो ॥२८॥**

व्याख्या—"लोए"त्ति अस्मिन् लोके कर्मवशगानां जीवानां मेधा—बुद्धिः, कर्मक्षयोपशमसद्भावात् कस्यचिद्भवेत्तदभावात् कस्यचिन्न भवेद्वा, तथाप्युद्योगः पुनः—उद्यमः पुनर्ज्ञानेऽध्येतव्ये सदा—निरन्तरं न मोक्तव्यः । अयम्भावः—कर्मनिर्जरैव हि साध्या, सा च प्रज्ञावत इतरस्य च श्रुताध्ययनं विदधतः सम्पद्यत एव, ततोऽल्पमेधसाऽपि 'मम न किञ्चिदागच्छती'त्युद्वेगतोऽध्ययनं सर्वथैव न मोक्तव्यमिति गाथार्थः ॥२८॥ ननु यदि प्रतिदिनं श्लोकदशकविंशत्यादिकं किञ्चित्पठतामागच्छेत् तदाऽधीमहि, यदा तु सकलेनापि दिनादिना पदादिमात्रमेव किञ्चिदागच्छेत् तदा किं तेनेत्याशङ्कयाह—

**जइ वि हु दिवसेण पयं, धरिज्ज पक्खेण वा सिलोगऽद्धं । उज्जोअं मा मुंचसु, जइ इच्छसि सिक्खिउं नाणं ॥२९॥**

व्याख्या—यद्यपि दिवसेन समस्तेनाऽपि पदं धरति—अवतिष्ठते, पक्षेण वा श्लोकार्द्धमवतिष्ठते, तथाप्युद्योगं मा मुञ्च, यदीच्छसि शिक्षितुं ज्ञानं। इयमत्र भावना—यद्यपि दिनादिना पदमात्रमेवागच्छति तथापि बहुना कालेन तद्बहु सम्पद्यते कर्मनिर्जरा च सञ्जायते, अतः श्रुतज्ञानमिच्छता सर्वदैवाध्येतव्यम्, यतः—"योजनानां सहस्रं तु, शनैर्याति पिपीलिका। अगच्छन्वैनतेयोऽपि, पदमेकं न गच्छति ॥ १ ॥" इति गाथार्थः ॥ २९ ॥ अत्रार्थे सूत्रकार एव दृष्टान्तमाह—

**जं पिच्छह अच्छेरं, तह सीयलमउयएण वि कमेण। उदएण वि गिरी भिन्नो, थोवं थोवं वहंतेण ॥३०॥**

व्याख्या—यत्—यस्मात्प्रेक्षध्वमाश्चर्यं, यदुत—'तथा' तेन लोकप्रसिद्धेन प्रकारेण शीतलमृदुनाऽपि स्तोकं स्तोकं वहताऽपि, एव सत्राप्यपि शब्दः सम्बन्धनीयः, उदकेन—नद्यादिसम्बन्धिजलेन क्रमेण गिरिर्भिन्नः, सर्वजनप्रसिद्धं चैतत्। एवमत्रापि नित्यं स्तोकं स्तोकं पठन्तोऽपि कालेन श्रुतरहस्यगिरिभेदिनो भवन्तीत्युपनय इति गाथार्थः ॥ ३० ॥

उक्तं ग्रहणविधिद्वारं, साम्प्रतं 'गुणाश्च के? तस्ये'ति चतुर्थद्वारमभिधित्सुराह—

**सूई जहाससुत्ता, न नस्सइ कयवरम्मि पडिया वि। तह जीवो वि ससुत्तो, न नस्सइ गओ वि संसारे॥३१॥**

व्याख्या—यथा सूचिः ससूत्रा—छिद्रप्रोतसूत्रनिर्मितदवरका कचवरे पतिताऽपि न नश्यति। दवरकदर्शनानुसारेण पुनरपि गृह्यत इति भावः। तथा जीवोऽपि ससूत्रः—पठितसिद्धान्तः अशुभकर्मोदयवशात्पतितः सन्—संसारे गतोऽपि न नश्यति। पूर्वाधीतस्यैव श्रुतस्य महात्म्यात्पुनरप्याक्षिप्तबोधिलाभादिभावः स्तोककालेनैव सिध्यत्येवेति भावः, इति गाथार्थः ॥ ३१ ॥ अथैव व्यतिरेकमाह—

**सूई वि जह असुत्ता, नासइ रेणुम्मि निवडिया लोए। तह जीवो वि असुत्तो, नासइ पडिओ भवरयम्मि॥३२॥**

व्याख्या—यथा अस्मिल्लोके सूचिरपि असूत्रा–छिद्रप्रोतसूत्रतन्तुः रेणुमध्ये निपतिता नश्यति, तथा जीवोऽपि असूत्रो–ऽनधीतसिद्धान्तोऽशुभकर्मोदयवशाद्भवरजसि पतितस्सन्नश्यति, प्रभ्रष्टबोधिलाभादिभावो दुःखान्यनेकान्यप्यनुभवतीति भावः, इति गाथार्थः ॥ एतेन च ज्ञानस्य बोधिलाभाक्षेपकत्वमेको गुण उक्तः, इदानीं तु तस्यैव चारित्रशोधकत्वगुणमाह—

**जह आगमपरिहीणो, विज्जो वाहिस्स न मुणइ तिगिच्छं। तह आगमपरिहीणो, चरित्तसोहिं न याणेइ ॥३३॥**

व्याख्या—यथा आगमेन–आत्रेयादिऋषिप्रणीतशास्त्रादिरूपेण, परिहीणो–रहितो वैद्यो व्याधे–र्ज्वरादिरोगरूपस्य चिकित्सां अपगमोपायरूपां, न "मुणइ"त्ति प्राकृतलक्षणेन जानाते "ज्ञो जाण–मुणौ"इति मुणादेशे जानाति। तथा आगमेन–कल्पव्यवहारादिरूपेण परिहीणस्साधुरपि अतिचारमलक्लिन्नस्य चारित्रस्य शुद्धिं(शोधिं)–प्रायश्चित्तप्रदानेन निर्मलीकरणलक्षणां न जानाति, न्यूनाधिकं प्रायश्चित्तं दत्वा आत्मानमालोचकं च संसारभाजनं करोतीति भावः, इति गाथार्थः ॥३३॥ अथ ज्ञानादपि प्रधानवस्त्वेव न किञ्चिदस्तीति दर्शयति—

**किं एत्तो लट्ठयरं, अच्छेरतरं व सुंदरतरं वा। चंदमिव सव्वलोया, बहुस्सुअमुहं पलोयंति ॥ ३४ ॥**

व्याख्या—किमेतस्मात्–ज्ञानाल्लष्टतरं–शोभनतरं ?, न किञ्चिदित्यर्थः। अथवा आश्चर्यं–चित्तविस्मयरूपं, प्रकृष्टमाश्चर्यमाश्चर्यतरं, तज्जनकं वस्त्वप्युपचारादाश्चर्यतरं, तदपि ज्ञानादन्यत्किं ?, न किमपीति भावः। चतुर्दशपूर्वविदामनुत्तरसुरशरीरेभ्योऽप्युत्कृष्टतरपुद्गलप्रकल्पितशैलानलाद्यस्खलितहस्तमिताऽऽहारकशरीरकरणादिशक्तिहेतुत्वाज्ज्ञानमेवोत्कृष्टाश्चर्यनिधानं, नान्यदित्याशयः। यदि वा सुष्ठु

दर्पयति–हर्षं नयति दृष्टं सत्सर्वलोकानिति निरुक्त्या सुन्दरं, प्रकृष्टं सुन्दरं–सुन्दरतरं । 'लष्टतर'मित्यनेन सामान्यशोभनतरं विवक्षितं, सुन्दरतरं तु यथोक्तस्वरूपमित्यतोऽस्य भेदः । ततः सुन्दरतरमपि ज्ञानादन्यत्किं ?, न किञ्चिदित्यर्थः । कथमिदं ज्ञायते ? इत्याह— यतश्चन्द्रमिव बहुश्रुतमुखं सर्वे लोका अन्तःप्रसर्पत्प्रचुरबहुमाननिभृतचेतसः प्रस्फारितदृशः प्रलोकयन्ति, ततो लोके पुरुषत्वादिधर्मसाम्येऽपि शेषपदार्थेभ्यः स्वाधारे प्रकर्षवद्गौरवाधानकारणत्वाज्ज्ञानमेव लष्टतरादिस्वरूपं, नान्यदिति । अथवेत्थं व्याख्या–चन्द्रमिव सर्वे लोका बहुश्रुतमुखं प्रलोकयन्ति, किमध्यवस्यन्तः ? इत्याह–किमेतस्माद्बहुश्रुतमुखाल्लष्टतरमाश्चर्यतरं वा सुन्दरतरं वा ? इत्येवं योजना कार्येति गाथार्थः ॥ ३४ ॥ अथ प्रकृष्टकर्मनिर्जराकारणं ज्ञानमेव, नान्यदिति दर्शयन्नाह—

**छट्ठऽट्ठमदसमदुवा–लसेहिं अबहुस्सुअस्स जा सोही । एत्तो उ अणेगगुणा, सोही जिमियस्स नाणिस्स ॥३५॥**

व्याख्या—'षष्ठ'मित्युपवासद्वयस्य सामयिकी संज्ञा, 'अष्टम'मुपवासत्रयस्य, 'दशम'मुपवासचतुष्टयस्य, 'द्वादशम'मुपवासपञ्चकस्य । इदं च पक्षमासक्षपणादेरुपलक्षणं । ततश्चैतैः षष्ठाष्टमादिभिः क्रियमाणैरबहुश्रुतस्य–अगीतार्थस्य या शुद्धिः–कर्ममलापगमरूपा सम्पद्यते, एतस्याः शुद्धेस्सकाशात्तु अनेकैर्गुण्यते इत्यनेकगुणा शुद्धिर्भवति, अतिबह्वीत्यर्थः । कस्य ? इत्याह–'ज्ञानिनो'गीतार्थस्य । कथम्भूतस्य ?, जिमितस्य–उद्गमादिदोषविशुद्धाहारभोजिन इत्यर्थः । अगीतार्थो हि द्रव्यादिस्वरूपमविदन् स्वाग्रहग्रस्तस्तत्किमपि विकल्पयति वक्ति विदधाति(वा), येन क्षुत्क्षामादिकष्टं सहमानोऽत्रैवानर्थलक्षाण्याप्नोति मृतश्च भ्रमत्यनन्तं संसारं, शुद्धेरभावात् । गीतार्थस्तु यथावद्द्रव्यादिस्वरूपं विदंस्तत्किञ्चिदाचरति येनात्रैव सर्वजनप्रि(पूजनी)यो भवति, परत्रापि च न स्पृश्यतेऽपायलेशेनापि प्राप्नोति च सर्वसुखसम्पदः, तथाविधशुद्धिसद्भावात् । यदुक्तं—

"जं अन्नाणी कम्मं, खवेइ बहुयाहिँ वासकोडीहिँ । तं नाणी तिहिँ गुत्तो, खवेइ ऊसासमित्तेणं ॥ १ ॥"

इति भावः, इति गाथार्थः ॥ २५ ॥ अथ ज्ञानस्यैव सूक्ष्मादिपदार्थज्ञातृत्वलक्षणं गुणमुक्त्वैतदभ्युपदेशमाह—

**नाणेण सव्वभावा, नज्जंति सुहुमबायरा लोए । तम्हा नाणं कुसलेण, सिक्खियव्वं पयत्तेणं ॥ ३६ ॥**

व्याख्या—अस्मिँल्लोके सर्वे भावाः सूक्ष्मा बादरा वा ज्ञानेनैव ज्ञायन्ते, नान्यथा । तस्मात्कुशलेन प्रयत्नेन ज्ञानमेव शिक्षणीयमिति गाथार्थः ॥ ३६ ॥ अथ ज्ञानस्यैवाकारणबन्धुतादिगुणानाह—

**नाणमकारणबंधू, नाणं मोहंधयारदिणबंधू । नाणं संसारसमुद्द-तारणे बंधुरं जाणं ॥ ३७ ॥**

इह सर्वेऽपि "कारणाद्बन्धुतामेति, द्वेष्यो भवति कारणात् । अर्थार्थी जीवलोकोऽयं, न कश्चित्कस्यचित्प्रियः ॥१॥"

इदं तु ज्ञानं अकारणेनैव—कारणापेक्षामन्तरेणैव अर्थावाप्त्यनर्थपरिहारयोर्महासाहाय्यदानतः सर्वजीवानां बन्धुरिव बन्धुः, तथा ज्ञानं मोहान्धकारध्वंसे साध्ये दिनबन्धुः, सूर्य इत्यर्थः । तथा ज्ञानं संसारसमुद्रतारणे बन्धुरं—प्रधानं यानं—यानपात्रमिति गाथार्थः ॥ ३७ ॥

अथ ऐहिकामुष्मिकगुणानामपि ज्ञानमेव साधकमिति सदृष्टान्तं दिदर्शयिषुराह—

**वसणसयसल्लियाणं, नाणं आसासयं सुमित्तुव्व । सागरचंदस्स व होइ, कारणं सिवसुहाणं च ॥ ३८ ॥**

व्याख्या—व्यसनशतैः शल्लियतानां—अन्तःपीडितानां ज्ञानमेवाश्वासकं—तन्निस्तरणोपायप्रदर्शकत्वेन स्वास्थ्यजनकं । किमिव ?, सुमित्रमिवेत्यनेन ज्ञानस्यैहिको गुणो दर्शितः, पारत्रिकमप्याह—भवति कारणं मोक्षसुखानां चेति । कस्येव ?, सागरचन्द्रस्य यथा, कः

पुनरसौ सागरचन्द्र इति चेत् ? उच्यते—

इह श्रीभरते मलयपुरे अमृतचन्द्रराज्ञश्चन्द्रकला[राज्ञी]कुक्षिशुक्तिमौक्तिकं सागरचन्द्रः कुमारः, सोऽन्यदा कस्यापि करात् पञ्चशत्या दीनारैरिमां गाथां जग्राह, यथा—"अप्पत्थियं चिय जहा, एइ दुहं तह सुहं पि जीवाणं। ता मुत्तुं संकप्पे, धम्मे चिय कुणह पडिबंधं ॥ १ ॥" इति। स कुमारोऽन्यदा क्रीडावने गतः, केनाप्यपहृतः, स्वं समुद्रे पतितमद्राक्षीत्। ततश्चेतः कल्लोलैरितो मत्स्यपुच्छैराहन्यमानः काष्ठखण्डमवाप्य नवमदिनेऽमरद्वीपमवाप्य नालीकेरनीराभ्यङ्गादिकमपि जातस्वास्थ्यः फलैर्वृत्तिं कल्पयन् गाथार्थस्मरणेन सदापि मातापितृवियोगवनवासादिदुःखमसदिव गणयंस्तत्र काप्यरण्योद्देशे दिव्याकृतिमेकां कन्यां 'भवान्तरेऽपि सागरचन्द्रो भर्त्ता भूया'दिति श्रावणां कृत्वा आम्रशाखाऽवलम्बितपाशबद्धकण्ठां मर्तुकामां पाशं छित्त्वाऽरक्षत्। अत्रान्तरे कोऽपि विद्याधरस्समायातः, स तं कन्यास्वरूपमपृच्छत्, कथितं च कुमारेण यथा ज्ञातं तत्। ततः स प्राह—भो! महात्मंस्त्वयाऽस्माकं महोपकारः कृतः कन्यां रक्षता। ततः कुमारानुयुक्तः खेचरः कन्यास्वरूपमाह—यथाऽस्मिन्नमरद्वीपेऽमरपुरे भुवनभानू राजा, चन्द्रवदना प्रिया, कमलमाला पुत्री कलाकुशला। सा च सागरचन्द्रगुणान् श्रुत्वा तत्पाणिग्रहे कृतप्रतिज्ञा, ततस्तत्पिता यावत्तत्सम्बन्धं करोति तावत्सुसेनविद्याधरेण तद्रूपमोहितेन साऽपहृता, अत्र प्रदेशे स्थितेन कन्यामातुलेन अमिततेजसा सा विलपन्ती दृष्टा, तस्मादाच्छिद्य चात्र मुक्ता, युद्धं च कृत्वा सुसेनो हतः। सेयं कमलमाला, स चाहमेतस्या मातुलः। अत्रान्तरे कथमपि संग्रामं ज्ञात्वाऽमिततेजसो माता विशुल्लता शशिवेगमुख्या भ्रातरश्च ससैन्यास्समायाताः, कृता सर्वैरन्योऽन्यमुचिता प्रतिपत्तिः। अथ विशुल्लता सागरचन्द्रं दृष्ट्वा सानन्दं प्राह—

" कः कल्पपादपो रत्न-निधिः को वा सुधारसः?। अनन्तफलदो लब्धो, योगः सत्पुरुषैर्यदि ॥ १ ॥"

अहो !! सोऽयं जगल्लङ्घनजङ्घालयशःप्रचारः श्रीअमृतचन्द्रनृपात्मजः श्रीसागरचन्द्रकुमारः, योऽस्माभिर्नन्दीश्वरे यात्रायां गच्छद्भिर्मलयपुरे पुरा क्रीडन् दृष्टः। एतच्चाकर्ण्य कमलमालाद्याः सर्वेऽप्यमृतस्नाता इवोच्छ्वसिताः। ततः कन्यामातामही-मातुलाभ्यां विद्युल्लता-ऽमिततेजोभ्यां दत्तां कमलमालां विस्तरेण परिणिन्ये कुमारः, ताभ्यां कृताग्रहश्चामरपुरे गतः श्वशुरेण कारितप्रवेशोत्सवः सगौरवं, तया सह तत्र विलसन्सुखं तिष्ठति। अन्यदा रात्रौ सुखनिद्रायां प्रसुप्तः कुमारः, प्रबुद्धश्च प्रातः कस्यचिद्गिरेः शिलायां स्वं पश्यति। ततश्चाहो !! क्व सा वासवेश्म-दिव्यशय्या-कमलमाला-चम्पकमालादिसुखसामग्री ? क्व चेयं विकटाटवी-खरगिरिशिला-श्वापदसर्पादिदुःखसामग्री ? इति क्षणचिन्ताचान्तचेताः पुनश्च तां गाथां स्मरन्नगणितापत्त्राटव्यां भ्रमन् कश्चिदशोकतरुतले कायोत्सर्गस्थितं मुनिमेकं दृष्ट्वा तद्दर्शनादेव सञ्जातविवेकः प्रणामपूर्वं 'साधो! संसारे किं जीवेन कार्यं ?' इति विनयेनापृच्छत्। मुनिरपि पारितोत्सर्गो धर्माशिषं दत्त्वा प्राह—शृणु भो भद्रक! तावत्सर्वः सुखार्थी जन्तुः, तच्च प्रार्थ्यमानमपि न धर्मादृते, धर्म एवार्थकाममोक्षाणां हेतुः, अतः स एव प्रयत्नेन कार्यः। सम्यक्त्वं च तन्मूलं, तच्च देवगुरुतत्त्वश्रद्धानरूपं, तेषां च "सर्वज्ञो जितरागादि-[दोषस्त्रैलोक्य पूजितः। यथास्थितार्थवादी च, देवोऽर्हन् परमेश्वरः ॥ ४ ॥" योगशास्त्र २ प्र०] इत्यादिकमन्वयव्यतिरेकाभ्यां स्वरूपमिति। ततो मुनिवचनाद्देवादिस्वरूपं जीवाजीवादिस्वरूपं च ज्ञात्वा मिथ्यात्वं व्युत्सृज्य सम्यक्त्वमादृत्य पुनर्यावत्किञ्चित्पृच्छति कुमारस्तावन्मुनिस्तिरोऽभूत्। अथ मुनेर्धर्मोपकारं स्मरन्तं 'रे रे !!! समरविजयकुमारस्तव रुष्टः' इति ब्रुवाणा चतुरङ्गचमूस्तं सर्वतोऽवेष्टयत्। ततो गाथार्थस्मरणेन तामापदमगणयन्निजभुजौजसा कस्यापि रथं सायुधं गृहीत्वा तत्सैन्यमभांक्षीत्। ततः स्वयं संग्रामं कुर्वन्समरविजयस्तद्रथमारुह्य कुमारेण केशेषु गृहीतस्तमेव शरणं प्रपन्नश्चरणयोर्लग्नः। अत्रान्तरे काऽपि स्त्री समागत्य कुमारं प्राह—भो महानुभाव! कुशवर्द्धनपुरे कमलच-

न्द्रनृपोऽमरकान्ता प्रिया, तयोर्भुवनकान्ता प्रियपुत्री परिणतजिनवचना तव गुणान् श्रुत्वा त्वत्पाणिग्रहे प्रतिज्ञामकार्षीत् । शैलपुरेशसुदर्शननृपपुत्रेण समरविजयेन त्वत्प्रतिपक्षेण मार्ग्यमाणाऽपि न लब्धा, ततः स्वयं चतुरङ्गसैन्येन मण्डलसीम्नि स्थितोद्याने क्रीडन्ती सा निपुणैरपहृता विलपन्ती, अहं तु तस्या धात्री स्नेहेनायाता, अत्र च त्वं दृष्टः प्रत्यभिज्ञातो दोषितश्च, तस्मान्मोचयित्वा तां परिणीयानुगृहाणेति । ततस्समरविजयस्तामानीय कुमाराय ददौ । स च संक्षेपेण तां परिणीतवान् , समरं च सम्भाष्य विसृष्टवान् । समरविजयादृगृहीते रथे तया सहारूढस्तस्याः पुरं प्रति व्रजन् क्वचिद्रणद्वेणुवीणं दूरतो गीतमश्रौषीत् । ततः सरथां प्रियां तत्र मुक्त्वाऽग्रतो गच्छन् वननिकुञ्जे सप्तभूमिकं प्रासादमद्राक्षीत् । तत्रारूढो गीतादिपरं सौभाग्यसारं कन्यापञ्चकं दृष्ट्वा विस्मितः । ताभिश्चाभ्युत्थानासनादिनोपचरितस्तत्स्वरूपमप्राक्षीत् , ताभिश्चोक्तं–वैताढ्ये [illegible]करपुरे सिंहनादः, तस्य कनकश्री-चम्पकश्री-रम्भा-विमला-ताराख्याः पञ्च पुत्र्यो वयं, पित्रा पृष्टेन नैमित्तिकेनास्माकं त्वं वरः प्रोक्तोऽस्यामटव्यां तव प्राप्तिश्च । ततोऽत्र प्रासादं कारयित्वा पित्रा वयमत्र मुक्ताः । ततोऽस्मद्भाग्येन त्वमत्रायातः, कुरु शीघ्रमस्मत्पाणिग्रहणं, इत्याकर्ण्य कुमारः सविस्मयो गाथार्थं स्मृत्वा तासां पाणिग्रहणमकरोत् , तावत्ता न प्रासादो न ताः कन्याः, किन्तु स्वं भूमौ पश्यति, रथे गतश्च तमपि प्रियाशून्यं पश्यति । ततो विषण्णो गाथार्थं भावयन् यावदग्रतोऽटव्यां याति तावच्छ्रीजिनप्रासादं रत्नमयप्रतिमामण्डितं दृष्ट्वा वाप्यां कृतस्नानः कमलैः पारमेश्वरीं पूजां कुर्वन् प्रत्यासन्नसुमङ्गलापुरीस्वामिना सुधर्मनृपेण पितुर्मित्रेण पूजार्थं तत्रायातेनोपलक्षितः, पित्रा सहायाता सुन्दरी कन्या नैमित्तिकोक्तं सागरचन्द्रं वरं दृष्ट्वा प्रमुदिता । अत्रान्तरे सिंहनादश्चक्री पुत्रीपञ्चकं लात्वा तत्र प्रासादे समायातः, कुमारेण पूजां कृत्वा पृष्टः प्राह–कुमार ! जलधितटेऽमिततेजा विद्याधरो यः पूर्वं त्वया दृष्टः कमलमालामातुलः, तस्य कमलोत्पलौ द्वौ पुत्रौ, तत्र कमलेन भुवनकान्ता रथस्था अपहृता, स च

वताढ्ये गतः, उत्पलेन त्वं भूमौ क्षिप्तः, प्रासादः स्वविद्ययाऽदृश्यी कृतः कन्यापञ्चकं चापहृतं, अहं च सम्प्रत्येव तं हत्वा कन्यापञ्चकं लात्वाऽऽयातः, इत्याकर्ण्य कुपितः कुमारः कथञ्चित्सुधर्मनृपोपरोधेन सुन्दरीकन्यां परिणीय वैताढ्ये विमलद्वारपुरे सिंहनादकृतोत्सवोऽगात्। तत्र सिंहनाददत्ता बहुविद्या असाधयत्। ततो विद्याबलेन महतीं प्रौढीमगात्। ततोऽमिततेजा भुवनकान्तां तां कुमाराय समर्प्य स्वपुत्रयोरपराधमक्षमयत्, स्वभागिनेयीं प्रथमपत्नीं कमलमालां चानीय ददौ। ततः कुमारः सर्वाः कन्याः सम्मील्य विद्याधरपरिवृतः स्वं पुरं महामहोत्सवेनागात्, ततः कुमारः पञ्चविधसौख्यान्यनुभवति। अन्यदा तत्र पुरोद्याने भुवनचन्द्रकेवली समवसृतः, तं च राजा सपरिकरः प्रणम्य देशनान्तरे इदमपृच्छत्, यथा—भगवन्! सागरचन्द्रकुमारः केनापहृतः?, श्रीकेवली प्राह—महाविदेहे द्वौ भ्रातरौ वणिक्पुत्रौ, तत्र ज्येष्ठस्य भार्याऽतिस्नेहवती भर्तरि, अन्यदा ज्येष्ठे ग्रामान्तरं गते लघीयसा हास्येन भ्रातृजाया प्रोक्ता, यथा—भ्राता पथि चौरैर्व्यापादितः, तत् श्रुत्वा [सा] मृता, लघोः पश्चात्तापोऽभवत्, कालेन ज्येष्ठः समायातः, ज्ञाततत्स्वरूपो लघीयसा क्षमितोऽपि न क्षमते, सक्रोधस्तापसो भूत्वाऽसुरेषूत्पन्नः। लघुः श्रीजिनधर्मं श्रुत्वा प्रव्रजितः। पूर्ववैरं स्मृत्वा तेनासुरेण शिलां शिरसि मुक्त्वा मारितः प्राणतकल्पे गतः। असुरः संसारं भ्रान्त्वा पुनरसुरो जातः। द्वितीयः प्राणताच्च्युत्वा तव पुत्रस्सागरचन्द्रस्तेनासुरेणापहृतः पूर्ववैरात्, पुनर्वारमेकमुपसर्गं करिष्यति, ततस्सागरचन्द्राद्बोधमवाप्स्यति। इति पूर्वभवस्वरूपं श्रुत्वा सञ्जातजातिस्मृतिर्मन्त्रिभिरनेकधा वार्यमाणोऽपि पुत्रं राज्ये संस्थाप्य पितृभ्यां युतः कलत्रमन्त्रिसामन्तादिपरिवृतः प्रव्रजितः। ततो गाथामात्रमपि ज्ञानं ममाश्वासकं जातं, तन्नूनं बहुलस्यास्य माहात्म्यपर्यन्तो नास्तीति विचिन्त्य विशेषतः पठन् चतुर्दशपूर्वी जातः। ततः पालितदीर्घव्रतपर्यायः, प्रान्ते पादपोपगमनस्तेनैवासुरेण वैक्रियवज्रतुण्डपक्षिसिंहगजादिरूपैरुपसर्गितोऽप्यक्षुभितचित्तः, पुनः शान्तिभूतेन तेनैवासुरेण प्रशंसितः प्राप्तकेवलज्ञानो मोक्षमगात्

श्रीसागरचन्द्रः । असुरोऽपि जातसंवेगः सम्यक्त्वं प्रतिपद्य गतः, क्रमान्मोक्षं यास्यति । श्रीअमृतचन्द्रप्रभृतिसाधुसाध्वीवर्गे केनापि सुरलोकः केनापि सिद्धिसुखं प्राप्तमिति श्रीसागरचन्द्रचरितं समाप्तम् । तदेवं सागरचन्द्रस्येवान्येषामपि ज्ञानं व्यसनेष्वाश्वासकं शिवसुखकारणं च भवतीति भाव इति गाथार्थः ॥ ३८ ॥ पुनर्भङ्ग्यन्तरेण तस्यैव गुणमाह—

**पावाओ विणियत्ती, पवत्तणा तह य कुसलपक्खम्मि । विणयस्स य पडिवत्ती, तिन्नि वि नाणे समप्पंति ॥३९॥**

व्याख्या—पापाद्विनिवृत्तिः, तथा प्रवर्त्तना कुशलपक्षे—धर्ममार्गे, विनयस्य च प्रतिपत्ति–राश्रयणं, एते त्रयोऽपि गुणा ज्ञाने एव सति 'समाप्यन्ते' समर्थ्यन्ते—परिपूर्णा भवन्ति, तदभावे तु केचित् क्वचित्क्रियन्तोऽपि कथञ्चिद्भवन्ति, तथापि तेऽसम्पूर्णत्वाद्विडम्बनामात्रमिति भाव इति गाथार्थः ॥ ३९ ॥ ज्ञानगुणानामनन्तत्वात्सामस्त्येन भणनासामर्थ्यमुपदर्शयन्नाह—

**गंगाए वालुअं जो, मिणिज्ज उल्लिंचि[उं जो]ऊण(?)समत्थो । हत्थउडेहिं समुद्दं, सो नाणगुणे भणिज्जा हि॥४०॥**

व्याख्या—यो गङ्गाया वालुकां मिनुयात्, समुद्रं च हस्तपुटैरुल्लिञ्चितुं यः समर्थः, स एव ज्ञानगुणान् सर्वानपि भणेत्, नापरः । गङ्गावालुकासंख्यानादिवत्समस्तज्ञानगुणभणनमतिशयज्ञानिनाऽपि कर्तुमशक्यमिति भाव इति गाथार्थः ॥ ४० ॥

इति जिनपतिवाचा ज्ञानमाहात्म्यमुच्चै–र्जगति जनितचित्रं सर्वभव्याः ! विभाव्य ।
यदि हृदि शिवसौख्येष्वस्ति काङ्क्षा कुतश्चि–त्तदतिसकलयत्नाज्ज्ञानमेवार्जयध्वम् ॥ १ ॥

इति पुष्पमालाविवरणे (द्वितीयं) ज्ञानद्वारम् २ ।

अथोपष्टम्भद्वारं बिभणिषुः पूर्वद्वारेण सह सम्बन्धगर्भां गाथामाह—

**आहारवत्थमाईहिं, नाणीणुवग्गहं कुज्जा। जं भवगयाण नाणं, देहेण विणा न संभवइ ॥ ४१ ॥**

व्याख्या—आहारादिभिर्ज्ञानिनामुपग्रहं-उपष्टम्भं कुर्यात्। कुतः? इत्याह—यत्-यस्माद्भवगतानां जीवानां ज्ञानं देहेन विना न सम्भवति, सिद्धानां तु भवतीति विशेषणाशयः। अत्र च 'ज्ञानिनामाहारादिभिरुपष्टम्भः कर्तव्य इत्युक्तमिति द्वारद्वयस्य सम्बन्धः क्रमभणनकारणं च सूचितमिति गाथार्थः ॥ ४१ ॥

ननु यदि भवस्थानां ज्ञानं देहमन्तरेण न सम्भवति तर्हि ज्ञानिनामाहारदाने किमायातं? इत्याह—

**देहो य पुग्गलमओ, आहाराईहिं विरहिओ न भवे। तयभावे न य नाणं, नाणेण विणा कओ तित्थं? ॥४२॥**

व्याख्या—देहश्च-जीवच्छरीरं पुद्गलमयत्वादाहारादिभिर्विरहितो न भवति, विशीर्यत एवेत्यर्थः, वनस्पत्यादिषु तथैव दर्शनात्। तदभावे-देहाभावे च ज्ञानं नास्तीत्युक्तमेव। मा भूत्तर्हि ज्ञानमपीत्याह—ज्ञानेन विना कुतस्तीर्थं साध्वादिरूपं?, न कुतश्चिदित्यर्थः, तन्मूलत्वात्तस्येति गाथार्थः ॥ ४२ ॥ न चाहारादिगृद्धैरस्माभिरिदमुच्यत इत्याह—

**एएहिं विरहियाणं, तवनियमगुणा भवे जइ समग्गा। आहारमाइयाणं, को नाम परिग्गहं कुज्जा? ॥४३॥**

व्याख्या—एतैराहारादिभिर्विरहितानां साधूनां यदि तपोनियमादयो गुणाः समग्राः-परिपूर्णा भवेयुस्तदा आहारादीनां, आदि-शब्दाद्वस्त्रपात्रादीनां, परिग्रहं-स्वीकारं को नाम कुर्यात्?, प्रार्थनालाघवपर्यटनादिकष्टसाध्यत्वात्तेषां परिग्रहं न कश्चित्कुर्यादित्यर्थः, न

नैतदस्ति, अतस्तपोनियमादिगुणोत्सर्पणायैवायमुपदेशो, न गृद्ध्येति भाव इति गाथार्थः ॥ ४३ ॥ तस्माद्यदिह पर्यवसितं तदाह—

**तम्हा विहिणा सम्मं, नाणीणमुवग्गहं कुणंतेणं । भवजलहिजाणवत्तं, पवत्तियं होइ तित्थंपि ॥ ४४ ॥**

व्याख्या—यस्मादनन्तरोक्तन्यायेनाहाराद्यभावे तीर्थमुच्छिद्यते, तस्मात्सम्यग्विधिना ज्ञानिनामाहारादिभिरुपग्रहं कुर्वता प्राणिना भवजलधियानपात्रं तीर्थमपि सामर्थ्यात्प्रवर्तितं भवतीति गाथार्थः ॥ ४४ ॥

तदेवमाहारादिना दानप्रवृत्तिं व्यवस्थाप्य तद्दानविध्यादि प्रतिपादनार्थं द्वारगाथामाह—

**कह दायगेण एयं, दायव्वं ? केसु वा वि पत्तेसु ? । दाणस्स दायगाणं, अदायगाणं च गुणदोसा ॥४५॥**

व्याख्या—कथं दायकेनैतद्दातव्यमिति वाच्यम्, तथा केषु पात्रेषु तद्दातव्यमित्यपि भणनीयम्, तथा दानस्य दायकानां ये गुणाः स्युरदायकानां च ये दोषास्सम्भवन्ति ते च वक्तव्या इति गाथार्थः ॥ ४५ ॥ तत्राद्यद्वारमधिकृत्याह—

**आसंसाए विरहिओ, सद्धारोमंचकंचुइज्जंतो । कम्मक्खयहेउं च्चिय, दिज्जा दाणं सुपत्तेसु ॥ ४६ ॥**

व्याख्या—आशंसया इह परभवगतऋद्ध्यादिप्रार्थनरूपया विरहितः, श्रद्धया आहारादिदानोत्साहलक्षणया, रोमाञ्च एव कञ्चुकः, स जातोऽस्य स रोमाञ्चकञ्चुकितः । कर्मक्षयहेतोरेव दद्यात् दानं दायक इत्येकं द्वारं । केषु तद्दातव्यमिति द्वितीयमाह—शोभनपात्रेष्विति गाथार्थः ॥ ४६ ॥ तान्येव सुपात्राण्याह—

**आरंभनियत्ताणं, अकिणंताणं अकारविंताणं । धम्मट्ठा दायव्वं, गिहीहिं धम्मे कयमणाणं ॥ ४७ ॥**

व्याख्या–आरम्भनिवृत्तेभ्यः, अक्रीणद्भ्यः–मूल्येन वस्त्राहाराद्यगृण्हद्भ्यः, तथा आरम्भं क्रयं वाऽकारयद्भ्यः, धर्मे कृतमनोभ्यः, सामर्थ्यात् साधुभ्यो गृहिभिर्धर्मार्थं दानं दातव्यमिति गाथार्थः ॥ ४७ ॥

ननु यथोक्तगुणेभ्य एव सर्वमपि दानं दातव्यं, उत किञ्चिदन्यथाऽपीत्याशङ्क्याह—

**इय मोक्खहेउदाणं, दायव्वं सुत्तवण्णियविहीए । अणुकंपादाणं पुण, जिणेहिं सव्वत्थ न निसिद्धं ॥४८॥**

व्याख्या— इति–उक्तप्रकारेण दायकग्राहकगुणान्वेषणलक्षणेन सूत्रवर्णितविधिना च देयवस्तुगतोद्गमादिदोषविशुद्धरूपेण यदेव ज्ञानादिगुणयुक्तेभ्यः साध्वादिभ्यो मोक्षहेतुर्दानं दीयते तदेवेत्थं दातव्यं, अनुकम्पादानं पुनर्जिनैः–स्तीर्थकृद्भिः सर्वत्र रोमाञ्चादिशून्येऽपि दायके वनीपकादावपि पात्रे उद्गमादिदोषाविशुद्धेऽपि देयवस्तुनि न निषिद्धं, अनुकम्पामात्रप्राधान्यादेव तस्येति । यथा चेह तीर्थकृद्गणधरादिभ्यो दीयमानं दानं आनन्तर्येणैव मोक्षहेतुर्न तथाऽनुकम्पादानं, पारम्पर्येणैव तस्य मोक्षकारणत्वात्, इतीदमिह मोक्षहेतुत्वेन विवक्षितमिति गाथार्थः ॥ ४८ ॥ अथानुषङ्गत एव दातॄन्प्रोत्साहयन्नाह—

**केसिंचि होइ चित्तं, वित्तं अन्नेसिमुभयमन्नेसिं । चित्तं वित्तं पत्तं, तिन्नि वि केसिंचि धन्नाणं ॥ ४९ ॥**

व्याख्या—केषांचिद्दानश्रद्धालूनां चित्तमेव केवलं भवेत्, न वित्तपात्रयोगः । अन्येषां च वित्तमेव स्यात्, न चित्तपात्रयोगः । अन्येषां चोभयं चित्तवित्तलक्षणं स्यात्, न पात्रं । चित्तं वित्तं पात्रमिति त्रीण्यपि केषाञ्चिद्धन्यानामेवाद्भुतपुण्योदयेनैव भवेयुरिति गाथार्थः ॥ ४९ ॥ अथ तृतीयद्वारमाश्रित्याह—

**आरोग्गं सोहग्गं, आणिस्सरियं मणिच्छिओ विहवो। सुरलोयसंपया वि य, सुपत्तदाणाऽवरफलाइं ॥५०॥**

व्याख्या—आरोग्यं सौभाग्यं आज्ञैश्वर्यं मनीषितो विभवो—धनं देवलोकसम्पदपि च, एतानि सुपात्रदानस्यापराणि—मोक्षापेक्षयाऽन्तरालवर्त्तीनि फलानि, परं तु फलं मोक्षमेवेति गाथार्थः ॥ ५० ॥ तदेव दानस्योत्कृष्टं फलमुपदर्शयन्नाह—

**दाउं सुपत्तदाणं, तम्मि भवे चेव निव्वुआ के वि। अन्ने तइयभवेणं, भोत्तूण नरामरसुहाइं ॥ ५१ ॥**

व्याख्या—केचित्तथाविधाल्पकर्म्माणः सुपात्रदानं दत्वा तस्मिन्नेव भवे निर्वृत्ताः—सिद्धाः, अन्ये च नरामरसुखानि भुक्त्वा तृतीयभवे सिद्धा इत्यर्थः ॥ ५१ ॥ दानदातुर्गुणानेव सदृष्टान्तमाह—

**जायइ सुपत्तदाणं, भोगाणं कारणं सिवफलं च। जह दुण्ह भाउआणं, सुयाण निवसूरसेणस्स ॥ ५२ ॥**

व्याख्या—सुपात्रदानं भोगानां कारणं तथा शिवफलं च जायते। यथा सूरसेननृपस्य सुतयोर्द्वयोर्भ्रात्रोरित्यक्षरार्थः। भावार्थस्तु कथानकेनोच्यते, तद्यथा—इह भरते ऋषभपुरे अभयङ्करः श्रेष्ठी, कुशलमती भार्या, तौ च जिनधर्मरतौ जीवाजीवादितत्त्वज्ञौ, तयोर्गृहे एको गोपालोऽपरः कर्म्मकरः, तौ श्रेष्ठिसंसर्गेण जिनपूजन—मुनिदानादिधर्म्मभावितौ स्तः। अन्यदा चातुर्मासिके श्रेष्ठिना समं जिनभवने पूजानिमित्तं गतौ चिन्तयतः—धन्योऽयं श्रेष्ठी, यो नित्यं जिनान् प्रभूतवित्तव्ययेन पूजयति। ततोऽवाऽऽवां स्वकीयेनैव वित्तेन जिनार्चादि कृत्वा निजं जन्म फलं कुर्वः इति चिन्तितवन्तौ, ततो गोपालः स्वीयपञ्चकपर्दकुसुमैर्जिनपूजां चकार, कर्म्मकरः श्रेष्ठिना समं सुगुरुसमीपे प्रत्याख्यातोपवासो गृहं गत्वा आत्मयोग्यं परिवेष्य तदैव दैवयोगाद्ग्लानाद्यर्थं तत्रैवागतान्मुनीन्परमश्रद्धया

स्वं कृतार्थं मन्यमानः स्वकीयाहारेण प्रतिलाभितवान्, ततस्तयोस्तथा पुण्यनैपुण्यं दृष्ट्वा हृष्टः श्रेष्ठी सुतरां तयोर्वात्सल्यं करोति। इतश्च कलिङ्गदेशाधिपः सूरसेननृपो गोत्रिभिर्गृहीतराज्यः कुरुदेशे गजपुरनृपसेवां कुर्वन् ग्रामचतुष्कं प्राप्य तत्र सुकराभिधाने ग्रामेऽस्थात्। तस्य विजयादेवीकुक्षौ तौ द्वावपि मृत्वा पुत्रौ जातौ अमरसेन-वयरसेनाख्यौ, सम्प्राप्तयौवनौ कलाकुशलौ सकलजनप्रियौ गुणाकरौ जातौ। तौ च तादृशौ दृष्ट्वा सपत्नी माता मायाविनी राजानमुवाच-एतौ तव पुत्रौ दुःशीलौ रागान्धौ, यदा प्रभृति त्वं प्रस्थितस्तद्दिनादारभ्य मां प्रार्थयन्तौ मया निषिद्धौ, निजं शीलं संरक्षितं, अथ यत्त्वत्कुलोचितं तत्कुरु। इत्याकर्ण्य राजाऽज्ञात परमार्थो ग्राममातङ्गमुख्यमाकार्य तन्मस्तकानयनायादिदेश। स च तत्र गत्वा पुत्रयोस्तत्स्वरूपमवदत्। ताभ्यामुक्तं-पितुरादेशः प्रमाणमिति गृहाण मस्तके। तेनोक्तं-राज्ञा चेदविमृश्योच्यते, परं कथमहमीदृशं करोमि?, इति प्रसद्य युवां देशान्तरं यातः, चित्रकरेण मस्तके कारयित्वा राज्ञो दर्शयिष्यामि। इति श्रुत्वा तौ देशान्तरं प्रस्थितौ। मातङ्गेन तथा कृत्वा सन्ध्यायां मस्तके दर्शिते राज्ञः, तत् श्रुत्वा प्रमुदिता विमाता। ततस्तौ स्वबुद्ध्या विमातृप्रपञ्चं ज्ञात्वा देशान्तराश्चर्यावलोकने स्वोपकारिणीं मन्यमानौ कस्याञ्चिदटव्यां सन्ध्यासमये गतौ। रात्रौ वृक्षाधोऽमरसेनः सुप्तः, वयरसेनस्तु प्रहरके स्थितः। अत्रान्तरे वृक्षोपरिस्थया कीरपत्न्या भूमिस्थस्य स्वभर्तुः कीरस्य प्रोक्तं-स्वामिन्! एतौ महापुरुषौ समायातौ स्तः, कोऽप्येतयोरुपकारः क्रियते। कीरेणोक्तं-पक्षिभिः कथमुपक्रियते?। तयोक्तं-स्वामिन्! सुकूटशैले विद्याधरेण स्वविद्यापरीक्षार्थं विद्याऽभिमन्त्रितौ द्वावाम्रौ रोपितौ स्तः, तयोः फलमेतत्-एकस्य लघुफलस्य फलेन भुक्तेन प्रतिप्रातः पञ्चशती द्रम्माणां मुखात्पतति, द्वितीयस्य वृद्धफलस्य फलेन भुक्तेन सप्तमदिने राज्यं भवति, तयोः फले समानीयानयोर्दीयते। इति विचार्य तेन कीरमिथुनेन तत्कालं ते फले समानीय वयरसेनोत्सङ्गे मुक्ते। तेन स्वस्य राज्यमनिच्छता प्रभाते

प्रभावमनाख्याय वृद्धफलममरसेन [यार्पितं]स्यार्पितं, लघुफलं स्वयं भुक्तम् । द्वितीयेऽह्नि प्रभाते सम्भूते एकाकी भूत्वा वयरसेनः सरसि गत्वा यावद्गण्डूषं करोति तावत्पञ्चशती द्रम्माणां मुखात् पतिता । ततः प्रति (दिनं) नगरं भोजनवस्त्रादिभिर्विलसन्तौ गच्छतः । ततस्सप्तमेऽह्नि काञ्चनपुरे अमरसेनं बहिर्वृक्षमूले सुप्तं मुक्त्वा वयरसेनो भोजनादि कारयितुं मध्ये गतः । अत्रावसरे तत्पुरनृपस्यापुत्रस्य मृतस्य पञ्चदिव्यैरमरसेन[ाय]स्य राज्यं दत्तं । वयरसेनस्तु कौतुकी गच्छन्वो वेश्यागृहे स्थितः क्रीडां करोति, वृद्धभ्रात्राऽवलोकितोऽपि न दृष्टः । अन्यदा मागधिकाकुट्टिन्या निर्व्यापारस्य तस्य घनं धनव्ययं दृष्ट्वा तत्स्वरूपं पृष्टो वयरसेनः स्वऋजुत्वेन जठरस्थाम्रफलप्रभावमाह । ततस्तया वमनौषधैः पातितफलो निर्द्रव्यः स्वगृहान्निष्कासितस्तत्फलं स्वयं गृहीतं । ततो वयरसेनो विलक्षो रात्रौ पुराद्बहिर्गतो वस्तुत्रयकृते चौरचतुष्कं कलहं कुर्वाणं दृष्ट्वा चौरसंज्ञया तन्मध्ये मिलितस्तत्स्वरूपमपृच्छत् । तैरुक्तं—अस्माकं चतुर्णां कन्था-लकुट-पादुकारूपं वस्तुत्रयं त्वं विभज्य देहि । वयरसेनेनोक्तं—कः प्रभाव एतेषां ?, तैरुक्तं—एकेन सिद्धपुरुषेण षण्मासान् देवताऽऽराधनं कृतं, ततस्तया तुष्टयाऽर्पितान्यमूनि । प्रभावश्चायं—कन्थाप्रस्फोटने प्रत्यहं प्रगे दीनारपञ्चशती पतति, लकुटप्रभावाच्छस्त्रं न लगति, पादुकाभ्यां गगने गमनं स्यात् । ततः प्रभावं श्रुत्वा कुमारेणोक्तं—मया पुरा कदाऽपि योगिवेषो न परिदधे, तेन पूर्वं विलोकयामि । ततस्तैरुक्तं—तथाऽस्तु । ततः कुमारः कन्थां गले क्षिप्त्वा लकुटं लात्वा पादुके पादयोः प्रक्षिप्य आकाशे गतः, वञ्चिताश्चौराः । ततो देशान्तरं भ्रान्त्वा पुनस्तत्रैवायातः, कुट्टिन्या द्रव्यं विलसन् दृष्टः, प्रपञ्चं कृत्वा स्वगृहमानीतः । कालेन निर्व्यापारस्य घनं धनं दृष्ट्वा कुट्टिन्या पुनः प्रीत्या पृष्टः पादुकाप्रभावेण देशान्तराद्धनमानयामीत्याह । ततस्तयोक्तं—वत्स ! मया त्वयि गते त्वद्वियोगदुःखितपुत्रीकृते तवागमनार्थं समुद्रमध्ये यक्षस्योपायनं मानितमस्ति । तत्पादुकाप्रभावेण त्वत्प्रसादात्करोमि । कुमारेणोक्तं—तथाऽस्तु । ततः

कुमारः पादुकाबलेन कुट्टिन्या सह समुद्रान्तर्यक्षभवने गतः, पूर्वं तन्मध्ये प्रविशत्याक्ता कुट्टिनी पादुके परिधाय स्वं पुरं गता। कुमारस्तत्रैव स्थितः कान्दिशीकः, तावता तत्र कोऽपि विद्याधरः प्राप्तः, तेनोक्तं–'त्वया ममोपरोधेन पक्षमेकं यक्षपूजा विधेया, परं पार्श्ववर्तिवृक्षद्वयाधो न गन्तव्यं, इति शिक्षां मोदकादिकं च दत्वा गगनमार्गे गतः। अन्यदा कुमारेण कौतुकात्तद्वृक्षाधो गतेनाघ्रातं पुष्पं, जातः खरः। पुनः पक्षान्तरे समायातः खेचरस्तं तथा दृष्ट्वा द्वितीयवृक्षपुष्पमघ्रापयत्, पुनर्मनुष्यो जातः। खचरेण निष्ठुरमुपालब्धः। खचरं क्षामयित्वा 'किमेतदाश्चर्यं ?' इति कुमारपृष्टः खेचरः प्राह—खर-मनुष्यविद्याऽधिष्ठितौ वृक्षौ मया कारणेन रोपितौ स्तः। ततः कुमारेण तद्वृक्षद्वयपुष्पाणि पृथग् २ ग्रन्थौ बद्धानि। ततः पक्षमदिने विद्याधरेण कुमारः काञ्चनपुरे मुक्तः। तत्र पुनस्तथैव विलसन् कुट्टिन्या प्रपञ्चेन गृहे नीतः पृष्टश्च–कथं वत्स! त्वं समायातोऽत्र ?, अहं तु तदा केनापि सिद्धपुरुषेण पादुके लात्वा गच्छता पादलग्नाऽत्र त्यक्ता। कुमारेणोक्तं–यक्षप्रसादेनाहमायातः। तयोक्तं–यक्षेण तत्र किमपि दत्तं ?, तेनोक्तं–मर्मौषधी दत्ता, यया जरा याति यौवनमायाति। तयोक्तं–वत्स! तादृशीमौषधीं मम देहि। ततः कुमारेणाघ्रापिता सा तानि पुष्पाणि, जाता रासभी, चटितः कुमारः, कुट्टयन् लकुटेन निर्गतो नगरान्तरा, मिलितो बहुजनो, जातो हाहारवः, समायाता राजपुरुषाः, तेन दण्डेन ताडिता रटन्तो राजकुले गताः। ततः सपरिजनो राजा समागतः, राज्ञोपलक्षिततः कुमारः विज्ञातप्रपञ्चेन च मोचिता कुट्टिनी। मिलितौ द्वावपि भ्रातरौ, महान् प्रमोदोऽजनि। ततः स्वपितरौ तत्रानाय्य राज्यं कुरुतः। अन्यदा तौ द्वावपि गवाक्षस्थौ मुनियुग्मं दृष्ट्वा सञ्जातजातिस्मरणौ भक्तिभरेण तद्वन्दितुं गतौ। तयोरवधिज्ञानिना महर्षिणा सविशेषं पूर्वभवमुक्त्वा प्रोक्तं-साधुदानतरोः कुसुमसमं ते राज्यं, वयरसेनस्य तु पञ्चकपर्दकजिनार्चातरोर्दीनारपञ्चशत्यादिका लब्धिर्भोगप्राप्तिश्च, फलं तु द्वयोरप्यतः पञ्चभवान् देवलोक-नरलोकोत्तमभोगान् भुक्त्वा

षष्ठे भवे पूर्वविदेहेषु राज्यं भुक्त्वा नीरागसंयमेन मुक्तिः । इति पूर्वभवदानप्रभावं ज्ञात्वाऽनेकसत्रागाराणि कारयित्वा जिनचैत्यानि स्थापयित्वा सप्तक्षेत्रीं स्ववित्तेनापूर्य प्रान्ते प्रव्रज्य पञ्चमस्वर्गं गतौ । पूर्वोक्तक्रमेण महाविदेहे मोक्षं यास्यतः ॥ ५२ ॥

इति पात्रदाने अमरसेन–वयरसेनचरितं समाप्तम् ॥

---

अथ येभ्यो दीयमानं दानं विशेषतो बहुफलं भवेत् तान् दर्शयन्नाह—

**पहसंतगिलाणेसुं, आगमगाहीसु तह य कयलोए । उत्तरपारणगम्मि य, दिन्नं सुबहुप्फलं होई ॥ ५३ ॥**

व्याख्या—पथश्रान्तेभ्यो ग्लानेभ्य आगमग्राहिभ्यः तथा [च] कृतलोचेभ्यः साध्वादिभ्यस्तथा उत्तरपारणके च विधिना दत्तमशनादि सुष्ठु बहुफलं भवति । यतः–पथश्रान्तस्य पर्यटनाद्यक्षमस्यानुकम्पा मासकल्पविहारे स्थिरीकरणाद्याः, ग्लानस्यार्त्तध्याननिराकरणाद्याः, आगमग्राहिणां स्निग्धभक्तादिसम्पादनेन क्षयरोगाद्युत्पत्तिनिराकरणाद्याः, कृतलोचे स्थिरीकरणाद्याः, उत्तरपारणके चोपष्टम्भादयो गुणाः स्युरिति गाथार्थः ॥ ५३ ॥ अथ दातॄणामेवोत्साहनायाह—

**बज्झेण अणिच्चेण य, धणेण जइ होइ पत्तनिहिएणं । निच्चंऽतरंगरूवो, धम्मो ता किं न पज्जत्तं ? ॥५४॥**

व्याख्या—तावद्बाह्येनानित्येन च यदि धनेन पात्रनिक्षिप्तेन सता नित्यो मोक्षाऽन्तावस्थायित्वाद्, अन्तरङ्गरूपश्चौराद्यहार्यत्वाद्धर्मोऽर्हद्भाषितो भवति, तर्हि किं न परिपूर्णं ?, अपि तु सर्वमपीति गाथार्थः ॥ ५४ ॥

उक्ता दानदायकानां गुणाः, अथ तद्दायकानां दोषानाह—

दारिद्दं दोहग्गं, दासत्तं दीणया सरोगत्तं । परपरिभवसहणं चिय, अदिन्नदाणेणऽवत्थाओ ॥ ५५ ॥

व्याख्या—अदत्तेन दानेन, इति अवस्थाः स्युरिति वाक्यशेषः । काः ?, दारिद्र्यं दौर्भाग्यं दासत्वं दीनता सरोगत्वं परपरि-
भवसहनमिति गाथार्थः ॥ ५५ ॥ तथा—

ववसायफलं विहवो, विहवस्स फलं सुपत्तविणिओगो । तयभावे ववसाओ, विहवो चिय दुग्गइनिमित्तं ॥५६॥

व्याख्या—तावद्व्यवसायस्य फलं—साध्यं विभवः । विभवस्य फलं सुपात्रविनियोगः । तदभावे—विभवस्य सुपात्रविनियोगाभावे
व्यवसायो विभवोऽपि च दुर्गतिनिमित्तमेवेति गाथार्थः ॥ ५६ ॥ अपरञ्च—

पायं अदिन्नपुव्वं, दाणं सुरतिरियनारयभवेसु । मणुयत्ते वि न देज्जा, जइ तं तो तं पि नणु विहलं ॥५७॥

व्या०—प्रायोऽदत्तपूर्वं दानं, केषु ? इत्याह—सुरतिर्यङ्नारकभवेषु, देवैर्दीयमानस्याहृतादिदोषयुक्तस्य साधूनामकल्पनीयत्वात् , तिरश्चां तु
तथाविधबुद्ध्यादिसामर्थ्याभावात् , नारकाणां च साध्वादिदर्शनस्यैवाभावादिति भावः । प्रायो ग्रहणं तु देवानामत्रैव वक्ष्यमाणयुक्त्या
तिरश्चां च वैतरणीवानरादीनामिव केषाञ्चित्कचित्कदाचित् कियतोऽपि दानस्य सम्भवात् । ततः सम्पूर्णा दानसामग्री मनुजत्व एव, यदि
चातिदुर्लभे मनुजत्वेऽपि प्राप्ते कार्पण्यादिभावमालम्ब्य कश्चित्तद्दानं न दद्यात्तदा तदपि—मनुजत्वमपि विफलमेव गतमिति गाथार्थः। तथा—

उन्नयविहवो वि कुलुग्गओ वि समलंकिओ वि रूवी वि । पुरिसो न सोहइ च्चिय, दाणेण विणा गयंदुव्व ॥५८॥

व्याख्या—उन्नतविभवोऽपि सुकुलीनोऽपि अलङ्कृतोऽप्यलङ्कारादिभिः रूपवानपि पुरुषो दानेन विना न शोभत एव, यथा

गजेन्द्रो दानेन—मदेन विना न शोभते इति गाथार्थः ॥ ५८ ॥ अथ दानस्यादायकानां दोषदर्शनदक्षं दृष्टान्तमाह—

**लद्धो वि गरुयविहवो, सुपत्तखेत्तेसु जेहिं न निहित्तो। ते महुराउरिवणिओव्व, भायणं हुंति सोअस्स ॥५९॥**

व्याख्या—लब्धोऽपि महान् विभवः सुपात्राण्येव क्षेत्राणि । 'क्षेत्र'शब्दोऽत्रातिवृद्धिहेतुत्वात् । यतो—

"व्याजात्स्याद् द्विगुणं वित्तं, व्यवसायाच्चतुर्गुणं । कृषेः शतगुणं प्रोक्तं, पात्रेऽनन्तगुणं मतम् ॥ १ ॥" इति,

तेषु येन निक्षिप्तं, ते मथुरापुरीवणिगिव शोकस्य भाजनं भवन्तीत्यक्षरार्थः । तत्कथा चेयम् , यथा—

मथुरायां धनसारश्रेष्ठी, तस्य द्वात्रिंशतिर्द्रव्यकोट्यः प्रत्येकं निधि—वृद्धि—देशान्तरेषु, एवं षट्पष्टिकोटीशोऽपि न तिलतुषमात्रमपि धर्मे ददाति । भिक्षाचरं वीक्ष्य ज्वरश्चटति । अन्यमपि दातारं दृष्ट्वा प्रज्वलति । किं बहुना ?, गृहमानुषाण्यपि तस्मिन् बहिर्गत एव भुञ्जते । एवं च सति तस्य तथा कृपणत्वप्रसिद्धिर्यथा नाभुक्तः कोऽपि नामापि गृह्णातीति । अन्यदा निधिसत्कं द्रव्यमङ्गारीभूतं, जलमार्गस्थं त्रुडितं, स्थलमार्गस्थं चौरैर्गृहीतं । ततः शेषमुद्धरितं दशलक्षरूपमादाय समुद्रे प्रविष्टः । तत्र प्रवहणं भग्नं । ततो जलधिना क्वापि तीरे एकस्यामटव्यां प्रक्षिप्तश्चिन्तितवान्—हा !! मया न स्वयं किञ्चिद्भुक्तं नापि सुपात्रे दत्तं, ततो दानभोगरहितस्य मम नाश एव जातस्तृतीयः प्रकारः, पुनर्दैवेन दर्शितः कुटुम्बविरहोऽपीत्यादि । तावत्तत्र तत्कालोत्पन्नकेवलं देवासुरसेवितं महर्षिमेकमालोक्य हृष्टस्तं नत्वा देशनां श्रुत्वा स्वद्रव्यगमनकारणमपृच्छत् । केवली प्राह—धातकीखण्डे भरतक्षेत्रे द्वौ भ्रातरौ, ज्येष्ठः सरलो गम्भीरो दाता दीनादीनामनवरतं ददाति । लघुः क्षुद्रः, ततः प्रद्वेषमत्यन्तं वहति तस्मिन्, वारितोऽपि ज्येष्ठो ददात्येव दानं, ततो लघुर्विभक्तो जातः। ततः क्षीणसर्वधनोऽजनि । ज्येष्ठस्य तु निजपुण्यैस्तथैव वर्द्धते विभवः । ततो लघुना मत्सरेण राजाऽग्रे अलीकं पैशून्यं कृत्वा द्रव्यं ग्राहितः

सः । ततस्तद्वैराग्याज्ज्येष्ठः प्रव्रज्य सौधर्मे सुरो जातः । लघुरज्ञानतपः कृत्वाऽसुरः । स च ततश्च्युत्वा त्वं जातः । ज्येष्ठः ताम्रलिप्तीपुर्यां व्यवहारिपुत्रो भुक्तभोगः प्रव्रजितः, सञ्जातकेवलः सोऽहं । यत्त्वया पूर्वभवे दानद्वेषः कृतस्तेन कर्मणा कृपणो जातस्त्वं धनं च सहसा गतं । इति श्रुत्वा ज्ञातपूर्वभवः सञ्जातसंवेगो गृहीतसम्यक्त्वश्रावकव्रतो 'लाभचतुर्थांश एव रक्षणीयः, अंशत्रयं धर्मे व्ययनीय'मिति कृताभिग्रहः केवलिनं नत्वा ताम्रलिप्तीं गतः । अन्यदा व्यन्तरोद्वासिते कस्मिंश्चिच्छून्यगृहे रात्रौ प्रतिमया स्थितस्तद्व्यन्तरेण सर्वां रात्रिं कृतोपसर्गो न क्षुब्धः । प्रातस्तुष्टो व्यन्तरो वरं ददाति । स तु नेच्छति । ततो व्यन्तरेणोक्तं–मथुरां गच्छ, पुनस्त्वं षट्षष्टिकोटीशो भविष्यसि । ततस्तत्र गतेन तथैव च निधानादिषट्षष्टिकोट्यो लब्धाः । महादानपुण्यं कृत्वा धर्ममाराध्य सौधर्मेऽरुणाभविमाने चतुष्पल्योपमायुर्देवो जातः, (ततश्च्युतो) महाविदेहेषु मोक्षमगादिति धनसाराख्यानकं+ समाप्तम् ॥

इति जिनपतिभिर्भाषितं युक्तिभिस्तद्, ददतु ददतु दानं न श्रियः स्थाप्यमन्यत् ।
यदसदपि गुणित्वं ज्ञानवत्त्वं यशस्त्वं, जनयति कुलजत्वं विश्ववन्द्यं शिवं च ॥ १ ॥

इति पुष्पमालावृत्तौ तृतीयमुपष्टम्भद्वारं समाप्तम्, तत्समाप्तौ च समर्थितस्त्रिविधोऽपि दानधर्मः ॥

अथ क्रमप्राप्तः शीलधर्मः प्रोच्यते–तत्र यद्यपि शीलशब्दः स्वभाव–ब्रह्म–चारित्रेषु, तथापीह लोकरूढ्याद्याश्रयणाद्ब्रह्मचर्यरूपं शीलं विभणिषुः पूर्वद्वारेण सह सम्बन्धगर्भां गाथामाह—

**इय इक्कं चिय दाणं, भणियं नीसेसगुणगणनिहाणं । जइ पुण सीलं पि हवेज्ज, तत्थ ता मुद्दियं भुवणं ॥६०॥**

+ इदं च कथानकं जलधितीरे श्लोकव्याख्यामेव यावत्प्रकृतोपयोगि, शेषं तु प्रसङ्गतः कथितमिति बृहद्वृत्तौ ।

व्याख्या—इत्युक्तप्रकारेण एकमपि दानं निःशेषगुणगणनिधानं भणितं। यदि पुनः शीलमपि–परकलत्रादिवर्जनरूपं देशतो ब्रह्मचर्यपालनलक्षणं, तत्र–दानदायके प्राणिनि भवेत्तदा गुणभणनमाश्रित्य "मुद्दियं"ति मुद्रितं–स्थगितं भुवनं, नातः परं गुणकथा भुवनेऽस्तीति भाव इति गाथार्थः ॥ ६० ॥ उक्तार्थसमर्थनायैव शीलगुणान् दिदर्शयिषुराह—

**जं देवाण वि पुज्जो, भिक्खानिरओ वि सीलसंपुन्नो। पुहइवई वि कुसीलो, परिहरणिज्जो बुहयणस्स ॥६१॥**

व्याख्या—"जं"ति यस्मात् भिक्षानिरतोऽपि शीलसम्पूर्णश्चेद्देवानामपि पूज्यः स्यात्। पृथिवीपतिरपि कुशीलस्तदा बुधजनस्य–चतुरलोकस्य परिहरणीयः, "बहुजणस्से"ति पाठे बहुलोकस्येति गाथार्थः ॥ ६१ ॥

तथा सर्वानिष्टं मरणमपि शुद्धशीलरत्नवतः प्रशस्यते। सर्वजीवेष्टं जीवितमपि विगलितशीलस्य निन्द्यते इति दर्शयति—

**कस्स न सलाहणिज्जं, मरणं पि विसुद्धसीलरयणस्स। कस्स व न गरहणिज्जा, विगलियसीला जियंता वि ॥६२॥**

व्याख्या—उक्तार्था ॥ ६२ ॥ ननु सुवहमेवैतत्ततो व्यर्थमित्थं तन्माहात्म्यकीर्तनमित्याशङ्क्याह—

**जे सयलपुहविभारं, वहंति विसहंति पहरणुप्पीलं। नणु सीलभरुव्वहणे, ते वि हु सीयंति कसरुव्व ॥६३॥**

नन्विति पराक्षेपे, ये सकलपृथिव्याः भारं वहन्ति–तां परिपालयन्ति, तथा प्रहरणोत्पीडां विषहन्ते, तेऽपि निश्चितं शीलभरोद्वहने कसराः–कल्होडका इव सीदन्ति, रावणाद्याश्चेह दृष्टान्ता वाच्या इति गाथार्थः ॥६३॥ अथ दृष्टान्तान् दर्शयन् शीलरक्षणोपदेशमाह—

**रइरिद्धिबुद्धिगुणसुं–दरीण तह सीलरक्खणपयत्तं। सोऊण विम्हयकरं, को मइलइ सीलवररयणं ? ॥६४॥**

व्याख्या—शीलमेव परमालङ्कारहेतुत्वाद्वररत्नं, तत्को मलिनयति ?, न कोऽपीत्यर्थः, किं कृत्वा ? इत्याह—तथा—तेन शास्त्रप्रसिद्धेन प्रकारेण विस्मयकरं शीलरक्षणप्रयत्नं श्रुत्वा, कासां ? इत्याह—सुन्दरी शब्दः प्रत्येकमभिसम्बद्ध्यते, ततश्च रतिसुन्दरी ऋद्धिसुन्दरी बुद्धिसुन्दरी गुणसुन्दरी, तासां कथाः पुनरेवम्—

साकेतपुरे जितशत्रुर्नृपः, तत्र नृप-श्रेष्ठि-मन्त्रि-पुरोधःपुत्र्यो रतिसुन्दरी-ऋद्धिसुन्दरी-बुद्धिसुन्दरी-गुणसुन्दरीनाम्न्यश्चतस्रः सख्यो जिनधर्ममर्मविदः, तत्र नृपपुत्री नन्दनपुरनृपेण परिणीता, तां चात्यन्तसुरूपां श्रुत्वा हस्तिनापुराधिपः सर्वबलेन तत्पतिं हत्वा तां जग्राह, सा राज्ञाऽनेकचाटुभिः प्रार्थ्यमाना मदनफलादियोगेन वमनादिना स्वदेहस्याशुचित्वमदर्शयत् । भणति चैवं—सर्वोऽप्यशुचिर्मदेहस्तत्कुतोऽनुरागः ?, नृपः प्राह—प्रिये ! मम तव नयनयोर्महामोहः, ततस्तया रात्रौ शस्त्रेण नयने उत्कीर्य राज्ञो हस्ते दत्ते, राजा च तद्दृष्ट्वा वैराग्यं गतः । तद्व्यतिकरेण राज्ञि खिद्यमाने च रतिसुन्दरीकायोत्सर्गाकृष्टदेवतया नूतने नयने दत्ते । लोके शीलधर्म्मप्रभावो विस्तृतः, ततः सा प्रव्रज्य स्वर्गमगात् ॥ १ ॥

श्रेष्ठिपुत्री ऋद्धिसुन्दरी व्यवहारिपुत्रेण परिणीता, स सकलत्रः प्रवहणे आरूढः, भग्ने प्रवहणे काष्ठं लब्ध्वा सभार्यः शून्यद्वीपे क्वापि गतः, तत्र जलार्थमागतेनान्यवणिजा स्वप्रवहणे नीतः । तत ऋद्धिसुन्दरीरूपमोहितेन तेन तत्पतिं समुद्रे पातयित्वा प्रार्थिता सा प्राह—"स्त्रीणां शतेन नैक-स्तृप्यति पुरुषोऽनिरुद्धकरणो यः । एकापि नैव तृप्यति, युवतिः पुरुषैश्च निःशेषैः ॥ १ ॥" तत्किं मुह्यसि ?, ततः स तूष्णीं स्थितः, तदपि प्रवहणं भग्नं, सा फलकमेकं प्राप्य सोपारके गता । तत्र पूर्वायातस्तस्याः पतिर्मिलितः, कथितोऽन्योऽन्यं स्ववृत्तान्तः, ततस्तौ भवविरक्तौ तत्र तिष्ठतः । वणिगपि फलके विलग्नस्तत्रैवागतः । मत्स्याहारैर्जातकुष्ठो दृष्टस्ताभ्यां उपचरितश्च, जात-

पश्चात्ताापश्च तया प्रतिबोध्य परदारविरतिं ग्राहितः, तत्र धनमुपार्ज्य सर्वे स्वस्थानं प्राप्ताः । ऋद्धिसुन्दरी समये प्रव्रज्य स्वर्गं गता ।

मन्त्रिपुत्री बुद्धिसुन्दरी सार्थवाहपुत्रेण परिणीता । पितृगृहे गवाक्षस्था नृपेण दृष्टा । तदनुरक्तो राजा मिथ्यादोषमुद्भाव्य सकुटुम्बं तं धृत्वा दिव्यशुद्धं चाह–विराधितस्त्वमिति, यदि परं उत्केन त्वां मुञ्चामि । मन्त्री प्राह---यदादिशति देवः, ततो राज्ञाऽऽदिष्टा बुद्धिसुन्दरी उत्के मुक्ता । ततः सा राज्ञाऽभ्यर्थिता न मन्यते । अन्यदा तया स्वानुकारा मदनमयी पुत्रिकाऽमेध्यभृता कारिता शृङ्गारिता स्वस्थाने मुक्ता । स्वयं च प्रच्छन्ना स्थिता । रात्रौ राजा तत्रागतः । पुत्रिकां तद्बुद्ध्याऽऽलापयति । अभाषमाणायाश्चालापयितुं यावन्मुखमुन्नमयति तावत् प्रागेवालग्नमुक्तं शिरः पपात । प्रसृतो दुर्गन्धः, मुखं मोटयन् किमेतदिति चिन्तयति नृपस्तावता सा प्रकटीभूय प्राह–यादृशीयं तादृश्यहमपि बही रम्याऽन्तरमेध्यपूर्णा, तथा च—"अशुचिरसमांसमिश्राणि, यत्रास्थीन्येव केवलानि पुनः । अजिनेन वेष्टितानि च, को देहेऽत्राभिरमते तत् ? ॥१॥" इत्याद्युक्तोऽपि यावन्न प्रतिबुद्ध्यते नृपस्तावत्सा सहसा गवाक्षात्स्वं मुक्त्वा भूमौ पपात । ततो लज्जितो नृपस्तत्रागत्य कृतोपचारां तां भगिनीं भणित्वा क्षामयित्वा तद्वचसा परदारविरतिं जग्राह । लोके यशोऽजनि । कालेन प्रव्रज्य स्वर्गं गता ॥ ३ ॥ पुरोधसः पुत्री गुणसुन्दरी श्रावस्त्यां विप्रपुत्रेण परिणीता । सा साकेतपुरविप्रपुत्रेण पल्लीतो भिल्लधाटीमानीय सरूपत्वाद्गृहीता, पल्ल्यां सा तेन प्रार्थ्यमाना चूर्णयोगेनातीसारमकरोत् स्वदेहे, स च तस्या अनेकप्रतीकारपरोऽप्यनिवर्त्यमाने तस्मिन्नशुचिखरण्टितां तां दृष्ट्वा निर्विण्णः । तदा ज्ञातभावया तया प्रतिबोधितस्तां श्रावस्त्यां स्वपितृगृहे मुमोच । अन्यदा सर्पदष्टो द्विजस्तयोपचरितो जिनधर्मं परदारविरतिं च प्रतिपन्नः । साऽपि वैराग्यात् प्रव्रज्य स्वर्गं गता ॥ ४ ॥

एवं चतस्रोऽप्येताः शीलप्रभावात् स्वर्गसौख्यं भुक्त्वा चम्पापुर्यां महेभ्यगृहेषु पृथक्पृथगुत्पन्ना रूपसौभाग्ययुताः । तत्रेभ्यपुत्रेण

विनयन्धरकुमारेण परिणीताः। अन्यदा तासां रूपं श्रुत्वा राज्ञा विनयन्धरकुमारेण सह मैत्रीं कृत्वा कौटिल्येनान्तःपुरदोषमुद्भाव्य तद्गृहे मुद्रां कारयित्वा ताः स्वान्तःपुरे प्रक्षिप्ताः। तदा ताः शीलानुभावतो देवतया कुरूपाः कृताः। ततो भीतेन विस्मितेन च राज्ञा मुक्ताः पुनः सुरूपा जाताः, विनयन्धरोऽपि सम्मानितः। लोके शासनप्रभावना, कालेन केवलिपार्श्वे राज्ञा पृच्छा कृता, ततस्तासां पूर्वभवं देवतासान्निध्यं च श्रुत्वा संवेगमापन्नो राजा विनयन्धरश्च सपत्नीकः प्रव्रज्य क्षितकर्ममलो मोक्षङ्गतः। इति रतिसुन्दर्यादिचरितं समाप्तं॥ शीलमाहात्म्यं ख्यापयन्नाह—

जलही वि गोपयं चिय, अग्गी वि जलं विसं पि अमयसमं। सीलसहायाण सुरा, वि किंकरा हुंति भुवणम्मि ६५

व्याख्या—इह भुवने शीलसहायानां जलधिरपि गोष्पदमेव, अग्निरपि जलं, विषमप्यमृतसमं, भवेदिति शेषः। तथा सुरा अपि किङ्करा भवन्तीति गाथार्थः॥ ६५॥ तथा—

सुरनररिद्धी नियकिं-करिव्व गेहंगणेव्व कप्पतरू। सिद्धिसुहं पि व करयल-गयं व वरसीलकलियाणं॥६६॥

व्याख्या—सुरनरयोस्सम्बन्धिनी ऋद्धिर्निजकिङ्करीव स्वायत्ता भवतीति भावः। कल्पतरुर्गृहाङ्गणे इव, सकलवाञ्छितार्थप्राप्तेः। आस्तामेतदैहिकं फलं, यावत्सिद्धिसुखमपि वा करतलगतमिव निर्मलशीलकलितानां भवतीति गाथार्थः॥ अत्रैव दृष्टान्तप्रतिपादनार्थमाह—

सीयादेवसियाणं, विसुद्धवरसीलरयणकलियाणं। भुवणच्छरियं चरियं, समए लोए वि य पसिद्धं॥६७॥

व्याख्या—सीता-देवसिकयोर्विशुद्धवरशीलरत्नकलितयोर्भुवनस्याप्याश्चर्यरूपं चरितं समये-सिद्धान्ते लोकेऽपि च प्रसिद्धमिति

गाथाक्षरार्थः ॥ तत्र सीताचरित्रं सुप्रसिद्धमेवेति नेह विस्तरेणोच्यते, स्थानाशून्यार्थं तु किञ्चिदुच्यते, तद्यथा—लङ्काधिपं निहत्य स्वपुर्यामयोध्यायामानीतायाः सीताया गर्भे समुत्पन्ने मासद्वयेऽतिक्रान्ते रामेण दोहदे पूरिते अन्यदा पूर्वार्जिततीव्रकर्मोदयादतीवापवादः प्रासार्षीत्, यदुत—'इयच्चिरं रावणगृहे कथमखण्डशीला सीता ?' इति । ततोऽपवादभीरू रामः सीतात्यागाय लक्ष्मणमादिदेश । स च निःश्वस्याह—

"जइ चलइ मंदरो सुमइ, सायरो लहसइ मयलदिसिचक्कं ।
तहवि हु न चलइ सीलं, सीआए महासईयराए ॥ १ ॥" किञ्च—
"कत्तो वि दुज्जणाणं, अविज्जमाणो वि फुरइ परदोसो। सच्छा वि हु सूरकरा, कलुसल्लिया कोसियकुलस्स ।२॥"

किञ्च—सीतायां त्यक्तायां त्रिभुवनेऽपि तेऽपवादः । अमुक्तायां तु पुर्यामेव संशयितः स इति । तथापि रामे तमसदाग्रहममुञ्चत्युद्विग्नो लक्ष्मणः स्वगृहं गतः । ततो रामादिष्टः कृतान्तवदनः सेनानीः सीतामाह—स्वामिनि ! जिनभवनवन्दनदोहदस्तेऽभूत् तदत्र तानि वन्दितानि, शेषदेशेषु तद्वन्दने रघुराजेनाहमादिष्टस्ततो रथमारोहतु स्वामिनी इति । साऽपि हृष्टा तथाऽकरोत् । ततो ग्रामाकरनगररम्यां बहुमहीमुल्लङ्घ्य गङ्गापरपारे भीषणारण्ये रथं संस्थाप्य गद्गदगिरा रामादेशं सहेतुं सीतायै न्यवेदयत् सः । सीता तु तदाकर्ण्य मूर्च्छिता भूमौ पपात, तेनोपचरिता तु लब्धचैतन्या दैवं नानोपालम्भैः सम्भावयन्ती विलपति पतति मूर्च्छति । सेनानीरपि तां तथा पश्यन् स्वं निन्दन् विलम्बमानोऽपि गत्वा रामाय तज्जगौ । रामोऽपि तत् श्रुत्वा मूर्च्छति विलपति, सीता गुणान् स्मारं स्मारं पश्चात्तापं करोति । इतश्च पुण्डरीकपुरेशः सुश्रावको वज्रजङ्घराजा गजबन्धनाय तत्रागतो विलपन्तीं सीतां भगिनीत्वेन प्रतिपद्य स्वगृहेऽनैषीत् । सा च तत्र पुत्रयुगं सुलग्ने लव—कुशनामकं प्रासूत । तारुण्ये लवो बहुकन्याः परिणिन्ये । कुशार्थे तु पृथुराजा प्रार्थितः 'कथमज्ञातकुलशीलस्य सुतां

दधि ?' इत्याह । वज्रजङ्घः कुपितस्तदुपरि प्रस्थितः । रघूद्वहौ तु ज्ञाततद्व्यतिकरौ रणाग्रे भूय पृथुराजं जित्वा जयश्रिया सह तत्पुत्रीं जगृहतुः । अन्यानपि बहुन्नृपतीन् जित्वा तद्देशान् गृहीत्वा महानृपती भूतौ । अन्यदा नारदाद्रामलक्ष्मणस्वरूपं ज्ञात्वा ताभ्यां सह रणाय लग्नौ तौ, तत्र हलमुशलचक्रध्वजफलेषु नूनमेतौ बल-केशवाविति चिन्तयतो रामलक्ष्मणयोर्युष्मत्पुत्रावेतौ, मा खिद्येथामित्यादि-नारदेनोक्ते हृष्टौ बलकेशवावुपपुत्रमागतौ, तावपि तत्पादयोः पतितौ, तदा च रामः स्मृतसीतागुणश्चिरं विललाप । ततः पुत्राभ्यां सह पुरं प्रविश्य महोत्सवमकारयत् । ततो 'दुःखेन तिष्ठन्तीं सीतामानाययतु देव !' इति सर्वसामन्तैर्विज्ञप्तो रामः प्राह–अस्त्वेवं, यदि परं प्रत्ययेन प्रमार्ष्टि जनापवादं । ततस्तत्प्रतिपद्य विभीषणादिखेचरैः पुराद्बहिर्मञ्चान् बन्धयित्वा सकलराजादिलोकान् मेलयित्वा पुष्प-कविमानेन महाविभूत्या समानीता सीता "तो रोहामि तुलाए, जलणं पविसेमि लेमि वा फालं । उग्गं वा पियामि विसं, अन्नं च करे-मि जं भणसि ॥ १ ॥" इति तयोक्ते रामः प्राह–देवि ! जानाम्येव शशिकुलधवलं ते शीलं, तथापि लोकप्रत्यायनाय ज्वलनं प्रविशेति, तुष्टा सीता तं प्रतिपेदे, रामः पुराद्बहिर्हस्तशतत्रयं समचतुरस्रावगाढां वापीमचीखनत्, चन्दनकाष्ठैः पूरयित्वाऽग्निरुद्दीपितः, ज्वालाभिः कवलितं नभः । अत्रान्तरे कस्यापि मुनेः केवलमहिमार्थं तत्रायातः शक्रस्तं व्यतिकरं ज्ञात्वा सीतायाः शीलेन तुष्टो वैयावृत्यार्थं हरिणै-गमेषिणं प्रैषीत् । सीताऽपि पञ्चपरमेष्ठिनमस्कारं स्मृत्वा आत्मानं शीलशुद्धं श्रावयित्वा हाहारवमुखरेषु पश्यत्सु लोकेषु ज्वालामाला-जटिले ज्वलने झम्पां ददौ, तावता नाग्निर्न धूमो नेन्धनं, किं त्वम्भोभृता नलिनीवनखण्डमण्डिता वापी, मध्ये चैकस्मिन् महापद्मे सीतोपविष्टा दृष्टा जनैः । प्रवर्द्धमानेन वापीनीरेण तु पुरी प्लावयितुं लग्ना । पौराः पुनर्भीताः सीतापादयोर्विलग्नाः, सीताकरस्पर्शाच्च तद्वापीमात्रमभूत् । पुष्पवृष्टिदुन्दुभिगीतनृत्यादिदेवकृतोत्सवः प्रवृत्तः । लक्ष्मणपुत्रादयः पादयोः पतन्ति । रामः प्राञ्जलिः क्षामयित्वा

राज्यस्वामित्वविषयैः प्रार्थयन्ति सीतां, सीता तु 'येषु गृद्धया मया विनाऽप्यपराधमियद् दुःखं प्राप्तं, अथ तेषु कः प्रतिबन्धः?' इत्याशुक्त्वा तदैव शिरसि लोचं कृतवती, ततो देवैर्दत्तवेषा केवलिसमीपे नीता चरणं प्रतिपद्य सम्यगाराध्याच्युतेन्द्रोऽभूत् । रामस्य तु यथोचितं वाच्यम् । [सीतया] पूर्वभवे वेगवत्या नाम्न्या ग्रामेण पूज्यमानस्य साधोर्मत्सरेण कलङ्को दत्तः, ततो लोकः साधौ विरक्तः, देवतानुभावात् तस्या मुखं स्थूनं, ततो सीता सा 'मयाऽलीकमुक्त'मिति लोके प्रोचे, ततः पुनर्मुनेः पूजा, इति यन्मुनेरभ्याख्यानं दत्तं शोधिश्च कृता, तेन कर्मणा तस्या द्वयमपि जातमिति ॥ इति श्रीसीताऽऽख्यानं समाप्तम् ॥

देव[सिका]सेना (?) चरितं त्विदम्—ताम्रलिप्तीपुर्यां कमलाकरश्रेष्ठी, जिनसेनः पुत्रो जिनधर्मपरः, स च रत्नाकरपुरनिवासिधर्मगुप्तश्रेष्ठिपुत्रीं देव[सिकां]सेनां (?) परिणीतवान् । अन्यदा पितर्युपरते जिनसेनोऽर्थोपार्जनाय देशान्तरं गच्छन् देव[सिकया]सेनया (?) भणितः—नाथ ! त्वं तत्र गतोऽन्यान्यरमणीभिर्लोभयिष्यसे । स प्राह—यावज्जीवं ममापररमणीरमणे नियम इति, तथापि सा न प्रत्येति । ततो जिनसेनो देवतामाराध्य तद्दत्तं पद्मद्वयं लात्वैकं पत्न्याः करे समर्प्यापरं स्वकरे कृत्वा बभाण—त्वच्छीलस्खलने मत्करकमलं मच्छीलस्खलने त्वत्करकमलं शुष्यतीति प्रत्ययः । ततः क्रयाणकानि गृहीत्वा स्वस्थचित्तो जलाध्वना पार्श्वकूलमगात् । तत्र राजमान्यो व्यवसायं कुर्वन् प्रत्यहं करकृतकमलस्तत्पुरनिवासिव्यवहारिपुत्रैश्चतुर्भिर्दृष्टस्तत्कमलस्वरूपं पृष्टो यथार्थं प्राह । ते तथाऽश्रद्दधानाश्चत्वारोऽपि ताम्रलिप्त्यामागताः, कस्याश्चित् परिव्राजिकाया गृहे स्थिताः, तैर्लक्षं लक्षं द्रव्यं मानयित्वा तस्य गृहे प्रेषिता परिव्राजिका देव[सिकाऽग्रे]सेनाऽग्रे धर्मकथां कथयति । सा शृणोति, प्रत्यहं यात्यायाति सा । अन्यदा परिव्राजिकया तस्या गृहशुन्याश्चूर्णमिश्राहारो दत्तस्तस्या नेत्रे स्पन्देते, तद्दृष्ट्वा देव[सिकया]सेनया (?) कारणं पृष्टा परिव्राजिका प्रपञ्चेन कूटध्यानं नाटयित्वा प्राह—इयं शुनी

भद्रे ! मम पूर्वभवसखी, तत्र यमलकणाऽनेकैर्लक्षणैः प्रार्थ्यमाना तेषां वचो नामन्यत, सम्प्रति शुनी जाता मां दृष्ट्वा ज्ञातपूर्वभवा पश्चात्तापेन रोदिति, इति श्रुत्वा देवसेना (?)(देवसिका)ऽचिन्तयत्–नूनमियं दुराचारिणी, केनापि कामिना प्रेषिता मम शीलभङ्गार्थं कल्पितवचांसि वक्ति, अन्यथा कथं सा शीलवती मृत्वा शुनी जाता ?, तर्हि तथा करिष्ये यथा अस्याः प्रपञ्चो मिथ्या भविष्यतीति ध्यात्वा देव[सिका]सेना (?) प्राह–तर्हि मया किं विधेयम् ?, तयोक्तं चत्वारः पुरुषाः प्रत्येकं लक्षाभरणास्तव सौभाग्याकृष्टाः पार्श्वकूलादायाताः सन्ति, तैः सह स्वयौवनं कृतार्थयेति। देव[सिका]सेना (?) प्राह–एवमस्तु। ततः परिव्राजिका सङ्केतेनैकः कृतशृङ्गारः समायातः, देव[सिका]सेना (?) स्वदासीं शृङ्गारयित्वा शिक्षां दत्वा द्वारि संस्थाप्य स्वयं प्रच्छन्ना स्थिता, दास्या लोहशिलाकां तापयित्वा स ललाटे दम्भितो दासीभिर्मिलित्वोद्दालितसर्वाभरणो विलक्षो गतः। त्रपया स्वस्वरूपमन्येषां नोक्तं। पुनर्द्वितीयेऽन्हि द्वितीयो गतः, सोऽपि गृहिताभरणोऽङ्कितः। एवं चत्वारोऽपि। ततः सर्वेऽपि समदुःखाः परस्परं सद्भावमुक्त्वा लज्जिताः परिव्राजिकोपरि द्विष्टास्तस्या नासां कर्णौ च छित्वा पार्श्वकूले गताः। तद्व्यतिकरं देव[सिकया]सेनया (?) ज्ञात्वा चिन्तितं–मा एते तत्र गता मम पत्युः किमपि विरूपकं कुर्वीरन्निति श्वश्रूसमक्षं उक्त्वा यानपात्रेण सपरिवारा प्रस्थिता। अन्तराऽकृतपूजया मिथ्यादृग्देवतया प्रवहणे भग्ने सम्यग्दृष्टिदेवतया शीलादिगुणाकृष्टया क्षणार्द्धेन सपरिवारा पार्श्वकूले नीता। तत्र पत्युः सर्वं प्रोक्तं, पुरुषवेषेण राज्ञः प्राभृतं कृत्वोक्तवती–अस्माकं चत्वारः किङ्करा बहुद्रव्यं लात्वा ताम्रलिप्तीपुर्या अत्रायाताः सन्ति। राज्ञोक्तं–विलोक्य गृण्हन्तु। तयोक्तं–सर्वे पुरुषा राजादेशेनात्रायान्ति तदा सुज्ञानं स्यात्। राज्ञोक्तं–किमपि तेषामुपलक्षणं चिन्हमस्ति ?। तयोक्तं–ललाटे अस्मत्स्वामिनोऽङ्काः सन्ति। ततो राज्ञा सर्वे पुरुषास्तत्र सभायामाहूताः। तया विलोक्य चत्वारोऽपि प्रकटिताः। उक्तं चैते ते मम किङ्कराः। राज्ञः सर्वलोकानां च महान् विस्मयः। अहो

एतेऽस्मत्पुरप्रधानव्यवहारिपुत्राः कथं किङ्करा जाताः ? । ते च पृष्टा अपि त्रपया न वदन्ति । ततो देव[सिकया]सेनया(?) यथास्थिते कथिते राज्ञा ते चत्वारोऽपि तस्याः समर्पिताः, उक्तं चैतेषां दुष्टानां यद्युक्तं तदेव कुरु । ततस्तया धर्मदेशनया सम्बोध्य परदार-विरतिं ग्राहिताः सत्कृत्य मुक्ताः । देव[सिकाऽपि]सेनाऽपि राज्ञा लोकैश्च स्तुता कृतशीलप्रभावना पत्या सह स्वावस्थानपुरं प्राप्ता कालेन त्रिभुवनचन्द्रकेवलिधर्म्मदेशनां श्रुत्वा सञ्जातवैराग्या प्रव्रज्य प्राप्तकेवलज्ञाना मोक्षमगात् । इति देवसिकाचरितं समाप्तम् ॥

अन्वयदृष्टान्तावभिधाय व्यतिरेकदृष्टान्तमाह—

**विसयाउरेहिं बहुसो, सीलं मणसा वि मइलियं जेहिं । ते निरयदुहं दुसहं, सहंति जह मणिरहो राया ॥६८॥**

व्याख्या—यैर्विषयातुरैः सद्भिर्मनसाऽपि शीलं बहुशोऽनेकवारं मलिनीकृतं, ते दुःसहं नरकदुःखं सहन्ते, यथा मणिरथो राजेति गाथार्थः ॥ ६८ ॥ तत्कथा चेयम्—अवन्तीदेशसारे सुदर्शनपुरे मणिरथो राजा, तस्यैवानुजो युगबाहुर्युवराजः, तस्य पत्नी मदनरेखा । अन्यदा तस्या रूपरक्तेन ज्येष्ठेन दूतीमुखेन प्रार्थिता साऽऽह—

"अन्नम्मि वि परदारे, सप्पुरिसाणं न वट्टइ मणं पि । जं पुण बहुजणकम्मि वि, कायपवित्ती महापावं ॥ १ ॥"

"सीलं चिय परमगुणो, नारीणं जइ न सो वि मह होज्जा । तो के गुणा य अन्ने ?, अणुरज्जइ जेसु नरनाहो ॥२॥" किञ्च-

"तुच्छाणं भोगाणं, कज्जे पाविहिसि तिहुयणे अयसं । घोरे य पडिहिसि नरए, दुहाइं किणिउं सहस्सेणं ॥३॥"

ततो विरमैतदकार्यादित्यादि, दूत्या चैतन्निवेदितं तस्य, तथाप्यनिवृत्तकामग्रहः स्वभ्रातजिघांसया छिद्राणि विलोकयति । अन्यदा वसन्ते क्रीडार्थं वने गतः, तत्रैव सुप्तो मणिरथ[युगबाहु]स्तेन व्यापादितः । ततो मदनरेखया युगबाहोरन्त्यावस्थां ज्ञात्वा कर्णमूले भूत्वा

मधुरगिराऽऽराधना कारिता, प्रतिपन्नभावचरणो भूत्वा ब्रह्मलोके उत्पन्नः । ततः शेषपरिजनेषु क्रन्दत्सु

"मज्झ निमित्तं वहिओ, नियबंधू जेण सो अवस्सं पि । गं[भं]जिहइ मज्झ सीलं, तम्हियाणि रक्खिउं जुत्तं ॥१॥"

इति विचिन्त्य सगर्भा मदनरेखा राजाग्रे नष्टा, कान्तारमध्ये पुत्ररत्नं प्रसूता । तत्करे युगबाहुनामाङ्कां मुद्रां क्षिप्त्वा तत्रैव मुक्त्वा वस्त्रादिक्षालनार्थं सरसि गता । तत्र जलगजेन गृहीत्वा गगने उच्छालिता पितृमुनेर्वन्दनार्थं नन्दीश्वरे गच्छता मणिप्रभविद्याधरेणान्तरा गृहीता । पुत्रार्थं विलपन्ती तेनोक्ता–तव पुत्रोऽश्वापहृतेन मिथिलापुरीस्वामिना पद्मरथेन गृहीतः पुष्पमालाया अर्पितः, इति मम प्रज्ञप्त्योक्तं. ततो मुञ्च विषादं, मया सह रमस्व खेचरीश्वरी भव, तावता तेन नीता नन्दीश्वरे मुनिसमीपे । अत्रान्तरे मदनरेखाकारिताराधनः पञ्चमस्वर्गादागतो युगबाहुर्देवस्तां त्रिःप्रदक्षिणीकृत्यावन्दत । ततो मुनिदेशनाबुद्धेन विद्याधरेण क्षामिता । देवस्तां मिथिलायां स्वपुत्रान्तिके मुक्त्वा स्वस्थानमगात् । तत्र प्रव्रजिता मदनरेखा, पुत्रः सर्वारिनमनान्नमिनाम्ना पद्मरथेनोक्तः, यौवनप्राप्तं च तं राज्ये संस्थाप्य प्रव्रज्य पद्मरथो मोक्षमगात् । इतश्च मणिरथस्तस्यामेव रजन्यां कालसर्पदष्टः चतुर्थे नरके उत्पन्नः । मन्त्रिभिर्युगबाहुपुत्रो ज्येष्ठश्चन्द्रयशा राज्ये स्थापितः । अन्यदा नमिनृपतेर्धवलगज आलानमुन्मूल्य वनं व्रजन्नन्तरा चन्द्रयशसा राज्ञा गृहीतः । नमिराज्ञा मार्गितोऽपि यावत्स न मुञ्चति, तावत् सबलवाहनो नमिस्तदुपर्यागतः । नमिमात्राऽऽर्यया तत् श्रुत्वा तयोः स्ववृत्तान्तं ज्ञापयित्वा द्वावपि भ्रातरौ मेलितौ प्रतिबोधितौ । चन्द्रयशाः स्वराज्यं नमेर्दत्त्वा प्रव्रजितः । अन्यदा नमिनृपतेर्देहे दाघज्वरः षाण्मासिको जातः । तदुपशमनार्थमन्तःपुरीभिर्घृष्यमाणे चन्दने बहुवलयरवो राज्ञः कर्णकटुरिति वलयमेकैकं रक्षयित्वा घर्षणं कुर्वन्ति । ततो राज्ञा चिन्तितं–यद्यहमप्येकाकी भूत्वा तिष्ठामि, तदा सुखमनुभवामि वलयदृष्टान्तेन । ततः प्रत्येकबुद्धस्सञ्जातजातिस्मृतिर्दाघदोषमुक्तः पुत्रं राज्ये संस्था-

प्य देवतादत्तलिङ्गः प्रव्रज्यां प्रतिपन्नः शक्रेण परीक्षितोऽक्षोभ्यचित्तः प्रणतः, स्वर्गं गतः [शक्रः]। मुनिरपि निरवद्यां दीक्षां पालयित्वा सिद्धिं गतः। इति मणिरथचरितं समाप्तं, प्रसङ्गान्नमिचरितमपि।

इह च यदेव प्रकर्षमापन्नमुक्तनीत्या प्राणातिपातादिषु निमित्ती भवति, तदेव मनसा शीलविराधनं नरकदुःखहेतुर्विवक्षितं, न तन्मात्रमिति गाथार्थः ॥ ६८ ॥ शीलमहात्म्यख्यापनार्थमेवाह—

**चिंतामणिणा किं? तस्स, किं च कप्पद्दुमाइवत्थूहिं?। चिंताईयफलकरं, सीलं जस्सऽत्थि साहीणं ॥६९॥**

व्याख्या–तस्य चिन्तामणिना किं?, न किञ्चिदित्यर्थः, किं वा कल्पद्रुमादिवस्तुभिः?, आदिशब्दात्कामधेन्वादिपरिग्रहः, यस्य चिन्तातीतं मोक्षप्राप्त्यादिफलकरं शीलं स्वाधीनमस्ति। चिन्तामण्यादयः कल्पितस्वरूपाणि हिरण्यलाभादीन्येव फलानि प्रयच्छन्ति, शीलं तु चिन्तातीतं मोक्षादिकं फलमपि करोतीत्येतदेवो[पादेयं]पेयं, नान्यदिति भावार्थः ॥ ६९ ॥

इति जिनपतिदिष्टं देहभाजो! यथेष्टं, कृतगुणगणलीलं शीलधन्त्वे शीलम्।
दिविजमनुजराजाऽभ्यर्चनाभक्तिहेतु-र्यदिह विकसदापत्सागरोत्तारसेतुः ॥ १ ॥

इति पुष्पमालाविवरणे [द्वितीयः] शीलधर्मः समर्थितः ॥ ४ ॥

---

अथ तपोधर्मं विभणिषुः शीलधर्मेण सह सम्बन्धगर्भां गाथामाह—

**इय निज्जियकप्पद्दुम–चिंतामणिकामधेणुमाहप्पं। धन्नाण होइ सीलं, विसेसओ संजुयं तवसा ॥ ७० ॥**

व्याख्या—इत्युक्तनीत्या निर्जितकल्पद्रुमचिन्तामणिकामधेनुमाहात्म्यं शीलं धन्यानां केषाञ्चिद्भवति, विशेषतस्तपसा संयुक्तमिति, शीलसम्पन्नोऽपि तपसैव विशिष्टां कर्म्मनिर्जरामाप्नोतीति शीलानन्तरं तपः प्रोच्यते इतीह सम्बन्धः प्रोक्तो द्रष्टव्य इति गाथार्थः ॥७०॥

कतिभेदं पुनस्तत्तपः ? कथं कैश्च विधेयं ? इत्याह—

**समयपसिद्धं च तवं, बाहिरमब्भिंतरं च बारसहा । नाऊण जहाविरियं, कायव्वं तो सुहत्थीहिं ॥ ७१ ॥**

व्याख्या—'समयः' सिद्धान्तः, तत्प्रसिद्धं तपो बाह्यमभ्यन्तरं च तावद् द्वादशधा, तच्चाशेषैर्गुरुसमीपे ज्ञात्वा यथावीर्यं—स्वशक्त्यनुसारेण कर्त्तव्यं, न सर्वथा शक्तिर्गोपनीया, यत उक्तं—" तित्थयरो चउनाणी, सुरमहिओ सिज्झियव्वए धुवम्मि । अनिगूहियबलविरिओ, सव्वत्थामेण उज्जमइ ॥ १ ॥ किं पुण अवसेसेहिं, दुक्खक्खयकारणा सुविहिएहिं । होइ न उज्जमियव्वं ?, सपच्चवायंमि जियलोए ॥ २ ॥" न च शक्त्यतिक्रमेण तत्कर्त्तव्यम् । यदुक्तं—"सो य तवो कायव्वो, जेण मणो मंगुलं न चिंतेइ । जेण न इंदियहाणी, जेण य जोगा न सीयंति ॥ १ ॥ " कैः कर्त्तव्यमिदं ? इत्याह—सुखार्थिभिः, न तु भवाभिनन्दिभिरिति गाथार्थः ॥ ७१ ॥ किमिति तपः कर्त्तव्यमित्याशङ्क्य तन्माहात्म्यं ख्यापयन्नाह—

**जं आमोसहिविप्पो—सही य संभिन्नसोयपमुहाओ । लद्धीओ हुंति तवसा, सुदुल्लहा सुरवराणं पि ॥७२॥**

व्याख्या—यस्मात्कारणादामर्षणमामर्षः संस्पर्शनमित्यर्थः, स एव कुष्ठादिव्याध्यपनयनसमर्थत्वादौषधिरामर्षौषधिः । अयम्भावः—यया संस्पर्शनमात्रादेव सकलव्याधीनपनयति, सा लब्धिरामर्षौषधिः, यया विप्रुड्विष्ठायाः सुगन्धयः स्युः संस्पर्शमात्रादेव च सकल-

व्याधीनपनयति, सा लब्धिर्विप्रुडौषधिः, तथा सम्भिन्नं—सर्वशरीरव्यापि श्रोतः—श्रवणं यस्यां लब्धौ सा, अथवा श्रोतांसि—इन्द्रियाणि संभिन्नानि—एकैकशः सर्वविषयैः परस्परतो वा यस्यां सा तथा, अथवा परस्परतो लक्षणतोऽभिधानतश्च सम्भिन्नान्—सुबहूनपि शब्दान् शृणोति यया सा सम्भिन्नश्रोतोलब्धिः, प्रभृतिग्रहणात् खेल—मलौषध्यादिकाः जङ्घाचारणादिकाश्च गृह्यन्ते, सर्वा अप्येतास्तपसा कस्यचित्साधोरेव भवन्ति । तत्र सुराणां न सम्भवत्यतस्तेषामप्यतिदुर्लभा एताः, इत्यालोच्य तप एव कर्त्तव्यं, एवमुत्तरत्रापि तपो माहात्म्यमुद्भाव्य यथायोगमित्थं सम्बन्धः कर्त्तव्य इति गाथार्थः ॥ ७२ ॥ तथा—

**सुरसुंदरिकरचालिय-चमरुप्पीलो सुहाइं सुरलोए । जं भुंजइ सुरनाहो, कुसुममिणं जाण तव तरुणो ॥ ७३ ॥**

व्याख्या—कश्चित् कार्त्तिकश्रेष्ठ्यादिको जीवः प्राग् जन्मनि शुद्धं तपो विधाय सुरलोके सुरनाथत्वेनोत्पन्नः सुरसुन्दरीकरचालितचमरोत्करः प्रवरवैषयिकसुखानि यद् भुङ्क्ते, तत्कुसुममात्रमेव जानीहि, कस्य ? इत्याह—तप एव तरुस्तस्य तपस्तरोः, फलं तु मुक्तिसुखमेवास्येति गाथार्थः ॥ ७३ ॥

**जं भरहमाइणो च—क्किणो वि विप्फुरियनिम्मलपयावा । भुंजंति भरहवासं, तं जाण तवप्पभावेणं ॥७४॥**

यद्भरताद्याश्चक्रिणोऽपि विस्फुरितनिर्मलप्रतापाः सन्तो भरतक्षेत्रं भुञ्जन्ति, तत्तपोमाहात्म्यादेवेति जानीहीत्यक्षरार्थः ॥ ७४ ॥

**पायाले सुरलोए, नरलोए वा वि नत्थि तं कज्जं । जीवाण जं न सिज्झइ, तवेण विहिणाऽणुचिण्णेणं ॥७५॥**

पाताले देवलोके मनुष्यलोके वाऽपि जीवानां तत्कार्यमेव नास्ति, यद्विधिनाऽनुचीर्णेन तपसा न सिद्ध्यतीत्यक्षरार्थः ॥ ७५ ॥

विसमं पि समं सभयं, पि निब्भयं दुज्जणो वि सुयणोव्व। सुचरियतवस्स मुणिणो, जायइ जलणो वि जलनिवहो॥

व्याख्या— 'विषममपि' सङ्कटरूपमपि समं—सम्पदारूपं, तथा सभयमपि निर्भयं, दुर्जनोऽपि स्वजन इव, ज्वलनोऽपि जलनिवह इव जायते, कस्य ? इत्याह—सुचरिततपसो मुने-र्महात्मनः, उपलक्षणं चैतत्तेनोग्रतपस्विनामन्येषामप्येतत् सकलं तपःप्रभावात्सम्पद्यत इति गाथार्थः ॥ ७६ ॥ अथ च तपसोऽतिगरीयस्त्वं दुष्करत्वं चाकलय्योत्पन्नभक्त्यतिरेको ग्रन्थकृत्तपःकर्तृसाधूनां प्रणाममाह—

तवसुसियमंसरुहिरा, अंतो विप्फुरियगरुयमाहप्पा। सलहिज्जंति सुरेहि वि, जे मुणिणो ताण पणओहं॥७७॥

व्याख्या—ये तपःशोषितमांसरुधिरा अन्तर्विस्फुरितगुरुकमाहात्म्याः सुरैरपि श्लाघ्यन्ते, तेभ्यो मुनिभ्योऽहं प्रणतोऽस्मीति गाथार्थः ॥ ७७ ॥ अथ दृष्टान्तपूर्वं तपोमाहात्म्यं स्पष्टयन्नाह—

जं नंदीसेणमुणिणो, भवंतरे अमरसुंदरीणं पि। अइलोभणिज्जरूवं, संपत्तं तं तवस्स फलं ॥ ७८ ॥

व्याख्या—यन्नन्दिषेणमुनेर्भवान्तरे—श्रीवसुदेवभवलक्षणे अमरसुन्दरीणामप्यतिलोभनीयं रूपं सम्प्राप्तं—जातं, तत्तपस एव फलमित्यक्षरार्थः, भावार्थस्तु कथानकेन कथ्यते—

मगधदेशे शालिग्रामे विप्रपुत्रो नन्दिषेणः, तस्मिन् जाते मातापितरौ मृतौ, सर्वमपि गृहधनं गतं, दुःखेनाष्टवर्षो जातः, बालकालाद्दुर्भगो रूपादिहीनः सर्वदोषमन्दिरं भिक्षां भ्रमन् मगधपुरे मातुलगृहे गतो गृहकर्माणि कुर्वंस्तिष्ठति। मातुलः सप्तपुत्रीभ्य एकैकां तस्य ददाति, ताः सर्वा अपि कृतमरणनिश्चया दुर्भगत्वात्तं नेच्छन्ति, किं पुनरन्याः कन्याः, ततो निर्विण्णो वैभारगिरिशृङ्गात्पतत्केनाऽपि

मुनिना निवारितस्तत्पार्श्वे दीक्षां गृहीत्वा एकादशाङ्गान्यधीत्य द्वादशविधं तपः कुर्वन् जघन्यतः कृतषष्ठतपोऽभिग्रहो दशविधवैयावृत्त्ये कृतयावज्जीवाभिग्रहः साधूनामिच्छतां निरवद्याशनादि आनीय ददाति। अन्यदा तस्य वैयावृत्त्यस्थिरताप्रशंसां शक्रकृतामश्रद्दधानौ द्वावमरौ साधुवेषेण परीक्षार्थमत्रायातौ। एको बहिः स्थितः, अपरस्तद्वसतावागत्य ग्रीष्मे मध्याह्ने षष्ठपारणे प्रथमकवलमुरिक्षपन्तं नन्दिषेणं महामुनिमुवाच—यदत्र गणे कश्चिद्ग्लानप्रतिजागरकोऽस्ति ? तदमन्त्यावस्थाप्राप्तं [ग्लानं] प्रतिजागर्तु। ततस्त्यक्त्वा कवलं सहसोत्थितः स प्राह—क्व क्व सः प्रतिवसति ग्लानः?, केनौषधेनार्थः?। देवमुनिराह—अरण्ये स्थितोऽस्ति सोऽतिसारकी, त्वं पुनर्निर्लज्ज ! निश्चिन्तो मिष्टभोजी रात्रिदिवास्वपि निरपेक्षः वैयावृत्त्यकरोऽहमेतावतैव तुष्टः। ततो नन्दिषेणस्तं क्षमयति निन्दति चात्मानं। अथ देवर्षिस्तस्थेत्रकालदुर्लभान्यौषधानि उष्णोदकं चानाय्य प्रतिगृह्यमनेषणामकरोत्। तथाऽप्यदीनचित्तः कथञ्चिद्व्याक्षिप्ते सुरे तत्सर्वं गृहीत्वा प्राप्तो ग्लानमुनिपार्श्वे, सोऽपि नन्दिषेणं वीक्ष्य क्रुद्धो वक्ति—अहमेनामवस्थां प्राप्तोऽरण्ये तिष्ठामि, त्वं पुनर्निर्भाग्यशेखर ! निर्लज्ज ! सुखेन तिष्ठसि तत्रेत्येवं निर्भर्त्सितोऽपि पुनस्तमपि क्षमयित्वाऽनुज्ञाप्याशुचिरसानुलिप्तं तद्देहं प्रक्षाल्यासौ स्कन्धे कृतो नन्दिषेणेन। सोऽप्युपरि स्थितो दुर्गन्धं मुञ्चत्यशुचिरसं, शिरसि गुरुप्रहारैर्हन्ति, 'रे दुरात्मन् ! किं न समं गच्छसि ?, कठिनहस्तैर्ममाङ्गं किं गाढं धरसि ?, न वेत्सि ? परपीडां, यत्पदे पदे मे दुःखमुत्पादयसि, रे दुष्ट ! निष्ठुर ! निष्कृप ! निस्त्रप ! कथं वैयावृत्त्यं प्रतिपन्न ?' इत्यादि निष्ठुरं भणतस्तस्य नन्दिषेणश्चिन्तयति—कथमस्य साधोः समाधिर्विधेया, यदहमसम्यग्व्रजंस्तस्य व्याधिविधुरस्य मुनेः पीडां करोमि, तन्मिथ्यादुष्कृतं इत्यादि चिन्तयन् शुद्धधीर्नन्दिषेणः प्राह—मा कुरु खेदमिदानीं त्वां सुखेन नयामि, यथा नीरुग् भविष्यसि तथा मया कर्तव्यम्, मा क्रोधं कुरु, क्षमस्व, एवं मधुरं जल्पन्नविना देवाभ्यामक्षोभ्योऽयमिति ज्ञात्वा प्रकटीभूय प्रदक्षिणापूर्वं नत्वा भणितं—त्वमेव

धन्यस्त्वमेव पूज्यो भुवनस्य, यस्य सुरेन्द्रो वैयावृत्ये निश्चलत्वं प्रशंसतीत्यादि स्तुत्वा क्षमयित्वा मुनिं स्वागमनकारणमुक्त्वा स्वर्गं गतौ। मुनिरप्यनाकुलचित्तो मध्यस्थमना गुर्वन्तिकेऽविरतवैयावृत्यमालोचयति। ततो विशेषतस्तपोवैयावृत्यादि कुर्वन् पञ्चपञ्चाशद्वर्षसहस्राणि श्रामण्यं पालयित्वा कृतसंलेखनः प्रान्ते दौर्भाग्यं स्त्रीजनपराभवं विरूपत्वं पितृमरणादि च स्मृत्वोद्विग्नः साधुभिर्वारितोऽपि यद्येतस्य तपसः फलमस्ति, तर्हि मनुष्यभवे मम सौभाग्यं स्त्रीजनवल्लभत्वं सुरूपत्वं लोकवल्लभत्वं भूयादिति कृतनिदानो मृत्वा सप्तमस्वर्गे सप्तदशसागरोपमस्थितिर्देवो जातः। ततः सौरीपुरेऽन्धकवृष्णेर्देव्याः सुभद्रायाः पुत्रो वसुदेवनामा रूपादिसम्पन्नस्समजनि। स च यथा सौभाग्यभूमिर्देशान्तरं गतोऽनेकविद्याधरनरेन्द्रकन्याभिः परिणीतः, यथा च यादवानां मिलितो, यथा वासुदेवः पुत्रो जातस्तथा सर्वं वसुदेवहिण्डेर्ज्ञेयमिति नन्दिषेणकथानकं समाप्तम्। तपस एव माहात्म्यं ख्यापयन्नाह—

**सुरअसुरदेवदाणव——नरिंदवरचक्कवट्टिपमुहेहिं। भत्तीए संभमेण य, तवस्सिणो चेव थुव्वंति॥ ७९॥**

व्याख्या—इह सुरा—वैमानिकाः, असुराः—भवनपतयः, देवाः—ज्योतिष्काः, सूर्यादीनां लोकेऽपि देवत्वेन प्रसिद्धेः, दानवा—उपलक्षणत्वादेव व्यन्तराः, नरेन्द्रवराः—मण्डलिकादिभूपतयः, चक्रवर्त्तिनः प्रसिद्धाः, प्रमुखग्रहणेन सामन्तामात्यश्रेष्ठ्यादि(परि)ग्रहः, एतैः सर्वैरपि भक्त्या सम्यग्दृष्टिभिः सम्भ्रमेण वा शापदानादिभयेन वा मिथ्यादृष्टिभिरपि तपस्विन एव स्तूयन्ते इति गाथार्थः॥ ७८॥

सुखार्थिभिश्च तपस्येव यतितव्यमित्याह—

**पत्थइ सुहाइं जीवो, रसगिद्धो नेय कुणइ विउलतवं। तंतूहिं विणा पडयं, मग्गइ अहिलासमित्तेण॥८०॥**

व्याख्या—तावत् सर्वोऽपि संसारिजीवः कामभोगादिसम्भवानि सुखानि प्रार्थयते, अथ च रसेषु—मधुरादिषु गृद्धस्तत्कारणभूतं न करोति विपुलं तपः। स चैवंविधः सन् कीदृशो द्रष्टव्यः? इत्याह—स नूनं कारणभूतैस्तन्तुभिर्विना अभिलाषमात्रेणैव पटं मृगयते। अयम्भावः—यथा स्वहेतुतन्तुसङ्घाताभावे पटो न भवेत्, तथा सुखान्यपि स्वकारणभूततपोविरहितानि न सम्भवन्ति, अतस्तदर्थिना तत्रैव यतितव्यमिति गाथार्थः ॥ ८० ॥ पूर्वोपचितकर्मणामपि तप एवापगमहेतुरित्याह—

**कम्माइं भवंतरसं—चियाइं अइकक्खडाइं वि खणेण। डज्झंति सुचिण्णेणं, तवेण जलणेण व वणाइं ॥८१॥**

व्याख्या—कर्म्माणि भवान्तरसञ्चितानि अति"कक्खडाणि"(कर्कशाणि)—दुर्भे(र्भे)द्यान्यपि क्षणेन दह्यन्ते सुचीर्णेन तपसा, केन कानीव?, ज्वलनेन वनानीवेति गाथार्थः ॥ ८२ ॥ अत्रार्थे दृष्टान्तमाह—

**होऊण विसमसीला, बहुजीवखयंकरा वि कूरा वि। निम्मलतवाणुभावा, सिज्झंति दढप्पहारिव्व ॥८२॥**

व्याख्या—इह केचिद्विषमशीला—असदृशाचारा बहुजीवक्षयंकरा अपि क्रूरा अपि भूत्वा निर्मलतपोऽनुभावादृढप्रहारीव सिद्ध्यन्तीत्यक्षरार्थः ॥ ८२ ॥ भावार्थः कथानकेनोच्यते, यथाहि—

वसन्तपुरे अग्निशर्म्मविप्रपुत्रः क्रूरकर्म्मा मांसाशी मद्यपानलुब्धो दोषैः समं वृद्धिं गतोऽनर्थभीरुणा पित्रा निर्वासितोऽटव्यां गतश्चौरैर्मिलितो धाटीषु गतो न मुञ्चति बालं वृद्धं गां महिषीं वा, प्रहरत्येव। ततस्तैः कृतदृढप्रहारिनामा सेनापतौ मृते स एव सेनापतिः कृतः। अन्यदैकस्मिन् ग्रामे धाट्यां गतस्तत्र क्षुधितैश्चौरैर्दरिद्रविप्रगृहात्पायसस्थाली गृहीता। तद्डिम्भै रुदद्भिः स्नातुं गतस्य पितुर्नि-

वेष्टितं, स च भार्यया निवार्यमाणोऽपि धावितश्चौरेभ्यः शपते । ततः कोपेन दृढप्रहारिणा विप्रशिरश्छिन्नं, तद्दृष्ट्वा गर्भवती विप्रभार्या क्रुद्धा दृढप्रहारिणमाक्रोशति, तेनाप्यतिक्रुद्धेन खड्गेन तस्या उदरं विदारितं । गर्भोऽपि द्विधाभूतो भूमौ पतितः । तं तथा वीक्ष्य दृढप्रहारी परमं निर्वेदमुपगतस्तुच्छकर्म्मैकव्यचश्चिन्तयति–हा !! अत्रावतीर्य मया सर्वं पापमेव समाचीर्णं, स नास्ति जीवो यो मया निर्दयेन न हतः, तथा कामदृगच्छलितेन इयन्तं कालं परदाररमणाभक्ष्यभक्षणापेयपानादीनि पापान्याचीर्णानि, इदं पुनर्महापापं चिन्तयितुमपि न तीर्यते ।

" जम्हा इत्थी गब्भवि, मणुस्सिणी बंभणी दरिद्दा य ।
गब्भेण य सह निहया, ता कत्थ गयस्स मह सुद्धी ? ॥ १ ॥ "

किं वह्नौ विशामि ? पर्वताद्वा पतामि ? नीरं वा साधयामि ? इत्यादि यावच्चिन्तयति तावन्महर्षिमेकं समीप एव विलोक्य तत्र गत्वा तं नत्वा देशनां श्रुत्वा प्रव्रजितस्सत्त्वनिधिरेवंविधमभिग्रहमकरोत्–मार्यमाणेनापि न मया रोषः कर्त्तव्यः, अन्यच्च यावद्दुर्गमं स्फुरत्स्फुरन्तं स्मरामि तावच्च चतुर्विधमाहारं गृहीष्यामि । ततश्चौरत्वेनोपद्रुतलोकोत्पादितोपसर्गान्सर्वानप्यदीनमना सहन् शुद्धध्यानेन केवलज्ञानमुत्पाद्य सिद्धः श्रीदृढप्रहारी, इति दृढप्रहारिकथानकं समाप्तम् । दृष्टान्तान्तरमाह–

संघगुरुपच्चणीए, तवोणुभावेण सासिउं बहुसो । विण्हुकुमारव्व मुणी, तित्थस्स पहावगा जाया ॥ ८३ ॥

व्याख्या–सङ्घगुरुप्रत्यनीकान् प्राणिनस्तपोऽनुभावेन अनुशिक्षयित्वा बहुशोऽनन्तकालेन बहवः साधवस्तीर्थस्य प्रभावका जाताः, क इव ?, विष्णुकुमार इव । कः पुनरसौ ? इत्युच्यते–

हस्तिनागपुरे पद्मोत्तरो नृपः, ज्वालाख्या पट्टराज्ञी जिनधर्म्मरता । तयोः सिंहस्वप्नसूचितो विष्णुकुमारो ज्येष्ठः पुत्रः, चतुर्दशस्व-

प्रसूचितो द्वितीयो महापद्मः। ज्येष्ठो निःस्पृहः, इतरः समीहते, इति राज्ञा युवराजत्वे स्थापितः। इतश्चोज्जयिन्यां श्रीमुनिसुव्रतशिष्याः सुव्रताचार्याः समायाताः, श्रीधर्म्मनृपो वन्दनार्थं गतः, तदमात्यो नमुचिर्नास्तिको धर्म्मनिन्दां कुर्वन् क्षुल्लकेन वादे जितः साधुषु प्रद्विष्टो रात्रौ साधुमारणार्थं गतो देवतया तत्रैव स्तम्भितः। प्रभाते राज्ञा लोकैश्च दृष्टो निन्द्यमानो लज्जया निर्गत्य हस्तिनागपुरे गतः, तत्र महापद्मकुमारसेवां करोति। अन्यदा महापद्मकुमारग्रामान् भञ्जन् सिंहबलनृपो नमुचिना प्रपञ्चेन बद्ध्वाऽऽनीतस्तुष्टेन कुमारेण वरो दत्तः, तेनोक्तं—समये गृहीष्ये वरं। अन्यदा ज्वालादेवी श्रीजिनप्रासादं कारयित्वा रथयात्रोपक्रममकरोत्। अपरा सपत्नी लक्ष्मीः, सा स्पर्द्धया ब्रह्मायतनं कारयित्वा रथयात्रामारेभे। तयोः प्रथमरथनिस्सरणे स्पर्द्धां ज्ञात्वा द्वावपि रथौ राज्ञा स्थापितौ। ततः स्वमातुः पराभवं ज्ञात्वा महापद्मो देशान्तरेषु भ्रमन्ननेके विद्याधरनृपामात्यपुत्रिकाः परिणीय महाविभूत्या चम्पापुरीप्रभोर्जन्मेजयस्य पुत्रीं मदनावलीं स्त्रीरत्नं परिणीय चक्रवर्त्तिऋद्धिसमृद्धः स्वपुरमगात्, पित्रा राज्याभिषेकः कृतः, स्वयं सुव्रताचार्यपार्श्वे दीक्षां प्रपेदे। विष्णुकुमारोऽपि पित्रा समं प्रव्रजितः। महापद्मः क्रमात् साधितषट्खण्डभूमण्डलो नवमश्चक्री सञ्जातः। तदा जननीकारितं जिनरथं महाविभूत्या भ्रमयित्वा मातुर्मनोरथः पूरितः। भरतक्षेत्रे जिनभवनकोट्यः कारिताः, द्वात्रिंशत्सहस्रा राजानो धर्मे स्थापिताः, अनेकधा शासनोन्नतिः कृता, पद्मोत्तरराजर्षिस्तु विगतकर्मा मोक्षमगात्। विष्णुकुमारः पुनस्तपःप्रभावाच्चभोगमनवैक्रियलब्ध्यादिलब्धिसमृद्धो मेरुचूलिकायांस्तपः करोति। इतश्च ते सुव्रताचार्या हस्तिनागपुरे वर्षारात्रं स्थिताः कथंचिन्नमुचिना दृष्टाः। ततः पूर्ववैरं स्मृत्वा पूर्वप्रतिपन्नं वरमयाचत राजानं नमुचिः। ततो राजा तद्याचितं कतिचिद्दिनानि राज्यमदात्। स्वयमन्तःपुरे स्थितः। नमुचिरपि कपटेन बहिर्यज्ञपाटके दीक्षितो जातः, प्रारब्धं यज्ञकर्म्म, तत्र लोकाः पाखण्डिभिः सह सर्वे वर्द्धापनके समायाताः, न पुनः श्वेतभिक्षवः। ततो न-

मुचिः सुव्रताचार्याणाकार्य तमेव दोषमुद्भाव्य भणति क्षुद्रः—यूयं लोकव्यवहारबाह्याः, अतो मुञ्चत मम राज्यं, अन्यथा मारयिष्यामि। ततः सूरिभिर्बहुधा प्रज्ञापितोऽपि न मन्यते। तत उद्याने गत्वाऽऽचार्यैः साधवः पृष्टाः—किं कर्त्तव्यं?, तत एकेन साधुनोक्तम्—भगवन्! मेरुशिरस्थो विष्णुकुमारश्चक्रिभ्राता यद्यायाति तदा तद्वचनेन नमुचिर्मुञ्चति कदाग्रहं, नान्यथा। गुरुराह—साधूक्तं, परं स कथमायाति?। एकेनोक्तं—अहं तत्र गन्तुं शक्तो, न पुनः प्रत्यागन्तुं। गुरुराह—स एव भवन्तमानेष्यति। ततस्तेन मेरुचूलायां गत्वा सङ्घकार्यं निवेदितं विष्णुकुमारर्षेः। सोऽपि तं गृहीत्वा क्षणेन प्राप्तो गुर्वन्तिकं। ततः प्राप्तो नमुचिपार्श्वे, धर्मोपदेशात्क्रमत्रयभूदाने कुपितेन विष्णुना साधिकलक्षयोजनरूपकरणेन ग्रामाकरनगरगिरिभवनवनज्योतिष्कक्षोभं जनयता नमुचिः शिरसि पादं दत्वा रसातले क्षिप्तः। पूर्वापरसागरपदस्थापने भुवनक्षोभे शक्रप्रेषितसुराङ्गनाभिस्तत्कर्णाभ्यर्णमागत्य प्रशमप्रधानगानेन सङ्घवचनेन चक्रिणा च ससम्भ्रमेण सपरिजनेन क्षामितः कथमप्युपशान्तस्तत्प्रभृति त्रिविक्रम इति प्रसिद्धः, आलोचितप्रतिक्रान्तः शुद्धः, यदुक्तम्—

"आयरिए गच्छम्मि य, कुलगणसंघे य चेइयविणासे। आलोइयपडिकंतो, सुद्धो जं निज्जरा विउला ॥ १ ॥"

"पाविय केवलनाणो, विण्हुकुमारो कमेण सो सिद्धो। चक्की वि महापउमो, गहिऊण वयं गओ सिद्धिं ॥ २ ॥"

इति विष्णुकुमारचरित्रं समाप्तम्।

---

पुनस्तपोमाहात्म्यं ख्यापयन् दृष्टान्तमाह—

**होंति महाकप्पसुरा, बोहिं लहिउं तवेण विहुयरया। जह खंदओ महप्पा, सीसो सिरिवीरनाहस्स ॥८४॥**

व्याख्या—यद्यपि तेनैव भवेन केचिन्न सिद्ध्यन्ति, तथापि तपसा विधूतरजसोऽल्पकर्माणस्सन्तो महाकल्पेषु—महर्द्धिदेवलोकेषु सुरा भवन्ति। ततोऽपि च्युत्वा महाविदेहेषु बोधिं लब्ध्वा 'तपसा विधूतरजसः' इत्यावृत्त्या अत्रापि योज्यते, तपसा क्षपितकर्म्माणः, सिद्ध्यन्तीति शेषः। क इव ?, यथा स्कन्दको महात्मा—शिष्यः श्रीवीरस्वामिनः, तत्कथा चेयम्—

कयङ्गलापुर्यां श्रीवीरः समवसृतः, प्रत्यासन्नश्रावस्तीपुर्यां गर्द्दभालिपरिव्राजकशिष्यः स्कन्दकश्चतुर्वेदस्मृतिपुराणादिग्रन्थनिपुणः परिवसति। स श्रीवीरशिष्येण पिङ्गलेन पृष्टः—भो स्कन्दक! 'किं सअंते लोए अणंते लोए ?, एवं जीवे सिद्धी सिद्धे वि पुच्छियव्वे, केण वा मरणेण जीवे संसारमणुपरियट्टइ ?, केण वा तं वीइवयइ ?, तए णं से खंदए परिव्वायए एयमट्ठं अयाणमाणे तुसिणीए चिट्ठइ। एवं दोचंपि तचंपि पुच्छिए तुसिणीए चिट्ठइ'। ततः श्रावस्त्या लोकं श्रीवीरवन्दनार्थं यान्तं दृष्ट्वा सोऽपि स्वसन्देहपृच्छार्थं चचाल। एतावता श्रीवीरेण गौतमस्य पिङ्गलप्रश्नस्कन्दकानवगमस्वरूपमुक्तम्। ततः समागते स्कन्दके श्रीगौतमः सम्मुखं गतः, स्वागतमपृच्छत् पिङ्गलप्रश्नस्वरूपं च। तत् श्रुत्वा विस्मितः स्कन्दकः प्राह—कथं जानासि ?, श्रीगौतमेनोक्तं—मम धर्माचार्येणोक्तमिति। ततः प्रमुदितः सर्वज्ञप्रत्ययत्वादवन्दत श्रीवीरं। भगवता च तत्सन्देहाः कथिताः, यथा—'खंदया! दव्वओ णं लोए एगदव्वे, अओ सअंते, खित्तओ वि सव्वासु दिसासु असंखिज्जे जोअणकोडाकोडिप्पमाणे, अओ सअंते। कालओ सया वि चिट्ठइ त्ति अणंते, भावओ(वि) अणंतपज्जायत्तणओ अणंते, एवं जीवे सिद्धि (सिद्धे) वि भाणियव्वे। नवरं—खित्तओ अप्पऽप्पणो पमाणं भाणियव्वं। मरणे वि खंदया! दुविहे पन्नत्ते, तं जहा—बालमरणे य पंडियमरणे य। तत्थ णं बालमरणेणं मरमाणे जीवे अप्पाणं अणंतेहिं नेरइयतिरियमणुयदेवभवग्गहणेहिं संजोएइ संसारमणुपरियट्टइ। पंडियमरणेण मरमाणे जीवे संसारं वीइवयइ' इति श्रुत्वा स्कन्दको बुद्धः। श्रीवीरोपदेशं श्रुत्वा प्राह—आलित्ते णं

भंते! लोए, पलित्ते णं भंते! लोए, आलित्तपलित्ते णं भंते! लोए जराए मरणेण य। यथा कश्चिद्गृहे प्रदीप्ते सारं भाण्डं निष्कासयति, तथाऽहमपि सारमात्मानं निष्कासयिष्यामि इति प्रव्रजितः। स्वामिना शिक्षितः–'एवं खलु देवाणुप्पिया! गंतव्वं (एवं चिट्ठियव्वं एवं निसीयव्वं) एवं तुयट्टियव्वं, एवं भुंजियव्वं, एवं भासियव्वं, एवं संजमेण संजमियव्वं, अस्सिं च अट्ठे नो पमाएयव्वं। तओ से सामण्णरए आणाए पडिबद्धे अणगारे जाए, इक्कारस अंगाइं अहिज्जित्था, बारस वि भिक्खुपडिमाओ, तओ गुणरयणसंवच्छरं तवोकम्मं सम्मं आराहेत्ता पुणो वि भगवओ अणुण्णाए बहुहिं चउत्थछट्ठऽट्ठमदसमदुवालसेहिं मासऽद्धमासखमणेहिं विचित्तेहिं तवोकम्मेहिं अप्पाणं भावेमाणे सुक्के लुक्खे निम्मंसे किसे धमणिसंतए जाए। कट्ठेणं सत्तेणं गच्छइ, सत्तेणं चिट्ठइ, भासंपि भासिउं कामे गिलायइ। तओ केवलनाणेण तस्स अज्झवसियं जाणेत्ता सयमेव भगवया महावीरेणं अब्भणुण्णाए हट्ठतुट्ठे खंदए अणगारे विहिणा पाओवगमं अणसणं करेइ। एवं से खंदए दुवालसवासाइं सामण्णपरियायमणुपालेत्ता मासं पाओवगमे कालं अणवकंखमाणे समाहिपत्ते कालं किच्चा अच्चुए कप्पे देवत्ताए उववण्णे। तओहिंतो चइत्ता महाविदेहे वासे सिज्झिही सव्वदुक्खाणमंतं काहि त्ति स्कन्दकचरितं समाप्तम् ॥

---

तपोगुणानामनन्तत्वेन न्यक्षेण भणनाशक्यत्वात् संक्षिपन्नाह—

**केत्तियमित्तं भणिमो?, तवस्स सुहभावणाए चिण्णस्स। भुवणत्तए वि न जओ, अन्नं तस्सऽत्थि गुरुययरं ॥८५॥**

व्याख्या—शुभभावनया चीर्णस्य तपसः कियन्मात्रं भणामः?, यतो भुवनत्रयेऽपि तस्मात्तपसोऽन्यद्गुरुकतरं नास्त्येवेत्यनेन तपोऽप्याशंसायदूषितमेव फलवदिति वक्ष्यमाणं च भावनाद्वारमिति सूचितमिति गाथार्थः ॥

" इति गदितमनन्तज्ञानिभिः कर्मकाष्ठ-प्रचयदहनवह्निर्यत्तपोऽनुष्ठितं च ।
तदिह भजत भव्याः! भावनातः प्रभूतं, भवति च खलु युष्मान् येन सन्मोक्षलक्ष्मीः ॥ १ ॥"

इति पुष्पमालाविवरणे [तृतीयः] तपोधर्मः समर्थित इति ॥ ५ ॥

---

इदानीं भावनाधर्म्मं विभणिषुः पूर्वेण (सह) सम्बन्धगर्भां गाथामाह—

दाणं सीलं च तवो, उच्छुपुप्फं व निप्फलं होज्जा । जइ न हिययम्मि भावो, होइ सुहो तस्सिमे हेऊ ॥८६॥

व्याख्या—दानं शीलं तपश्चेति पूर्वोक्तं सर्वमपि इक्षुपुष्पमिव निष्फलं भवेत्, यदि हृदये भवनिर्वेदमोक्षाकाङ्क्षागर्भः शुभो भावो न भवेत्, अतो दानादीन्नभिधाय भावनाधर्मोऽभिधीयते, तस्य च शुभभावस्यैते वक्ष्यमाणा हेतव इति गाथार्थः ॥ ८६ ॥ तानेवाह—

सम्मत्तचरणसुद्धी, करणजओ निग्गहो कसायाणं । गुरुकुलवासो दोसाण, वियडणा भवविरागो य ॥८७॥

विणओ वेयावच्चं, सज्झायरई अणाययणचाओ । परपरिवायनिवित्ती, थिरया धम्मे परिन्ना य ॥ ८८ ॥

व्याख्या—सम्यक्त्वशुद्धिश्चरणशुद्धिरिन्द्रियजयः, कषायाणां निग्रहः, नित्यं गुरुकुलवासः, दोषाणां प्रमादाद्याचीर्णानां विकटना-आलोचना, भवविरागश्च । तथा विनयः, वैयावृत्त्यं, स्वाध्याये रतिः, अनायतनस्य-ज्ञानादिदूषकवस्तुनस्त्यागः, परपरिवादनिवृत्तिः, स्थिरता धर्मे, परिज्ञा च-प्रान्तेऽनशनरूपा, इत्येते चतुर्दश [१४] शुभभावस्य हेतवः, हेत्वन्तराणां सम्भवेऽप्यत्रैवान्तर्भावादिति द्वारगाथाद्वयार्थः, विस्तरार्थं तु सूत्रकारः प्रतिद्वारं वक्ष्यतीति ॥ ८७-८८ ॥

तत्रादौ सम्यक्त्वशुद्धिं विवृण्वन् सम्यक्त्वमेव तावत् किंस्वरूपमित्यादिद्वारगाथामाह—

**किं सम्मत्तं? तं होज्ज, किहं? णु कस्स? व गुणा य के? तस्स। कइभेयं? अइयारा, लिंगं वा किं भवे? तस्स॥८९॥**

व्याख्या—किंस्वरूपं तावत्सम्यक्त्वं ?, कथं—केन प्रकारेण वा तज्जीवानां भवेत् ?, कस्य वा तद्भवेत् ?, गुणाश्च के ? तस्य सम्यक्त्वस्य, कतिभेदं तद्भवेत् ?, अतिचाराः लिङ्गं वा किं भवेत् ? तस्य—सम्यक्त्वस्येति द्वारगाथासंक्षेपार्थः ॥ अत्राद्यद्वारनिर्णयार्थमाह—

**अरिहं देवो गुरुणो, सुसाहुणो जिणमयं मह पमाणं। इच्चाइ सुहो भावो, सम्मत्तं बिंति जगगुरुणो॥९०॥**

व्याख्या—अर्हन्नेव मम देवो, नेश्वरादयः, सुसाधव एव गुरवो, न परिव्राजकादयः, जिनमतमेव प्रमाणं, न कुतीर्थिकाभिमतमित्यादिको य आत्मनः शुभः परिणामः, स सम्यक्त्वमिति जगद्गुरवस्तीर्थङ्करगणधरा ब्रुवते। उक्तं च तैः—"से य सम्मत्ते पसत्थसम्मत्तमोहणिज्जकम्माणुवेयणोवसमखयसमुत्थे उवसमसंवेगाइलिंगे सुहे आयपरिणामे पण्णत्ते" त्ति गाथार्थः ॥ ९० ॥

गतं किं सम्यक्त्वमिति द्वारम्, अथ तत्कथं भवेदिति द्वितीयं द्वारमाह—

**भमिऊण अणंताइं, पोग्गलपरियट्टसयसहस्साइं। मिच्छत्तमोहियमई, जीवा संसारकंतारे ॥ ९१ ॥**

**पावंति खवेऊणं, कम्माइं अहापवत्तिकरणेणं। उवलनाएण कहमवि, अभिन्नपुव्विं तओ गंठिं॥९२॥(युग्मम्)**

व्याख्या—प्रथमं तावत् मिथ्यात्वमोहितमतयः सर्वे जीवाः संसारकान्तारे अनन्तानि पुद्गलपरावर्त्तलक्षाणि भ्रान्त्वा कथञ्चिदुपलज्ञातेन यथाप्रवृत्तिकरणेन ग्रन्थिप्रदेशागमनप्रतिबन्धीनि कर्माणि क्षपयित्वाऽभिन्नपूर्वं ग्रन्थिं केचित्प्राप्नुवन्ति। तत्रानन्तोत्सर्पि-

ण्यवसर्पिण्यः पुद्गलपरावर्त्तः, तदुक्तम्—"उस्सप्पिणी अणंता, पुग्गलपरियट्टओ मुणेयव्वो" इति। करणं—अध्यवसायविशेषः, विशिष्टज्ञानादिगुणमन्तरेण कथमपि स्वयमेव प्रवृत्तं यथाप्रवृत्तं, तच्च तत्करणं च यथाप्रवृत्तकरणं, यथा गिरिनद्या उपलो घर्षणाघोलनावशतः स्वयमेव वृत्तादिभावमापद्यते, एवं जन्तवोऽपि यथाप्रवृत्तकरणेन स्वयमेव कर्म्म क्षपयन्तीति भावः। इति गाथाद्वयार्थः ॥ १२ ॥

ननु ग्रन्थिरिति कः पदार्थः? इत्याह—

**गंठिं भणंति मुणिणो, घणरागद्दोसपरिणइसरूवं। जम्मि अभिण्णे जीवा, न लहंति कयाइ सम्मत्तं ॥१३॥**

व्याख्या—घना-निबिडा या रागद्वेषपरिणतिः, तत्स्वरूपं ग्रन्थिं मुनयः प्रतिपादयन्ति, यथा वल्कादिनिष्पन्नः कश्चिन्निबिडग्रन्थिर्दुर्भेदो भवत्येवं रागद्वेषपरिणामोऽपि यः सम्यक्त्वप्राप्तिप्रतिबन्धकोऽनन्तकालेनापि जीवैर्न भिन्नः, स ग्रन्थिरिति भावः। सम्यक्त्वप्राप्तिप्रतिबन्धकत्वमेव तस्याह—यस्मिन्नभिन्ने जीवा न कदाचिल्लभन्ते सम्यक्त्वमिति गाथार्थः ॥ १३ ॥

ननु ये केचन जीवा ग्रन्थिं यावदागच्छन्ति ते सर्वेऽपि तं भिन्दन्ति?, नेत्याह—

**उल्लसियगरुयविरिया, धन्ना लहुकम्मुणो महऽप्पाणो। आसण्णकालभवसि-द्धिया य तं केइ भिंदंति ॥१४॥**

व्याख्या—उल्लसितगुरुवीर्या धन्या लघुकर्म्माणो महात्मान आसन्नकाले भवा-भाविनी सिद्धिर्येषां ते आसन्नकालभवसिद्धिकाश्च तं ग्रन्थिं केचिदेव प्राणिनो भिन्दन्ति, न सर्वे, इति गाथार्थः ॥ १४ ॥ व्यतिरेकमाह—

**जे उण अभव्वजीवा, अणंतसो गंठिदेसपत्ता वि। ते अकयगंठिभेया, पुणोवि वड्ढंति कम्माइं ॥ १५ ॥**

व्याख्या—ये पुनस्सर्वथैव अभाविनी सिद्धिर्येषां ते अभव्याः, ते च ते जीवाश्च अभव्यजीवाः, उपलक्षणत्वाद्दूरभव्याश्च, तेऽनन्तशो–ऽनन्तवारं ग्रन्थिदेशं प्राप्ता अपि अकृतग्रन्थिभेदा एव स्युः। ततः पुनरपि वर्द्धयन्ति कर्म्माणि, स्थितिरसादिभिर्गुरूणि कुर्वन्तीति गाथार्थः ॥ ९५ ॥ अथ ये ग्रन्थिं भिन्दति तेषां सम्यक्त्वलाभक्रममाह—

**तं गिरिवरं व भेत्तुं, अपुव्वकरणोग्गवज्जधाराए। अंतोमुहुत्तकालं, गंतुं अनियट्टिकरणम्मि ॥ ९६ ॥**
**पइसमयं सुज्झंतो, खविउं कम्माइं तत्थ बहुयाइं। मिच्छत्तम्मि उइण्णे, खीणे अणुइयम्मि उवसंते ॥९७॥**
**संसारगिम्हतविओ, तत्तो गोसीसचंदणरसं व। अइपरमनिव्वुइकरं, तस्संऽते लहइ सम्मत्तं ॥९८॥** [विशेषकम्]

व्याख्या—करणं–विशिष्टाध्यवसायविशेष एव अपूर्वं–अननुभूतपूर्वं करणमपूर्वकरणं, अत्र हि वर्त्तमानो जीवस्तादृशान् स्थितिरसघातादीन् क्रियाविशेषान् करोति, यादृशः संसारे न कदाचित् पूर्वं कृता, इति कृत्वा वज्रधारेव वज्रधारा, अपूर्वकरणमेवोग्रवज्रधारा अपूर्वकरणोग्रवज्रधारा, तया गिरिवरमिव तं ग्रन्थिं भित्त्वा–तथाविधं रागद्वेषपरिणामं किञ्चिदपनीय ततोऽन्तर्मुहूर्त्तं कालं अनिवृत्तिकरणं गत्वा। अत्रापि करणं–विशिष्टतमोऽध्यवसायविशेष एव। न विद्यते प्रथमाद्यसङ्ख्येयतमावसानसमानसमयवर्त्तिनां प्राणिनां स्वभावादेव परस्परमध्यवसायस्य निवृत्ति–र्वैलक्षण्यं यत्र तदनिवृत्तिः, तच्च तत्करणं चानिवृत्तिकरणम्। ततोऽत्रान्तर्मुहूर्त्तं यावत्प्रतिसमयमनन्तगुणविशुद्ध्या विशुद्ध्यमान आयुर्वर्जानि शेषसप्तकर्म्माणि बहूनि क्षपयित्वा प्रत्येकं पल्योपमासङ्ख्येयभागन्यूनैकसागरोपमकोटाकोटिमात्राणि विधृत्य, शेषाणि क्षपयित्वेत्यर्थः, ततश्च मिथ्यात्वं यदुदीर्णं तस्मिन् क्षीणेऽनुदीर्णे तु सत्तामात्रवर्त्तिन्युपशान्ते सति

संसार एव ग्रीष्मस्तेन तप्तो गोशीर्षचन्दनरसमिवातिपरमनिर्वृत्तिकरं–मुक्तिशर्मविधायकं, तस्य–अनिवृत्तिकरणस्य अन्ते सम्यक्त्वं लभते। यथा ग्रीष्मतप्तः कश्चित्पुण्यवशादतिपरमनिर्वृत्तिकरं गोशीर्षचन्दनद्रवं लभते, एवं जीवोऽपि संसारदुःखोपतप्तः सम्यक्त्वमिति। अयमभावः–अपूर्वकरणेन ग्रन्थिभेदं विधाय मिथ्यात्वमोहनीयकर्म्मस्थितेरन्तर्मुहूर्त्तमुदयक्षणादुपर्यतिक्रम्यानिवृत्तिकरणरूपेण शुद्धिविशेषेणान्तर्मुहूर्त्तकालप्रमाणं वेद्यदलिकाभावरूपमन्तरकरणं करोति, स्थापना ○ ◒ ● । अत्र च मिथ्यात्वदलिकवेदनाभावादौपशमिकसम्यक्त्वं जीवो लभते इति गाथात्रयार्थः ॥ ९६–९७–९८ ॥ इदानीं 'कस्य तद्भवेदि'ति तृतीयं स्वामित्वद्वारमाह—

**पुव्वपडिवन्नपडिवज्ज–माणया निरयमणुयदेवा य। तिरिएसुं तु पवन्ना, बेइंदियमाइणो होज्जा ॥ ९९ ॥**

व्याख्या—नारकमनुष्यदेवाः पूर्वप्रतिपन्नाः प्रतिपद्यमानकाश्च भवन्ति, तथाहि–मनुष्या देवाश्च धर्म्मश्रवणादिभ्यः, नारकाश्च वेदनादेः कर्म्म निर्जरयन्तस्तथाभव्यत्वपरिपाकतः कुतश्चिन्निसर्गादित एव केचित्सम्यक्त्वं प्रतिपद्यमाना आद्यसमये प्रतिपद्यमानकाः द्वितीयादिसमयेषु तु ते पूर्वप्रतिपन्ना एवोच्यन्ते इति। तिर्यक्षु पुनः "पवन्न"त्ति प्रतिपन्ना द्वीन्द्रियादयो भवेयुः, तत्र द्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियेषु तावद्यः सास्वादनसम्यग्दृष्टिः, स न मृत्वा एतेषूत्पद्यते, सोऽपर्याप्तावस्थायां कियतीमपि वेलां यावत्तद्भावेनावतिष्ठते, ततः परं नियमेन मिथ्यात्वं गच्छत्येवासौ, ततोऽमुमेवाश्रित्य पूर्वप्रतिपन्ना एषु मन्तव्याः, नान्यथा। पञ्चेन्द्रियेषु तु सामान्यमपि सम्यक्त्वमाश्रित्य पूर्वप्रतिपन्नाः प्राप्यन्त इति गाथार्थः ॥ ९९ ॥

ननु उक्ता द्वीन्द्रियादिषु पूर्वप्रतिपन्नाः, प्रतिपद्यमानकास्तेषु भवन्ति न वा? इत्याह—

**पडिवज्जमाणया वि हु, विगलिंदिया अमणवज्जिया होंति। उभयाभावो एगिं–दिएसु सम्मत्तलद्धीए ॥१००॥**

व्याख्या—विकलानि—असम्पूर्णानीन्द्रियाणि येषां द्वित्रिचतुरिन्द्रियाणां ते तथा, अमनस्काः—सम्मूर्च्छजाः पञ्चेन्द्रियाः, एतेषु तथाविधाध्यवसायशुद्ध्यभावान्न सम्यक्त्वप्रतिपत्तिसम्भवः, अतस्तिर्यक्षु एतान् वर्जयित्वा शेषा गर्भजपञ्चेन्द्रियाः प्रतिपद्यमानका अपि भवन्ति। उभयस्यापि—पूर्वप्रतिपन्नप्रतिपद्यमानकलक्षणस्यैकेन्द्रियेषु सम्यक्त्वलब्धेरभावः। यतोऽत्र तथाविधाध्यवसायशुद्ध्यभावात् सम्यक्त्वस्य प्रतिपद्यमानको न कश्चिद्भवति। पूर्वप्रतिपन्नं तु कार्मग्रन्थिका द्वीन्द्रियादिवत्पृथिव्यादिषु सास्वादनसम्यग्दृष्ट्युत्पत्तेर्मन्यन्त एव, सैद्धान्तिकास्तु तस्य तत्रानुत्पत्तेः स्वल्पत्वेनाविवक्षणाद्वा कुतश्चित्कारणात्पूर्वप्रतिपन्नस्यात्राभावं मन्यन्त इत्यत्र मतद्वयं, तत्त्वं तु सर्वविदो विदन्तीति गाथार्थः ॥१००॥ अथ 'गुणाश्च के तस्ये'ति चतुर्थद्वारमिधित्सुः सम्यक्त्वस्य सर्वगुणाधारत्वलक्षणं गुणमाह—

**जह धन्नाणं पुहई, आहारो नहयलं व ताराणं। तह नीसेसगुणाणं, आहारो होइ सम्मत्तं ॥ १०१ ॥**

व्याख्या—उत्पत्तिवृद्धिस्थित्यपेक्षया यथा सर्वधान्यानां पृथिवी आधारः, नभस्तलं वा ताराणां आधारः, तथा निःशेषगुणानां शमसंवेगनिर्वेदादीनां आधारः सम्यक्त्वं भवतीति गाथार्थः ॥ १०१ ॥ अथ तस्यैव सुगतिगमनहेतुत्वमाह—

**सम्मद्दिट्ठी जीवो, गच्छइ नियमा विमाणवासीसु। जइ न विगयसम्मत्तो, अहव न बद्धाउओ पुव्विं ॥१०२॥**

व्याख्या—इह सम्यग्दृष्टिरुत्कृष्टतस्तेनैव भवेन सिद्ध्यति, योऽपि सम्पूर्णकालादिसामग्र्यभावान्न निर्वाणं गच्छति, सोऽपि जन्तुर्नारकतिर्यङ्मनुजभवनपतिव्यन्तरज्योतिष्कगतीर्निरुध्य नियमाद्विमानवासिष्वेव सौधर्मादिदेवेषु गच्छति, यदि मरणसमये सर्वथा विगतसम्यक्त्वोऽतिचारमलिनसम्यक्त्वो वा, अथवा सम्यक्त्वलाभकालात् पूर्वं बद्धायुश्च न भवति, अस्य हि चतसृष्वपि गतिषूत्पत्तेः।

देवनारकाश्च सम्यग्दृष्टयोऽपि मनुष्येष्वेवोत्पद्यन्ते, तेषां देवगतिनिषेधादिति मन्तव्यमिति गाथार्थः ॥ १०२ ॥

दृष्टान्ताभिधानद्वारेण तस्यैव गुणान्तरमाह—

**अचलियसम्मत्ताणं, सुरा वि आणं कुणंति भत्तीए। जह अमरदत्तभज्जा-ए अहव निवविक्कमाईणं ॥१०३॥**

व्याख्या—दृढसम्यक्त्वानां सुरा अपि भक्त्या आज्ञां कुर्वन्ति, यथा अमरदत्तभार्यायाः, अथवा नृपविक्रमराजादीनामित्यक्षरार्थः, भावार्थकथनार्थं त्वमरदत्तभार्याकथानकं तावदुच्यते—

सुराष्ट्रादेशे कनकरत्नपूर्णायां द्वारिकापुर्यां पद्मश्रेष्ठिपुत्रोऽमरदत्तो रूपसौभाग्यसम्पन्नः कुशद्वीपे सुवर्णपुरे वाणिज्यार्थं जलाध्वना बहुविभवो गतः। तत्र विशङ्कश्रेष्ठिपुत्रीं श्रीजिनधर्मपरां रूपादिभिरनुत्तरां विमलयशानाम्नीं दृष्ट्वा ययाचे। पित्रोक्तं—ददामि, परं 'यः कोऽपि मां धर्म्मवादे जयति, स एव मम वर' इति कृतप्रतिज्ञा साऽस्ति। ततो जाते वादे स मिथ्यामतिस्तस्याः स्याद्वादवादिन्या उत्तरं दातुमक्षमश्चिन्तयति—अहो !! सुनिपुणेयं जिनधर्म्मे गृहस्थ्यपि, ततोऽहमप्येनमेव शिक्षयित्वैनां निरुत्तरां करोमीति कपटश्रावको भूत्वा जिनधर्म्ममभ्यस्यन् ज्ञाततत्त्वः सद्भावेन श्रावकोऽभूत्। ततः समन्तभद्रसूरिपार्श्वे गृहीतधर्म्मं तं दृष्ट्वा विमलयशसा हृष्टया प्रोक्तं—भोः ! तवैवं धर्म्मविचारेऽद्याप्यस्तीच्छा ?, अत्रान्तरे श्रेष्ठ्यपि तत्रैवागतः, ततोऽमरदत्तेनोक्तं—'भद्रे ! शुद्धाकरप्रभवे वज्रे या पुनर्विचारणा अभिनिविष्टबुद्धिभिः क्रियते, सा तेषां जडत्वमेव साधयति, पूर्वापराविरुद्धे प्रमाणसिद्धे जगत्प्रसिद्धे सर्वज्ञभाषिते धर्मे विप्रतिपन्ना ये विचारणां कुर्वन्ति, तेषामसमञ्जसभाषिणां सा दुर्गतिमेव फलं साधयती'ति श्रुत्वा विमलयशसा चिन्तितं—परिणतधर्म्मोऽयं शुद्धवचनैर्लक्ष्यते, अन्यच्च—ममापि स्तोकानुरागः सम्पन्नोऽस्त्यसौ, तद्यदि मामिच्छति, मत्पिताऽपि यदि कथमपि प्रतिपद्यते, तदेतेन परिणीता एवं

धर्मं स्थिरं करोमि। पित्राऽपि च तस्या दृष्ट्वैव भावं विज्ञाय चिन्तितं–युक्तमिदम्। ततः क्षणं धर्मं श्रुत्वा स आदरेण स्वगृहमानीतः, सम्मान्य श्रेष्ठी पुत्रीमदात्। ततः स तां परिणीय स्वगृहे गतः। तां च जिनधर्म्मपरां दृष्ट्वा पितरौ मिथ्यादृशौ द्वेषमुद्वहन्तौ तस्याः पार्श्वे सङ्केतेन पुरुषमेकं प्रेष्य पूत्कृत्य कलङ्कमदातां। अमरदत्तो विस्मितमना: सविषादं चिन्तयति–नूनं प्रियायाः कल्पान्तेऽपि शीलं न लुप्यते, तत्किमप्यत्र कस्यापि दुर्विलसितमित्यादि। तावन्मातापितृभ्यां प्रोक्तम्–'रे मूढ ! यस्याः शीलेन गर्वं वहसि, तस्याश्चेष्टितमेतत्, अस्या एष धर्म्मः, एषः साधुसाध्वीनामुपदेशः, एतादृश्यः श्राविका जिनधर्मे। त्वं चेदद्यापि न मन्यसे, तदा न त्वया नानयाऽस्माकं कार्यम्'। इत्यादि गाढस्वरं कलहं कुर्वद्भ्यां लोकप्रसिद्धे कलङ्के सा जिनधर्ममालिन्यभीता दृढसम्यक्त्वा सकलजनसमक्षं पुराद्बहिःप्रदेशस्थे देवताऽधिष्ठिते महापद्महृदे निजपतिव्रताव्रतजिनधर्मैकचित्तताश्रावणं कृत्वा झम्पामदात्। ततः सन्निहितदेवैस्तत्सत्त्वरञ्जितै रत्नमयद्रोण्यां रत्नमयसिंहासने स्थापिता सा सर्वजनैर्दृष्टा, तीरे उत्तारिता, पुष्पवृष्टिश्चक्रे जयघोषणा च, श्वशुरवर्गस्य दुर्विलसितं नृपप्रमुखलोकस्या विमलयशा स्तुता, एवं शासनप्रभावना कृता। ततः संसारं विरसपरिणामं विभाव्य गृहवासे क्षणमपि रतिं अलभमाना नृपामरदत्तप्रमुखैर्वार्यमाणाऽपि तद्दाहोपशमनाय प्राप्ता केवल्याचार्यसमीपे धर्मं श्रुत्वा 'कुतो मेऽसद्भूतः कलङ्कः?' इति प्रश्ने कृते पूर्वभवे सपत्नी-कलङ्कदानं पुनस्तां विरसं रसन्तीं श्रुत्वा पश्चात्तापः कलङ्कोत्तारणं च कृतमतस्तवाप्येवं जातमिति श्रुत्वा सञ्जातवैराग्या दीक्षां गृहीत्वा सुन्दरायाः प्रवर्त्तिन्याः पार्श्वे एकादशाङ्गान्यधीत्य उग्रं तपः कृत्वा मोक्षमगात्। तेनैव निर्वेदेन राजसामन्ताद्या अमरदत्तोऽपि च प्रव्रज्य पञ्चमे कल्पे महर्द्धिका देवाः सञ्जाताः। **अमरदत्तभार्यावृत्तं समाप्तम्** ॥

अथ नृपविक्रमाख्यानकमुच्यते–[इहैव] भरते कुसुमपुरे हरितिलकनृपो, गौरी प्रिया, तयोः पुत्रो विक्रमः द्वासप्ततिकलाकुशलः

प्राप्तयौवनः स्वयंवरायातद्वात्रिंशत्कन्याः परिणीय तद्योग्यान् द्वात्रिंशत्प्रासादान् मनोहरान् मध्ये स्त्रोत्तुङ्गभवनकलितान् कारयित्वा ताभिः समं यावद्भोगान् भुङ्क्ते, तावत् तद्देहे कुष्ठादयो महारोगा अभूवन् । अनेकवैद्यौषधमन्त्रतन्त्रादिभिर्गुणाभावे कुमारेण वेदनार्तेन पुराद्बहिःस्थसप्रभावधनञ्जययक्षस्य महिषशतं मानितं । अथ तस्मिन्नेव दिने तत्र विमलकीर्त्तिः केवली समागात्, कुमारोऽपि पित्रा सह वन्दनार्थं गतः, केवलिप्रभावादुपशान्तव्यथोऽभूत् । राज्ञा पुत्रस्य रोगकारणं पृष्टः श्रीकेवली प्राह—पूर्व(अपर)विदेहे रत्नस्थलपुरे पद्ममुखो नृपो नास्तिकः, अन्यदा मृगयां गतः कायोत्सर्गस्थं मुनिमेकमालोक्य पापात्मा बाणैर्जघान । शुभध्यानेन मुनिः सर्वार्थसिद्धिविमानेऽगात् । राजा लोकैर्धिक्कारितो लोकान्मारयन्मन्त्रिसामन्तैः काष्ठपञ्जरे प्रक्षिप्य निष्कासितः, तत्पुत्रः पुण्डरीको राज्ये स्थापितः । ततः स नृपस्सर्वत्र धिक्कारितः केनापि तापसेनावज्ञां कुर्वन् × तेजोलेश्यया दग्धः सप्तमं नरकं गतः । ततः स्वयम्भूरमणमत्स्यो भूत्वा सप्तमनरके गतः, ततो मत्स्यः, ततः षष्ठनरके, ततश्चाण्डालस्त्री, ततः षष्ठनरके, तत उरगो भूत्वा पञ्चमनरके, ततो मत्स्यः, पञ्चमनरके, ततः सिंहः, चतुर्थनरके, ततो व्याघ्रश्चतुर्थनरके, ततः श्येनस्तृतीयनरके, पक्षी, तृतीयनरके, सरीसृपो, द्वितीयनरके, पुनः सरीसृपो, द्वितीयनरके, ततो मत्स्यः, प्रथमनरके, पुनर्मत्स्यः, प्रथमनरके, ततः पृथिव्यादिष्वनन्तोत्सर्पिणीकालो गतः । ततो वसन्तपुरे सिन्धुदत्तवणिक्पुत्रो, बालतपः कृत्वा तव पुत्रोऽभूत्, इति श्रुत्वा कुमारस्सञ्जातजातिस्मरणस्संविग्नः प्रतिपन्नसम्यक्त्वमूलद्वादशव्रतो विगतवेदनो स्वगृहेऽगात् । क्रमेण राजाऽभूत् । धनञ्जययक्षयाचितान्महिषान्न दत्ते । ततस्तेनानेकधोपसर्गितोऽपि दयापरो यावन्न दत्ते, तावत्तेनैव यक्षेण तद्गुणहृष्टेन कृता पुष्पवृष्टिः, प्रशंसितः कुमारस्य दयापरो धर्म्मः सम्यक्त्वनिश्चयश्च । ततो यक्षेण कृतसान्निध्यः साधितसकलभूवलयः

× 'कदाचित्पुराद्बहिः कायोत्सर्गस्थं सोमाख्यं मुनिं दृष्ट्वा सञ्जातकोपो यष्टिभिः पुनः २ प्रहरणविधिना ज्ञातप्रवचनद्विष्टत्वेन तेन मुनिना,' इति वृहद्वृत्तौ ।

प्रभावितजिनशासनः कृत सर्वाङ्गीणपुण्य कृत्यः प्रान्ते श्रीकेवलिपार्श्वे दीक्षां गृहीत्वा कृतकर्म्मक्षयो मोक्षमगात् ॥

॥ इति श्रीविक्रमराजाऽऽख्यानकं समाप्तम् ॥

---

आदिशब्दादन्येऽपि सुरसम्पादिताज्ञाः सुलसाद्या द्रष्टव्या इति गाथार्थः ॥ १०२ ॥ अथ सम्यक्त्वस्यैव गुणोत्कर्षमाह—

**अंतोमुहुत्तमित्तं पि, फासियं जेहिं हुज्ज सम्मत्तं । तेसिं अवड्ढपोग्गल—परियट्टो चेव संसारो ॥ १०४ ॥**

व्याख्या—अन्तर्मुहूर्त्तमात्रमपि स्पृष्टं—आस्वादितं यैः सम्यक्त्वं भवेत् तेषां, पश्चात् कथमपि तीर्थंकराशातनादिमहापातकिनां गोशालकादीनामप्युत्कृष्टतः अपार्द्धपुद्गलपरावर्तमात्र एव संसारः । अपगतमर्द्धं यस्मादसावपार्द्धः, स चासौ पुद्गलपरावर्त्तश्चापार्द्धपुद्गलपरावर्तः, पुद्गलपरावर्त्तस्यार्द्धमित्यर्थः । तदप्युपलक्षणत्वादेशोनमिह ज्ञेयम् । पुद्गलपरावर्त्तस्वरूपं चैवमष्टधाऽऽहुः—

"*दव्वे खित्ते काले, भावे चउह दुह बायरो सुहुमो । होइ अणंतुस्सप्पिणि—परिमाणो पुग्गलपरिअट्टो ॥ १ ॥
उरलविउव्वतेयग—भासाणपाणमणकम्मगत्तेण । ...

---

* आसामर्थोऽयं—द्रव्यपुद्गलपरावर्त्तः क्षेत्रपुद्गलपरावर्त्तः कालपुद्गलपरावर्त्तो भावपुद्गलपरावर्त्तश्चेति चतुर्धा—चतुष्प्रकारो भवति पुद्गलपरावर्त्तः । पुनरप्येकैको द्विधा—बादरः सूक्ष्मश्चानन्तोत्सर्पिण्युपलक्षणादवसर्पिणीकालप्रमाणो भवति ॥ १ ॥ तत्र भवं भ्रमन्नेको जीवस्तनुस्तनु—औदारिकवैक्रियतैजसकार्मणरूपशरीरचतुष्कं तथा मनोवाक्श्वासाः, इत्येतत्सप्तकत्वेन परिणमयति मुञ्चति च यावता कालेन सर्वाणून्—समग्रलोकवर्तिनः सर्वान् पुद्गलान्, स स्थूलो—बादरो द्रव्यपुद्गलपरावर्त्तः । किमुक्तं भवति ?, यावता कालेनैकेन जीवेन सर्वेऽपि जगद्वर्तिनः परमाणवो यथायोग्यमौदारिकशरीरादिसप्तकरूपत्वेन परिभुज्य परिभुज्य परित्यक्तास्तावान् कालविशेषो बादरद्रव्यपुद्गलपरावर्त्तः, आहारकशरीरं चोत्कृष्टतोऽप्येकजीवस्य वारचतुष्टयमेव सम्भवति, ततस्तच्च पुद्-

"सत्तण्हऽन्नयरेणं, इय फुसणे सुहुमदव्वपरियट्टो। अन्ने चउतणुसु कमे-णमेवं तु बिंति दुविहं पि ॥ ३ ॥"
"लोगपएसुस्सप्पिणि-समया अणुभागबंधठाणा य। पुट्ठा मरणेण जया, कमुक्कमा बायरत्तणया ॥ ४ ॥"
"पुट्ठाऽणंतरमरणेण, पुण जया ते तया भवे सुहुमो। पुग्गलपरियट्टो खित्त-कालभावेहिं इय नेओ ॥५॥" इति।

कपरावर्तं प्रथमपुद्गलयोगाय [illegible] ॥ २ ॥ मतान्तरे-औदारिकादिसप्तकान्यतरेणैकेन केनचिद्रूपत्वेन समस्तलोकवर्तिनामखिलानां परमाणूनां स्पर्शने सूक्ष्मद्रव्यपुद्गलपरावर्तो, भवतीति शेषः। अन्ये पुनरौदारिकादिष्वपि चतुर्षु यथायोगमन्यतमेनैकेन वा क्रमेण-विवक्षितशरीरपुद्गलरूपतया परिणमय्य स्वीकृते, इति-एवं पूर्वोक्तप्रकारेण एव द्विविधोऽपि द्रव्यपुद्गलपरावर्तो भवतीति ब्रुवते। किमुक्तं भवति?, अन्येषामाचार्याणां मतेनौ-दारिकवैक्रियतैजसकार्मणशरीरचतुष्टयरूपतया निःशेषद्रव्यग्रहणे-सर्वलोकपुद्गलानां परिभुज्य परिभुज्य परित्यजनेऽयं बादरो द्रव्यपुद्गलपरावर्तो भवति, तथैव यावता कालेन सर्वेऽपि लोकाकाशभाविनः परमाणव औदारिकाद्यन्यतमैकशरीररूपतया अनुक्रमेण, अर्थाद्विवक्षितैकशरीरव्यतिरेकेणान्यशरीरतया ये परि-भुज्य परिभुज्य परित्यज्यन्ते ते न गण्यन्ते, किन्तु प्रभूतेऽपि काले गते ये विवक्षितैकशरीररूपतया परिणम्यन्ते त एव परमाणवो गण्यन्ते, इत्येतदपेक्षा-नुक्रमेण परिभुज्य परिभुज्य निष्ठां नीयन्ते, तावान् कालविशेषः सूक्ष्मद्रव्यपुद्गलपरावर्तः। पुद्गलानां-परमाणूनामौदारिकादिसप्तकरूपतया विवक्षितैकश-रीरादिरूपतया वा सामस्त्येन परावर्तः-परिणमनं यावति काले भवति, स तावान् कालः पुद्गलपरावर्तः ॥३॥ लोकस्य चतुर्दशरज्ज्वात्मकस्य ये प्रदेशाः, तथोत्सर्पिण्या उपलक्षणत्वादवसर्पिण्याश्च ये समयास्तथाऽसङ्ख्येयलोकाकाशप्रदेशप्रमाणान्यसङ्ख्येयान्यनुभागबन्धस्थानानि, सर्वाण्यप्येकेन जीवेन यदा क्रमेण-नन्तरमरणेन-परम्परया च स्पृष्टानि भवन्ति, तदा क्षेत्रकालभावैर्बादरो, यदा पुनस्त एव लोकप्रदेशा उत्सर्पिण्यवसर्पिणीसमया अनुभागबन्धस्था-नान्यनन्तरमरणेन स्पृष्टानि भवेयुस्तदा तैरेव क्षेत्रकालभावैः सूक्ष्मः पुद्गलपरावर्तो भवेदिति शेषः। इदमुक्तं भवति-यावता कालेनैको जीवः क्रमेणोत्क्रमेण वा यत्र तत्र वा म्रियमाणः सर्वानपि लोकाकाशप्रदेशान्मरणेन स्पृशति तावान्कालविशेषो बादरः, यावता च कालेनैकः कश्चिज्जीवोऽनन्तरानन्तरप्रदेशमर-णात्मकेन क्रमेण सर्वेष्वपि लोकाकाशप्रदेशेषु मृतो भवति, तावान् कालविशेषः सूक्ष्मः, क्षेत्रपुद्गलपरावर्तो भवतीति शेषः। यावता कालेनैको जीवः

तथाऽपीह सूक्ष्मक्षेत्रपुद्गलपरावर्तस्य देशोनमर्द्धं सम्भाव्यते, निश्चयं तु केवलिनो बहुश्रुता वा विदन्ति, व्यक्तनिर्णयस्यादर्शनात् । एतच्च देशोनं पुद्गलपरावर्त्तार्द्धमनन्तोत्सर्पिणीकालमानं ज्ञेयं, तदन्तेऽवश्यं क्षपितकर्म्मा निर्वृतिमाप्नोतीति भावः, इति गाथार्थः ॥

अथ अमरादिसम्पदादिभ्योऽपि सम्यक्त्वस्य दुर्लभत्वलक्षणं गुणमाह—

**लब्भंति अमरनरसं-पया उ सोहग्गरूवकलियाओ । न य लब्भइ सम्मत्तं, तरंडयं भवसमुद्दस्स ॥ १०५ ॥**

व्याख्या—लभ्यन्तेऽमरनरसम्पदास्तु सौभाग्यरूपकलिताः, न च लभ्यते सम्यक्त्वं भवसमुद्रस्य तरण्डकं, उत्तारे इति शेषः । यथा चास्य दुर्लभत्वं तथा प्रागेवोक्तमिति ॥ १०५ ॥ उक्तं गुणद्वारं, अथ कतिभेदं तद्भवतीति पञ्चमद्वारमाह—

---

सर्वाण्यप्युत्सर्पिण्यवसर्पिणीसमयान् क्रमेणोत्क्रमेण वा मरणेन व्याप्नोति तावान्कालविशेषो बादरः कालपुद्गलपरावर्तः, यदा चैकः कश्चिज्जीवोऽवसर्पिण्या-द्यसमये मृतः, पुनस्स एव जीवोऽवसर्पिण्याद्यसमयस्यानन्तरे द्वितीये समये म्रियते, एवमनन्तानन्तरसमयभाविमरणैः सर्वानप्युत्सर्पिण्यवसर्पिणीसमयान् क्रमेण स्पृशन् करोति, तदा सूक्ष्मः कालपुद्गलपरावर्तो भवति । यावता कालेन अनुभागबन्धाध्यवसायस्थानानि सर्वाण्यप्यसङ्ख्येयलोकाकाशप्रदेशप्रमा-णानि यदैकेन जीवेन म्रियमाणेन क्रमेणोत्क्रमेण च स्पृष्टानि भवन्ति, तावान्कालो बादरस्तथा यावता कालेनैकेन जन्तुना प्रथमद्वितीयतृतीयाद्यनुभागब-न्धाध्यवसायस्थानेषु मरणानि कुर्वता असङ्ख्येयलोकाकाशप्रदेशप्रमाणानि सर्वाण्यप्यनुभागबन्धाध्यवसायस्थानानि स्पृष्टानि भवन्ति, तावान् कालः सूक्ष्मो भावपुद्गलपरावर्तः । अथानुभागबन्धस्थानानीति कः शब्दार्थः ?, उच्यते--तिष्ठत्यस्मिन् जीव इति स्थानं, अनुभागबन्धस्य स्थानमनुभागबन्धस्थानं, एकेन काषायिकेणाध्यवसायेन गृहीतानां कर्मपुद्गलानां विवक्षितैकसमयबद्धरससमुदायपरिमाणमित्यर्थः, तानि चानुभागबन्धस्थानान्यसङ्ख्येयलोकाकाशप्रदेशप्रमा-णानि, तेषां चानुभागबन्धस्थानानां निष्पादका ये कषायोदयरूपा अध्यवसायास्तेऽप्यनुभागबन्धस्थानानीत्युच्यन्ते, कारणे कार्योपचारात्, तेऽपि चानुभाग-बन्धाध्यवसाया असङ्ख्येयलोकाकाशप्रदेशप्रमाणा इति ४ ४-५ ॥

**खइयं खओवसमियं, वेयगमुवसामियं च सासाणं । पंचविहं सम्मत्तं, पण्णत्तं वीयरागेहिं ॥ १०६ ॥**

व्याख्या—अनन्तानुबन्धिचतुष्टयस्य त्रिविधस्यापि दर्शनमोहनीयस्य च क्षयेण–अत्यन्तोच्छेदेन निर्वृत्तं क्षायिकं, तच्च क्षपकश्रेणिमारोहतो भवति १ । तथा उदीर्णस्य मिथ्यात्वस्य क्षयेणानुदीर्णस्य चोपशमेन सम्यक्त्वरूपतापत्तिलक्षणेन विष्कम्भितोदयस्वरूपेण यन्निर्वृत्तं तत्क्षायोपशमिकं २ । तथा क्षायिकसम्यक्त्वस्यैव निर्वर्तनकालेऽनन्तानुबन्ध्यादिषु षट्सु क्षपितेषु मिथ्यात्वपुञ्जे(सम्यक्त्वपुञ्जे)ऽपि बहुतरे क्षपिते क्षायोपशमिकसम्यक्त्वपुद्गलरूपेऽवतिष्ठमानेऽपि सम्यक्त्वपुद्गलानां कियतामपि वेद्यमानत्वाद्वेदकं, तदुक्तं–"सम्मत्तचरमपुग्गल–अणुभवणा वेयगं विंति" ३ । तथा औपशमिकं तु प्रागुक्तमेव, यदुक्तं–" ऊसरदेसं दड्ढिल्लयं च विज्झाइ वणदवो पप्प । इय मिच्छस्साणुदए, उवसमसम्मं लहइ जीवो ॥१॥" उपशमश्रेण्यारूढस्य चौपशमिकं "उवसमसेढिगयस्स, होइ उवसामियं तु सम्मत्तं ।" इति ४ । तथा "उवसमसम्मत्ताओ, चयओ मिच्छं अपावमाणस्स । सासायणसम्मत्तं, तयंतरालंमि छावलिया ॥१॥" इति सम्यक्त्वं पञ्चविधं प्रज्ञप्तं वीतरागैरिति । एतदेव निसर्गाधिगमभेदाद् दशधा । अथवा " निसग्गुवएसरुई, आणरुई सुत्तबीयरुइमेव । अभिगमवित्थाररुई, किरिया संखेवधम्मरुई ॥१॥" इति दशधा सम्यक्त्वं । रोचककारकदीपकभेदास्त्वत्रैवान्तर्भूता इति गाथार्थः ॥१०६॥

षष्ठमतिचारद्वारं विभणिषुराह—

**संकाकंखविगिच्छा, पासंडीणं च संथवपसंसा । तस्स य पंचऽइयारा, वज्जेयव्वा पयत्तेणं ॥ १०७ ॥**

व्याख्या—तस्य च–सम्यक्त्वस्य पञ्चातिचाराः प्रयत्नेन वर्जनीयाः, तत्रातिचरन्ति–मालिन्योत्पादनेन सम्यक्त्वमुद्रां लङ्घयन्ति

यैस्तेऽतिचाराः, मिथ्यात्वमोहनीयोदयादात्मनोऽशुभपरिणामविशेषा इत्यर्थः । के ते ? इत्याह–शङ्कनं शङ्का, अर्हत्प्रणीतेषु जीवादितत्त्वेषु मतिमान्द्यादनवबुद्ध्यमानेषु संशयकरणमित्यर्थः, किमिदमित्थमेवान्यथा वा स्यात्? इति, सा च द्विधा–जीवो नित्योऽनित्यो वा? इत्यादिदेशविषया देशतः, मूलत एव जीवोऽस्ति न वा ? इत्यादि सर्वविषया सर्वत इति । द्विधाऽपि चेयं सम्यक्त्वं मलिनयति, सर्वज्ञोक्तेऽपि संशयात् १। तथा काङ्क्षणं काङ्क्षा–अन्यान्यदर्शनग्रहः, शाक्यादिदर्शनानामपि सर्वज्ञदर्शनतुल्यत्वेन विकल्पनमित्यर्थः, साऽपि देशतः सर्वतश्च, तत्र यदा चित्तनिग्रहादिकं कश्चिद्धर्मं सर्वज्ञोक्तमन्यदर्शने श्रुत्वा चिन्तयति–यथेदमप्येकं दर्शनं सर्वज्ञदर्शनेन तुल्यमेव, अत्रापि चित्तनिग्रहादेः प्रतिपादनात्, तदा देशतः, यदा त्वक्षपादादिषु बहुषु दर्शनेषु जीवदयादिकं श्रुत्वेत्थं विकल्पयति–सर्वाणि दर्शनानि सर्वज्ञदर्शनतुल्यानि, जीवदयादेः सर्वत्र तुल्यत्वात्, तदा सर्वतः, इयं च द्विधाऽपि सम्यक्त्वं दूषयति । घुणाक्षरन्यायेन जीवदयादेस्तुल्यत्वेऽपि शेषैः प्रभूतधर्मैरन्यदर्शनानामतीव व्यभिचारात् । अथवा ऐहिकामुष्मिकसुखादीन् काङ्क्षतः काङ्क्षा, इयमप्यतिचाररूपैव, अर्हन्निषिद्धाचरणरूपत्वेन मालिन्यहेतुत्वादिति २ । विचिकित्सा–मतिविभ्रमः, युक्त्यागमोपपन्नेऽप्यर्थे फलं प्रति सम्मोहः, किमस्यास्तपःप्रभृतिक्रियाया उत्तरकाले फलसम्पद्भविष्यति न वा ? इति, अथवा विदितयथावस्थितवस्तुत्वाद्विद्वांसः–साधवस्तेषां जुगुप्सा विद्वज्जुगुप्सा, इत्येवमिह व्याख्यायते । एषाऽपि सम्यक्त्वदूषिकैव । यदा हि मलमलिनान् साधूनालोक्य कश्चिदेवं निन्दति–हन्त !! कोऽत्र दोषः स्यात् ?, यदि स्वल्पप्रासुकजलेन शरीरादिप्रक्षालनममी कुर्वीरन्निति, तदा दूष्यत एव सम्यक्त्वं, अर्हदुक्तस्नानविभूषामार्गस्य निर्युक्तिकत्वविकल्पमात्रेणाप्रमाणीकरणात् ३ । तथा पाखण्डिनां शाक्यादीनां संस्तवः–एकत्र निवासादिरूपः परिचयः, न स्तुतिः, तस्या अनन्तरं वक्ष्यमाणत्वात्, सम्पूर्वं स्तौतेश्च परिचये रूढत्वात्, यथा–" असंस्तुतेषु प्रसभं कुलेषु" इति । अनेनाप्यतिचरत्येव जीवः

सम्यक्त्वं, तत्परिचये हि तत्क्रियाश्रवणदर्शनाभ्यां पुनरपि मिथ्याबोधोत्पत्तेः ४ । तथा तेषामेव पाखण्डिनां प्रशंसा—स्तवः, यथा—पुण्यभाज एते सुतपस्विन इति । अनयाऽपि सम्यक्त्वमालिन्यं जन्यते, तत्करणे हि तेषामात्मनोऽन्येषां च मिथ्यात्वस्थिरीकरणपक्षपात-मिथ्यात्वगमनजिनशासनद्वेषादयो दोषाः प्रभवन्तीति, तत्तपःप्रभृतिगुणानां चाज्ञानकष्टरूपत्वेनानर्थफलत्वात्, अत एते वर्जनीया इति गाथार्थः ॥ १०७ ॥ अतिचाराधिकारादन्यदपि यत्सम्यक्त्वदूषकं तन्निषेधयन्नाह—

**पिंडप्पयाणहुयणं, सोमग्गहणाइलोयकिच्चाइं । वज्जसु कुलिंगिसंगं, लोइयतित्थेसु गमणं च ॥ १०८ ॥**

व्याख्या–पिण्डप्रदानं पितृणां प्रतीतं, हवनं—अग्न्यादौ तिलादिक्षेपोऽग्निकारिकेत्यर्थः, सोमग्रहणं प्रसिद्धम्, आदिशब्दात् सूर्यग्रहण-सङ्क्रान्तिमाघनवम्यादेर्ग्रहणं । एतानि लौकिककृत्यानि वर्जय । एतेनान्यान्यपि यानि लोकहेयां प्रवृत्तानि कृत्यानि, तानि निर्युक्तिक-त्वान्निषिद्धत्वान्निष्फलत्वेन जीवघातहेतुत्वेन वर्जनीयानीत्यर्थः, तथा कुलिङ्गिभिः शाक्यादिभिः सङ्गं सम्भाषणादिकं, लौकि[कतीर्थेषु]-कायतनेषु गमनं च वर्जयेति सम्बन्ध इति गाथार्थः ॥१०८॥ ननु किमित्येवं पुनः पुनः प्राचुर्यप्रवृत्तं कुलिङ्गिसङ्गादिवर्जनं ? इत्याह—

**मिच्छत्तभाविअच्चिय, जीवो भवसायरे अणाइम्मि । दढचित्तो वि छलिज्जइ, तेण इमो नणु कुसंगेहिं ॥१०९॥**

व्याख्या—पूर्वं तावज्जीवोऽनादौ संसारसागरे मिथ्यात्वभावित एव भवेत्, तेनायं जीवः सम्यक्त्वे दृढचित्तोऽपि निश्चितं कुसङ्गैः—सहकारिभिश्छल्यते, मिथ्यात्वं नीयते इति यावत्, स्वभ्यस्तत्यक्तमदिरापानस्तद्दर्शनाघ्राणश्रवणादिभ्यस्तत्पानाभिलाषमिवेति गाथार्थः ॥ १०९ ॥ उक्तमतिचारद्वारं, सप्तमं लिङ्गद्वारं विभणिषुराह—

**जस्स भवे संवेओ, निव्वेओ उवसमो य अणुकंपा । अत्थित्तं जीवाइसु, नज्जइ तस्सऽत्थि सम्मत्तं ॥११०॥**

व्याख्या—यस्य भवेत् संवेगो निर्वेद उपशमोऽनुकम्पा जीवादिष्वस्तित्वं च, तस्य जन्तोरेतैर्लिङ्गैर्ज्ञायते, यदुत—अस्ति सम्यक्त्वं। तत्र मानुषिकसुखपरिहारेण मुक्तिसुखाभिलाषः संवेगः १ । सांसारिकदुःखेभ्यो निर्विण्णता निर्वेदः २ । अपराधवत्यप्यक्षमावर्जनमुपशमः ३ । अविशेषतो दुःखितसत्त्वेषु कारुण्यमनुकम्पा ४ । शङ्काकाङ्क्षादिरहितो जिनोदिततत्त्वाभ्युपगमो जीवाद्यस्तित्वमिति गाथार्थः ॥ ११० ॥ अपराण्यपि सम्यक्त्वगमकानि लिङ्गान्याह—

**सव्वत्थ उचियकरणं, गुणाणुराओ रई य जिणवयणे । अगुणेसु अ मज्झत्थं, सम्मद्दिट्ठिस्स लिंगाइं ॥१११॥**

व्याख्या—सम्यग्दृष्टेस्तद्भावगमकान्येतान्यपराण्यपि लिङ्गानि स्युः, कानि? इत्याह—सर्वत्र देवगुरुमातृपितृस्वजनादिषूचितकरणं १, तथा ज्ञानादिषु औदार्यगाम्भीर्यमार्गानुयायितादिषु च गुणेष्वनुरागः—प्रीतिः २, तथा रतिश्च तस्य जिनवचन एव स्यात्, यदाह—"यूनो वैदग्ध्यवतः, कान्तायुक्तस्य कामिनोऽपि दृढं । किन्नरगेयादधिकः, सम्यग्दृष्टेः श्रुतौ रागः ॥१॥" ३, तथा अगुणेषु च—गुणरहितेषु च प्राणिषु माध्यस्थ्यं-उपेक्षैव तस्य भवतीति ४, एतानि सम्यग्दृष्टेर्लिङ्गानीति गाथार्थः ॥१११॥ तदेवमुक्तानि किं सम्यक्त्वमित्यादिद्वाराणि, तेषां चोपलक्षणत्वादन्यदप्यत्राकारद्वारं द्रष्टव्यम्, ते चामी आकाराः—राजाभियोग-गणाभियोग-बलाभियोग-देवताभियोग-गुरुनिग्रह-वृत्तिकान्तारलक्षणाः षट्। तत्राभियोजनं—अनिच्छतोऽपि व्यापारणमभियोगः, राज्ञोऽभियोगो राजाभियोगः, एवमग्रेऽपि समासः । गणः—स्वजनादिसमुदायः, बलं—हठप्रयोगः, देवता—कुलदेव्यादिकेति, गुरूणां—मातापित्रादीनां निग्रहो—निर्बन्धः,

आग्रह इति यावत्, वृत्तिः—प्राणवर्त्तनरूपा, कान्तारं—अरण्यं, बाधेति यावत्, वृत्तेः कान्तारं वृत्तिकान्तारं—वृत्तिबाधेत्यर्थः। ननु कथं कान्तारमेव वृत्तेर्बाधाऽभिधीयते?, उच्यते—तद्धेतुत्वात्तस्येत्यदोषः। अत्रायम्भावः—प्रत्याख्यातमिथ्यात्वस्य तावत् "नो मे कप्पइ अ-ज्जप्पभिइ अन्नउत्थिए(इ वा अन्नउत्थियदेवयाणि वा अन्नउत्थियपरिग्गहियाणि अरिहंतचेइयाणि वा वंदित्तए वा नमंसित्तए वा पुव्विं अणालत्तेणं आलवित्तए वा [संलवित्तए वा], तेसिं असणं वा पाणं वा खाइमं वा साइमं वा दाउं वा अणुप्पयाउं) वा" इत्यादिवचनादन्यतीर्थिकादेरनुकम्पां विहाय दानवन्दनादिकमिह प्रतिषिद्धं, ततस्तेषामनुकम्पयाऽन्यत्रापि च राजाद्यभियोगादिभिः षड्भिरेतैः कारणैर्भक्तिविरहितो द्रव्यतस्तत् समाचरन्नपि कार्त्तिकश्रेष्ठ्यादिवत्सम्यक्त्वं नातिचरति। एवमन्यदप्यत्रोपयोगि स्वयमेव वाच्यमिति।

" अनन्तसंसारनिदानमेनं, मिथ्यात्वमेवं परिभाव्य भव्याः!।
सम्यक्त्वमेकं विमलं श्रयध्वं, कैवल्यलक्ष्मीं त्वरितं लभध्वम् ॥ १ ॥ "

इति पुष्पमालाविवरणे [चतुर्थे] भावनाद्वारे सम्यक्त्वशुद्धिलक्षणं प्रतिद्वारं समर्थितम् ॥ ६ ॥

सम्प्रति चरणशुद्धिद्वारं विभणिषुः पूर्वद्वारेण सम्बन्धगर्भां गाथामाह—

**चरणरहियं न जायइ, सम्मत्तं मोक्खसाहयं एक्कं। तो जयसु चरणकरणे, जइ इच्छसि मोक्खमचिरेण ॥११२॥**

व्याख्या—चरणरहितमेकमेव सम्यक्त्वं मोक्षसाधकं न जायते, तस्माच्चरणस्य करणं—निर्वर्त्तनं, प्रतिपालनमित्यर्थः। तत्र यतस्व-यतनं कुरु, यदि मोक्षं अचिरेण—स्वल्पकालेनैव इच्छसि। अयम्भावः—प्राप्तेऽपि सम्यक्त्वे चिरकालेनापि तावच्चारित्रं स्पृष्ट्वैव मोक्षः

प्रसव्यो, नान्यथा, उक्तं च—"सुट्ठु वि सम्मदिट्ठी, न सिज्झइ चरणकरणपरिहीणो" इत्यादि । तद्यद्यप्यवश्यं प्रतिपत्तव्यमेवेदं मोक्षार्थिना तदिदानीमेव प्रतिपद्यस्व, येन शीघ्रमेव समीहितं सिद्ध्यतीति । एवं च सति सम्यक्त्वशुद्धिद्वारानन्तरं चरणशुद्धिद्वारमभिधीयत इति पूर्वद्वारेण सम्बन्धाभिधानमिति गाथार्थः ॥११२॥ अथ चरणस्वरूपमेव किञ्चिद्विस्तरतो विभणिषुर्द्वारगाथामाह—

**किं चरणं? कइभेयं?, तदरिहं पडिवत्तिविहिपरूवणया । उस्सग्गऽववाएहि य,तं कस्स फलं व किं तस्स ॥११३॥**

व्याख्या — किं चरणमिति तत्स्वरूपं तावद्वाच्यं, ततः कतिभेदं तदिति वक्तव्यं । ततस्तदर्हाश्चरणयोग्या जन्तवो वाच्याः । ततोऽपि चरणस्य प्रतिपत्तिविधिप्ररूपणा कार्या । तच्चोत्सर्गापवादैश्च, युक्तमिति शेषः, तच्चरणं कस्य साधोर्भवतीत्यभिधानीयं । फलं वा—साध्यं किं तस्येति वाच्यमिति सङ्क्षेपार्थः । विस्तरार्थस्तु सूत्रकार एवाह—

**सावज्जजोगविरई, चरणं ओहेण देसियं समए । भेएण उ दुवियप्पं, देसे सव्वे य नायव्वं ॥ ११४ ॥**

व्याख्या—सह अवद्येन—पापेन वर्तन्त इति सावद्याः, योगाः—जन्तुघातादिहेत्वारम्भादिव्यापारास्तेषु सावद्ययोगेषु या विरति-र्निवृत्तिस्तच्चरणं—सपापव्यापारपरिहाररूपं, ओघेन—सामान्यतो देशसर्वादिविचारविरहेण समये—सिद्धान्ते देशितं—कथितमित्यर्थः । गतं किंचरणमिति द्वारं, कतिभेदं तदित्याह—भेदेन तु चिन्त्यमानं द्विविकल्पं—द्विप्रकारं चरणं ज्ञेयम् । तदेव द्वैविध्यमाह—देशे—स्थूलप्राणातिपातादौ सर्वस्मिंश्च—स्थूलसूक्ष्मजीवघातादौ विरतिरूपं चरणं ज्ञातव्यं, देशचारित्रं सर्वचारित्रं चेत्यर्थः, इति गाथार्थः ॥ ११४ ॥

कस्य पुनस्तावद्देशचरणं भवतीत्याह—

**देसचरणं गिहीणं, मूलुत्तरगुणविअप्पओ दुविहं । मूले पंच अणुव्वय, उत्तरगुण दिसिवयाईआ ॥११५॥**

व्याख्या—देशचरणं गृहिणामेव भवेत्, न यतीनां, तेषां सर्वचारित्र एवाधिकारात् । तदपि कतिभेदं? इत्याह—मूलोत्तरगुणविकल्पतो—मूलोत्तरगुणभेदाभ्यां तदपि द्विविधं । तत्र मूले—मूलगुणविषये पञ्चाणुव्रतानि, तत्राणूनि—महाव्रतापेक्षया लघूनि व्रतानि अणुव्रतानि, अणोर्वा गुणापेक्षया यतिभ्यो लघोः श्रावकस्य व्रतान्यणुव्रतानि, अथवा देशनाकाले महाव्रतप्ररूपणातोऽनु—पश्चात् प्ररूपणीयानि व्रतान्यनुव्रतानि, यदाह—"**जइधम्मस्सऽसमत्थे, जुज्जइ तद्देसणं पि साहूणं**"। इति, पञ्च तानि च अणुव्रतानि पञ्चाणुव्रतानि, स्थूलप्राणातिपातविरमण—स्थूलमृषावादविरमण—स्थूलादत्तादानविरमण—परदारविरमणस्वदारसन्तोष-अपरिमितपरिग्रहविरमणलक्षणानि । एतानि च श्रावकधर्मतरोर्मूलकल्पत्वान्मूलगुणाः । दिग्व्रतादीनि तु तदुपचयलक्षणगुणहेतुत्वेन श्रावकधर्मद्रुमस्य शाखाकल्पा उत्तरगुणाः, उत्तररूपा गुणा उत्तरगुणास्ते च दिग्व्रतादाः सप्त । तत्रोर्ध्वाधस्तिर्यग्दिग्गमनपरिमाणकरणं दिग्व्रतम् १ । तथा नियतपरिमाणोपभोगपरिभोगकरणमुपभोगपरिभोगव्रतम् । इदं च द्विधा—भोजनतः कर्मतश्चेति २ । तथाऽनर्थदण्डविरमणं, तत्र अर्थः—प्रयोजनं, तदभावोऽनर्थः, दण्ड्यते आत्माऽनेनेति दण्डः, अनर्थेन—प्रयोजनाभावेन निजजीवस्य दण्डोऽनर्थदण्डः, स चतुर्द्धा, तद्यथा—अपध्यानं प्रमादाचरितं हिंस्रप्रदानं पापकर्मोपदेश इति । तस्माद्विरमणं अनर्थदण्डविरमणं । एतानि च दिग्व्रतादीनि त्रीण्यपि गुणव्रतान्युच्यन्ते, अणुव्रतानां गुणाय—उपकाराय व्रतानि गुणव्रतानीतिकृत्वा, भवति ह्यणुव्रतानां गुणव्रतेभ्य उपकारो, विवक्षितक्षेत्रादिभ्योऽन्यत्र हिंसादिनिषेधादिति । अथोत्तरगुणचतुष्टयरूपाणि चत्वारि शिक्षाव्रतानि उच्यन्ते । तत्र शिक्षा—अभ्यासस्तत्प्रधानानि व्रतानि शिक्षाव्रतानि, पुनः पुनरासेवनार्हाणीत्यर्थः । तानि च सामायिकादीनि, तत्र समस्य—रागद्वेषरहितस्य जीवस्य आयो—लाभः समायः, समो ह्यनुक्षणमपूर्वज्ञानदर्शनचा-

र्निरुच्यते । समायः प्रयोजनमस्य क्रियाऽनुष्ठानस्येति सामायिकं, सावद्यपरित्यागनिरवद्यासेवनरूपो × व्रतविशेष इत्यर्थः । इदं च श्रावकेण प्रतिदिवसमन्तरान्तरा यत्नेन कर्त्तव्यम्, यदुक्तं आगमे—"जाहे खणिओ ताहे सामाइयं कुज्जा" इत्यादि [आवश्यकचूर्णौ]१। तथा देशावकाशिकलक्षणं द्वितीयं शिक्षाव्रतं, तत्र गृहीतसविस्तरदिक्प्रमाणस्य देशे—सङ्क्षिप्तविभागेऽवकाशः—अवस्थानं देशावकाशिकस्तेन निर्वृत्तं देशावकाशिकं, बहुतरदिक्परिमाणसङ्कोचरूपमिति भावः २। तथा पौषधस्तृतीयं शिक्षाव्रतं, तत्र पोषं—पुष्टिं प्रक्रमाद्धर्मस्य धत्ते—करोतीति पौषधः, अष्टमीचतुर्दशीपौर्णमास्यमावास्यापर्वदिनानुष्ठेयो + व्रतविशेषः । अयं च आहारशरीरसत्कारब्रह्मचर्याव्यापारपौषधभेदा-

---

× न हि निरवद्यासेवन–सावद्यपरित्यागरूपो, यत एतद्वेचार्थव्यापकस्तमुपलभ्यते "सामाइयं नाम सावज्जजोगपरिवज्जणं निरवज्जजोगपडिसेवणं च" इत्यावश्यकसूत्रपाठस्तथैव "सिक्खावयं तु एत्थं, सामाइयमो तयं तु विण्णेयं । सावज्जेयरजोगाण, वज्जणासेवणारूवं ॥१॥" व्याख्या–××× 'तयं तु' तत्पुनः सामायिकं 'विज्ञेयं' ज्ञातव्यं 'सावद्येतरयोगानां' सपापनिष्पापव्यापाराणां यथासङ्ख्यं [अनुक्रमेण] न त्वयथासङ्ख्यं, 'वर्जनासेवनरूपं' परिहारानुष्ठानस्वभावं" इति नवाङ्गवृत्तिकारकश्रीमदभयदेवसूरिपुरन्दरसन्दृब्धपञ्चाशकवृत्तिपाठः २२ पत्रे । एतदादिशास्त्रप्रमाणैः स्फुटतरं भवन्ति सावद्यपरिवर्जनरूपसामायिकोच्चारादर्वाङ्निरवद्यासेवनादिमिकेर्याप्रतिक्रान्तेर्निषेधः, सावद्येतरयोगानां यथासङ्ख्यमनुक्रमेणैव वर्जनासेवनरूपत्वेनोक्तत्वात् । अपरं च–अकृत्वा सावद्यमव्युत्सर्जनं शुद्धिहेतोः प्रागीर्यापथिकान्त्यभ्युपगन्तृमतेन त्वावश्यकादौ "सामाइयं नाम निरवज्जजोगपडिसेवणं सावज्जजोगपरिवज्जणं च" इत्येवं पाठो किञ्चिदुपचितोऽभूत्, परं न क्वाप्येवमुपलभ्यतेऽतो युक्तियुक्तैव शास्त्रकाराभीष्टाऽपि च सामायिकोच्चारादन्वीर्याप्रतिक्रान्तिः ।

× भापर्वस्वपि यदृच्छयाऽनुष्ठेयः, शास्त्रेष्वस्याहरस्याविप्रतिनियतदिवसेष्वेवानुष्ठेयत्वेन प्रतिदिवसेष्वनाचरणीयत्वेन चोक्तत्वात्, तथाहि–"पौषधोपवासातिथिसंविभागौ तु प्रतिनियतदिवसानुष्ठेयौ, न प्रतिदिवसा(नुष्ठेयौ)चरणीयौ" इति पञ्चाशकवृत्ति (पत्र ३०) आवश्यकबृहद्वृत्ति (पत्र ८३२) श्रावकप्रज्ञप्तिवृत्ति (पृष्ठ १८२) तत्त्वार्थ(अ० ७ सूत्र १६)वृत्त्यादयनेकेषु शास्त्रेष्वेष एव पाठः ।

ये च प्रकल्पित पण्डितम्मन्या "न प्रतिदिवसाचरणीयौ" इत्यत्र नकारो न प्रतिषेधवाचकः, तद्युक्तं, साक्षितया परिकल्पितस्य तथाविधपाठस्यैव

तथाऽवश्यकचूर्ण्यादावभावात् । अवलोकयन्तु चैतद्वाक्यवचनं-मदीयं [न प्रतिदिवसाचरणीयाविति] वचनं पर्वान्यदिनेषु पौषधनिषेधपरं, किन्तु पर्वसु पौषधकरणनियमपरं, यथा आवश्यकचूर्ण्यादौ श्राद्धपञ्चमप्रतिमाऽधिकारे 'दिवैव ब्रह्मचारी, न तु रात्रौ' इति वचनं दिवसे ब्रह्मचर्यनियमार्थं, न तु रात्रौ ब्रह्मनिषेधार्थं, अन्यथा पञ्चमप्रतिमाऽऽराधकश्राद्धेन रात्रावब्रह्मचारिणैव भाव्यमिति पापोपदेश एव दत्तः स्यात्, रात्रौ ब्रह्मपालने प्रतिमाऽतिचारश्च प्रसज्येत" इति श्राद्धप्रतिक्रमणसूत्रवृत्त्यर्थदीपिकायां १६५ पत्रे । अत्रावश्यकचूर्ण्यादिनाम्ना पञ्चमप्रतिमाराधकश्राद्धमुद्दिश्य "दिवैव ब्रह्मचारी, न तु रात्रौ" इति यदुक्तं, तदिदमत्यन्तमसत्यम्, कस्मिन्नपि शास्त्रे तथाविधशब्दगन्धस्याप्यभावात्, तथा च दृश्यन्ते कतिचित्तत्पाठाः पाठकानां मतिमोहनिरासाय—

"दिआ बंभयारी, राती परिमाणकडे अपोसहिए । पोसहिए रत्तिम्मि अ, नियमेणं बंभयारी अ ॥ १ ॥" आवश्यकबृहद्वृत्ति, पत्र ६४७ ।

" दिआ बंभयारी, राति परिमाणकडे " समवायाङ्गसूत्र, पत्र १९ ।

"असिणाणवियडभोई, मउलियडो दिवसबंभयारी अ । रत्तिं परिमाणकडो, पडिमावज्जेसु दिवसेसु ॥१॥" प्रवचनसारोद्धार, पत्र २९४ ।

"जाव पडिमा पंचमासिआ न समप्पति ताव दिवसओ बंभयारी, रत्तिं परिमाणं करेति–एग दो तिन्नि वा वारे अपोसहिओ, पोसहिओ रत्तिं पि बंभयारी" इति पञ्चाशकचूर्णिः ।

नास्त्येतेषु पाठेषु "दिवैव ब्रह्मचारी, न तु रात्रौ" इत्यर्थगन्धोऽपि, तथाऽप्येवं शास्त्रपाठपरावर्तनद्वारा स्वाभिमतसिद्धये पूर्वाचार्योपरि पापोपदेशदानस्य पातकद्वयार्जनं तत्र सुधिया स्वमताभिनिवेशव्युद्ग्राहित्वं नान्यत् किमपि कारणमवतरति दृष्टिपथे ।

अन्यच्च–ये पर्वतिथिवृद्धिप्रसङ्गे सूर्योदयात्सम्पूर्णाहोरात्रव्यापिनीषु प्रथमाष्टम्यादिपर्वतिथिष्वपि स्वयं पौषधादिधर्मकार्यान्निषेधयन्तोऽपि "पाश्वनक्षत्रीं न पश्यति" इति न्यायं आरचयन्तोऽपर्वपर्वपौषधनिषेधकत्वारोपदोषारोपणं कुर्वन्ति तैर्विचार्यमेतत्, यदुत–पौषधशब्दोऽपि पर्वपर्यायस्य वाचको, तदुक्तं श्रीमत्खरतरगच्छगगनाङ्गणनभोमणिकल्पैर्नवाङ्गवृत्तिकारैः श्रीमदभयदेवसूरिपादैः—"पौषधं-पर्वदिनमष्टम्यादिः" इति समवायाङ्गवृत्तिः, पत्र १९ । एवमेव " पोषं धत्ते पौषधः-अष्टमीचतुर्दश्यादिपर्वदिवसः" इति धर्मबिन्दुवृत्तौ श्रीमन्मुनिचन्द्रसूरयः । तथा "पौषधः पर्व इत्यनर्थान्तरं" इत्युमास्वातिवाचकमिश्रतत्त्वार्थभाष्ये, तथैव "पौषधः पर्वेति नार्थान्तरं" इति तत्त्वार्थवृत्तौ । इत्याद्यनेकैः श्रुतधरैः पौषधशब्द एव पर्ववाचकत्वेनोक्तः ।

चतुर्धा, पुनरपि प्रत्येकं द्विधा–देशतः सर्वतश्च *, अस्मिन्नङ्गीकृते आहारशरीरसत्कारयोः परिहारो ब्रह्मचर्याव्यापारयोरासेवनं च देशतः

तथा च सर्वथैवाचरणकदाचिद्यमनुष्ठानं तत्कथमपर्वण्यपि विधेयतया प्रतिपादयितुमपि शक्यते ?, न कथमपीति ।

ननु नियतदिनानुष्ठानस्य सर्वदा विधेयत्वस्वीकारे को दोषः ?, प्रत्युत कर्मनिर्जरादिविशिष्टलाभ एव भविष्यतीति चेत्तर्हि पाक्षिकादिप्रतिक्रमणानां कथं न सर्वदा विधेयत्वं स्वीक्रियते ?, किं तेषां सर्वदा करणे कर्मनिर्जरादिविशिष्टलाभो न भविष्यति ?, स्वाध्यायकरणेऽपि च किं प्रयोजनमस्वाध्यायकालवेलादिवर्जनस्य ?, कुर्वन्तु यदा तदा कालेऽकाले यदृच्छया, कर्मनिर्जरादिविशिष्टलाभस्यात्रापि समानत्वात् । चेच्छास्त्राज्ञाभङ्गप्रसङ्गान्न तथा स्वीक्रियते तदा कथमाग्रहः पौषधस्य प्रतिदिवसेऽपि विधेयत्वस्वीकारे ?, अत्रापि "प्रतिनियतदिवसानुष्ठेयो, न प्रतिदिवसा(नुष्ठेयो)चरणीयो" इत्येवंरूपशास्त्राज्ञाया भङ्गप्रसङ्गः सुदुर्निवार एवेति विमृश्यं पक्षपातविकलैस्तत्त्वविवेचकैरित्यलम् ।

* कृतचतुर्विधाहारप्रत्याख्यानस्यैवैतो मुख्यौपचारिकमन्यपौषधे त्रिविधाहारोपोषितस्य देशतो भवति, आहारचतुष्कादन्यतरत्यागस्यैव देशत्वेन व्यपदेष्टुमुचितत्वात् । कृते त्रिविधाहारोपवासे आहारचतुष्कस्यैकदेशं यत्प्रासुकोदकं, तस्य मुक्तत्वेन शेषाहारत्रिकस्य त्यागेन च युक्तियुक्तमेव तत्र 'देशत आहारपौषध' इति व्यपदेष्टुं । अन्यथा–नामाद्येकाशनतस्य न केवलं 'पौषध' इत्येतावन्मात्रमेव, किन्तु 'पौषधोपवास' इति, तच्च भिन्नोपवासं न कथमपि सफलीभूतं भवितुमर्हति, अतस्तत्रोपवासकरणमेव न्याय्यं, तथा चोक्तं परमगुरुभिर्नवाङ्गवृत्तिसूत्रणसूत्रधारैः श्रीमदभयदेवसूरिपूज्यैः–"पौषधं–पर्वदिनमष्टम्यादिस्तत्रोपवासो–ऽभक्तार्थः पौषधोपवास इति, इयं तु व्युत्पत्तिरेव, प्रवृत्तिस्त्वस्य शब्दस्याहारशरीरसंस्काराब्रह्मचर्यव्यापारपरिवर्जनेष्विति ध्येयम्" इति समवायाङ्गवृत्तौ १९ पत्रे । अनेन सिद्धं पौषधेऽभोजनं । ये पुनर्वदन्ति पौषधे भोजनाद्यनुज्ञां तेऽप्यपसिद्धान्ता एव, मोक्षमार्गः, परमन्तु तपागच्छीयाचार्यश्रीमत्सोमसुन्दरसूरिशिष्यश्रीहेमहंसगणिकृतावश्यकबालावबोधस्यैवं पाठः–"तृतीयशिक्षाव्रतं पौषधोपवासः, स च पर्वतिथिष्वहोरात्रं यावच्चतुर्विधाहारत्यागेन, तथा न शक्नोति चेत्तदा त्रिविधाहारपरित्यागेन, पश्चादशक्तावपवादत आचाम्लादिसमुच्चार्य भोजनं क्रियते" इति । तथा चापवादमुत्सर्गे निक्षिप्योपधानमन्तरेणापि पौषधे भोजनकरणकथनं वचनं प्रभुस्यूत्सूत्रानुमापकं । उपधाने त्वनुमतं पौषधिकस्य भोजनकरणं सर्वगच्छीयाचरणीतार्थैरित्यदोषः ।

सर्वतो वा भवतीति भावः। अथातिथिसंविभागश्चतुर्थं शिक्षाव्रतं, तत्र तिथिपर्वादिलौकिकव्यवहारत्यागाद्भोजनकालोपस्थायी श्रावकस्यातिथिः साधुरुच्यते। तदुक्तं—"तिथिः पर्वोत्सवाः सर्वे, त्यक्ता येन महात्मना। अतिथिं तं विजानीया—च्छेषमभ्यागतं विदुः ॥१॥" तस्यातिथेः सङ्गतो—निर्दोषो न्यायागतानां कल्पनीयानां वस्तूनां श्रद्धासत्कारादिक्रमयुक्तः पश्चात्कर्मपरिहारार्थं भागः—अंशोऽतिथिसंविभागः। तदेवमुक्तानि लेशतो द्वादशापि श्रावकव्रतानि, एतेष्वतिचारादिविचारविस्तरस्त्वावश्यकादिभ्योऽवसेयः, एतेन च व्याख्याता देशचरणस्य मूलगुणा उत्तरगुणाश्चेति गाथार्थः ॥ ११५ ॥

अथ मूलगुणैरुत्तरगुणैश्च मीलितैर्यथा देशचरणं द्वादशधा भवेत् तथा आह—

**पंच य अणुव्वयाइं, गुणव्वयाइं च हुंति तिन्नेव। सिक्खावयाइं चउरो, सव्वं चिय होइ बारसहा ॥११६॥**

व्याख्या—पञ्चैवाणुव्रतानि त्रीण्येव गुणव्रतानि भवन्ति, चत्वारि शिक्षाव्रतानि, सर्वमेवैतन्मीलितं द्वादशधा भवतीति गाथार्थः ॥११६॥

उक्तं सप्रभेदं देशचरणं, अथ सर्वचरणं निरूपयन्नाह—

**मूलुत्तरगुणभेएण, सव्वचरणं पि वण्णियं दुविहं। मूले पंच महव्वय—राईभोअणविरमणं च ॥ ११७ ॥**

व्याख्या —मूलोत्तरगुणभेदेन सर्वचरणमपि द्विविधं वर्णितं तीर्थकृद्गणधरैः, तत्र मूले—मूलगुणविषये पञ्चमहाव्रतानि, महान्ति—अणुव्रतापेक्षया गुरूणि व्रतानि महाव्रतानि, पञ्च तानि च महाव्रतानि पञ्चमहाव्रतानि, स्थूलसूक्ष्माभ्यां प्राणातिपातमृषावादादत्तादानमैथुनपरिग्रहेभ्यो विरमणलक्षणानि, षष्ठं रात्रिभोजनविरमणं चेति। ननु देशचारित्रे तु रात्रिभोजनविरमणं उत्तरगुणेषूक्तं इह तु, मूल-

गुणेष्विति कोऽत्र विशेषः ?; उच्यते—देशचारित्रिणस्त्वारम्भजप्राणातिपातादिभ्योऽनिवृत्तत्वात्स्थूलप्राणातिपातविरत्यादिषु मूलगुणेषूपकारमात्रत्वेनैव रात्रिभोजनविरमणं वर्त्तते, इत्युत्तरगुणेषूक्तं; सर्वचारित्रिणो हि सर्वसावद्यव्यापारनिवृत्तत्वात् सर्वेष्वपि मूलगुणरूपेषु महाव्रतेषु रात्रिभोजनविरमणमत्यन्तोपकारित्वेन मूलगुणेष्विति गाथार्थः ॥ ११७ ॥ उक्ताः सर्वचरणमूलगुणास्तदुत्तरगुणान्निरूपयन्नाह—

**पिंडविसोही समिई, भावण पडिमा य इंदियनिरोहो । पडिलेहणगुत्तीओ, अभिग्गहा उत्तरगुणेसु ॥११८॥**

व्याख्या—उत्तरगुणेषूच्यमानासौ सन्मतिर्यथा—पिण्डस्य विशुद्धिश्चतुर्द्धा—षोडशोद्गमदोषशुद्धिः १, षोडशोत्पादनादोषशुद्धिः २, दश ग्रहणैषणादोषशुद्धिः ३, पञ्च ग्रासैषणादोषशुद्धिः ४ इति । समितयः—ईर्यादिविषयाः पञ्च प्रसिद्धाः । भावना द्वादश—"अनित्यतामशरणं, भवमेकत्वमन्यता—मशौचमाश्रवविधिः, संवरं कर्मनिर्जराम् ॥ १ ॥ धर्मस्वाख्याततां लोकं, द्वादशीं बोधिभावनां ।" इति जानीहि । प्रतिमा द्वादश, तत्स्वरूपं च विनेयजनानुग्रहार्थं सिद्धान्तानुसारेण किञ्चिल्लिख्यते—

"मासाईसत्तंता, पढमा बिइतइयसत्तराइदिणा । अहराइ एगराई, भिक्खुपडिमाण बारसगं ॥ १ ॥"

अस्या एवं व्याख्या—मासाद्याः सप्तान्ताः सप्त भिक्षुप्रतिमा भवन्ति, तत्राद्या एकमासिकी द्वितीया द्विमासिकी यावत्सप्तमी सप्तमासिकी । ताश्च सप्ताऽपि वर्षासु नारभ्यन्ते, किन्तु ऋतुबद्धकाले एव, अतः प्रथमं सम्यग्गुरुणाऽनुज्ञातैराद्यसंहननश्च धृतियुक्तैर्जिनकल्पिकवत्—"तवेण सुत्त—सत्तेण, एगत्तग बलेण य । तुलणा य पंचहा एवं, जिणकप्पं पडिवज्जओ ॥ १ ॥" इति गाथोक्तपञ्चविधतुलनापरिकर्मितैर्गच्छमध्यस्थैरेवोत्कर्षतः किञ्चिन्न्यूनदशपूर्वाणि जघन्यतोऽपि नवमपूर्वस्य तृतीयं वस्तु यावत् सूत्रतोऽर्थतश्च पारगैर्व्युत्सृष्टदेहैरुपसर्गादिसहैः एषणाऽभिग्रहवद्भिरलेपकृद्वल्लचणकादिभिक्षाभोजिभिः—

" संसट्ठमसंसट्ठा, उद्धडा तह अप्पलेवडा चेव । उग्गहिया पग्गहिया. उज्झियधम्मा य सत्तमिया ॥ १ ॥ "

इति गाथोक्तसप्तभिक्षामध्या[दा]द्यद्वयवर्जनाच्छेषपञ्चकेऽपि कृताभिग्रहैर्दिने दिने एकां दत्तिं भक्तस्यैकां पानकस्य गृह्णद्भिरेकं मासं यावदेवं परिकर्मणां कृत्वा गच्छान्निष्क्रम्य बहिरप्येकं मासं यावत्सर्वमिदं कृत्वा दिवा वृक्षादिमूलस्थैः रात्रौ श्मशानादावेकपुद्गलन्यस्तदृष्ट्या कायोत्सर्गकारिभिर्यत्रास्तं यात्यादित्यस्ततः स्थानात् हस्त्यादिभयेऽपि पदमात्रमप्यसञ्चरद्भिर्निकटोदकेनापि पादाद्यप्रक्षालकैः स्थित्वा चतुर्विधसङ्घेन महाप्रभावनया राजादिसम्मुखानयनादिभिर्महर्द्ध्या पञ्चशब्दादिवादनपूर्वं प्रवेशकमहोत्सवेन नगरमध्येन गच्छमध्ये आगम्यते, एवं सर्वास्वपि महोत्सवः क्रियते । एवं मासद्वयेन प्रथमा प्रतिमा पूर्णा भवेत् । एवमेव पूर्वोक्तरीत्या तस्मिन्नेव वर्षे द्वितीया प्रतिमा प्रारभ्यते, मासद्वयं गच्छमध्यस्थैः परिकर्म्मणापूर्वं मासद्वयं बहिः स्थित्वा गच्छे आगम्यते । एवं मासचतुष्केण द्वितीया पूर्णा भवति, नवरं–द्वितीयाद्यासु सप्तमीं यावदेकैका दत्तिर्भक्तस्यैकैका पानकस्य क्रमक्रमेणाधिका क्रियते । एवं प्रथमवर्षे प्रतिमाद्वयं सम्पूर्यते । तृतीया तु मासत्रयं गच्छे मासत्रयं बहिरेवं षड्भिर्मासैर्द्वितीयवर्षेण पूर्यते । चतुर्थ्यपि मासचतुष्टयं गच्छे मासचतुष्टयं बहिरेवं तृतीयवर्षेण सम्पूर्णा भवेत् । ततः पञ्चमी मासपञ्चकं यावत् गच्छमध्ये चतुर्थे वर्षे परिकर्म्मणा पञ्चमे वर्षे मासपञ्चकं, बहिरवस्थानेन वर्षद्वयेन पूर्णा स्यात् । षष्ठ्यपि षष्ठसप्तमवर्षाभ्यां मासषट्कं गच्छमध्ये परिकर्म्मणया मासषट्कं बहिरवस्थानेन स्यात् । सप्तम्यपि अष्टमनवमवर्षाभ्यां गच्छे माससप्तकं परिकर्म्मणया माससप्तकं बहिर्यथोक्तविधिना महाकष्टावस्थानेन पूर्यते । एवं सप्तापि नवभिर्वर्षैः षट्पञ्चाशता मासैः सम्पूर्णा भवन्ति । तथाऽष्टमी प्रतिमा [प्रथमा] सप्तरात्रिन्दिवा नाम सप्तभिर्दिनैरेकान्तरितैः पानकाहारवर्जितैश्चतुर्भिश्चतुर्थैः पारणकाचाम्लैस्त्रिभिर्गच्छमध्यस्थैरेव साधुभिः सकलां रात्रिं यावदुत्तानकपार्श्ववर्त्तिस्थानशायिभिरूर्ध्वपादैर्निष-

ग्रास्थायकैर्दिव्याद्युपसर्गसहैः पूर्यते । नवम्यपि प्रतिमा द्वितीया सप्तरात्रिन्दिवा नाम चतुर्भिराचाम्लैस्त्रिभिरुपवासैः । नवरं–गच्छाभिष्क-म्य ग्रामादेर्बहिरेवोत्कटिकासनस्थैर्यद्वा लगण्डं–वक्रकाष्ठं, तद्वत्शायिभिर्दण्डायतवद्वा–दण्डवदायतीभूय–सरलीभूय सकलां रात्रिं शिर-सा पादाभ्यां च भूमिमस्पृशद्भिः शयानैः सम्पूर्यते । दशम्यपि तृतीया सप्तरात्रिन्दिवा नामैव नवमीवद्बहिःस्थैस्तपसा त्वष्टमीवत् । नवरं–आसनवर्जितगोदोहकपुरुषासनस्थैरथवाऽऽसनस्थैराम्रफलवत् कुब्जासनस्थैर्वा सम्पूर्यते। एवमेतास्तिस्रोऽप्येकविंशत्यादिनैर्निरन्तरैः सम्पूर्णा भवन्ति । एकादशी तु अहोरात्रिकी नामा कृताचाम्लैः सकलमहोरात्रं ग्रामादेर्बहिःस्थैर्लम्बितभुजद्वन्द्वैः कायोत्सर्गेण स्थित्वा पर्यन्ते च पानकाहारवर्जितं षष्ठं–उपवासद्वयं कृत्वैवं त्रिभिर्दिनैः पूर्यते । द्वादशी तु दिवाऽऽचाम्लं विधाय रात्रौ निर्निमेषदृष्टिभिरीषत्प्राग्भारग-तैर्ग्रामादेर्बहिः सकलां रात्रिं द्वावपि पादौ संहृत्य जिनमुद्रया स्थित्वेत्यर्थः, प्रलम्बितभुजद्वन्द्वैर्निर्निमेषदृष्टिभिः कायोत्सर्गस्थैः स्थित्वा पर्यन्ते च पानकाहारवर्जितमष्टमं–उपवासत्रयं कृत्वैवं चतुर्भिर्दिनैः सम्पूर्णा क्रियते । अष्टम्यादिषु पञ्चस्वपि प्रतिमासु दत्त्याद्यभिग्रहो न हि । सर्वप्रतिमापर्यन्ते च नानाविधलब्धय उत्पद्यन्ते । इत्येवं सङ्क्षेपेण दर्शिता द्वादशप्रतिमाः । तथा इन्द्रियाणां–स्पर्शनरसनघ्राणच-क्षुःश्रोत्रलक्षणानां निरोधः–स्वस्वविषये रागद्वेषाभ्यां प्रवृत्तिनिषेधरूपः पञ्चधा । प्रतिलेखना मुखपोतादिविषयाः पञ्चविंशतिः प्रसिद्धाः । गुप्तयो मनोवाक्कायानां सावद्यव्यापारेभ्यो गोपनरूपास्तिस्रः । अभिग्रहा द्रव्यक्षेत्रकालभावानुगता नियमविशेषाश्चतुर्विधा इति । कश्चित्तु–

“पिंडस्स जा विसोही, समिईओ भावणा तवो दुविहो । पडिमा अभिग्गहा वि य, कुनवइ उत्तरगुणा एए ॥१॥”

उपलक्षणमात्रमेव पिण्डविशुद्ध्यादीनामुत्तरगुणत्वं, ततश्च—

“इच्छा मिच्छा तहक्कारो, आवस्सिया निसीहिया आपुच्छा । पडिपुच्छा छंदणा य, निमंतणा उवसंपया काले ॥१॥”

इति प्रकारा अन्या अपि [illegible] द्रष्टव्या इति गाथार्थः ॥ ११८ ॥

उक्तं लेशतो भेदतश्चारित्रं, एवमन्येऽपि चरणभेदा इह वाच्या इति पूर्वार्द्धेन सूचयन्नुत्तरार्द्धेन तदर्हद्वारप्रस्तावनां च कुर्वन्नाह—

**इय एवमाइभेयं, चरणं सुरमणुअसिद्धिसुहकरणं। जो अरिहइ इय घेत्तुं, जे तमहं वोच्छं समासेणं ॥११९॥**

व्याख्या—इत्येवमादयः सामायिक–च्छेदोपस्थापनीय–परिहारविशुद्धि–सूक्ष्मसम्पराय–यथाख्यातलक्षणा भेदा यस्य तत्तथाभूतं।
तत्र समो–रागद्वेषरहितत्वात्, अयो–गमनं समायः, एष अन्यासामपि साधुक्रियाणामुपलक्षणं, सर्वासामपि साधुक्रियाणां रागद्वेषरहि-
तत्वात्, समायेन निर्वृत्तं समाये भवं वा सामायिकं, यद्वा समानां–ज्ञानदर्शनचारित्राणामायो–लाभः समायः, समाय एव सामायिकं।
"विनयादिभ्यष्ठक्" [पा० ५–४–३४, तथा "ठस्येकः" पा० ७–३–५०] इति स्वार्थे [ठगिकौ] इकण्। तच्च सर्वसावद्यविरतिरूपं,
यद्यपि सर्वमपि चारित्रमविशेषतस्सामायिकं, तथापि छेदादिविशेषैर्विशिष्यमाणमर्थतः शब्दान्तरतश्च नानात्वं भजते, प्रथमं पुनरविशे-
षणात् सामान्यशब्दे एवावतिष्ठते सामायिकमिति। तच्च द्विधा–इत्वरं यावत्कथिकं च, तत्रेत्वरं भरतैरावतेषु प्रथमपश्चिमतीर्थकरतीर्थेषु
अनारोपितमहाव्रतस्य शैक्षस्य विज्ञेयम्, यावत्कथिकं प्रव्रज्याप्रतिपत्तिकालादारभ्य मरणं यावत् भरतैरावतभाविमध्यमद्वाविंशतितीर्थ-
करतीर्थेषु विदेहतीर्थकरतीर्थेषु च साधूनामवसेयं, तेषां उपस्थापनाया अभावात्।

"सव्वमिणं सामाइअ–च्छेआइविसेसिअं पुण विभिन्नं। अविसेसिअसामाइअं, ठिअमिह सामन्नसन्नाए ॥१॥"
"सावज्जजोगविरइ–त्ति तत्थ सामाइअं दुहा तं च। इत्तरमावकहंति अ, कहंति पढमंतिमजिणाणं ॥ २ ॥"
"तित्थेसु अणारोविअ–वयस्स सेहस्स थेवकालीअं। सेसाणमावकहिअं, तित्थेसु विदेहयाणं च ॥ ३ ॥"

ननु चेत्वरमपि सामायिकं 'करोमि भदन्त! सामायिकं यावज्जीवं'इत्येवं यावदायुस्तावद्गृहीतं, तत उपस्थापनाकाले तत्परित्य-जतः कथं न प्रतिज्ञाभङ्गः?, उच्यते—ननु, प्रागेवोक्तं—सर्वमेवेदं चारित्रमविशेषतः सामायिकं, सर्वत्रापि सर्वसावद्ययोगविरतिसद्भावात्, केवलं छेदादिविशेषैर्विशिष्यमाणमर्थतः शब्दान्तरतश्च नानात्वं भजते, ततो यथा यावत्कथिकं सामायिकं छेदोपस्थापनं वा परमविशुद्धि-विशेषरूपसूक्ष्मसम्परायादिचारित्रावाप्तौ न भङ्गमास्कन्दति तथेत्वरमपि सामायिकं शुद्धिविशेषरूपच्छेदोपस्थापनाऽवाप्तौ, यदि प्रव्रज्या परित्यज्यते तर्हि तद्भङ्ग आपद्यते, न[तु]तु (?) तस्यैव विशुद्धिविशेषावाप्तौ। [ यदुक्तम् ]

"नणु भणिअं सव्वं चिअ, सामाइअमिणं विशुद्धिउ भिन्नं। सावज्जविरइमइयं, को अ विलोवो विसुद्धीए? ॥१॥
उक्खिवमओ भंगो, जो पुण तं चिअ करेइ सुद्धयरं। सन्नामित्तविसिट्ठं, सुहुमं पि व तस्स को भंगो? ॥२॥"

तथा छेदः पूर्वपर्यायस्य उपस्थापना च—आरोपणा महाव्रतेषु यस्मिंश्चारित्रे तच्छेदोपस्थापनं, तच्च द्विधा—सातिचारं निरतिचारं च। तत्र निरतिचारं यदित्वरसामायिकवतः शैक्षकस्यारोप्यते, तीर्थान्तरसङ्क्रान्तौ वा, यथा श्रीपार्श्वनाथतीर्थाद्वर्द्धमानस्वामितीर्थं सङ्क्रामतः पञ्चयामधर्मप्रतिपत्तौ। सातिचारं यन्मूलघातिनः व्रतोच्चारणं, उक्तं च—

"सेहस्स निरइयारे, तित्थंतरसंकमेव तं हुज्जा। मूलगुणघाइणो सा—इआरमुभयं च ठिअकप्पे॥१॥"

'उभयं चे'ति सातिचारं निरतिचारं च स्थितकल्पे—प्रथमपश्चिमतीर्थकरतीर्थे। तथा परिहरणं परिहारस्तपोविशेषस्तेन[वि]शुद्धिर्य-स्मिंश्चारित्रे तत्परिहारविशुद्धिकं। तच्च द्विधा—निर्विशमानकं निर्विष्टकायिकं च, तत्र निर्विशमानका विवक्षितचारित्रासेवकाः, निर्विष्ट-कायिका आसेवितविवक्षितचारित्रकायाः, तदव्यतिरेकाच्चारित्रमप्येवमुच्यते। इह नवको गणश्चत्वारो निर्विशमानकाश्चत्वारोऽनुचारिण

एकः कल्पस्थितो वाचनाचार्यः, यद्यपि च सर्वेऽपि श्रुतातिशयसम्पन्नास्तथापि कल्पत्वात्तेषामेकः कश्चित्कल्पस्थितोऽवस्थाप्यते । निर्विशमानकानामयं परिहारः—

" परिहारियाण उ तवो, जहन्न मज्झो तहेव उक्कोसो । सीउण्हवासकाले, भणिओ धीरेहिं पत्तेयं ॥ १ ॥ "

" होइ जहन्नो गिम्हे, चउत्थछट्ठं तु होइ मज्झिमओ । अट्ठमिह उक्कोसो, इत्तो सिसिरे पवक्खामि ॥ २ ॥ "

" सिसिरे उ जहन्नाई, छट्ठाई दसमचरिमगो होई । वासासु अट्ठमाई, बारस पज्जंतगो(होइ)नेओ ॥ ३ ॥ "

" पारणगे आयामं, पंचसु गहो दो सभिग्गहो भिक्खे । कप्पट्ठियावि पइदिणं, करंति एमेव आयामं ॥ ४ ॥ "

" एवं छम्मासतवं, चरिउं परिहारिगा अणुचरंति । अणुचरिगे परिहारिय–पयट्ठिए जाव छम्मासा ॥ ५ ॥ "

" कप्पट्ठिओ वि एवं, छम्मासतवं करेइ सेसाओ । अणुपरिहारगभावं, वयंति कप्पट्ठिगत्तं च ॥ ६ ॥ "

" एवेसो अट्ठारस, मासपमाणो उ वण्णिओ कप्पो । संखेवओ विसेसो, सुत्ताद्देसाउ नायव्वो ॥ ७ ॥ "

" कप्पसमत्तीइ तयं, जिणकप्पं वा उविंति गच्छं वा । पडिवज्जमाणगा पुण, जिणस्सगासे पवज्जंति ॥ ८ ॥ "

" तित्थयरसमीवासे–वगस्स पासे व नो उ अन्नस्स । एएसिं जं चरणं, परिहारविसुद्धिगं तं तु ॥ ९ ॥ "

तथा सम्पर्यैति संसारमनेनेति सम्परायः–कषायोदयः, सूक्ष्मो, लोभांशावशेषत्वात्, सम्परायः–कषायोदयो यत्र तत्सूक्ष्मसम्परायम् । तच्च द्विधा–विशुद्ध्यमानकं सङ्क्लिश्यमानकं च, तत्र विशुद्ध्यमानकं क्षपकश्रेणिमुपशमश्रेणिं वा समारोहतः, सङ्क्लिश्यमानकं तूपशमश्रेणितः प्रच्यवमानस्य । उक्तं च—

" सेढिं विलग्गओ सं, विसुद्धमाणं तओ चुअंतस्स । तह संकिलिस्समाणं, परिणामविसेसेण विन्नेयं ॥ १ ॥ "
तथा यथाख्यातमिति, यथा--यस्मिंल्लोके ख्यातं-प्रसिद्धमकषायं भवति चारित्रमिति तथैव यथाख्यातं, अथाख्यातमिति द्वितीयं
नाम, तस्यायमन्वयः-अथ शब्दो यथार्थे, आङभिविधौ, याथातथ्येनाभिविधिना च यत्ख्यातं अकषायचारित्रमिति तदथाख्यातं, उक्तं
च-"अहसद्दो जाहत्थे, आङोऽभिविहीए कहिअमक्खायं । चरणमकसायमुदिअं, तमहक्खायं जहक्खायं ॥१॥"
इदं च द्विधा-छाद्मस्थिकं कैवलिकं च, तत्र छाद्मस्थिकं उपशान्तमोहगुणस्थानके क्षीणमोहगुणस्थानके वा, कैवलिकं च सयोगिके-
वलिभवमयोगिकेवलिभवं चेति । चरणं-चारित्रं, कथम्भूतं? इत्याह-सुराश्च मनुजाश्च सिद्धिश्च, तासां सुखं शक्रचक्रवर्त्यादिभोगजितं
निरुपमस्वाभाविकपरमानन्दरूपं, तत् क्रियतेऽनेनेति करणं, एतच्च यो ग्रहीतुं-आसेवितुमर्हति, "जे" पादपूरणे, तमहं समासेन-सङ्क्षेपेण
वक्ष्ये इति गाथार्थः ॥ ११९ ॥ चरणाधिकारिषु तावद्देशचरणाधिकारिणं निरूपयन्नाह—

**संवेगभाविअमणो, सम्मत्ते निच्चलो थिरपइन्नो । विजिइंदिओ अमाई, पन्नवणिज्जो किवालू अ ॥ १२० ॥**
**जइधम्मम्मि वि कुसलो, धीमं आणारुई सुसीलो अ । विन्नायतस्सरूवो, अहिगारी देसविरईए ॥१२१॥**

व्याख्या—संवेगभावितमनाः सम्यक्त्वे निश्चलः स्थिरप्रतिज्ञो विजितेन्द्रियोऽमायः प्रज्ञापनीयः, अकदाग्रहीत्यर्थः, कृपालुश्च ।
यतिधर्मेऽपि कुशलः, उक्तं च-"नापऽणगारधम्मे, सावगधम्मे भवेज्ज जोगो"त्ति । [तथा धीमान्-तीर्थान्तरीयैरक्षोभ्यो निपु-
णबुद्धिः] आज्ञारुचिः-आज्ञाग्राह्यनिगोदादिजीवसत्ताङ्गीकारकः, सुशीलो, विज्ञाततत्स्वरूपो-ज्ञातदेशचरणस्वरूपः, उपलक्षणं चैतेऽन्येऽपि

विनीतत्वादयो गुणा यथासम्भवं ग्राह्याः । अत्र च पूर्वपूर्वगुणसद्भावेऽपि उत्तरोत्तरगुणाभावेऽनधिकार्येव, इत्येवम्भूतसर्वगुणविशिष्टो देशविरतिप्रतिपत्तावधिकारीति गाथार्थः १२०–१२१ ॥ अथ सर्वचरणार्हान् प्ररूपयन्नाह—

**पाएण होंति जोग्गा, पव्वज्जाए वि तेच्चिय मणुस्सा । देसकुलजाइसुद्धा, बहुखीणप्पायकम्मंसा ॥ १२२ ॥**

व्याख्या—य एव देशविरतेर्योग्या उक्ताः, सर्वविरतिरूपायाः प्रव्रज्याया अपि प्रतिपत्तौ त एव प्रायो देशकुलजातिविशुद्धा बहुक्षीणप्रायकर्मांशा मनुष्या योग्या–अधिकारिणो भवन्ति । देश आर्यादिः, पैत्रिकं कुलं, मात्रिकी जातिः । न देशविरतिप्रतिपत्तुर्मनुष्यत्वदेशशुद्धत्वादीनि विशेषणानि, तस्यास्तिर्यगादिभ्योऽपि दीयमानत्वात् । नापि बहुक्षीणप्रायकर्मांशत्वविशेषणं, यावत्यां हि कर्मस्थितौ सत्यां सम्यक्त्वं लभ्यते, तस्याः पल्योपमपृथक्त्वे क्षीणे देशविरतः श्रावको भवति, ततोऽपि सङ्ख्यातेषु सागरोपमेषु क्षीणेषु सर्वविरतिचरणं लभ्यते, ततोऽपि तावत्स्वेतेषु क्षीणेषूपशमश्रेणिः, ततोऽपि इयत्स्वेतेष्वतिक्रान्तेषु क्षपकश्रेणिः । तदुक्तम्—

"सम्मत्तम्मि उ लद्धे, पलियपुहुत्तेण सावओ होज्जा । चरणोवसमखयाणं, सागरसंखंतरा होंति ॥ १ ॥" इति ।

उपलक्षणमात्रमेते च गुणास्तेनान्येऽपि वयःप्राप्तत्वारोग्यादयोऽत्र गुणा द्रष्टव्या इति गाथार्थः ॥ १२२ ॥ अन्वयव्यतिरेकाभ्यां निर्णीतोऽर्थस्सुग्राह्यः स्यादतः सर्वविरतेर्योग्या उक्ताः, अथ अयोग्यानाह—

**अट्ठारस पुरिसेसुं, वीसं इत्थीसु दस नपुंसेसुं । जिणपडिकुट्ठत्ति तओ, पव्वावेउं न कप्पंति ॥ १२३ ॥**

व्याख्या—पुरुषेषु मध्येऽष्टादश स्त्रीषु विंशतिर्नपुंसकेषु दश, एते जिनैः प्रतिकुष्टा–निवारिता, इत्यतः प्रव्राजयितुं न कल्पन्ते इति गाथार्थः १२३ ॥ तत्र ये पुरुषेष्वष्टादश तानाह—

बाले बुड्ढे नपुंसे य, कीबे जड्डे य वाहिए । तेणे रायावगारी य, उम्मत्ते अ अदंसणे ॥ १२४ ॥
दासे दुट्ठे य मूढ य, अ[रि]णत्ते जुंगिए इय । ओबद्धए य भयए, सेहनिप्फेडिया इय ॥ १२५ ॥

व्याख्या—अत्र सप्ताष्टौ वर्षाणि यावद्बालः । सप्ततिवर्षाणामुपरि वृद्धः, षष्टिवर्षाणामुपरीति केचित् । न स्त्री न पुमान् नपुंसकं । (यः स्त्रीभिर्भोगैर्निमन्त्रितोऽसंवृत्ताया वा स्त्रियोऽङ्गोपाङ्गानि दृष्ट्वा शब्दं वा मन्मनोल्लापादिकं तासां श्रुत्वा समुद्भूतकामाभिलाषोऽधिसोढुं न शक्नोति स क्लीबः) । जड्डस्तु त्रिधा—भाषया शरीरेण करणेन च, तत्र भाषाजड्डस्त्रिधा—जलमूको मन्मनमूक एलकमूकः, अत्र जल-निमग्न इव बुडबुडायमानो यो वक्ति स जलमूकः, यस्य तु वदतः खण्डमानमिव वचनं स्खलति स मन्मनमूकः, यस्त्वेलक इवाव्यक्तं शब्दमात्रमेव करोति स एलकमूकः । शरीरजड्डस्तु यः पथि भिक्षाऽटने वन्दनादिषु चातीव स्थूलादितयाऽशक्तो भवेत् । करणं क्रिया, तस्यां जड्डः, समितिगुप्तिप्रतिक्रमणप्रत्युपेक्षणादिक्रियामसकृदुपदिश्यमानामपि यो गृहीतुं न शक्नोति स इत्यर्थः । भगन्दरार्शःकुष्ठादि-रोगैर्ग्रस्तो व्याधितः । चौर्यरतः स्तेनः । राजादिद्रोहकृद्राजापकारी । यक्षादिना प्रबलमोहोदयेन वा परवशतां नीत उन्मत्तः । अन्धो-ऽदर्शनः स्त्यानर्द्धिनिद्रोदयवान्वा । तथा दासीजातः अर्थेन वा क्रीतः ऋणादिव्यतिकरे च रुद्धो वा दास उच्यते । दुष्टो द्विधा-कषाय-दुष्टो विषयदुष्टश्च, तत्र कषायदुष्टोऽत्युत्कटकषायः, विषयदुष्टोऽतीव परयोषिदादिषु गृद्धः । स्नेहाज्ञानादिना यथावस्थितवस्त्वनभिज्ञो मूढः । योऽन्येषां धनादिर्धारयति स ऋणार्त्तः । जातिकर्मशरीरादिभिर्दूषितो जुङ्गितः, तत्र छिम्पकमातङ्गादयोऽस्पृश्याः कुर्कुटादिपोषकाः स्पृश्याश्च जातिजुङ्गिताः, नखप्रक्षालनादिनिन्दितकर्म्मकारिणः कर्म्मजुङ्गिताः, करकर्णादिवर्जिताः कुब्जकाणपङ्ग्वादयश्च शरीरजुङ्गिताः

अर्थग्रहणनिमित्तं विद्यादिग्रहणनिमित्तं वा इयत्कालं त्वदीयोऽहमित्येवं येनात्मनः परायत्तता कृता स्यात् सोऽवबद्धः । भृत्या परादेशकरणाय प्रवृत्तो भृतकः । शैक्षकस्य–अन्येन दीक्षितुमिष्टस्योपलक्षणान्मातापित्राद्यननुज्ञातस्य च निस्फेटिका–दीक्षितुमपहरणं शैक्षकनिस्फेटिका । इत्यष्टादश दीक्षाऽनर्हाः पुरुषस्य–पुरुषाकारवतो भेदा इत्युत्तरगाथायां सम्बन्धः । एषां च बालादीनां दीक्षणे प्रवचनमालिन्यसंयमात्मविराधनादिदोषाः सुखावसेया इति नोक्ताः, वैरस्वाम्यादिप्रव्राजने त्वपवादपदमिति साधिकगाथाद्वयार्थः ॥ १२४–१२५ ॥

अथोक्तान् व्रतानर्हपुरुषभेदाननुपसंहरन्नुक्तां[श्च] स्त्रीभेदानाह—

**इय अट्ठारस भेया, पुरिसस्स तहित्थियाए ते चेव । गुव्विणि सबालवच्छा, दोन्नि इमे होंति अन्ने वि ॥१२६॥**

व्याख्या—यथा पुरुषाकारवतस्तथा स्त्रीजनाकारवतोऽपि व्रतायोग्या बालादयोऽष्टादश भेदास्त एव, तथाऽन्यावपि द्वाविमौ भवतः–गुर्विणी, सह बालेन–स्तनपायिना वत्सेन वर्तत इति सबालवत्सा । एते सर्वेऽपि विंशतिः स्त्रीभेदा इति गाथार्थः ॥ १२६ ॥

श्रुतोक्तेषु षोडशभेदेषु नपुंसकेषु "दस नपुंसेसु"त्ति मूलगाथोक्तान् व्रतानर्हान् दश तद्भेदानाह—

**पंडए वाइए कीवे, कुंभी ईसालुए त्ति य । सउणी तक्कम्मसेवी य, पक्खियापक्खिए इय ॥ १२७ ॥**
**सोगंधिए य आसित्ते, दस एए नपुंसगा । संकिलिट्ठ त्ति साहूणं, पव्वावेउं अकप्पिया ॥ १२८ ॥**

व्याख्या—तत्र पण्डकस्य स्वरूपं तावदत्रैव किञ्चिद्वक्ष्यति । वातक्यादीनां तु स्वरूपं विशेषत इदं–सनिमित्तमनिमित्तं वा लिङ्गे स्तब्धे स्त्रीसेवां विना यो वेदं न धारयति स वातिकः । क्लीबश्चतुर्धा–यो विवस्त्रां स्त्रियं वीक्ष्य क्षुभ्यति स दृष्टिक्लीबः, यः शब्दं श्रुत्वा

क्षुभ्यति स शब्दक्लीबः, एवमाश्लिष्टो निमन्त्रितश्च। यस्य मोहोत्कटतया द्रावकाले लिङ्गं वृषणौ वा कुम्भवदुच्छूनतः स कुम्भी। स्त्रियमासेव्यमानामालोक्य यस्येर्ष्या महती जायते स ईर्ष्यालुः। यो वेदोत्कटतयाऽभीक्ष्णं मैथुनासक्तः स शकुनिः। यो गलितशुक्रः श्वान इव स्वलिङ्गं लेढि स तत्कर्मसेवी। यः शुक्लपक्षे सवेदो, न कृष्णपक्षे, स पाक्षिकापाक्षिकः। यस्सुभगं मन्यानः स्वलिङ्गं जिघ्रति स सौगन्धिकः। यो वीर्यपातेऽपि स्त्रियमालिङ्ग्य तिष्ठति स आसक्त इति। सामान्यतः पुनरत्रैवाह—एते दशापि नपुंसकाः सङ्क्लिष्टाः स्त्र्याद्यासेवनामाश्रित्यातीवाशुभाध्यवसायवन्तः, अविशेषेण नगरमहादाहसमानकामाध्यवसायसम्पन्नत्वात्, इति साधूनां प्रव्राजयितुमकल्पिता—अयोग्या इति गाथार्थः ॥ १२७–१२८ ॥ अथ व्रताहोन् षड्नपुंसकभेदानाह—

वद्धिए चिप्पिए चेव, मंतओसहि उवहए। इसिसत्ते देवसत्ते य, पव्वावेज्ज नपुंसए ॥ १२९ ॥

व्याख्या—यस्य बालत्वेऽपि छेदं दत्वा वृषणौ गालितौ भवतः स वर्द्धितः। यस्य च जातमात्रस्याङ्गुष्ठाङ्गुलीभिर्मर्दयित्वा वृषणौ द्रावितौ स्तः स चिप्पितः। कस्यचिन्मन्त्रसामर्थ्यादन्यस्यौषधिवशतः पुंवेदः स्त्रीवेदो वा उपहतः। अन्यश्च 'मदीयतपःप्रभावादसौ नपुंसको भवत्वि'ति ऋषिणा शप्तो देवेन वा शप्तः। एवं च सत्येतेषां नपुंसकवेदोदयो जायते, इत्येतान् षड्नपुंसकान् निशीथोक्तविशेषलक्षणसम्भवे सति प्रव्राजयेदिति श्लोकार्थः ॥ १२९ ॥ पूर्वोक्तपण्डकस्वरूपमाह—

महिलासहावो सरवण्णभेओ, मिंढं महंतं मउआ य वाणी। ससद्दयं मुत्तमफेणगं च, एयाणि छप्पंडगलक्खणाणि

व्याख्या—पुरुषाकारवतोऽपि महिलास्वभावत्वं पण्डकस्यैकं लक्षणं। स्वरवर्णयोर्भेदः—स्त्रीपुरुषापेक्षया वैलक्षण्यं, उपलक्षणत्वाद्,

गन्धरसस्पर्शानां चेति द्वितीयमिदं। मेढ्रं–पुरुषचिन्हं महद्भवति। मृद्वी च वाणी योषिद् वाणी इव जायते। ललनाया इव सशब्दं मूत्रं भवेत्, फेनरहितं च तद्भवति। एतानि षट्पण्डकलक्षणानि। वातकयादीनां तु स्वरूपं मूलगाथाव्याख्यायामुक्तमेवेति वृत्तार्थः ॥१२०॥

तदेवं दार्शनाः सर्वविरतेरयोग्याः, देशविरत्ययोग्यास्त्वसंवेगभावितचित्तादयः स्वयमभ्यूह्याः। एवं च समर्थितं तदर्हद्वारं, अथ प्रतिपत्तिविधिप्ररूपणाद्वारं विभणिषुराह—

**बालाइदोसरहिओ, उवट्ठिओ जइ हविज्ज चरणऽत्थं। तं तस्स पउत्तालो–यणस्स सुगुरुहिं दायव्वं ॥१२१॥**

व्याख्या—पूर्वोक्तबालादिदोषै रहितो यदि चरणार्थमुपस्थितो भवेत्तदा प्रथममेव प्रयुक्तालोचनस्य–दत्तालोचनस्य तस्य 'तं' इति चरणं सुगुरुभिर्दातव्यमिति गाथार्थः ॥ १२१ ॥ किमेतावन्मात्रेणैव तद्दीयते?, नेत्याह—

**आलोयणसुद्धस्स वि, दिज्ज विणीयस्स नाविणीयस्स। नहि दिज्जइ आभरणं, पलियत्तियकन्नहत्थस्स ॥१२२॥**

व्याख्या—आलोचनाशुद्धस्यापि विनीतस्यैव तद्देयं, नाविनीतस्य। अमुमेवार्थमर्थान्तरन्यासेन दृढयति–नहि आभरणं परिकर्त्तित-कर्णहस्तस्य दीयत इति गाथार्थः ॥ १२२ ॥ अथ विनीतस्वरूपमेवाह—

**अणुरत्तो भत्तिगओ, अमुई अणुवत्तओ विसेसन्नू। उज्जुत्तोऽपरितंतो, इच्छियमत्थं लहइ साहू ॥१२३॥**

व्याख्या—स एव साधुरीप्सितं चरणादिकमर्थं लभते, यः, कथम्भूतः? इत्याह–'अनुरक्तः' पटे नीलीरङ्ग इव गुरुषु प्रतिबद्धः। गुरोर्भक्ति–कृताञ्जलिपुटादिभावेन सेवां गतः–प्राप्तो गुरुभक्तिगतः। अमोचको–यावज्जीवितं गुरुचरणापरिहारी। अनुवर्तकः–सर्वेषा-

ष्यौचित्यप्रवृत्तिनिष्ठः। विशेषज्ञः—सदसद्वस्तुविवेकज्ञाता। उद्युक्तः—अध्ययनवैयावृत्त्यादिष्वतीवोद्यमपरः। अपरितान्तो—विवक्षितार्थसाधनेऽनिर्विण्णः। तदर्हद्वारसङ्गृहीतमपि विनीतत्वं विनयगुणस्य मुख्यतयाऽन्वेषणीयत्वख्यापनार्थं पुनरुपन्यस्तमिति गाथार्थः ॥१३३॥

विनीतस्यापि केन विधिना चरणं देयं? इत्याह—

**विणयवओ वि हु कयमंगलस्स तदविग्घपारगमणाय। दिज सुकओवओगो, खित्ताइसु सुप्पसत्थेसु ॥१३४॥**

व्याख्या—विनयवतोऽपि दद्यास्त्वं चारित्रं, कथम्भूतस्य? इत्याह—कृतानि मङ्गलानि जिनचैत्यसङ्घपूजादीनि येन, तस्य, किमर्थं? इत्याह—'तस्य' चरणस्याविघ्नं पारगमनाय। गुरुगतं विधिमाह—सुष्ठु कृत उपयोगो निमित्तादिषु येन स तथा, केषु? इत्याह—क्षेत्रादिषु सुप्रशस्तेषु, तत्र क्षेत्रे जिनायतनेक्षुक्षेत्रक्षीरवृक्षसमीपादौ दातव्यं चरणं, न तु भग्नश्यामितकचवराकीर्णादौ। कालेऽपि—

"चाउद्दसिं पन्नरसिं, च वज्जए अट्ठमिं च नवमिं च। छट्ठिं च चउत्थिं बा-रसिं च सेसासु दिज्जाहि ॥ १ ॥"

"तिसु उत्तरासु तह, रोहिणीसु कुज्जा हु सेहनिक्खमणं। गणिवायए अणुन्ना, महव्वयाणं च आरुहणा ॥२॥"

इत्यादितिथिनक्षत्रादिशुद्धिकलिते, नाप्रशस्ते। भावेऽपि प्रशस्ताहारादिप्रवृत्तिशुद्ध इति गाथार्थः ॥ १३४ ॥

श्रुतोक्तस्य सर्वस्यापि विधेर्वक्तुमशक्यत्वादुपसंहरन् परीक्षाकालदर्शनपूर्वं व्रतदानमाह—

**इय एवमाइविहिणा, पाएण परिक्खिऊण छम्मासा। पव्वज्जा दायव्वा, सत्ताणं भवविरत्ताणं ॥ १३५ ॥**

व्याख्या—प्रायेण इत्येवमादिविधिना षण्मासान् परीक्ष्य भवविरक्तानां सत्त्वानां प्रव्रज्या दातव्या, वैरस्वाम्यार्यरक्षितादिभिरुदायिनृपमारकादिभिश्च व्यभिचारवारणाय प्रायो ग्रहणमिति गाथार्थः ॥ १३५ ॥

यदेवं सर्वविरतिसामायिकप्रतिपत्तिविधिरुक्तः, अथ महाव्रतारोपणं लेशतो दर्शयितुमाह—

**विहिपडिवन्नचरित्तो, दढधम्मो जइ अवज्जभीरू य। तो सो उवट्ठविज्जइ, वएसु विहिणा इमो सो उ ॥१२६॥**

व्याख्या—विधिप्रतिपन्नचारित्रो यदि दृढधर्मा पापभीरुश्च, ततः स विधिना व्रतेषु उपस्थाप्यते—आरोप्यते, स पुनर्विधिरयं वक्ष्यमाण इति गाथार्थः ॥ १२६ ॥ तमेवाह—

**पढिए य कहिय अहिगय, परिहारुट्ठावणाए सो कप्पो। छज्जीवघायविरओ, तिविहंतिविहेण परिहा(?)री[रो] ॥१२७॥**

व्याख्या—यथोक्तगुणविशिष्टोऽपि स एवोपस्थापनायां—व्रतारोपणायां क[ल्प्यो]ल्पो—योग्यः, यः ''परिहार'' इति प्राकृतत्वाल्लुप्तेकारान्तनिर्देशात् परिहारी—सर्वविरतः, क्व सति? इत्याह—'पठिते' षड्जीवनिकायमहाव्रतरूपादिप्रतिपादके शस्त्रपरिज्ञादशवैकालिकाद्युचितसूत्रेऽधीते, ततः कथिते—गुरुणा तदर्थे व्याख्याते, ततोऽप्यधिगते—शिष्येणापि तस्मिन् सम्यगवधारिते सति। ननु कः पुनः परिहारी? इत्याह—षड्जीवकायघातात्त्रिविधंत्रिविधेन—मनोवाक्कायैः करणकारणानुमतिभिर्विरतो—निवृत्तो यः स इह परिहारीत्यभिमतः, सूत्रार्थाभ्यामधिगतशस्त्रपरिज्ञादिश्रुतः षड्जीवनिकायं श्रद्दधानो व्रतोपस्थापनायोग्यो भवतीति भाव इति गाथार्थः ॥ १२७ ॥

उक्तवक्ष्यमाणविधिविपर्यये दोषमाह—

**अप्पत्ते अकहित्ता, अणहिगयऽपरिच्छणे य आणाई। दोसा जिणेहिं भणिया, तम्हा पत्ता दुवट्ठावे ॥१२८॥**

व्याख्या—इहानन्तरमेव वक्ष्यमाणो जघन्यतः सप्ताहोरात्रादिरुपस्थापनायां कालक्रमस्तं अप्राप्तेऽल्पकालिके शैक्षके, अकथयित्वा

च यथोक्तसूत्रार्थं, अनधिगते च शिष्यके तस्मिन्, तथा अपरीक्षया च शिष्यकस्य, किं जीवनिकायानसौ श्रद्धत्ते न वा ?, श्रद्दधानेऽपि तान् रक्षति न वा ? इत्येवं बुधैः सूत्रोक्तविधिना परीक्षायामकृतायामित्यर्थः । उपस्थापनां कुर्वीत इति सर्वत्र गम्यम् । आज्ञाविराधनाऽनवस्थादयो दोषा जिनैर्भणिताः, तस्मात्कालक्रमेण प्राप्तादीनेवोपस्थापयेन्नान्यानिति गाथार्थः ॥ १३८ ॥

उपस्थापनायोग्यतायां कालक्रममाह—

**सेहस्स तिन्नि भूमी, जहन्न तह मज्झिमा य उक्कोसा । राइंदिय सत्त चउमा-सिया य छम्मासिया चेव ॥१३९॥**

व्याख्या— शिष्यक[शैक्ष]स्य अभिनवदीक्षितस्य व्रतोपस्थापनायां कर्त्तव्यायां तिस्रोभूमिका-योग्यतास्थानानि, तद्यथा-जघन्या तथा मध्यमा उत्कृष्टा च । तत्र जघन्या सप्ताहोरात्रिकी मध्यमा चातुर्मासिकी उत्कृष्टा षाण्मासिकी चेति । सप्ताहोरात्रादिभिरतिक्रान्तैर्व्रतोपस्थापनायोग्यः शैक्षकः स्यादिति गाथार्थः ॥ १३९ ॥ तत्र कस्य का भूमिर्भवेदित्याह—

**पुव्वोवट्ठपुराणे, करणजयट्ठा जहण्णिया भूमी । उक्कोसा उ दुम्मेहं, पडुच्च अस्सद्दहाणं च ॥ १४० ॥**

व्याख्या—'पुराणः' समयभाषया व्रतभग्न उच्यते, पूर्वं व्रतेषूपस्थापितः पूर्वोपस्थापितः, स चासौ पुराणश्च पूर्वोपस्थापितपुराणः, तस्मिन् यथोक्ता जघन्या भूमिः, कर्म्मक्षयोपशमवशात् पुनरप्यसौ कथञ्चित्प्रव्रजितोऽपि सप्तभिरहोरात्रैरतिक्रान्तैर्व्रतेषूपस्थाप्यते । ननु तस्य सूत्रं पूर्वाधीतमेव, ततश्च सप्ताहोरात्रातिक्रममपि यावत्किमर्थं विलम्बित ? इत्याह-'करणानि' इन्द्रियाणि, तज्जयार्थं, एतावन्तमपि कालं विना करणजयोऽपि सम्यङ्न जायत इत्याशयः । उत्कृष्टा तु षाण्मासिकी भूमिर्दुर्मेधसं-मन्दप्रज्ञं प्रतीत्य, तस्य हि यथोक्तश्रुतं शीघ्रमेव

नागच्छतीति भावः । अथवा अश्रद्धानं प्रतीत्योत्कृष्टा भूमिः, शीघ्रमपि तत्रोऽपि मिथ्यात्वमोहनीयोदयादेकेन्द्रियजीवादिकं यो न श्रद्धत्ते तथापि बोध्यमानस्योत्कृष्टा षाण्मासिकी भूमिर्भवतीत्यर्थः, इति गाथार्थः ॥ १४० ॥ तर्हि मध्यमा कस्य ? इत्याह—

**एमेव य मज्झिमिया, अणहिज्जंते असद्दहंते य । भावियमेहाविस्स वि, करणजयट्ठा य मज्झिमिया ॥१४१॥**

व्याख्या—एवमेव दुर्मेधस्त्वेन सूत्रमनधीयाने मोहोदयाद्वा अश्रद्धानवति पूर्वोक्तात्किञ्चिद्विशिष्टतरे मध्यमा—चातुर्मासिकी भूमिर्भवति । तथा च भावितमेधाविनोऽपि अपुराणस्य करणजयार्थं मध्यमा भूमिर्द्रष्टव्येति गाथार्थः ॥ १४१ ॥

तदेवं कृता लेशतः प्रतिपत्तिविधिप्ररूपणा, अथोत्सर्गापवादविशुद्ध्या तच्चारित्रं भवतीति चिन्तनीयं, तत्र पूर्वोक्तविधिप्रतिपन्नमहाव्रतस्य तत्पालनोपदेशमभिधित्सुः प्राणातिपातव्रतपरिपालनोपदेशं तावदुत्सर्गतः प्राह—

**इय विहिपडिवन्नवओ, जएज्ज छज्जीवकायजयणासु । दुग्गइनिबंधणच्चिय, तप्पडिवत्ती भवे इहरा ॥१४२॥**

व्याख्या—इत्युक्तविधिप्रतिपन्नव्रतः षड्जीवकाययतनासु यत्नं कुर्यात्, इतरथा—षड्जीवकायपालनमन्तरेण तत्प्रतिपत्तिः—व्रतप्रतिपत्तिर्दुर्गतिनिबन्धनैव भवेदिति गाथार्थः ॥ १४२ ॥ षड्जीवकाययतनोपायमेवाह—

**एगिंदिएसु पंचसु, तसेसु कयकारणाणुमइभेयं । संघट्टणपरितावण—ववरोवणं चयसु तिविहेणं ॥ १४३ ॥**

व्याख्या—एकेन्द्रियेषु पञ्चसु पृथिव्यादिषु, त्रसेषु द्वीन्द्रियादिषु च, त्यज त्वं, किम् ? इत्याह—सङ्घट्टनं चरणस्पर्शादिभवं, परितापनं—लकुटघातादिना गाढपीडनरूपं, तथा व्यपरोपणं—प्राणेभ्यश्च्यावनं, एकैकमिदं कथम्भूतं ? इत्याह—कृतकारणानुमतिभेदं, केन

त्यज ? इत्याह—'त्रिविधेन' मनसा वचसा कायेन चेत्यर्थः, एवं च कुर्वता षड्जीवकाययतनासु प्रयत्नः कृतः स्यादिति भावः, इति गाथार्थः ॥ १४३ ॥ अस्य च विशेषतः कर्त्तव्यतामाह—

**जइ मिच्छदिट्ठियाण वि, जत्तो केसिंचि जीवरक्खाए। कह साहूहिं न एसो, कायव्वो? मुणियसारेहिं ॥१४४॥**

व्याख्या—यदि नाम अविदितपरमार्थानां मिथ्यादृशामपि केषाञ्चित्स्वाभिप्रायतो जीवरक्षायां कोऽपि कथञ्चिद्यत्नो दृश्यते, तर्हि कथं ज्ञातसिद्धान्तसारैः साधुभिरेष—जीवरक्षायत्नो न कर्त्तव्यः ?, कर्त्तव्य एवेत्यर्थः, इति गाथार्थः ॥ १४४ ॥

नन्वशक्यानुष्ठानत्वान्न केनाप्यसौ कृतो भविष्यतीत्याह—

**नियपाणच्चाएण वि, जणंति परपाणरक्खणं धीरा। विसतुंबओवभोगी, धम्मरुई एत्थुदाहरणं ॥ १४५ ॥**

व्याख्या—निजप्राणत्यागेनापि धीराः परप्राणरक्षणं जनयन्ति, अत्र विषतुम्बकोपभोगी धर्म्मरुचिरुदाहरणं—दृष्टान्तः, स चायं—

इह चम्पापुर्यां सोम–सोमदत्त–सोमभूतिनाम्नां विप्राणां बन्धूनां नागश्री–भूतश्री–यक्षश्रियो भार्याः, अन्यदा मधुरभ्रान्त्या कटुतुम्बं नागश्रिया उपस्कृतं, पतिते तद्रसबिन्दौ मक्षिकामृतेर्ज्ञातं परमार्थं, गोपितं च। इतश्च पूर्वधरधर्म्मघोषसूरिशिष्यो धर्म्मरुचिर्मास[क्षपण]पारणे तत्रैव समागतः, ततो मा भूद्वृथा इयान्व्ययोऽन्यत्रास्य त्यागेन, दानेन चायं तोषितो भविष्यतीति विचिन्त्य तत्सर्वं तया पापया तस्मै दत्तं। स च तद्गृहीत्वा गतो गुरोर्दर्शितवान्। गुरुभिश्च कथञ्चिज्ज्ञात्वा 'विषतुम्बकमिदं, ततः परिष्ठापये'त्यादिष्टः सः शुद्धस्थण्डिले गत्वा कुतोऽपि बिन्दुमेकं मुमोच, तद्गन्धेन चायाताः कीटिकास्तत्र लग्ना मृता दृष्टाः, ततो 'वरं ममैकस्य विधिना मृतिर्न त्वेवमेतस्माज्जन्तुसमूहस्ये'ति विचिन्त्य तत्सर्वं तत्रैव बुभुजे। ततो महावेदनाक्रान्तः सिद्धसाक्षिकमालोच्य प्रतिक्रम्य पादपोप-

गमनेन सर्वार्थसिद्धिमगमत् । श्रुतोपयोगात् ज्ञात्वा च गुरुभिर्नागश्रीदानस्वरूपं धर्म्मरुचेराराधनापूर्वं सर्वार्थसिद्धिगमनं च सङ्घायाभ्यधायि, ज्ञाततद्व्यतिकरैर्लोकैर्धिक्क्रियमाणा च नागश्रीर्भर्तृदेवरैर्गृहान्निर्भर्त्स्य निष्कासिता सर्वत्र लोकैर्धिक्क्रियमाणा धूत्क्रियमाणा बालैर्लेष्टुभिर्हन्यमाना क्वचित्स्थानमलभमाना भिक्षया जीवन्ती षोडशरोगाक्रान्ता मृता षष्ठपृथिव्यामुत्पन्ना । ततो मत्स्यादिभवान्तरितासु सप्तपृथिवीष्वनेकश उत्पद्यमाना तिर्यगादिभवान् भ्रान्त्वा चम्पायां सागरदत्तसार्थवाहस्य भद्राभार्यायाः पुत्रीत्वेनोत्पन्ना, काले चोत्पन्नतीव्रदौर्भाग्या भर्त्रादित्यक्ता प्रव्रज्यां गृहीत्वा गुरुणीनिषिद्धाऽपि वने कृतकायोत्सर्गा पञ्चभिर्विटैर्विविधोपचारैः काम्यमानां काञ्चिद्गणिकामालोक्य स्वदौर्भाग्यं स्मृत्वा कृत[पञ्च]भर्तृनिदाना काले मृत्वा ईशाने कल्पे सुरगणिकात्वेनोत्पन्ना । ततश्च च्युत्वा काम्पिल्यपुरे द्रुपदराजपुत्री द्रौपदीनाम्नी, यौवने पूर्वनिदानात्स्वयंवरे पञ्चपाण्डवानां पत्नी जाता । अथैकदाऽनादरकुपितेन नारदेन धातकीखण्डभरते अमरकङ्काधिपस्य पद्मनाभस्य तद्रूपादीन् गुणानुक्त्वाऽपहारिता नित्यमाचाम्लपारणकषष्ठतपस्तप्यमाना शुद्धशीला षण्मासान्ते पद्मनाभं विजित्य केशवेन निवर्त्तिता पाण्डुमथुरायां पाण्डवानुकारं पाण्डुसेनं सुतमजीजनत् । तस्मिन् राज्येऽभिषिक्ते पाण्डवैः सह प्रव्रज्य ब्रह्मलोकं गता, ततश्च्युत्वा विदेहे सेत्स्यतीति धर्मरुचिचरित्रं प्रसङ्गाद्द्रौपदीचरितमपि किञ्चिदुक्तं, विस्तृतं तु पाण्डवचरित्राज्ज्ञेयमिति ॥ १४५ ॥ इति धर्म्मरुचिकथा समाप्ता ॥ अथ द्वितीयव्रतपरिपालनोपदेशमाह—

**कोहेण व लोभेण व, भएण हासेण वा वि तिविहेणं । सुहुमेयरं पि अलियं, वज्जसु सावज्जसयमूलं ॥१४६॥**

व्याख्या—क्रोधेन निमित्तभूतेन लोभेन वा भयेन वा हास्येन वा वर्जयेत्, किम्? इत्याह—'अलीकमपि' मिथ्यावचनमपि, कथम्भूतमिदम्? इत्याह—सूक्ष्मं चेतरच्च सूक्ष्मेतरं, सावद्यशतानां मूलं । केन त्यजेत्? इत्याह—त्रिविधेनेत्युपलक्षणत्वात्त्रिविधं त्रिविधेनेति

गाथार्थः ॥ १४६ ॥ कः पुनरलीकवादिनो दोषः ? इत्याह—

लोए वि अलियवाई, वीससणिज्जो न होइ भुअगोव्व । पावइ अवन्नवायं, पियराण वि देइ उव्वेयं ॥१४७॥

व्याख्या—प्रत्यक्षलक्ष्येऽस्मिल्लोकेऽप्यलीकवादी भुजग इव कस्यापि विश्वसनीयो न भवति प्राप्नोति चावर्णवादं, ततश्च पित्रोर्मातापित्रोरप्युद्वेगं ददातीति गाथार्थः ॥ १४७ ॥ सत्यवादिनो गुणानाह—

आराहिज्जइ गुरुदे-वयं व जणणिव्व जणइ वीसंभं । पियबंधवोव्व तोसं, अवितहवयणो जणइ लोए ॥१४८॥

व्याख्या— अवितथवचन इह लोकेऽप्याराध्यते गुरुदेवतावत्, जननीवद्विस्रम्भं जनयति, प्रियबान्धव इव तोषं जनयतीति गाथार्थः ॥ १४८ ॥ इह सत्यवादो द्विधा—लोकोत्तरो लौकिकश्च, तत्राद्यं समर्थनार्थमाह—

मरणे वि समावडिए, जंपंति न अन्नहा महासत्ता । जन्नफलं निवपुट्ठा, जह कालगसूरिणो भयवं ॥१४९॥

व्याख्या— मरणेऽपि समापतिते—ध्रुवमागते सति महासत्त्वा नान्यथा जल्पन्ति, यथा नृपेण यज्ञफलं पृष्टा भगवन्तः कालकाचार्या इति । के पुनरमी ?, उच्यते—

भारते तुरमिणीनगर्यां जितशत्रू राजा, तत्र भद्राब्राह्मणीपुत्रो व्यसनी क्षुद्रो रौद्रो दत्तनामा, अन्यदा राजानं सेवितुं प्रवृत्तः, क्रमेण सामन्तचक्रं वशीकृत्य जितशत्रुं निर्वास्य स्वयं नृपीभूतः, यतः—"उवयरमाणाण वि म—ज्जणाण विहडइ खलो खणद्धेण । दुद्धाइदाणओ पो—सिओ वि डसइच्चिय भुअंगो ॥१॥" जितशत्रुरन्यत्र गतः, दत्तस्तु बहून् यज्ञान् यजते, अन्यदा

दत्तमातुलः कालिकाचार्यस्तत्रागतः, दत्तस्तं यज्ञफलं पप्रच्छ, स च 'पशुघातप्रधानानां यज्ञानां फलं नरक' इत्याह, यतः प्रोक्तं व्यासेन—

" ज्ञानपालिपरिक्षिप्ते, ब्रह्मचर्यदयाऽम्भसि । स्नात्वाऽतिविमले तीर्थे, पापपङ्कापहारिणि ॥ १ ॥ "

" ध्यानाग्नौ जीवकुण्डस्थे, दममारुतदीपिते । असत्कर्मसमित्क्षेपै-रग्निहोत्रं कुरूत्तमम् ॥ २ ॥ " [युग्मम्]

" कषायपशुभिर्दुष्टै-र्धर्मकामार्थनाशकैः । शममन्त्रहुतैर्यज्ञं, विधेहि विहितं बुधैः ॥ ३ ॥ "

" प्राणिघातात्तु यो धर्म-मीहते मूढमानसः । स वाञ्छति सुधावृष्टिं, कृष्णाहिमुखकोटरात् ॥४॥ "इत्यादि ।

ततः कुपितेन तेनाऽस्मिन्नर्थे कः प्रत्ययः ? इति पृष्टो गुरुः 'सप्तमेऽह्नि श्वभिस्सह तैलकुम्भ्यां तव क्षेप एव प्रत्यय' इत्याह । तत्रापि कः प्रत्ययः ? इति पृष्टस्तस्मिन्नेवाह्नि प्रागेव त्वन्मुखे कुतोऽप्यशुचिप्रवेश इति । ततोऽतिक्रुद्धोऽसौ गुरुमाह—कस्य करे ते मृतिः ?, गुरुराह—न कस्यापि, किन्तु सुचिरं चरिष्याम्यद्यापि व्रतमहं । ततो गुरुं रोधयित्वाऽतिकुपितो राजा सशङ्को गृहं प्रविश्य स्थितः । इतश्चातिदुष्टत्वेन तेनोद्वेजितैः सामन्तैरतीव दृढं मन्त्रयित्वा जितशत्रुश्छन्नमानीतः । दत्तस्तु कोपवशात्सप्तममप्यष्टमं दिनं मन्यमानोऽश्वारूढो यावद् गृहासन्नं मुनिं जिघांसुर्याति, तावदश्वखुरोत्क्षिप्तोऽशुचिलवस्तन्मुखे प्रविवेश । ततो नूनं दिनभ्रान्तोऽहमिति विचिन्त्य भीतो यावदश्वं पश्चाद्वालयति सः, तावता 'कुतोऽपि मन्त्रो भिन्न' इति मन्यमानास्सर्वे सामन्तास्तं बन्धयित्वा गले च तस्य बहून् शुनो बन्धयित्वा तप्ततैलकुम्भ्यां चिक्षिपुरधश्चाग्निं ज्वालयन्ति, दह्यमानाः श्वानो नृपं खण्डशः कुर्वन्ति । एवं वेदनार्त्तो दत्तो नृपो मृत्वा नरकङ्गतः, सूरिः पुनः सुचिरं विहृत्य त्रिदिवङ्गतः । इत्यविनयजितमतप्ररूपककालिकाचार्यकथानकमिति गाथार्थः ॥

अथलौकिकसम्यग्वादसमर्थनार्थमाह—

**वसुनरवइणो अयसं, सोऊण असच्चवाइणो कित्तिं। सच्चेण नारयस्स वि, को नाम रमिज्ज? अलियम्मि॥१५०॥**

व्याख्या—वसुनरपतेरसत्यवादिनः [अयशः-अ]कीर्तिमतिशयेन श्रुत्वा, अपिशब्दस्य व्यवहितस्य सम्बन्धात्, तथा नारदस्य सत्येन कीर्तिमपि श्रुत्वा को नाम रमेतालीके?, न कोऽपीत्यर्थः। भावार्थः कथानकेनोच्यते—

चेदिविषये शुक्तिमतीपुर्यामभिचन्द्रे राज्ञि क्षीरकदम्बोपाध्यायान्तिके पुत्रपर्वतक–राजपुत्रवसुनारदा वेदान् पठन्ति। अन्यदाऽऽकाशे गच्छतो मुनेर्मुखाद्द्वयोर्नरकगमनमेकस्य स्वर्गगमनं श्रुत्वोपाध्यायो विषण्णः परीक्षार्थं लाक्षारसभृतं कुक्कुटं पृथक् पृथक् प्रच्छन्नं दत्वोक्तास्ते 'यत्र न कश्चिज्जानातीक्षते वा तत्रायं हन्तव्य' इति। वसो वसुपर्वतौ क्वचिच्छून्यगृहे तौ हत्वाऽऽयातौ, नारदस्त्वहतकुक्कुटश्चिरं भ्रान्त्वा समागतो गुरुं नत्वोवाच–नास्त्येव स प्रदेशो यत्र न कश्चिज्जानाति पश्यति वा, यतो पश्यन्ति सर्वज्ञा अपि। ततस्तदितरयोर्नरकं निश्चित्य वैराग्याद्गुरुः प्राव्राजीद्। पर्वतस्तत्स्थाने शिष्यानध्यापयति, नारदः स्वस्थानं गतः, पितरि प्रव्रजिते वसू राज्यं शास्ति। इतश्च मृगाय मुक्ते बाणे स्खलिते साश्चर्यकरस्पर्शादाकाशनिर्विशेषां स्फटिकरत्नशिलां नृपोचितां विज्ञाय वसुनृपायाख्यद्व्याधः, वसुश्च तामानाय्य प्रच्छन्नं सिंहासनं तयाऽचीकरत्, शिल्पिनश्च जघान। आस्थाने च तस्मिन्नासने स्वयं निविष्टः, न चासनासन्नं कोऽपि गन्तुं लभते। ततः सत्यादिगुणैर्वसुर्वसुमतीशो व्योम्नि तिष्ठतीति प्रोच्छलितः प्रवादः। अन्यदा नारदो गुरौ गौरवाद्गुरुसुतमालोकयितुमायातः। अत्रान्तरे "अजैर्यष्टव्य"मिति ऋग्वेदपदं नारदसमक्षं शिष्येभ्यः पर्वतो व्याख्यानयति, यथा–'अजा' पशवस्तैर्यष्टव्यमिति। एतच्चाकर्ण्य कर्णौ पिधाय ऋषिणोक्तं–आः!! शान्तं पापमिति, यतो हन्त यदि पशुभिर्यज्ञो भवेत्तदा व्यासेन [पण्डितादिपुरुष] चतुष्टयलक्षणं कुर्वता यदुक्तं—

" धर्मात्मा पण्डितो ज्ञेयो, नास्तिको मूर्ख उच्यते । सर्वभूतहितस्साधु-रसाधुर्निर्दयः स्मृतः ॥ १ ॥"

" वरमेकस्य सत्त्वस्य, प्रदत्ताऽभयदक्षिणा । न तु विप्रसहस्रेभ्यो, गोसहस्रमलङ्कृतम् ॥ २ ॥"

" सत्यं सत्यं पुनः सत्य-मुत्क्षिप्य भुजमुच्यते । नास्ति [illegible], [illegible] कुर्वतः ॥३॥"

इत्यादि, तद्विरुद्धचेत । न चाचार्येणाप्येवं व्याख्यातमिदं, किन्तु 'यवास्सन्तो न जायन्ते--न प्ररोहन्तीत्यजास्त्रिवार्षिका व्रीहयस्तै-र्यष्टव्य'मिति व्याख्यातं तैरिति । पर्वतस्त्वसम्बद्धवाक्यैर्नारदमाक्रुशन् 'अजैः-पशुभिर्यष्टव्यमित्येवोपाध्यायैर्व्याख्यातं, अत्र च सहाध्यायी वसुराजः प्रमाणं, यद्यसौ त्वत्पक्षं गुरुसम्मतं मन्यते तदा समूला मे जिह्वा छिद्यते, अन्यथा तवे'ति प्रतिज्ञां चाकरोत् । नारदोऽपि तदेव प्रमाणीकृत्य देवार्चादिनिमित्तं जगाम । ततो निशि निजमात्रा सहितः पर्वतो गत्वैकाकिने वसुराजाय तत्सर्वं छद्मनाख्यद्वसुरपि यथा नारदः प्राह तथैव गुरुभिर्व्याख्यातत्वादयुक्तमुक्तं भवतेत्याह । ततश्चोपाध्यायभार्याऽऽग्रहात्पर्वतोक्तं समर्थनीयं मयेति राज्ञा-ऽङ्गीकृते पर्वतो माता च तस्मा आशीर्वादं दत्वा स्वगृहं गतौ । प्रातः समागते पर्वते नारदे च मिलिते सबालवृद्धपुरजने कौतुकाश्रितेषु भवन[पति]व्यन्तरादिदेववर्गेष्वाशीर्वादपूर्वं पर्वतनारदाभ्यामुक्ते स्वस्वपक्षे—

" धम्माईयं दिव्वं, लोए वि हु फुरइ सच्चवाईणं । तो भोसुणं सच्चं, पसंसिमो ? किमिह लोअम्मि ॥१॥"

तदनयोः पक्षयोर्यत्सत्यं तत्प्रसद्य निवेद्यतामिति ब्राह्मणवृद्धैरभिहितेऽप्यविवेकतिमिरतरलिततत्त्वदर्शिना राज्ञा व्यलीकोऽपि पर्वतपक्षः सहसैव समर्थितः । तदैव च क्रुद्धया कुलदेवतया दत्वा पार्ष्णिप्रहारं पातितः सिंहासनान्नरपतिः क्षिप्तश्च पातालं । ततश्च आः !! किमिदमिति भीतो लोकः, प्रवृत्तः पर्वतकभूपयोस्सर्वत्र धिक्कारः, समुच्छलितो नारदस्य तु साधुकारः, विडम्ब्य निर्वासितो नगरा-

त्पर्वतः, अभिषिक्तो राज्ये वसुभूपतेः पुत्रः, पितृव्यतिकरक्रुद्धया कुलदेवतया सोऽपि निपातितः। एवं परेऽपि सप्त वसुपुत्राः क्रमेण तदर्पयत एव तथैव निपातिताः। अभिनिवेशेन च पर्वतेन तत्प्रभृति यज्ञेषु सुतरां जीवघातः प्ररूपितः। वसुस्तु नरकं गतः। इति वसुराजकथानकं समाप्तम्। अथ तृतीयव्रतपालनोपदेशमाह—

**अवि दंतसोहणं पि हु, परदव्वमदिन्नयं न गिण्हेज्जा। इहपरलोगगयाणं, मूलं बहुदुक्खलक्खाणं ॥१५१॥**

व्याख्या—"अवी"ति कोमलामन्त्रणे, दन्तशोधनमात्रमपि परद्रव्यं न गृण्हीयात्। कथम्भूतमिदं? इत्याह—इहपरलोकगतानां [बहु] दुःखलक्षाणां मूलमिति गाथार्थः ॥ १५१ ॥ इदमेव समर्थयन्नाह—

**तइयव्वए दढत्तं, सोउं गिहिणो वि नागदत्तस्स। कह तत्थ होंति सिढिला, साहू कयसव्वपरिच्चाया ?॥१५२॥**

व्याख्या—तृतीयव्रते दृढत्वं गृहस्थस्यापि नागदत्तस्य श्रुत्वा तत्र—तृतीयव्रते कृतसर्वपरित्यागाः साधवः कथं शिथिला भवन्ति?, प्रायो गृहस्थः सुवर्णधनादिषु गृद्ध एव स्यात् तथापि नागदत्तस्य तृतीयव्रते दृढत्वं, तर्हि कृतसर्वसावद्यपरित्यागाः साधवः कथं न तत्र दृढा भवेयुरिति भावः। कः पुनस्तृतीयव्रते दृढो नागदत्तः?, वाणारस्यां जितारिनृपः, धनदत्तः श्रेष्ठी, धनश्रीः प्रिया। तयोः पुत्रो नागदत्तः सौभाग्यभाग्यैकभूर्जिनधर्ममर्मज्ञः संसारासारताज्ञः, स्वगुणगणावर्जिता स्वयंवरत्वेनागता अपि चतुःषष्टिकलाकुशला अपि महेभ्यपुत्रीर्न परिणयति। अन्यदा तत्र निवासि प्रियमित्रसार्थवाहपुत्री पुरुषद्वेषिणी नागवसुनाम्नी पुराद्बहिर्हेममणिमयजिनायतने जिनार्चां कुर्वन्तं नागदत्तं दृष्ट्वा तं वरं प्रत्यज्ञासत। तत्रैव पुरे वसुदत्तनामा आरक्षकर्त्ता दृष्ट्वा दृढानुरागः सार्थेशादयाचत, ज्ञातप्रतिज्ञेन

पित्रा तस्मै नादायि सा । इतश्च राजपाटिकां गच्छतो राज्ञः कर्णात्कुण्डलमपतत्, बहुधा विलोक्यमानमपि न लेभे । अन्यदा रेणुच्छन्नं राजमार्गे नागदत्तस्तद् दृष्ट्वा परिहृत्योऽन्यमार्गेण गच्छन् वसुदत्तेन दृष्टः, ततः किमेतदिति तत्र विलोकयता कुण्डलं लब्ध्वा नहि नागदत्ते जीवति नागवसुर्मां परिणेष्यतीति तस्यानर्थं हेतुं विचार्य पर्वणि पौषधप्रतिमास्थितस्य नागदत्तस्य गले तद्बध्वा राज्ञे विज्ञप्तं, यथा–देव ! तत्कुण्डलं नागदत्तगले मया दृष्टं, राज्ञा तं तथाऽवस्थमानाय्यानेकधा कुण्डलस्वरूपं पृष्टः, प्रतिमाऽन्तेऽपि मा भूद्वसुदत्तस्यापकारिणोऽप्यनर्थ इति मौनेनास्थान्नागदत्तः । ततो रुष्टेन राज्ञा वध्यतयाऽऽदिष्टस्य विडम्ब्यमानस्य वध्यभूमौ प्रेषितस्य सदुःखदुःखिताया नागवसुकन्यायाः सत्त्वेन तस्य च सत्येन धर्मप्रभावेण च शूलिका सिंहासनं प्रहाराश्चाभरणान्यभूवन् । जिनशासने प्रभावनाऽभूत् । राज्ञा नागदत्तः पूजितो वसुदत्तो निर्वासितः । नागदत्तोऽपि तथाऽनुरक्तां नाग(वसुं)श्रियं (?) परिणीय चिरं विषयानुपभुज्य प्रव्रज्य प्रियया सह स्वर्गं गतः, तौ क्रमान्मुक्तिं यास्यतः, इति तृतीयव्रते नागदत्तकथानकं समाप्तम् ॥

अथ चतुर्थव्रतपालनोपदेशमाह—

**नवगुत्तीहिं विसुद्धं, धरिज्ज बंभं विसुद्धपरिणामो । सव्ववयाण वि परमं, सुदुद्धरं विसयलुद्धाणं ॥१५३॥**

व्याख्या—स्त्र्यादिवर्जिता वसतिः, तत्र देव्यो नार्यश्च स्त्रियः सचित्ताः, चित्रन्यस्तरूपास्त्वचित्ताः, पशवो–गोमहिष्यादयः, पण्डकाः–स्त्रीनरसेविनः, एतद्विकारदर्शनाद्ब्रह्मबाधा १ । स्त्रीणां कथा–एकाकिना धर्मदेशनादिरूपा "कर्णाटी सुरतोपचारचतुरा लाटी विदग्धप्रिया" इत्यादिका वा न कर्तव्या २ । स्त्रीभिः सहैकासने नोपविशेत्, उत्थितास्वपि मुहूर्तं (यावत्) तिष्ठेत्, यदाह–

" इत्थीहिँ मल्लियसयणा-सणम्मि सम्फासदोसओ जइणो । दूसेइ मणं जइणो, कुड्डं जह फासदोसेणं॥१॥"३।

तदिन्द्रियाङ्गोपाङ्गावलोकनत्यागः ४। गृहस्थैः सह कुड्यान्तरितावस्थितिविरहः ५। पूर्वक्रीडितस्मरणाकरणं ६। अतिस्निग्धाहारानभ्यवहरणं ७। अतिमात्राहाराग्रहणं ८। विभूषापरिवर्जनं च ९। इत्येताभिर्नवभिर्गुप्तिभिर्विशुद्धं, सर्वव्रतानामपि मध्ये परमं-प्रकृष्टं, विषयलुब्धानां सुदुर्द्धरं ब्रह्म विशुद्धपरिणामो धरेदिति गाथार्थः ॥ १५३ ॥ अस्य च सर्वव्रतोत्तमत्वमाह—

देवेसु वीयराओ, चारित्ती उत्तमो सुपत्तेसु। दाणाणभयदाणं, वयाण बंभव्वयं परमं ॥ १५४ ॥

व्याख्या – देवेषु प्रसिद्धेषु यथोत्तमो वीतरागः, सुपात्रेषु चारित्रवान्, दानानां मध्येऽभयदानं, व्रतानां मध्ये तथा ब्रह्मव्रतं प्रधानमिति गाथार्थः ॥ १५४ ॥ अथैतद्विरहितस्य व्रतादेरकिञ्चित्करत्वमाह—

धरउ वयं चरउ तवं, सहउ दुहं वसउ वणनिकुंजेसु। बंभव्वयं अधरितो, बंभा वि हु देइ मह हासं॥१५५॥

व्याख्या—व्रतं धरतु, तपश्चरतु, दुःखं सहतां, वननिकुञ्जेषु वसतु, तथापि ब्रह्मव्रतं अधरन्, आस्तां अन्यो, ब्रह्मापि मम हास्यमेव ददातीति गाथार्थः ॥ १५५ ॥ अथैतद्व्यतिरेकस्य सर्वदुःखप्रभवत्वमाह—

जं किंचि दुहं लोए, इहपरलोउब्भवं पि अइदुसहं। तं सव्वं चिय जीवो, अणुभुंजइ मेहुणासत्तो ॥१५६॥

व्याख्या—यत्किञ्चिद्दुःखं इह-परलोकोद्भवं अतिदुस्सहमपि, तत्सर्वमेव मैथुनासक्तो जीवोऽनुभुङ्क्त इति गाथार्थः ॥१५६॥

दृष्टान्तद्वारेणैतत्समर्थयन्नाह—

नंदंतु निम्मलाइं, चरियाइं सुदंसणस्स महरिसिणो। तह विसमसंकडेसु वि, बंभवयं जस्स अक्खलियं॥१५७

व्याख्या—सुदर्शनस्य महर्षेर्निर्मलान्यद्भुतानि चरित्राणि नन्दन्तु। यस्य, तथेति प्रसिद्धौ, स्खलनाहेतुत्वाद्विषमेषु सङ्कटेष्वपि ब्रह्मव्रतमस्खलितं, अत्रायं वक्ष्यमाणश्च सुदर्शन-स्थूलभद्रयोर्गुणस्तुतिपद्प्रणतिद्वारेणोपदेशस्तयोरसमसाहसत्वविस्मितेन शास्त्रकारेण निबद्ध इति गाथार्थः॥ १५७॥ कः पुनरयं सुदर्शनमहर्षिः?, उच्यते—

अङ्गदेशे चम्पापुर्यां दधिवाहनो राजा, ऋषभदासः श्रेष्ठी, अर्हद्दासी भार्या, तयोर्महिषीपालकः सुभगाख्यो दासो हेमन्तेऽटव्यां कायोत्सर्गस्थं चारणश्रमणं दृष्ट्वा जातभक्तिर्महिषीश्चरन्ती मुक्त्वा सर्वं दिनं तं पर्युपास्ते। सायं पुनस्तं नत्वा ताभिः समं गृहं गतः साधोर्गुणान्स्मरन्कथं सकलां रात्रिमेतादृशं शीतं स सोढेति चिन्तयन् सकलां रात्रिं निद्रामलभमानः प्रातर्महिषीं नीत्वा तत्र गतस्तं साधुं तथैव स्थितं पश्यति, तावता पारितोत्सर्गो "नमो अरिहंताणं" भणन्नाकाशे उड्डीनः। स चेयमाकाशगामिनीविद्येति जानन् "नमो अरिहंताणं" इत्येवोच्चरन् भ्रमति, सर्वकार्याणि करोति। ततस्तस्य श्रेष्ठिश्रेष्ठिनीभ्यामुपबृंह्यमाणस्य भक्तिरपि तत्र जाता। अन्यदा वर्षासु गङ्गाऽपरतीरे युध्यमानानां महिषीणां निवारणायाकाशगमनबुद्ध्या "नमो अरिहंताणं" उच्चरन्नुत्प्लवमानः पतन्महाकीलकेनोदरे विद्धो मृत्वा तत्रैव ऋषभदासार्हद्दासीपुत्रो दिव्यरूपलावण्यः सुदर्शननामाऽभूत्, तारुण्ये सागरदत्तश्रेष्ठिपुत्रीं मनोरमानाम्नीं परिणिन्ये। पिता प्रव्रज्य स्वर्गं गतः। तस्य च द्वितीयात्मा पुरोधाः कपिलः, तत्कान्ता कपिला सुदर्शनगुणोत्कीर्तनं श्रुत्वाऽनङ्गबाणविद्धा शिक्षयित्वा दूतीं प्रेषयति, सा चागत्य श्रेष्ठिनं प्राह—ननु कपिलो दाघज्वरार्तो रतिमलभमानः क्षणं सुखाय

स्वामाकारयति । ततस्तयैव सह सुदर्शनस्तद्गृहं गतो यावदित इतो मध्येऽपवरके निशीते ते बान्धव इति गुप्ते नीत्वा दत्तद्वारा तद्भार्या-ऽऽह—न कपिलो न दाघज्वरः, किन्तु कपिलायाः कामज्वरप्रतीकारं कुरु प्रसादं । ततस्तदतिसङ्कटं निस्तितीर्षुः श्रेष्ठी प्राह—भद्रे ! किं करोमि ?, दैवहतोऽहं पण्डकः, सुगुप्तमात्मानं जने रक्षामीति । ततो जातविरागा सा तं विसृजति । अथान्यदा कपिल–सुदर्शनसहितो राजा वसन्तक्रीडार्थं निर्गतः । पट्टराज्ञी अभया कपिला मनोरमा च शिबिकारूढाः स्वस्वपरिवारोपगूढा निर्गताः । तदा च कपिलाऽभयामाह—कस्येदं पुण्याधिकस्य स्त्रीरत्नं ?, राज्याह—सुदर्शनस्य, पुत्राश्चैते जयन्तोपमा इति । कपिला प्राह—अहो ! ! पण्डकस्यापि पुत्राः?, राज्याह—कथं जनासि पण्डकः? । ततः सा पूर्ववृत्तान्तमाह । राज्ञी हसति—धूर्तमन्याऽपि वञ्चिताऽसि । ततः सा दूना प्राह—ज्ञास्यते ते वैदग्ध्यं, यद्यनेन [रंस्यसे] रमसे(?) । ततोऽभया कृतप्रतिज्ञा उपायं विचार्य पण्डितानाम्न्या धात्र्या सुदर्शनप्रतिरूपं पुत्रकं कारयित्वा रात्रिप्रथमयामे स्वान्ते आनाययति । किमेतदिति कञ्चुकिभिः पृष्टे देव्याः पूजनार्थं कामदेवं नयामीति पण्डिता प्राह । एवं प्रत्यहं क्रियमाणे विश्वस्तेषु तेष्वष्टम्यां पौषधप्रतिमायां स्थितं सुदर्शनमानयति पण्डिता, कामप्रतिमेति न किञ्चित्पृष्टं कञ्चुकिभिः । ततः पुरो मुक्तं तं कामातुराऽभया सर्वाङ्गालिङ्गनचुम्बनप्रार्थनपरिहाससीत्कारधिक्कारथूत्काराद्यनुकूलप्रतिकूलैः सर्वां शर्वरीं न क्षोभयितुमलं । ततः प्रातःप्राये स्वं नखैरुल्लिख्य सा पूत्करोति, राजा तत् श्रुत्वा तत्रागत्य सुदर्शने तदसम्भावयन् किमिदं ?, सत्यं ब्रूहीति तं पृच्छति, स तु मा भूदभयाया भयमिति मौनेनास्थात् । ततस्तत्रैव सुदर्शने व्यलीकं निश्चित्य तं वध्यमादिशद्धनीशः । ततस्तत्सामग्र्या नीयमानं तं दृष्ट्वा मनोरमा परया भक्त्या जिनमभ्यर्च्य साभिग्रहा कायोत्सर्गेऽस्थात् । इतश्च तस्याः सत्त्वेन स्वशीलमहिम्ना च वध्यभूमौ शूलिका सिंहासनं प्रहाराश्चाभरणान्यभूवन्, तज्ज्ञात्वा राजा तत्रागत्य तं क्षमयित्वा सिन्धुरस्कन्धमारोप्य महाविभूत्या

स्वगृहेऽनैषीत् । अभया स्वदुश्चरितभयेनात्मानमुद्बध्य मृत्वा पाटलिपुत्रे व्यन्तरी जाता, पण्डिता तु पलाय्य पाटलिपुत्रेऽनुसमयं
सुदर्शनरूपादीन् वर्णयन्ती देवदत्तागणिकागृहे तिष्ठति । अत्रान्तरे गृहीतदीक्षं तत्रायातं भिक्षार्थं समेतं तं [सुदर्शनं] देवदत्ताय
उपालक्षयत्, सा द्वारं पिधाय विविधवेश्याभावैः सन्ध्यां यावदक्षुब्धं तं दृष्ट्वा पश्चात्तापेन प्रेतवनेऽमोचयत् । तत्र च कायोत्सर्गस्थं
तं दृष्ट्वा पूर्ववैरं स्मृत्वाऽभयाव्यन्तरी सप्तदिनीमनुकूलप्रतिकूलोपसर्गैस्तं व्यडम्बयत् । तदन्ते च शुक्लध्यानात्तस्य केवलज्ञानमुत्पन्नं
शक्रादिभिर्महिमा कृता । देशनां श्रुत्वाऽभयाव्यन्तरी पण्डिता देवदत्ताऽपरेऽपि च बहवः श्राद्धधर्मं केचित्साधुधर्मं च जगृहुः
एवं भव्याङ्ख्यानुद्धरंश्चिरं विहृत्य श्रीसुदर्शनर्षिर्मुक्तिमवापेति श्रीशीले श्रीसुदर्शनदृष्टान्तः समाप्तः ।

अत्रैवोदाहरणान्तरमाह—

**वंदामि चरणजुयलं,मुणिणो सिरिथूलभद्दसामिस्स।जो कसिणभुयंगीए,पडिओ वि मुहे न निड्डसिओ॥१५**

व्याख्या—श्रीस्थूलभद्रस्वामिनो मुनेश्चरणयुगलं वन्दे, यो भगवान् मदनोद्दीपनविषमविषेण संयमप्राणापहारकत्वात्कृष्णभुजङ्गी
कोशागणिका, तस्या मुखे–गोचरे पतितोऽपि न निर्दष्टो–न तद्विषयविषेण व्याप्त इति गाथार्थः ॥ १५८ ॥

श्रीस्थूलभद्रकथानकं आवश्यकादिषु प्रसिद्धमेव, स्थानाशून्यार्थं तु किञ्चिदुच्यते–पाटलिपुत्रे नन्दराज्ञो मन्त्री शगडाल
स्थूलभद्र–सिरियाख्यौ तस्य पुत्रौ, सिरियाविवाहावसरे पूर्वं विरोधितेन वररुचिपण्डितेनोद्भावितं कपटं, ततो जातकोपे नन्दे विष
प्रयोगादिना शगडाले मृते द्वादशकोटीकनकव्ययेन द्वादशवर्षाणि कोशागृहे वेश्यावासे वसन्तं विषयदुर्ललितं स्थूलभद्रमानाय

मन्त्रिमुद्रापरिधानायादिशति नन्दः । विमृशामि इति तेनोक्ते राजा प्राह–अत्रैव ममाशोकवने विमृशेति । ततः श्रीस्थूलभद्रस्तत्र गत्वा धर्मार्थकाममोक्षमधिकारं विमृश्य पितुश्चान्त्यचरितं च चिन्तयन् वैराग्यरङ्गतरङ्गितः पञ्चमौष्टिकं लोचं कृत्वा रत्नकम्बलं प्रावृत्य तस्यान्तैः कृतरजोहरणो नन्दनृपं धर्मलाभयित्वा श्रीआर्यविजयसम्भूति[श्रीआर्यसम्भूतिविजय]हस्ते प्राव्राजीत् । क्रमाद्गृहीतार्थो गुरुभिः सह कदाचित्पाटलिपुत्रे समागतः । वर्षासु सिंहगुफा-सर्पबिल-कूपकाष्ठेषु कायोत्सर्गे स्थातव्यमिति मुनित्रयेऽभिग्रहं गृह्णति कोशाऽऽवासरसनाभिग्रहमग्रहीत्स्थूलभद्रः । तद्वसतिं याचित्वा चोपवने स्थितः । यथाप्राप्तं षड्रसैः षड्विकृतिभिरप्यनुदिनं भुङ्क्ते । ततः षड्विकृत्याहार-केकि-चातक-दर्दुरारावे विद्युद्गर्जनकोशाप्रकाशितहावभावादिद्रव्यक्षेत्रकालभावैरक्षुब्धे तस्मिन्नुपशान्ता सा भगवन्तं प्रशंसति । सोऽपि तथा तामुपदेशैरनुगृह्णाति यथा विषयविमुखा राजदत्तादन्यनरपरिहाराभिग्रहं जग्राह सा । इतश्चतुरो मासान्निराहारं तपस्तप्त्वा सिंहगुहादिवासिनः समायाताः, प्रत्येकं स्वागतं दुष्करकारकाणामिति वदद्भिरीषदभ्युत्थानेन सम्भाविता गुरुभिः । स्थूलभद्रस्त्वतिसम्भ्रमेणाभ्युत्थितः सादरतरं स्वागतं भणितो दुष्करदुष्करकारक इति प्रशंसितश्च । तत इतरे त्रयोऽपीर्ष्याऽनलतर्जिताश्चिन्तयन्त्यहो !! वेश्यागृहे सुखं स्थितोऽपि नित्यं स्निग्धभोज्यपि सर्वाङ्गोपचितोऽप्यमात्यसुतत्वाद्यथाऽसावादरेण दृष्टो न तथा वयं तथाकृतकष्टा अपि । अथ चागते द्वितीयवर्षाकाले गुरुभिर्निवारितोऽपि स्थूलभद्रमत्सरेण गृहीत्वाऽभिग्रहं सिंहगुहानिवासी गतः कोशागृहं, मार्गिता वसतिर्दत्ता च तस्मिन्नेवोपवने सा तया । प्रशान्तचित्ता च सा विभूषिताऽप्यविभूषिता वा प्रतिदिनं तं वन्दते । ततोऽतीवोदाररूपायां तस्यां जातपरिणामोऽन्यस्मिन् दिने स तां प्रार्थयते । ततोऽहो !! महानुभावस्य कर्मपारतन्त्र्यं, तदुपायेन प्रतिबोधयामीति विचिन्त्य तयोक्तं-न वेश्यानां धर्मलाभः, किन्तु द्रव्य(द्रम्म)लाभोऽर्थ्यः, तद्यद्यस्माभिरर्थस्तर्हि नेपालनृपेणापूर्व-

साधवे दीयमानं लक्षमूल्यं रत्नकम्बलं त्वमप्यानय । ततः स कामतृष्णया वर्षास्वपि तथाऽकरोत् । दत्तश्च रत्नकम्बलस्तस्याः करे, क्षिप्तश्च तया तदैव क्षाले । ततः साधुराह—सत्यं मुग्धाऽसि, यदेवं कष्टेनानीतोऽप्येतादृग्रत्नकम्बलो मलक्लिन्ने क्षाले क्षिप्यते । साऽप्याह—ज्ञातं ते वैदग्ध्यं, यदनन्तभवभ्रमणदुर्लभं चारित्रचिन्तामणिरत्नं सर्वथाऽशुचिस्त्रीशरीरेषु क्षिपसीत्यादि । तद्वचनाज्जातविवेकविकाशः साधु-र्भणति—साधु भणितं, मिथ्या मे दुष्कृतं स्यात् सर्वं । साऽपि साधुं क्षामयति । साधुरपि गुरुसकाशं गत्वा तं नत्वा स्वापराधं क्षामयति, श्रीस्थूलभद्रं प्रशंसति, प्रायश्चित्तं गृह्णाति । स्थूलभद्रस्वाम्यप्युपभद्रबाहुस्वामिपादमर्थतो दशपूर्वाणि, सूत्रतस्तु सर्वाणि पूर्वाण्यधीत्य प्राप्ताचार्यपदः स्वर्गङ्गतः । तदेवं परैरपि साधुभिर्दृढशीलैर्भाव्यमिति श्रीस्थूलभद्रकथानकं समाप्तम् । अथ परिग्रहव्रतपालनोपदेशमाह—

**जइ वहसि कहवि अत्थं, निग्गंथं पवयणं पवण्णो वि । निग्गंथत्ते तो सा—सणस्स मइलत्तणं कुणसि ॥१५९॥**

व्याख्या—निर्ग्रन्थं प्रवचनं यतिधर्मलक्षणं प्रपन्नोऽपि यद्यर्थं वहसि ततो निर्ग्रन्थत्वे विषयभूते शासनस्य मालिन्यमेव करोषि । निर्ग्रन्थत्वं मुनीनां वाङ्मात्रमिति लोका भणिष्यन्तीत्यर्थ इति गाथार्थः ॥ १५९ ॥ [ ननु ] भवत्वेवं, को दोषः ? इत्याह—

**तम्मइलणा उ सत्थे, भणिया मूलं पुणब्भवलयाणं । निग्गंथो तो अत्थं, सव्वाणत्थं विवज्जेज्जा ॥ १६० ॥**

व्याख्या—तन्मलिनता पुनः क्रियमाणा पुनर्भवलतानां—पुनः पुनस्संसारोत्पत्तिवल्लीनां मूलं—कारणं भणितं शास्त्रे, तद्यथा—

" पावइ तित्थयरत्तं, जीवो जिणसासणं पभावंतो । तं चेय य मइलंतो, भमइ भवे भीसणदुहम्मि ॥ १ ॥ "

ततो निर्ग्रन्थः सर्वे अनर्था वधबन्धादयो यस्मात्तं सर्वानर्थं वर्जयेदर्थमिति गाथार्थः ॥ १६० ॥

आस्तां तावद्धर्मस्थ्यर्थस्तत्प्रतिबन्धोऽप्युपार्जनाद्याग्रहरूपो न कार्य इत्याह—

**जइ चक्कवट्टिरिद्धिं, लद्धं पि चयंति केइ सप्पुरिसा। को तुज्झ असंतेसु वि, धणेसु तुच्छेसु पडिबंधो?॥१६१॥**

व्याख्या—यदि विपुलां चक्रवर्तिन ऋद्धि-लक्ष्मीं लब्धामपि-विद्यमानामपि केचित्सत्पुरुषा भरतादिवत्त्यजन्ति तर्हि साधो! कस्तवासत्स्वपि धनेषु तुच्छेष्वसारेषु प्रतिबन्ध-उपार्जनाद्याग्रहः? इति गाथार्थः ॥ १६१ ॥

किं तावद्विभूत्यां, शरीरेऽपि केचिदासन्नसिद्धिका ममत्वं न कुर्वन्तीत्याह—

**बहुवेरकलहमूलं, नाऊण परिग्गहं पुरिससीहा। सरीरे वि ममत्तं, चयंति चंपाउरिपहुव्व ॥ १६२ ॥**

व्याख्या—परिग्रहं वधवैरकलहानां प्रसिद्धानां मूलं ज्ञात्वा पुरुषसिंहाश्चम्पापुरीप्रभुरिव स्वशरीरेऽपि ममत्वं त्यजन्तीति गाथार्थः॥१६२

तत्कथानकं पुनरिदम्—चम्पापुर्यां कीर्तिचन्द्रनृपस्तदनुजः समरविजयो युवराजः। अन्यदा वर्षाकाले वातायनगतेन प्रासादतलाग्रे वहन्तीं कल्लोलिनीं निरीक्ष्य कौतुकान्निजबन्धुना समं वेडामारुह्य मन्त्रिसामन्तादिवेडाकलितस्तत्र क्रीडितुं लग्नः। तावत्स कोऽपि नदीप्रवाहः समागात्, येन द्रोणयोऽन्यान्यदिक्षु क्षिप्ताः, सर्वोऽपि पुरीलोको निष्कासनाथ मिलितस्तावन्नृपद्रोणी अदर्शनं गता, नदीवेगेन दूरं नीता। ततो दीर्घतमालाभिधाटव्यां क्वचित्तरुमूले लग्ना नृपद्रोणी, उत्तीर्णः सबन्धुर्नृपः कतिपयपरीकरकलितः, तीरे यावद्विश्राम्यति तावन्नदीखाततटस्थं निधानं ददृशे। तल्लोभादनुजो नृपं हन्तुं दधावे। परिच्छदेन मिलित्वा निवारितो निर्वासितश्च। अन्यदा केवलिपार्श्वेऽनुजप्राग्भवं नृपोऽपृच्छत्, केवली प्राह–अत्र जम्बूद्वीपे महाविदेहेषु मङ्गलावतीविजये सुगन्धिपुरे मदना-

भिधश्रेष्ठिपुत्रौ सागरकुरङ्गनामकौ महापरिग्रहौ जातौ। बहुलोभादनेकमहापापव्यवसायात् कारं कारं शतसहस्रलक्षकोटिलाभे लोभादनुजो ज्येष्ठं जघान, जातस्तृतीयनरके। द्वितीयोऽपि मृत्वा पञ्चमीं पृथिवीं गतः। ततो राजन्! भवं भ्रान्त्वा नानारूपौ सुदुःखितौ कथञ्चित्कर्मयोगादञ्जनगिरौ सिंहौ जातौ। तत्राप्येकगुहार्थं परस्परं युध्वा मृतौ चतुर्थं नरकं गतौ। ततः सर्पौ जातौ। तावप्येकनिधिकृते युध्वा मृतौ पञ्चमं नरकं गतौ। ततो बहुभवस्यान्ते एकस्य धनिनो गृहे कलत्रत्वं प्राप्तौ, तयोः पृथक् पृथक् पुत्रोऽभवत्। भर्तरि मृते धनार्थं कलहेऽतिरोषेण युद्धे युध्वा मृतौ निमुच्य तद्वित्तं पुत्रगेहादि चोत्पन्नौ षष्ठे नरके, ततो बहुभवात्यये एकस्य नृपस्य पुत्रौ जातौ, तत्राप्युपरते राज्ञि राज्यार्थं परस्परमतिसंरम्भं कृत्वाऽन्योन्यनिहतौ जातौ तौ सप्तमावनौ। ततः पुनर्भवे परिग्रहस्यार्थे नानास्थानेष्वापदो लब्ध्वा न क्वापि स्वयं स्वीयः परिग्रहो भुक्तः। इतः पूर्वे भवे ज्ञानकष्टं तथाविधं विधाय सागरस्त्वं समुत्पन्नः, त्वद्भ्राता तु कुरङ्गसंज्ञः, सोऽद्याप्येकवारं तव वार्तां विधास्यति, भवनाराधको राजन्! तृतीयभवसिद्धिकः, भवद्भ्राता त्वनन्तं भवं भ्रमिष्यति। इति श्रुत्वा संविग्नो निजभागिनेयस्य हरिसिंहस्य राज्यं दत्त्वा स राजा प्राव्राजीत्। नवपूर्वधरः स्वदेहेऽपि निस्पृहः प्रतिपन्नजिनकल्पः क्वचिदुद्याने कायोत्सर्गस्थोऽनुजेन दृष्ट्वा ज्वलितकोपेन खड्गेन हतः सहस्रारे कल्पे समुत्पन्नः। ततश्च्युतो विदेहेषु सेत्स्यति। इति कीर्तिचन्द्रनृपाख्यानकं समाप्तम्। अथ रात्रिभोजनविरमणपालनोपदेशमाह—

**पच्चक्खनाणिणो वि हु, निसिभत्तं परिहरंति बहुमूलं। लोइयसिद्धंतेसु वि, पडिसिद्धमिणं जओ भणियं॥२६**

व्याख्या—प्रत्यक्षं अवधि-मनःपर्याय-केवलरूपं ज्ञानं येषां ते प्रत्यक्षज्ञानिनः। इन्द्रियजन्यास्मदादीनां घटपटादिज्ञानस्य

व्यवहारमात्रेणैव प्रत्यक्षत्वात् । ततः केवल्यादयः प्रत्यक्षज्ञानिनोऽपि निशि-रात्रौ भोजनमाश्रित्य भक्तं परिहरन्ति, कुतः ? इत्याह—यतो वधस्य-जीवघातस्य मूलं कारणं तत्, केवल्यादयः कुन्थ्वादिजन्तून् भक्तगतान् पश्यन्तोऽपि तेषां वधस्य परिहर्तुमशक्यत्वाद्रात्रौ न भुञ्जते, तर्हि तान् जन्तून् द्रष्टुमप्यशक्नुवन्तोऽस्मदादयः कथं भुञ्जते ? इति भावः । किञ्च लौकिकसिद्धान्तेष्वपि प्रतिषिद्धमिदं-रात्रिभोजनं, यतो भणितं तेष्विति गाथार्थः ॥ १६३ ॥ किं तदित्याह—

बंभाइतेयसंभूयं, भाणुं जंपंति वेयवी । पुट्टं करेहिं तो तस्स, सुभं कम्मं समायरे ॥ १ ॥
रिसिहिं भुत्तं मज्झण्हे, पुव्वण्हे तियसेहि य । अवरण्हे पियरेहिं, सायं भुंजंति दाणवा ॥ २ ॥
संझाए जक्खरक्खेहिं, भुत्तमेवं अहक्कमं । सव्ववेलामइक्कम्म, राओ भुत्तमभोयणं ॥ ३ ॥
नेवाहुई न य ण्हाणं, न सद्धं देवयच्चणं । दाणं वा विहियं राओ, भोयणं तु विसेसओ ॥ ४ ॥

एते चत्वारोऽपि श्लोकाः स्त्र्यादीनामुपकाराय प्राकृतत्वेनोक्ताः, स्मृतौ त्वेत एव संस्कृतास्तद्यथा—

" ब्रह्मादितेजस्सम्भूतं, भानुं वेदविदो विदुः । स्पृष्टं करैस्ततस्तस्य, शुभं कर्म समाचरेत् ॥ १ ॥ "
" मध्याह्ने ऋषिभिर्भुक्तं, पूर्वाह्ने त्रिदशैस्तथा । अपराह्णे पितृभिर्भुक्तं, सायं भुञ्जन्ति दानवाः ॥ २ ॥ "
" सन्ध्यायां यक्षरक्षोभि-र्भुक्तमेवं यथाक्रमं । सर्ववेलामतिक्रम्य, रात्रौ भुक्तमभोजनम् ॥ ३ ॥ "
" नैवाहुतिर्न च स्नानं, न श्राद्धं देवताऽर्चनं । दानं वा विहितं रात्रौ, भोजनं तु विशेषतः ॥ ४ ॥ "

पाठसिद्धा एव । यदि लौकिकैरपीदं निषिद्धं ततः किम् ? इत्याह—

**इय अन्नाण वि वज्जं, निसिभत्तं विविहजीववहजणयं । छज्जीवहियरयाणं, विसेसओ जिणमयट्ठियाणं॥१६**

व्याख्या—इत्युक्तनीत्या अज्ञानामपि-सम्यग्ज्ञानरहितत्वेन धिग्वर्णादीनामपि वर्ज्यं-वर्जनीयं निशिभक्तं, यतः, कथम्भूतम् ? इत्याह-विविधानां कीटिका-पतङ्गादिजीवानां वधजनकं, ततः षड्जीवनिकायेषु रक्षणादिद्वारा हितरतानां जिनमतस्थितानां विशेषतस्त वर्जनीयमिति गाथार्थः ॥ १६८ ॥ अथ रात्रिभोजिनामैहिकामुष्मिकानपायानाह—

**इहलोयम्मि वि दोसा, रविगुत्तस्स व हवंति निसिभत्ते । परलोए सविसेसा, निद्दिट्ठा जिणवरिंदेहिं ॥१६५॥**

व्याख्या—रविगुप्तस्येव निशिभक्ते इहलोकेऽपि दोषा मक्षिकादिभक्षणाद्वान्त्यादयो भवन्ति । परलोके पुनः सविशेषा-बहुतर नरकादिगतस्य तप्तत्रपुपानादयो दोषा जिने[जिनवरे]न्द्रैर्निर्दिष्टा इति गाथार्थः ॥ १६५ ॥

कोऽसौ रविगुप्तः ? उच्यते-उज्जयिन्यां महेन्द्रदेवश्रेष्ठिसुतो रविगुप्तः, स च विषयगृद्धो यौवनगर्वितो निशिभोजनेऽत्यन्त रक्तः, चतुष्पथादिष्वपि सकलां रात्रिं भुञ्जानस्तिष्ठति, श्रावकाश्चिन्दति, यदेते वराका रात्रिभोजनरसानभिज्ञा इति, स्वजनाश्चिन्दति अन्यदा पितर्युपरते गृहस्यापि स्वामी जातः । ततो निश्शङ्कः सविशेषं पापान्याचरति, यज्ञेषु पशुघातं करोति । अथान्यदा रात्रि भोजनाज्जातरोग आर्त्तध्यानेन मृत्वा तृतीयपृथिव्यां समुत्पन्नः, तत्र छेदनभेदनताडनकर्षनदहनादीनि दुःखानि निशिभक्तं स्मारयित्वा स्मारयित्वा अनिशमुत्पाद्यमानानि विषह्य तत उद्वृत्तोऽनन्तं संसारं भ्रान्त्वा रात्रिभोजनार्जितं बहुदुःखं क्षुधापिपासादि सहमानोऽनन्त भवप्रान्ते काम्पिल्यपुरे मधुनाम्नो विप्रस्य पुत्रो वामदेवनामा जातः । तत्रापि गृद्धो रजन्यां भुङ्क्ते । अन्यदा श्रावकैर्मित्रैर्विवाहार्थं नीत

एकस्मिन् मार्गग्रामे रात्रिभुक्तिरता यज्ञयात्रिकाः । तत्र च श्रावका यावन्न भुञ्जते तावद्वामदेव उपहसति-रात्रौ यदि भवतां गले कवलो विलगति तर्हि न मोक्तव्यं, अहं तावद्भोक्ष्ये । ततस्तन्निमित्तमुपस्कृतः कूरः, महानसे भ्रमन् धूमव्याकुलः कृष्णाहिपोतस्तद्भाजनमध्ये पच्यमानः खण्डशो जातस्तेनाद्गुभुक्तेन दृष्टः, तत्क्षणमेवासौ विषेण व्याप्तो भूमौ पतितः, तत आसन्ने दशपुरनगरे गारुडिकपार्श्वं नीतः, कथं कथमप्यतिक्लेशेन जीवितः संवेगं प्राप्तः, श्रावकैः करुणया केवलिपार्श्वे नीतः । भगवता कर्मशत्रुसंहारिणी कृता देशना, प्रोक्तश्च रात्रीभोजनात्प्राग्भवेषु एवंप्रकारेण बहुनरकादिरोगदारिद्र्यादिदुःखभाग्जातस्त्वं, ततस्तदाकर्ण्य संविग्नसंसारभीरुर्वामदेवो दीक्षां जिघृक्षुः काम्पिल्यपुरे गत्वा निजपितुर्मधोः सर्वं रात्रिभोजनादिव्यतिकरं कथयित्वा व्रतार्थमात्मानं मोचितवान् । ततो मधुश्रेष्ठ्यपि मिथ्यात्वविषे गते प्रव्रजितुकामोऽजनि ।

ततः शीघ्रं गृहीत्वा च, व्रतं केवलिनोऽन्तिके । भुक्त्वाऽनुपाल्य सम्प्राप्तौ,द्वावप्यमरसम्पदम् ॥ १ ॥

। इति रविगुप्तकथा समाप्ता ।

तदेवं व्रतषट्कपरिपालनोपदेशं दत्त्वोपसंहरन्नाह—

**अलमेत्थ पसंगेणं, रक्खेज्ज महव्वयाइं जत्तेण । अइदुहसमज्जियाइं, रयणाइं दरिद्दपुरिसोव्व ॥ १६६ ॥**

व्याख्या—अलमत्र व्रतोपदेशे प्रसङ्गेन विस्तरेण, संक्षिप्यैवोपदिश्यते, यथा रक्षेस्त्वं महाव्रतानि यत्नेन, क इव कानि ? इत्याह-दरिद्रपुरुष इवातिदुःखसमर्जितानि रत्नानीति गाथार्थः ॥ १७० ॥

तत्कथानकं पुनरेवम्—कौशाम्ब्यां कश्चिन्निपुणोऽपि बुद्धिमानपि आजन्मदरिद्रः पुरुषो वसति, स चान्यैरीश्वरैः स्वजनैश्चाभिभूयते, स्वोदरपूरणेऽप्यक्षमः ।

"जंपइ दीणं छंदं, चरेइ धणवंतयाण गेहेसु । कुणइ कुकम्मं न लहइ, वि तस्स भोत्तुं पि संपडइ ॥ १ ॥"

ततः स्वं निन्दन् निर्विण्णश्चिन्तयति मरणमात्मनः । अथान्यदा भ्रमन् स क्वापि विद्यामठे प्राप्तः । तत्रेदं व्याख्यायमानमशृणोत्—

"जाई रूवं विज्जा, तिन्नि वि निवडंतु कंदरे विवरे । अत्थो च्चिय परिवड्ढउ, जेण गुणा पायडा होंति ॥ १ ॥"

"विहवुज्जोएण विणा, दारिद्दमहंधयारपिहियाइं । संतगुणरयणियाइ वि, नज्जंति न पुरिसरयणाइं ॥ २ ॥"

"धणजीविएण मुक्कं, दरिद्दमइयं अमंगलभएण । न छिवंति नूणं धणिणो, दूरेणं च्चिय परिहरंति ॥ ३ ॥"

"तम्हा अज्जिणह धणं, पयत्तओ जेण विबुहाईयं । अणहुंतयं पि पावहु, गुणनिवहं सयललोयम्मि ॥ ४ ॥"

इत्यादि श्रुत्वा दरिद्रपुरुषेणोक्तं—जानाम्यहमेतदनुभवामि, परं तत्किञ्चिद्वदन्तु, येनाहमपि धनमर्जयामि । तत उपाध्यायः प्राह—

"इक्षुक्षेत्रं समुद्रश्च, योनिपोषणमेव च । प्रसादो भूभृतामेते, घ्नन्ति शीघ्रं दरिद्रताम् ॥ १ ॥"

इति श्रुत्वा गुरूणां च सेवा नैव निष्फला भवतीति मत्वा गुरुश्च जलधिरिति तस्यैव सेवा प्रारब्धा, त्रिकालं पुष्पाञ्जलिं क्षिपति, विनयेन प्रणमति, वेलायां चटन्त्यां धावति निवृत्तायां निवर्तते, एवं प्रभूतकालं क्लेशे कृते तद्विनयगुणाक्षिप्तः सुस्थितो लवणाधिपस्तस्य प्रत्येकं लक्षमूल्यानि पञ्चरत्नानि ददौ, सोऽपि तानि विनयेन गृहीत्वा एवं चिन्तयति—मयाऽमूनि महाकष्टेन प्रभूतकालेना-

जितानि, ततो गुरूपायेन स्वदेशं नेतुं युज्यते, इति तत्रैव कचिद्देशे तानि सुगुप्तानि कृत्वा रत्नाकाराणि पञ्चोपलखण्डानि अपराणि गृहीत्वा कौशाम्बीमार्गे सर्वचौरपल्ल्यासन्नं इत्युच्चैर्वदन् व्रजति, विलोकयन्तु मम पञ्चरत्नानि २। ततश्चौरा आगत्योपलान् वीक्ष्य निवर्त्तन्ते, नूनं ग्रहिलः कोऽप्ययमिति मुञ्चन्ति, इति कौशाम्बीसमुद्रयोरन्तरा त्रिर्गमनागमनं चकार। ततः सर्वत्र ग्रहिल इति कृत्वा पूत्कुर्वन्तमपि न गणयन्ति चौराः। ततस्तुर्यवेलायां निजजङ्घायां रत्नानि गोपित्वा वलितस्तेनैव नगराध्वना, आसन्नमेव जलं पिबति, कन्दमूलफलादि च भुङ्क्ते, न पुनर्दूरे याति, अ(?)दृष्टपूर्वचौरभयात्। एवं कष्टेन रत्नान्यादाय स्वपुरीं प्राप्तो विषयसुखभागी जातः। एवं पञ्चमहाव्रतरत्नान्यपि मुनिः सुगुरुसमुद्राल्लब्ध्वा रक्षित्वा ज्ञानादिमार्गं नयन् रागादिचौरभयाज्ज्ञानादिमार्गस्यासन्नं तिष्ठन् अन्तप्रान्तमशनाद्यास्वादयन्निर्वृतिपुरीं प्राप्तोऽनन्तसुखभागी स्यात्। इत्यादि शेषोऽप्युपनयो बुधैः कार्यः। इति दरिद्रपुरुषकथा समाप्ता।

अथ व्रतोपकारिणीनां समितिगुप्तीनामुत्सर्गतः परिपालनमुपदिदिक्षुराह—

**ताणं च रक्खणुवाओ, पंच य समिईउ तिन्नि गुत्तीओ। जासु समप्पइ सव्वं, करणिज्जं संजयजणस्स ॥१६७॥**

व्याख्या—तेषां च महाव्रतानां 'तत्र' परिपालनेऽप्युपायः, कः? इत्याह—पञ्च समितयस्तिस्रो गुप्तयः, कुतः? इत्याह—यासु समितिगुप्तिषु पाल्यमानासु समाप्यते–समर्प्यते (?) सर्वमपि करणीयं संयतजनस्य, समितिगुप्ती सम्यक् पालयतो महाव्रतानि पालितान्येव भवन्ति, अतो व्रतपालनार्थिना एतास्वेव यत्नो विधेय इति भावः, इति गाथार्थः ॥ १६७ ॥

ननु सर्वं संयतकरणीयमेतासु कथं समाप्यते? इत्याह—

**पवयणमायाउ इमा, निद्दिट्ठा जिणवरेहिं समयम्मि। मायं एयासु जओ, जिणभणियं पवयणमसेसं ॥१६८**

व्याख्या—इमाः समितिगुप्तयो(प्रवचनमातरः)निर्दिष्टा जिनवरैस्तीर्थकरैः समये—सिद्धान्ते, कुतः ? इत्याह—यत एतासु-समितिगुप्तिषु मातं—निष्ठाङ्गतं जिनभणितं प्रवचनं—द्वादशाङ्गमशेषं, तथाहि—ईर्यासमितौ प्राणातिपातविरमणव्रतमवतरति, तद्वृत्तिकल्पानि च शेषव्रतान्यतोऽत्रैवान्तर्भवन्ति, तथा सावद्यवचनपरिहारतो निरवद्यवचनभाषणात्मिकायां भाषासमितौ निरवद्यवचनपर्यायः सर्वोऽप्यन्तर्भवति, न च तद्बहिर्भूतं किमप्यपरं द्वादशाङ्गमस्तीति। एवमेषणासमित्यादिष्वपि भावनीयम्। इत्यर्थतः सर्वमपि प्रवचनमिह मातमुच्यत इति गाथार्थः ॥ १६८ ॥ अथैतासु प्रकारान्तरेण प्रवचनान्तर्भावमाह—

**सुयसागरस्स सारो, चरणं चरणस्स सारमेयाओ। समिईगुत्तीण परं, न किंचि अन्नं जओ चरणं ॥ १६९ ॥**

व्याख्या—श्रुतसागरस्य सारः—परमार्थश्चरणं—चारित्रं, तदर्थमेव तत्प्रवृत्तेः। चरणस्यापि सारमेता एव, कुतः ? इत्याह—समितिगुप्तिभ्यः परं न किञ्चिदन्यद्यतश्चरणमस्ति, अनुपयुक्तगमनादिसावद्यविरतिरूपं हि चारित्रं, तच्च समितिगुप्तिभिरेव साध्यते, अतः स्थितमेतज्ज्ञानदर्शनाविनाभाविनि चारित्रे प्रवचनमवतरतीति चारित्रं समितिगुप्तिषु, इत्येतासु प्रवचनं मातमुच्यत इति गाथार्थः ॥१६९

काः पुनस्ताः समितिगुप्तयः ? इत्याह—

**इरियाभासाएसण—आयाणे तह परिट्ठवणसमिई। मणवयणकायगुत्ती, एयाओ जहक्कमं भणिमो ॥१७०॥**

व्याख्या—'सं' सम्यग् अर्हद्वचनानुसारेण 'इतिः' आत्मनश्चेष्टा समितिरिति तान्त्रिकी संज्ञा । समितिशब्दस्य सर्वत्र योगादीर्यां—ईर्या, गमनरूपा चेष्टा, तद्विषया समितिरीर्यासमितिः । (एवं) भाषासमितिः एषणासमितिः । 'आयाण'त्ति एकारस्यालाक्षणिकत्वादेशेन च समुदायगमनादादानं—पीठफलकादेर्ग्रहणं, निक्षेपणं—तस्यैव मोचनं, तद्विषया समितिरादाननिक्षेपणासमितिः । तथा परिष्ठापनसमितिरित्येताः पञ्च समितयः । अथ तिस्रो गुप्तिराह—'मण' इत्यादि, चेष्टादिषु गोपनं गुप्तिः, सम्यग्योगनिग्रह इत्यर्थः । गुप्तिशब्दस्यापि प्रत्येकं सम्बन्धान्मनोविषया गुप्तिर्मनोगुप्तिः, एवं वाग्गुप्तिः कायगुप्तिः, एताः समितिगुप्तयतीः (?, प्रत्येकं किञ्चिद्विस्तरतो यथाक्रमं भणाम इति गाथार्थः ॥ १७० ॥ तत्रेर्यासमितिं तावदाह—

**आलंबणे य काले, मग्गे जयणाएँ चउहिँ ठाणेहिं । परिसुद्धं रियमाणो, इरियासमिओ हवइ साहू ॥१७१॥**

व्याख्या—विभक्तिव्यत्ययादालम्बनेन कालेन मार्गेण यतनया च, एतैरेव चतुर्भिः स्थानैः परिशुद्धं रीयमाणः—पर्यटन्नीर्यासमितिमान् साधुर्भवतीति गाथार्थः ॥ १७१ ॥ आलम्बनादीन्येव व्याचिख्यासुराह—

**नाणाई आलंबण—कालो दिवसो य उप्पहविमुक्को । मग्गो जयणा य पुणो, दव्वाइ चउव्विहो इणमो ॥१७२॥**

व्याख्या—आलम्ब्यत इत्यालम्बनं, यदालम्ब्य यतीनां गमनमनुज्ञायते, तच्च 'नाणाइ'त्ति ज्ञानदर्शनचारित्ररूपमित्यर्थः । ज्ञानप्रयोजनेन पाठार्थित्वादिना, दर्शनप्रयोजनेन तत्स्थिरीकरणार्थत्वादिना, चारित्रप्रयोजनेन तदुपष्टम्भकाशनपानार्थित्वादिनैव साधुना स्वोपाश्रयान्निर्गन्तव्यं, न राजाद्यवलोकनादिनिमित्तं निरर्थकं चेति भावः । कालश्च साधुपर्यटनविषयत्वेन दिवसो, न रात्रिः,

तस्यां सचक्षुर्विषयत्वादिभ्यः पुष्टालम्बनं विना गमनं निषिद्धमिति भावः। मार्गस्तु साधुगमनविषयत्वेनोत्पथविमुक्तो द्रष्टव्यः, उत्पथगमने आत्मविराधनादिदोषप्रसङ्गात् । यतना पुनर्द्रव्यादिविषया चतुर्विधा 'इरियाओ'त्ति इयं वक्ष्यमाणेति गाथार्थः ॥ १७२ ॥

तदेव चातुर्विध्यमाह—

**जुगमित्तनिहियदिट्ठी, खेत्ते दव्वम्मि चक्खुणा पेहे । कालम्मि जाव हिंडइ, भावे तिविहेण उवउत्तो ॥१७३॥**

व्याख्या—यदा युगमात्रक्षेत्रन्यस्तदृष्टिः पर्यटति तदा क्षेत्रे—क्षेत्रविषया यतना कृता भवति, अत्यासन्नस्य दृष्टस्यापि कस्यचिज्जीवादे रक्षितुमशक्यत्वात्, युगमात्रात्परतस्तु सूक्ष्मजीवादेर्द्रष्टुमशक्यत्वाद्युगमात्रग्रहणं । द्रव्ये—द्रव्यमाश्रित्येयं यतना, यथा चक्षुषा प्रेक्षेत, जीवादिद्रव्यमिति गम्यते । कालतस्तु यावद् हिण्डते तावत्कालमानं सर्वामपि द्रव्यादियतनां करोति । यत्तु त्रिविधेन—मनसा वाचा कायेन चोपयुक्तः पर्यटति सा भावतो यतना। इह च गाथाबन्धानुरोधाद् द्रव्ययतनामुत्सृज्य क्षेत्रयतनायाः प्रथममुपन्यासः कृत इति गाथार्थः ॥ १७३ ॥ उपयुक्तत्वमेव व्यक्तीकुर्वन्नाह—

**उड्ढमुहो कहरत्तो, हसिरो सद्दाइएसु रज्जंतो । सज्झायं चिंतंतो, रीएज्ज न चक्कवालेणं ॥ १७४ ॥**

व्याख्या—ऊर्ध्वमुखः, कथासु—वार्त्तासु रक्तो, हसन्, शब्दादिषु रज्यन्—रागं कुर्वन्, स्वाध्यायं चिन्तयन्, तथा चक्रवालं—वार्त्ताकथनाद्यर्थं कुण्डलकविरचनं, तेन च न रीयेत, किन्तु ज्येष्ठोऽग्रतः, शेषास्त्वनुज्येष्ठादिक्रमेणोपयुक्ताः पृष्ठतः, इत्येवमेव

रीयेतेत्यर्थः। अत्र चोर्ध्वमुखादिविशेषणैर्यथासम्भवं कायवाङ्मनोऽनुपयुक्ततानिषेधः कृतः। उपलक्षणत्वाच्छब्दादिषु द्वेषादयोऽपीह निषेद्धव्या इति गाथार्थः ॥ १७४ ॥ अथोदाहरण द्वारेणातीवेर्यासमितिपालनपरैर्भाव्यमित्युपदेशमाह—

**तह होज्जिरियासमिओ, देहे वि अमुच्छिओ दयापरमो। जह संथुओ सुरेहिं, वि वरदत्तमुणी महाभागो ॥**

व्याख्या—तथेर्यासमितो भवेत् देहेऽप्यमूर्च्छितो दयायां परमो, यथा सुरैरपि संस्तुतो वरदत्तमुनिर्महाभाग इति गाथार्थः ॥१७५

कः पुनर्वरदत्तमुनिः? उच्यते—क्वापि गच्छे वरदत्तमुनिर्महाचारित्री स्वशरीरेऽपि निस्पृहः प्रशमैकभावितः, विशेषत ईर्यासमितः, प्राणान्तेऽप्यनुपयुक्तो न गच्छति, अन्यदा शक्रेण सुरेषु तस्येर्या प्रशंसिता, देवैरप्यक्षोभ्यत्वमुक्तं। तत्रैको मिथ्यादृष्टिसुरः—

"कस्स न वल्लहं नियय-जीवियं? मरणभीरुए लोए। किंतु वियारो न खमइ, निउणाण वि भत्तिभरिएसु ॥ १ ॥"

इत्यादि चिन्तयित्वा तं चालयितुमागात्। तेन साधोर्विचारभूमौ गच्छतो मार्गे मक्षिकाप्रमाणा निरन्तरा मण्डूकिका विहिताः। पृष्ठितो मत्तो गज आनीतो, लोकैर्नश्यद्भिर्बहूक्तोऽपि साधुर्न पश्चाद्विलोकयति, न च गतिं भिनत्ति, उपयुक्त ईर्यां शोधयति चिन्तयति च दुष्टो गजो मामेकं हनिष्यति, अहं तु धावन्नितयतीनां घाताय भविष्यामीतीर्यां शोधयतो यद्भवति तद्भवत्विति, तावद्गजेनोत्पाट्य खे क्षिप्तः पतन् स्वदेहं मण्डूकीघातकारि[णं] निन्दन् षड्विधजीवान् क्षामयन् पुनःपुनर्मिथ्यादुष्कृतं भणन्नवगणितमरणभयः सुरेण ज्ञातः प्रत्यक्षीभूय प्रशंसितः, शक्रप्रशंसाव्यतिकरं उक्त्वा क्षामयित्वा सुरः स्वर्गमगात्। इति देवैः स्तुतोऽपि गतगर्वो विजहार। इति वरदत्तमुनिकथा समाप्ता। अथ भाषासमितिमाह—

कोहाईहिं भएण व, हासेण व जो न भासए भासं। मोहरिविगहाहिं तहा, भासासमिओ स विण्णेओ ॥१७

व्याख्या—'क्रोधादिभिः' क्रोधमानमायालोभैश्चतुर्भिः, भयेन वा हास्येन वा, तथा मौखर्यविकथाभ्यां च, यो भाषां न भाषते, किन्तु हितमितनिरवद्यगुणोपेतामेव भाषत इत्यर्थः, स भाषासमितो विज्ञेयः। एतैस्त्वष्टभिः स्थानैराविष्टः सत्यमपि वदन्निश्चयतो मृषावाद्येव स्यादिति गाथार्थः ॥ १७६ ॥ अत्रैव किञ्चिद्विशिष्टमुपदिशन्नाह—

बहुअं लाघवजणयं, सावज्जं निट्ठुरं असंबद्धं। गारत्थियजणउचियं, भासासमिओ न भासेज्जा ॥१७७॥

व्याख्या—बहुक-मकार्यभाषणादिरूपं, अस्मिन्ननाभोगादिनाऽनेकासत्यवचनादिप्रवृत्तिसम्भवात्, प्रवचनादिलाघवजनकं—कञ्चन धनाढ्यमुद्दिश्य दीनतामालम्ब्य 'त्वदीयोऽहं, न भवन्तं विमुच्य ममापरो निर्वाहकर्ताऽस्ती'त्यादिरूपं, सावद्यं—'गच्छागच्छ भुङ्क्ष्व वा भो गृहस्थ! त्व'मित्यादि, निष्ठुरं—रे काणान्धबधिरचौर्यांट! इत्यादि, असम्बद्धं—" गङ्गा यमुनयोर्मध्ये, दशहस्ता हरीतकी। चित्रकूटं गमिष्यामि, राहुग्रस्ते विनायके [गणे] ॥१॥" इत्यादि, गृहस्थजनोचितं-"हे-हो-हलेत्ति [अन्नेत्ति, भट्टे सामिणि गोमिणि। होले गोले वसुलेत्ति, इत्थियं नेवमालवे ॥ १६ ॥" दश० अ० ६ ] इत्यादि, एवमन्यदपि लोकागमविरुद्धं भाषासमितो न भाषेतेति गाथार्थः ॥ १७७ ॥ एतदेव सदृष्टान्तमाह—

न विरुज्झइ लोयठिई, बाहिज्झइ जेण नेय परलोओ। तह निउणं वत्तव्वं, जह संगयसाहुणा भणियं ॥१७८

व्याख्या—न विरुध्यते लोकस्थितिः, बाध्यते येन नैव परलोकः, तदेव वक्तव्यमिति शेषः। किम्बहुना? तथा निपुणं वक्तव्यं यथा सङ्गतसाधुना भणितमिति गाथार्थः॥ १७८॥

कः पुनरसौ सङ्गतसाधुः?, उच्यते—क्वापि गच्छे विज्ञातसमयसारो गुणरत्नरोहणस्सङ्गतनामा मुनिः, स गुरुभिस्समं विहरन् क्वापि नगरे प्राप्तः। तत्र गुरुभिर्निमित्तात्परचक्रागमनं ज्ञात्वा गच्छोऽन्यत्र विहारितो। ग्लानाद्यर्थं सङ्गतं साधुं मुक्त्वा गुरवोऽपि विजहुः, परचक्रेण नगरे रुद्धे सङ्गतः साधुः शुद्धभैषजाहारार्थं बहिर्निस्सृतः सेनान्या दृष्टः पृष्टः—कुतस्त्वमागतोऽसीति, तेनाप्यक्षुब्धचित्तेनोक्तं—नगरात्, ततः सेनान्या नृपसैन्यपदातिलोकसुखदुःखादिस्वरूपं पृष्टोऽपि नाचीकथत्। कृतकोपेनापि पृष्टः प्राह—साधूनां नेदं वक्तुं युक्तं, यत उक्तम्— +(दशा० ८-२०)

"बहुं सुणेइ कण्णेहिं, बहुं अच्छीहिं पेच्छइ। न य दिट्ठं सुयं सव्वं, भिक्खू अक्खाउमरिहई॥ १॥ ×

"संगरहियाण जम्हा, सावज्जं जुज्जए न जंपेउं। परतित्तीसु पवित्ती, सत्थे लोयम्मि य विरुद्धा॥ २॥"

ततः सेनानी प्राह—किं बहुना भणितेन? यूयं हेरिकाः, मुनिः प्राह—न वयं हेरिकाः, किन्तु साधवो निस्सङ्गा लोकचिन्तारहिताः मोक्षार्थिन इत्यादि। एवमेकमपि लोकविरुद्धं वचनमभणतो हृष्टः सेनानी प्रणम्य भणति—सत्यं, सत्य एष एव धर्मस्ततो ममाप्येनं कथयन्तु। ततो मुनिर्धर्ममुक्त्वाऽणुव्रतादि दत्वा गतः, एवमन्येनापि भाषासमितेन भाव्यम्। इति सङ्गतमुनिकथा समाप्ता।

अथैषणासमितिमाह—

**आहार उवहि सिज्जं, उग्गमउप्पायणेसणासुद्धं। गिण्हइ अदीणहियओ, जो होइ स एसणासमिओ ॥१७९**

व्याख्या—आहारं–अशनादिकं, उपधिं–प्रच्छादनादिकं, शय्या–सुपाश्रयं, उद्गमशुद्धं–गृहस्थसमुत्थाधाकर्मादिषोडश-दोषरहितं, उत्पादनाशुद्धं–आत्मसमुत्थधात्रीकर्मादिषोडशदोषैः परिहृतं, एषणाशुद्धं–गृहस्थात्मोभयसम्भवैः शङ्कितम्रक्षितादिदशभि-र्दोषैर्विरहितं गृह्णाति, अदीनहृदयो–ऽलाभादिष्वपि वैक्लव्यमनवलम्बमानो यः स एव एषणासमितो भवति, नान्य, इति गाथार्थः ॥१७९॥

आहारशुद्धिर्दुष्करेति चेदाह—

**आहारमेत्तकज्जे, सहसच्चिय जो विलंघइ जिणाणं। कह सेसगुणे धरिही ?, सुदुद्धरे सो जओ भणियं ॥१८०**

व्याख्या—आहार एवाहारमात्रं, तस्यापि कार्ये यः सहसैव–वारत्रयमन्यत्र पर्यटनमकृत्वा पुष्टालम्बनं विनैव जिनाज्ञां–एष-णासमितिपालनरूपां विलङ्घयति-अनेषणीयग्रहणेनातिक्रामति, स वराकः कथं शेषगुणान् ब्रह्मचर्यादीन् सुदुर्धरान् धरिष्यति ? न कथ-ञ्चिदिति भावः, यतो भणितमागमे इति गाथार्थः ॥ १८० ॥ आगमोक्तमेवाह–

**जिणसासणस्स मूलं, भिक्खायरिया जिणेहिं पण्णत्ता। एत्थ परितप्पमाणं, तं जाणसु मंदसद्धीयं ॥१८१**

व्याख्या—'जिनशासनस्य' जिनोक्तमार्गस्य 'मूलं' तत्त्वं, भिक्षार्थमुद्गमादिदोषत्यागेन चरणं भिक्षाचर्या, सैव जिनैः प्रज्ञप्ता-ऽऽदिष्टा। अस्यां तु भिक्षाचर्यायां परितप्यमानं–निर्वेदं गच्छन्तं तं साधुं जानीहि धर्मविषये मन्दश्रद्धाकमिति गाथार्थः ॥ १८१ ॥

ननु जिनाज्ञोल्लङ्घने किमनिष्टमापद्यते ? इत्याह

जह नरवइणो आणं, अइक्कमंता पमायदोसेणं । पावंति बंधवहरोह–छिज्जमरणावसाणाणि ॥१८२॥
तह जिणवराण आणं, अइक्कमंता पमायदोसेणं । पावंति दुग्गइपहे, विणिवायसहस्सकोडीओ ॥१८३॥

व्याख्या—यथा नरपतेराज्ञामतिक्रामन्तो–लङ्घयन्तः स्वकीयप्रमाददोषेण प्राप्नुवन्ति, कानि ? इत्याह–बन्धो रज्ज्वादिभिर्वधो-लकुटादिहननं, रोधो-गुप्तिगृहादिषु, छेदनं–देहावयवादेः कर्त्तनमित्यादीनि मरणावसानानि, दुःखानीत्यध्याहारः । तथा जिनवराणामाज्ञामतिक्रामन्तः प्रमाददोषेण दुर्गतिपथे विनिपातसहस्रकोटीः प्राप्नुवन्तीति गाथाद्वयार्थः ॥ १८२–१८३ ॥ एवं च सति—

जो जह व तह व लद्धं, गिण्हइ आहारउवहिमाईयं । समणगुणविप्पमुक्को, संसारपवड्ढओ भणिओ ॥१८४॥

व्याख्या—यो 'यथा वा तथा वा' उद्गमादिदोषदूषितमदूषितं वा 'लब्धं' प्राप्तं कामचारित्वाज्जिनाज्ञाविरहेण गृह्णात्याहारोपध्यादिकं, स श्रमणगुणैर्विप्रमुक्तः संसारप्रवर्द्धको भणित इति गाथार्थः ॥ १८४ ॥

अथैषणाशुद्धिपालने आदरोत्पादनार्थं तन्निष्ठमहर्षीणां नमस्कारमाह—

धणसम्म-धम्मरुइ--माइयाण साहूण ताण पणओऽहं । कंठट्ठियजीएहि वि, न एसणा पिल्लिया जेहिं ॥१८५॥

व्याख्या—तान् धनशर्म-धर्मरुच्यादिकान् साधूनहं प्रणतोऽस्मि, कण्ठस्थितजीवैरपि न यैरेषणासमितिः पीडिता–खण्डितेत्यर्थः । अत्र चाप्रासुकमनेषणीयं च परिहरन्नेषणासमितः स्यादित्यप्रासुकानेषणीययोः परिहारे क्रमाद्धनशर्म-धर्मरुचिदृष्टान्तौ, तौ चैवं–

अवन्त्यां धनमित्रश्रेष्ठी, धनशर्मा सुतः, अन्यदा धर्मं श्रुत्वा ससुतः स प्राव्राजीत् । सोऽन्यदा दारुणे ग्रीष्मे गुरुभिस्समं

विहारं कुर्वन्नरण्ये व्रजति, तावद्धनशर्मक्षुल्लकस्तथा पिपासया पीडितो यथाऽक्षिणी भ्रमतः मूर्च्छा समायाति, स्खलति विसंस्थुलानि पदानि, परिशुष्यत्यमृतकला, ततो गच्छेन समं गन्तुमशक्तः स दूरे पृष्ठत आगच्छति। जनकोऽपि तत्प्रतिबन्धेन तदासन्नस्थो व्रजति, ततः काप्यन्तरा शीतलजलकल्लोलसङ्कुला महानदी मार्गे समायाता। ततो धनमित्रः पुत्रमोहमोहितो भणति–वत्स! पिबेदं जलं, येन स्वस्थो गन्तुं शक्नोषि। ततोऽग्रे गत्वा नदीतीरे वृक्षान्तरितः स्थितः [पिता], मा एष लज्जावान्न पिबतीति। धनशर्मा क्षुल्लकस्तु जिनागमोक्तवचनानि स्मरन्नशुद्धजलस्याग्रहणे परित्यक्तप्राणः शुभपरिणामो वैमानिकदेवेषूत्पन्नोऽवधिना पूर्वभवव्यतिकरं ज्ञात्वा-ऽधिष्ठितक्षुल्ल[क]शरीरो जनकस्य दर्शनं दत्वा मिलितो मुनिसमूहे, मा मम मरणं ज्ञात्वा मुनीनां खेदो भवेदिति। ततः सर्वान् मुनीन् क्षुत्पिपासापीडितान् ज्ञात्वा सकलेऽपि मार्गे स्थाने स्थाने गोकुलानि विकुर्वितानि। मुनयोऽप्यज्ञाततत्त्वास्तेषु तक्रादि गृह्णन्ति। अथ यावत्ते सुखेनारण्यं लङ्घयित्वा जनपदं प्राप्ताः ततः संहृतेषु गोकुलेषु देवसान्निध्यं ज्ञात्वा मुनिभिर्मिथ्यादुष्कृते कृते देवो निजं रूपं कृत्वा जनकं विना साधून् वन्दमानः पिपासापीडितक्षुल्ल[क]मरणवृत्तान्तं वदन् गुरुभिर्भणितो–यद्येवं किं न जनकं वन्दसे?, सुरः प्राह–अनेनानेषणीयोपदेशेन संसारे क्षिप्तोऽभूवं, यदि जलं गृहीतं भवेत्, अतोऽज्ञातपरमार्थैः कार्ये एवोपदेशो दातव्य इति ज्ञापनार्थं न जनको वन्दित इत्युक्त्वा जनकं क्षामयित्वा गतो देवः। एवमापत्स्वप्यपरेणाप्यप्रासुकं न स्वीकर्त्तव्यमिति धनशर्मकथा समाप्ता।

अथानेषणीयत्यागे धर्मरुचिकथेयं–क्वापि गच्छे तपश्शोषिताङ्गो धर्मरुचिर्मुनिः, सोऽन्यदा ग्रीष्मेऽष्टमतपःपारणके क्वाप्यरण्ये गच्छन् क्षुत्तृषाक्रान्तो वनदेवतया काञ्जिकाभृततालाबुकौ द्वौ पुरुषौ मार्गे गच्छन्तौ वृक्षमूले स्थितौ दर्शितौ। तयोरेकः प्राह–भो! एतत्पिब, स प्राह–न तृषितोऽहं, इतरः प्राह–तदिदं को वोढा? त्यजामि, अपरेणोक्तं–यद्यस्य मुनेः कार्ये किमप्यायाति तदाऽस्य

देहि, तत इतरो मुनिं प्रत्याह—गृहाण भो मुने! यदि ते रोचते, अथ त्यजामि, ततः साधुना तृषार्त्तेनापि द्रव्यक्षेत्रकालादिविलोकनेन देवसम्बन्धी ज्ञात्वा दोषभीतेन नाग्राहि, प्रकटीभूय देवतया प्रशंसितो विगतगर्वः शिवमगात्। एवमन्येनाप्यप्रमत्तेन एषणा कार्या, इति धर्मरुचिकथा समाप्ता। अथादाननिक्षेपणविषयां समितिमाह—

**पडिलेहिऊण सम्मं, सम्मं च पमज्जिऊण वत्थूणि। गिण्हेज्ज निक्खिवेज्ज व, समिओ आयाणसमिइए॥**

व्याख्या—यः सम्यक्प्रत्युपेक्ष्य—दृष्ट्या सम्यग्निरीक्ष्य ततः सम्यक् प्रमृज्य च रजोहरणादिना वस्तूनि—पीठफलकादीनि गृह्णीयान्निक्षिपेद्वा, स, पदे समुदायोपचारादादाननिक्षेपणसमित्या समितो भवेत्, नान्य, इति गाथार्थः ॥ १८६ ॥

यदि तावदशक्यं कर्तुं न शक्यते? तदा शक्यं तु कर्तव्यमेवेत्याह—

**जइ घोरतवच्चरणं, असक्कणिज्जं न कीरए इण्हिं। किं सक्का वि न कीरइ?, जयणा सुपमज्जणाइया॥१८७॥**

व्याख्या—यदि तीव्रतपश्चरणं कर्तुमशक्यमत इदानीं न क्रियते, तर्हि किं शक्याऽपि सुप्रमार्जनादिका यतना न क्रियते? क्रियत एवेति गाथार्थः ॥ १८७ ॥ ततः किमित्याह—

**तम्हा उवउत्तेणं, पडिलेहपमज्जणासु जइयव्वं। इह दोसेसु गुणेसु वि, आहरणं सोमिलऽज्जमुणी॥१८८॥**

व्याख्या—तस्मादुपयुक्तेन प्रत्युपेक्षाप्रमार्जनयोर्यतितव्यं, इह दोषेषु गुणेष्वप्युदाहरणं सोमिलार्यमुनिरिति गाथार्थः ॥१८८॥

कः पुनः सोमिलार्यः?, उच्यते—क्वापि गच्छे सोमिलो मुनिर्गुरुदिशात्पात्रकाणि [सवेलं] प्रतिलिख्योद्ग्राह्य किञ्चित्कार्यं प्रति

चलितः कार्ये सिद्धे पुनः स्थितः, प्रतिलेखना[वेला]यां जातायां साधुभिर्भणितो-भोः ! पात्रकाण्डग्रन्थ्य प्रतिलिख, तेनोक्तं-मयेदानीमेव प्रतिलिख्योपकरणं गृहीतं, किं तत्पुनः पुनः प्रतिलेखनया ?, नहीदानीमेवैतन्मध्ये सर्पः प्रविष्टोऽस्ति । ततो देवतया तस्योत्कण्ठवाक्येन तत्र सर्पः क्षिप्तः। गुरुभिः प्रोक्तः—साम्प्रतमपि सर्पो भवतीति प्रेरितो यावत्पात्रकाण्यादत्ते तावद्धावितो गलं प्रति सर्पः, मुनिर्नष्टो गुरुशरणं गतः स्वापराधं क्षामयति स्म । देवतयाऽपि प्रत्यक्षीभूयोपालब्धः, ततोऽतीव प्रतिलेखनाशीलो जातः । पश्चादपि शुद्धप्रतिलेखनया निरन्तरं गच्छदागच्छतां साधूनां प्रतिलिख्य प्रतिलिख्य दण्डग्रहणार्पणविश्रामणादिवैयावृत्त्येन च घातिकर्मक्षयात्सिद्धः । एवमन्योऽपि चतुर्थसमितौ प्रमाद्यन् दोषान् अप्रमत्तस्तु गुणानासादयतीति तत्राप्रमत्तेन भाव्यम् । सोमिलार्यकथानकं समाप्तम् ।

अथोच्चारप्रस्रवणादिपरिस्था[ष्ठा]पनायां समितिमाह—

**आवायाइविरहिए, देसे संपेहणाइपरिसुद्धे । उच्चाराइ कुणंतो, पंचमसमिइं समाणेइ ॥१८९॥**

व्याख्या—आपातस्तिर्यग्मनुष्याणामागमनं आदिर्येषां संलोकादीनां, ते आपातादयो दोषास्तैर्विरहिते सम्प्रेक्षणप्रमार्जनाभ्यां च परिशुद्धे प्रदेशे उच्चारप्रस्रवणादिकुर्वन्ननेषणीयमतिरिक्तं वा भक्तपानादि च परिष्ठापयन् पञ्चमीं समितिं परिष्ठापनरूपां समानयति—समर्थयते आराधयतीति यावदिति गाथार्थः ॥ १८९ ॥ अत्रोदाहरणमाह ।

**धम्मरुइमाइणो इह, आहरणं साहुणो गयपमाया । जेहिं विसमावईसु वि, मणसा वि न लंघिया एसा ॥**

व्या.—इह धर्मरुच्यादयो गतप्रमादाः साधव उदाहरणं, यैर्विषमापत्स्वपि एषा—परिष्ठापनासमितिर्मनसाऽपि न लङ्घितेति गाथार्थः ।

धर्मरुचिकथानकमुच्यते—क्वापि गच्छे धर्मरुचिर्मुनिर्दयापरः प्राणान्तेऽप्यविधिनोच्चारप्रस्रवणोत्सर्जनादि न करोति। अन्यदा तस्य सन्ध्यायां स्थण्डिलप्रतिलेखना विस्मृता, रात्रौ तस्य प्रस्रवणनिरोधे कृते दयानिमित्तं पीडां सहमानस्य 'रे जीव! प्रमादपरः किं स्थण्डिलप्रतिलेखनां न करोषि?, इदानीं किं ताम्यसि? निजप्रमादतरुकुसुमलाभे' इति चिन्तयतः स्थिरचित्तस्य सत्त्वरञ्जितः कश्चित्सुरो हृष्टः प्रभातं चकार। साधुः स्थण्डिलं प्रतिलिख्य प्रस्रवणोत्सर्गमकरोत्, तावता पुना रात्रिर्झगित्येव जाता। ततः साधुर्देवमायां ज्ञात्वा स्वं निन्दन् देवसान्निध्येऽप्यगर्वितः गुरुप्रशंसितो विशेषत उत्सर्गसमितिरतः कर्मक्षयात्सिद्धः, इत्यन्योऽपि चरमसमितौ दृढत्वं कुर्यात्। [इति] धर्मरुचिकथानकं समाप्तम्।

उक्ताः सोदाहरणाः पञ्च समितयः, अथ गुप्तित्रये मनोगुप्तिं तावदाह—

**अकुसलमणोनिरोहो, कुसलस्स उईरणं तहेगत्तं। इय निट्ठियमणपसरा, मणगुत्तिं बिंति महरिसिणो ॥१९१॥**

व्याख्या—योऽकुशलस्य सावद्यचिन्तारूपस्य मनसो निरोधः, कुशलस्य—सूत्रार्थादिचिन्तारूपस्य मनसो यदुदीरणं, तथा तस्यैव मनस एकत्वं—एकाग्रताव्यवस्थापनं, इत्युक्तरूपां त्रिविधामपि मनोगुप्तिं ब्रुवते, सकलविकल्पातीतत्वान्निष्ठितो विकल्परूपमनसः प्रसरः—प्रवृत्तिर्येषां ते निष्ठितमनःप्रसरा महर्षय—स्तीर्थकरा इति गाथार्थः ॥१९१॥ कर्तुमशक्या चेयं गुरुकर्मणामित्याह—

**अवि जलहीवि निरुज्झइ, पवणोवि खलिज्जइ उवाएणं। मन्ने न निम्मिओच्चिय, कोवि उवाओ मणनिरोहे ॥**

व्याख्या—अपिः सम्भावने, एतदपि सम्भाव्यते, यदुत—केनापि पर्वतादिक्षेपेण जलधिरपि निरुध्यते, पवनोऽप्यन्तरे

कटकुड्यादनायुपायतस्तीव्रवेगप्रवृत्तोऽपि स्खलयते, मनोनिरोधे पुनः सूत्राध्ययनादिको जिनैर्निर्मितोऽपि परमोपायो, कोऽपि मन्ये न निर्मित इव, अनभिज्ञतया अयोग्यतया वा बहूनामस्मादृशां तदुपायबहिर्भूतत्वादिति भाव इति गाथार्थः ॥ १९२ ॥

कुत एतदित्याह—

**चिंतइ अचिंतणिज्जं, वच्चइ दूरं विलंघइ गुरुं पि। गु आणरू वि जेण मणो, भमइ दुराचारमहिलव्व ॥१९३**

व्याख्या—चिन्तयत्यचिन्तनीयं स्त्रीरूपादि, व्रजति दूरं, विलङ्घयति गुरुमप्यद्रिसमुद्रादिकं, महतामपि येन मनो भ्रमति दुराचारमहिलेवेति गाथार्थः ॥ १९३ ॥ अथ जिनवचनविद्यासहायाः केचिद्गृहिणोऽपि विषमिव मनो निरुन्धयन्त्येवेत्याह—

**जिणवयणमहाविज्जा—सहाइणो अह य केइ सप्पुरिसा। रुंभंति तं पि विसमिव, पडिमापडिवन्नसड्ढोव्व ॥**

व्याख्या—जिनवचनमेव महाविद्या, तत्सहायाः केऽपि सत्पुरुषास्तदपि प्रसरणशीलं मनो विषमविषमिव रुन्धन्ति, प्रतिमां प्रतिपन्नः श्राद्धो जिनदासः, स इवेति गाथार्थः ॥ १९४ ॥

कोऽसौ जिनदासः ?, उच्यते—चम्पायां जिनदासः श्राद्धो ज्ञातजिनधर्मो महार्द्धिकोऽष्टमीचतुर्दश्योः पौषधं गृह्णन् प्रतिमां शून्यगृहादिषु प्रतिपद्यते। अन्यदा कृष्णचतुर्दश्यां पौषधं गृहीत्वा नृपमन्दिरासन्नशून्यगृहे प्रतिमया स्थितः, निशि परपुरुषलुब्धा तद्भार्या तत्रैवागता, तया तमसि भर्त्ता न ज्ञातः, निश्चलत्वकृते चतुर्षु पादेषु क्षिप्ततीक्ष्णलोहकीला खट्वा क्षिप्ता तत्र। ततो जिनदासचरणोपर्येकः कीलः समागात्। स च पादं भित्त्वा भूमौ प्रविष्टः, प्रवृत्तो रुधिरप्रवाहः, उच्छलिताऽतीव वेदना, चित्तेन सुप्रण-

मानां प्रियां दृष्ट्वाऽचिन्तयत्–'रे जीव ! संसारे भ्रमता त्वयाऽनन्ता भार्यास्त्यक्ताः, एनामपि तास्वेकां जानीहि, मा पुनर्विषादं गच्छ, शास्त्रेऽपीदृशा नार्यः किं त्वया न श्रुताः ? "सुकृतेन न गृह्यन्ते, गुरुमपि मुञ्चन्ति यान्ति नीचेऽपि । तत्तोषविषादकरा, न भवन्त्येता महामनसाम् ॥ १ ॥" इत्यादि, ततोऽसौ निश्चलचित्तः पापेन प्रार्थ्य सममेव परित्यक्तः प्राप्तो वैमानिकसुरेषु । पतिते च तद्देहे सम्भ्रान्तोत्थिता तद्भार्या । एतद्व्यतिकरं ज्ञात्वा पश्चात्तापपरां तां सुरः कृपया समागत्य प्रतिबोध्य जिनदीक्षोन्मुखां चकार । तस्माद्यदि गृहस्था अप्येवं मनोनिरोधं कुर्वते तर्हि साधुभिरसौ सुतरां कार्यः, इति जिनदासकथानकं समाप्तम् ।

अथ वाग्गुप्तिमाह—

**अकुसलवयणनिरोहो, कुसलस्स उईरणं तहेगत्तं । भासाविसारएहिं, वइगुत्ती वण्णिया एसा ॥ १९५ ॥**

व्याख्या—योऽकुशलस्य–सावद्यभाषणरूपस्य वचनस्य निरोधो–निवारणं, कुशलस्य तु–सूत्रार्थभणनादिरूपस्य वचसो यदु- दीरणं, तथा तस्यैव वचसो यदेकत्वं–निर्व्यापारतालक्षणं, एषा त्रिविधाऽपि भाषाविशारदैर्वाग्गुप्तिर्वर्णितेति गाथार्थः ॥ १९५ ॥

अशक्या चेयमपि गुरुकर्मभिः कर्तुमित्याह—

**दम्मंति तुरगा वि हु, कुसलेहिं गया वि संजमिज्जंति । वइवग्घं संजमिउं निउणाण वि दुक्करं मन्ने ॥ १९६ ॥**

व्याख्या—दम्यन्ते तुरङ्गा अपि, हुः–स्फुटं, कुशलैः गजा अपि संयम्यन्ते, वागेव व्याघ्री वाग्व्याघ्री, तां पुनः संयमितुं निपुणानामपि दुष्करं मन्ये इति गाथार्थः ॥ १९६ ॥

नन्वशक्यानुष्ठानरूपया किमनयोपदिष्टया ? इति चेदाह—

**सिद्धंतनीइकुसला, केइ निगिण्हंति तं महासत्ता। सज्झायगचोरग्गह–जाणगगुणदत्तसाहुव्व ॥१९७॥**

व्याख्या—सिद्धान्तनीतिकुशलाः केचिन्महासत्त्वास्तामपि वाग्व्याधिं निगृण्हन्त्यतस्तदुपदेशो न निरर्थकः। क इव निगृण्हन्ति ? इत्याह–"सज्झायग" त्ति स्वजनास्तेषां चौरैर्ग्रहं जानाति यो गुणदत्तसाधुः, स इवेत्यक्षरार्थः ॥१९७॥

कथानकं तूच्यते—कश्चिद्गुणदत्तनामा बहुलद्धिस्वजनादींस्त्यक्त्वा प्राव्राजीत्। गीतार्थः प्रतिपन्नैकाकिविहारः स्वजनप्रतिबोधनार्थं व्रजन्नरण्ये चौरैर्गृहीतः, श्रमणं ज्ञात्वा 'अस्माकमत्र स्थितानां स्वरूपं कस्याप्यग्रे मा कथये'रित्युक्त्वा तैर्मुक्तस्य तस्याग्रतो गच्छतो मिलिता मातृपितृभ्रात्रादियुताः स्वजनस्वज्ञातीययज्ञयात्राः ['जानीया' इति लोके], स्वजनैर्वन्दितो मुनिः, तेन साधुवक्तव्याहे प्रोक्तं, न चौरादिस्वरूपं, स्वजनैराग्रहात् साधुः पश्चाद्वालितस्तैस्समं गच्छत्यन्तरा स्थितैश्चौरैर्लुण्टिता यज्ञयात्रा धृतास्तत्स्वजनाश्चालिताः पल्लीं प्रति। ततः साधुर्दृष्टश्चौरैरुक्तं च–स एवायं साधुर्यः आत्मभिर्बद्धो मुक्तश्च, हन्यतेऽसौ, माऽस्मत्स्वरूपं वैरिणो गत्वा कथयेत्, तावदेतत्कथश्चित्साधुजननी श्रुत्वा प्राह–भोः ! पल्लीश ! त्वत्क्षुरिकां ममार्पय, येन निजौ स्तनौ छित्त्वा त्यजामि, पल्लीशेन पृष्टं–वृद्धे ! कस्मादेवं करिष्यसि ?, तयोक्तं–यत आभ्यां स्तन्यं पायितोऽप्यसौ ग्रस्यर्थं भवतो दृष्ट्वा नास्माकमकथयत्। चौरैः साधुः पृष्टो–भोः ! कस्मान्न कथिता वयमत्र स्थिताः ?। साधुनोक्तं–साधूनां स्तोकाऽपि गृहिप्रसङ्गवार्ता जिनैर्निषिद्धा। ततः सर्वज्ञवचनमुल्लङ्घ्य स्वजनकार्यं कथं (कथयामि ?) करोमि ? इत्यादि श्रुत्वा हृष्टाश्चौराः भद्रका जाताः सर्वममुञ्चन्। मुनिरपि तुष्टानां स्वज्ञातीयानां धर्ममुक्त्वा प्रतिबोध्य विहरतिस्म। एवमन्येनापि वाग्गुप्तिः कर्त्तव्या। इति [वाग्गुप्तौ] गुणदत्तसाधुकथा समाप्ता ॥ अथ कायगुप्तिमाह—

**जो दुट्ठगयंदो इव, देहो असमंजसेसु वट्टंतो। नाणंकुसेण रुंभइ, सो भन्नइ कायगुत्तो त्ति ॥ १९८ ॥**

व्याख्या—अत्र प्राकृतत्वाद्विभक्तिव्यत्ययस्ततो यो दुष्टगजेन्द्रमिव देहमसमञ्जसे-ष्वागमविरुद्धेषु वर्तमानं ज्ञानाङ्कुशेन रुणद्धि, स कायगुप्त इति भण्यत इति गाथार्थः ॥ १९८ ॥ दृष्टान्तद्वारोपदेशमाह—

**कुम्मुव्व सयांगे, अगोवंगाइं गोविउं धीरा। चिट्ठंति दयाहउं, जह मग्गपवन्नओ साहू ॥ १९९ ॥**

व्याख्या—कूर्म इव सदाऽङ्के अङ्गोपाङ्गानि गोपयित्वा धीरास्तिष्ठन्ति दयाऽर्थं, यथा मार्गे प्रपन्नः साधुरित्यक्षरार्थः ॥१९९॥

भावार्थस्तु कथानकेनोच्यते—कश्चित्साधुः सार्थेन समं प्रस्थितः, सार्थः क्वापि हरितभूमौ स्थितस्तत्र भूमौ सर्वत्र हरितत्वात्साधुः स्वयोग्यां भूमिमलभमानः कृच्छ्रेणैकपादस्थापनयोग्यं स्थण्डिलं प्राप्य रात्रौ तत्रैकपादेन स्थितो ध्यानसंलीनः, शक्रेणावधिना दृष्टो, भक्त्या वन्दितः, कायगुप्त्या सभामध्ये प्रशंसितश्च। ततः कश्चित्सुरो व्याघ्ररूपेणाचालयत्तं, परं साधुर्नाचलन्निजध्यानात्, फालाहतोऽपि तिलतुषमात्रमप्यशुद्धं स्थण्डिलं न परिभुक्तवान्, ततस्तद्गुणरञ्जितः सुरस्तं मुनिं नत्वा क्षामयित्वा हृष्टः स्वर्गमगात्। साधुरप्यगर्वितो मोक्षमगात्। इत्यन्येनापि कायगुप्तिः कार्या, इति कायगुप्तसाधुकथानकं समाप्तम् ॥

तदेवं समर्थिताः समितयो गुप्तयश्च, आसां परस्परं चैष विशेषः—गमनभाषणाहारग्रहणादाननिक्षेपपरिष्ठापनारूपचेष्टाकाल एव समितीनां व्यापारो, गुप्तीनां तु गमनादिरहितकायोत्सर्गाद्यवस्थायामचेष्टाकालेऽपि च व्यापारः। यत उक्तं—

"**समिओ नियमा गुत्तो, गुत्तो समियत्तणम्मि भइयव्वो। कुसलवइमुईरंतो, जं वइगुत्तो वि समिओ वि ॥१॥** इति।

अथ व्रतकलितोऽपि समितिगुप्त्युद्यतोऽपि च सूत्रार्थपौरुषीक्रमेण तदुपकारार्थमेव सूत्रं पठेदित्याह—

**इय निम्मलवयकलिओ, समिईगुत्तीसु उज्जुओ साहू। तो सुत्तअत्थपोरिसि–कमेण सुत्तं अहिज्जिज्जा ।२००**

व्याख्या–इत्युक्तप्रकारेण निर्मलव्रतकलितः समितिगुप्तियुक्तः साधुः, ततस्तदुपकारार्थं सूत्रार्थपौरुषीक्रमेण सूत्रमधीयीतेति गाथार्थः।

सूत्रं च पठतः कथञ्चित्तदालम्बनेनातीव तीव्रं तपोऽतप्यमानस्यैकत्रापि क्षेत्रे तिष्ठतस्तस्मिन्नधीते विशेषतः कृत्यमुपदिशन्नाह–

**तम्मि अहीए विहिणा, विसेसकयउज्जमो तवविहाणे। दव्वाइअपडिबद्धो, नाणादेसेसु विहरेज्जा ॥२०१॥**

व्याख्या–तस्मिन्–सूत्रे अधीते विधिना तपोविधाने विशेषेण कृतोद्यमः, द्रव्ये–श्रावकादौ, आदिशब्दात्क्षेत्रे–निर्वातवसत्यादौ, काले–शरदादौ, भावे–शरीरोपचयादौ, अप्रतिबद्धो नानादेशेषु विहरेन्मासकल्पादिना, पुष्टालम्बनं विना सुखेच्छया नैकत्र तिष्ठेदित्यर्थः। अयम्भावः–द्रव्यादिप्रतिबद्धममुकं क्षेत्रं, इदं तु न, विहरतां रमणीयोऽयं शरत्कालादिः, स्निग्धमधुराद्याहारादिप्राप्त्या तत्र मे शरीरसुखं भविष्यति, नात्र, अथ चैवं विहरन्तं मामेवोद्यतविहारिणं लोका भणिष्यन्त्यमुकं शिथिलमित्यादि, द्रव्यक्षेत्रकालभाव-प्रतिबन्धेन मासकल्पविहारोऽपि कार्यासाधक एव, ततो विहारोऽवस्थानं वा द्रव्याद्यप्रतिबद्धेन विधेयमिति गाथार्थः ॥२०१॥

नन्वेकत्र कुतो न स्थीयते? इत्याह—

**पडिबंधो लहुयत्तं, न जणुवयारो न देसविन्नाणं। नाणाईण अवुड्ढी, दोसा अविहारपक्खम्मि ॥ २०२ ॥**

व्याख्या–बहुकालमेकत्रावस्थाने प्रतिबन्धः श्रावकादिषु जायते, अनादेयवाक्यतादिनिबन्धनं लघुत्वं लोके भवेत्, न च नाना-देशीयजनस्य सम्यक्त्वप्राप्त्याद्युपकारो जायते, नापि देशसम्बन्धिभाषादीनां विज्ञानं भवति, तदज्ञाने च तत्रोत्पन्नशिष्यप्रतिबोधानुवृत्ती दुस्साध्ये, ज्ञानदर्शनचारित्राणां च प्रचुरबहुश्रुतादर्शनेन न शिष्याद्यप्राप्त्या वा वृद्धिरेव जायते, इत्याद्या अविहारपक्षे दोषाः, अतोऽप्रु-

ष्टालम्बनेन नैकत्रावस्थितिः कार्येति गाथार्थः ॥ २०२ ॥

मासकल्पादिना विहरताऽप्येवम्भूतेनैव भाव्यं, अन्यथा स्वकार्यासिद्धेरित्याह—

**गयणं व निरालंबो, हुज्ज धरामंडलं व सव्वसहो । मेरुव्व निप्पकंपो, गंभीरो नीरनाहुव्व ॥२०३॥**

**चंदुव्व सोमलेसो, सूरुव्व फुरंत उग्गतवतेओ । सीहुव्व असंखोभो, सुसीयलो चंदणवणुव्व ॥ २०४ ॥**

**पवणुव्व अप्पडिबद्धो, भारंडविहंगमुव्व अप्पमत्तो । मुद्धवहुव्वऽवियारो, सारयसलिलं व सुद्धमणो ॥२०५॥**

व्याख्या—गगनमिव निराधारः—स्वजनकुलादिनिश्रारहितो भवेत् । धरामण्डलमिव सर्वंसहः । मेरुरिव निष्प्रकम्पः—परीषहपवनाक्षोभ्यः । नीरनाथ इव गम्भीरः—परैरलब्धमध्यः । चन्द्र इव सौम्यलेश्यः—प्रसन्नो, न तु रौद्रमूर्त्तिः । सूर्य इव स्फुरदुग्रतपस्तेजाः । सिंह इवासङ्क्षोभ्यो—वादिगजघटाऽभीतचित्तः । चन्दनवनमिव सुशीतलः—आप्यायककोमलवाक्प्रवृत्तः । पवन इवाप्रतिबद्धो द्रव्यादिषु । भारण्डपक्षीवाप्रमादवान् । मुग्धवधूवदविकारः—शृङ्गारगर्भवक्रोक्त्यादिविकाररहितः । सागरसलिलमिव शुद्धमना इति गाथात्रयार्थः ॥ २०३-४-५ ॥ पुनः कथम्भूतो भवेत् ? इत्याह—

**वज्जेज्ज मच्छरं पर—गुणेसु तह नियगुणेसु उक्करिसं । दूरेणं परिवज्जसु, सुहसीलजणस्स संसग्गिं ॥ २०६ ॥**

व्याख्या—वर्जयेन्मत्सरं—प्रद्वेषं परगुणेषु, तथा निजगुणेषूत्कर्षं वर्जयेत्, तथा दूरेण परिवर्जय सुखशीलः—सुखलिप्सुर्जनः—पार्श्वस्थादिस्तस्य संसर्गं—सङ्गतिमिति गाथार्थः ॥ २०६ ॥ सुखशीलजनमेवाह—

**पासत्थो ओसन्नो, कुसीलसंसत्तनी अहाछंदो। एएहिं समाइन्नं, न आयरेज्जा न संसेज्जा ॥ २०७ ॥**

व्याख्या–सम्यग्ज्ञानदर्शनचारित्रेभ्यः पार्श्वे–पृथक् तिष्ठतीति पार्श्वस्थः, स द्विविधः–सर्वतो देशतश्च, तत्र ज्ञानादिभ्यः पृथग्भूतः सर्वतः, निष्कारणमेव शय्यातराभ्याहृतराजनित्याग्रपिण्डभोजित्वादिदोषदुष्टस्तु देशतः, सातिचारचारित्रसद्भावात् । अवसीदति–प्रमाद्यति साधुसामाचार्यामित्यवसन्नः, सोऽपि द्विधा–सर्वतो देशतश्च, अत्रावबद्धपीठफलकः स्थापनाभोजी च सर्वतोऽवसन्नः, तत्रैककाष्ठनिष्पन्नसंस्तारकालाभे बहुभिर्वंशादिकाष्ठखण्डैर्दवरकादिबन्धान् दत्वा वर्षासु संस्तारकः क्रियते, तं च यः पक्षसन्ध्यादिषु बन्धापगमं कृत्वा न प्रत्युपेक्षते सोऽवबद्धपीठफलकोऽभिधीयते, अथवा नित्यमास्तीर्णसंस्तारक एकान्तानास्तीर्णसंस्तारक एव वा य आस्ते स एव वा वाच्यः, यस्तु प्रतिक्रमणस्वाध्यायप्रत्युपेक्षणागमननिर्गमनस्थाननिषीदनादिकां साधुसामाचारीं प्रत्येकं न करोति, हीनाधिकादिदोषदुष्टां वा करोति, स्खलिते मिथ्यादुष्कृतं न ददाति, प्रेरितश्च गुरोः सम्मुखीभूय प्रब्रवीतीत्यादिदोषदुष्टो देशावसन्नः । कुत्सितं ज्ञानदर्शनचारित्ररूपं शीलं यस्य स कुशीलः, अयं च त्रिधा–ज्ञानदर्शनचारित्रकुशीलभेदात्, तत्र कालविनयादिकमष्टधा ज्ञानाचारं विराधयन् ज्ञानकुशीलः, निश्शङ्कितत्वादिकमष्टधा दर्शनाचारं विराधयन् दर्शनकुशीलः, ज्योतिष्कविद्यामन्त्रयोगचूर्णनिमित्तादिकं प्रयुञ्जानो जातिकुलशिल्पकर्मतपोगणसूत्राणि चाहारादिगृद्ध्या आजीवन् विभूषादिकं च चरणमालिन्यजनकं कुर्वाणश्चरणकुशीलः । मूलोत्तरगुणविपर्ययैर्बहुभिर्गुणैर्दोषैश्च संसज्यते–मिश्रीभवतीति संसक्तः, यथा–गौ भुक्तमुच्छिष्टमनुच्छिष्टं च भक्तखलकर्पासादिकं सर्वं स्पृशति, एवं यो गुणान् दोषांश्चेत्यर्थः, अयं च द्विधा–सङ्क्लिष्टोऽसङ्क्लिष्टश्च; तत्र पञ्चाश्रवप्रवृत्तो गौरवत्रयप्रतिबद्धः स्त्रीप्रतिषेवी गृहकार्यचिन्तकश्च सङ्क्लिष्टः, यस्तु बहुरूपः सम्पद्यते–संविग्नेषु मिलितः संविग्नतां भजते पार्श्वस्थादिषु च सम्प्राप्तो,

सोऽसंक्लिष्टः । * छन्दो-ऽभिप्रायः, स चार्थाद्यथाछन्दस्यैव, ततो जिनवचनबहिर्भूतं स्वाभिप्रायस्यैवानुरूपं प्ररूपयति करोति वा इति यथाछन्दः, उत्सूत्रमाचरन् प्ररूपयंश्च परतप्तिप्रवृत्तः स्वल्पेऽप्यपराधे पुनः पुनर्झपनशीलो मिथ्यालम्बनस्य किञ्चिद्दुद्धयादि-विकल्पसुखाभिलाषी विकृतिप्रतिबद्धो गौरवत्रयगर्वितश्च यथाछन्द इत्यर्थः । एतेऽनन्तरोक्ताः षडपि सुखशीलजनस्वरूपाः, एतैश्च षड्भिरपि यज्जिनाज्ञामतिक्रम्य समाचीर्णं तच्च स्वयमाचरन्नापि शंसे-च्छोभनमिदमिति न प्रशंसेदित्यर्थः । एतेषां च पार्श्वस्थादीनाम-पुष्टालम्बनेनाग्रपिण्डभोजित्वादिनोत्तरगुणविराधकानां पञ्चाश्रवप्रवृत्त्यादिना मूलगुणविराधकानां च कृतिकर्मादिकमपि निषिद्धं, विशु-द्धालम्बनाः पुनरात्यन्तिके कारणे कटकसम्मर्दमपि कुर्वन्तोऽल्पेन बह्विच्छन्तः संयमश्रेण्यामेव वर्तन्त इति वन्दनीया, अपरं चेह भ्रष्टसंयमगुणोऽप्यायोपायकुशलेन कार्यार्थिना वन्दनीयः, अन्यथा दोषप्रसङ्गात् । नन्वस्य वन्दनेऽपि संयमव्ययाद्दोषाः प्रसजन्ति ?, सत्यं, किन्तु संयमव्ययात्सदायो यथा गरीयान् भवति तथा यतितव्यमेव, तथा च भाष्यं—

"कुणइ वयं धणहेउं, धणस्स धणिणो य आगमं नाउं । इय संजमस्स वि वओ, तस्सेवऽट्ठा न दोसाय ॥१॥"

"गच्छस्स रक्खणऽट्ठा, अणागयं आउवायकुसलेणं । एवं गणाहिवइणो, सुहसीलगवेसणं कुज्जा ॥ २ ॥"

तथा—"वायाए नमोक्कारो" इत्यादि, किम्बहुना ?—

"वायाए कम्मुणा वा, तह चिट्ठइ जह न होइ से मन्नुं । पस्सइ जओ अभावं, तं भावं दूरओ वज्जे ॥१॥"

इति गुणवर्जितविषयं च नमस्कारादिकृत्यमुक्तं, यत्र गुणः स्वल्पोऽस्ति तत्र किं कर्तव्यम् ?, अत्रापि भाष्यं—

---

* "ऋतुबद्धकाले मासकल्पं वर्षासु पुनः कार्त्तिकचातुर्मासिकमतिक्रम्य पुष्टालम्बनमन्तरेणापि सुखप्रतिबद्धतया एकत्रापि क्षेत्रे [यः] तिष्ठति स नित्यवासी" इति बृहद्वृत्तौ

"दंसणनाणचरित्तं, तवविणयं जत्थ जत्तियं जाणे। जिणपन्नत्तं भत्तीए, पूयए तं तहिं भावं ॥ १ ॥" इति [जीत० भा० १३३२], किमिह बहुना ?, "पडिसेहो य अणुण्णा" इत्यादिना सूत्रेणात्रैव प्रवचनसारमेव वक्ष्यते, तद्विस्तरार्थिना तु निशीथ [उ० ५] कल्पौ [उ० ३] अन्वेषणीयौ, अतो गम्भीरं जिनवचनं पौर्वापर्येण परिभावनीयं, न तु कचिद्वचनमात्राकर्णनेनापि सम्मोहः कार्य इति गाथार्थः ॥२०७॥ अन्यदपि यत्साधूनां निषिद्धं तदाह—

**पेज्जं भयं पओसो, पेसुन्नं मच्छरं रई हासो। अरई कलहो सोगो, जिणेहिं साहूण पडिकुट्ठो ॥२०८॥**

व्याख्या—प्रेमः—स्वजनादिषु स्नेहः, भयं परीषहोपसर्गेभ्यः शङ्का, प्रद्वेषो—जीवाजीवादिषु क्रोधः, पैशून्यं—दुर्जनता, मत्सरः प्रतीतः, रतिः—सुष्ठु शब्दादिषु समाधिः, हासः—क्रीडा, अरतिः—कष्टरोगादावसमाधिः, कलहः, शोकः, जिनैः, साधूनां प्रतिकुष्टो—निषिद्ध इति गाथार्थः ॥२०८॥ तथा—

**वंदिज्जंतो हरिसं, निंदिज्जंतो करेज्ज न विसायं। न हि नमियानिंदियाणं, सुगइं कुगइं च बिंति जिणा ॥२०९॥**

व्याख्या—साधुर्धनाढ्यादिभिर्वन्द्यमानो हर्षं, गोपालादिभिश्च निन्द्यमानो न विषादं कुर्यात्। कुतः? इत्याह—न हि यस्माल्लोकैर्नतानां साधूनां सुगतिं निन्दितानां कुगतिं वा ब्रुवते जिनाः, किन्त्वात्मगतगुणदोषैरेव तत्प्राप्तिरिति गाथार्थः ॥२०९॥

आत्मन एव सुगतिदुर्गतिसाधकत्वं दर्शयति—

**अप्पा सुगइं साहइ, सुपउत्तो दुग्गइं दुपउत्तो। तुट्ठो रुट्ठो य परो, न साहओ सुगइकुगईणं ॥ २१० ॥**

व्याख्या—आत्मैव सुप्रयुक्तः—शोभनज्ञानादिमार्गव्यापृतः सुगतिं साधयति, स एवात्मा दुष्प्रयुक्तः—प्राणिवधाद्युन्मार्ग-

प्रस्थितश्च दुर्गतिं साधयति, न च तुष्टः परः सुगतेः साधकः रुष्टो वा कुगतेः साधक इति गाथार्थः ॥२१०॥

अथ श्रीमहावीरचरितं चिन्तयता परीषहोपसर्गाः सोढव्या इत्याह—

लहुकम्मो चरमतणू, अणंतवीरिओ सुरिंदपणओ वि। सव्वोवायविहिन्नू, तियलोयगुरू महावीरो ॥२११॥
गोपालमाइएहिं, अहमेहिं उईरिए महाघोरे। जो सहइ तहा सम्मं, उवसग्गपरीसहे सव्वे ॥२१२॥
अम्हारिसा कहं पुण, न सहंति विसोहियव्वघणकम्मा। इय भावंतो सम्मं, उवसग्गपरीसहे सहउ ।२१३।

व्याख्या—यदि लघुकर्मा चरमतनुश्च अनन्तवीर्यः उपसर्गकर्तृन्निगृहीतुमपि शक्तः सुरेन्द्रप्रणतः सर्वोपायविधिज्ञश्च त्रैलोक्यगुरुरपि श्रीमहावीरोऽधमैर्गोपालादिभिरुदीरितान् महाघोरान् सर्वानप्युपसर्गान्—सुरनरतिर्यगुजनितोपद्रवान्, परीषहान्—क्षुत्पिपासादीन्, तथा—तेनावश्यकोक्तप्रकारेण सम्यक्सहते, तर्हि अस्मादृशाः कथं पुनस्तान्न सहन्ते ?, कथम्भूताः सन्तः ? इत्याह—विशोधयितव्यं—क्षपणीयं घनं—प्रचुरं कर्म येषां ते तथा, गुरुकर्माण इत्यर्थः। अनेन पूर्वोक्तलघुकर्मताया वैपरीत्यमुक्तं, अस्य चोपलक्षणत्वाच्चरमतनुत्वादीनामपि विपर्यय आत्मनि भावनीयः, इत्येवं परिभावयन्नुपसर्गपरीषहान् सहस्वेति गाथात्रयार्थः ॥२११–१२–१३॥

ननु परीषहोपसर्गतर्जितस्य साधोर्यदि चरणेऽरतिर्जायते, गृहवासप्रतिपत्त्या विषयसुखवाञ्छोत्पद्यते तर्हि स किं कुर्यात् ? इत्याह—

एवं पि कम्मवसओ, अरई चरणम्मि होज्ज जइ कहवि। तो भावणाए सम्मं, इमाए सिग्घं नियत्तेज्जा ॥ २१४॥

व्याख्या—एवमपि भावनां भावयतः साधोः कर्मवशाद्यदि कथमपि चरणेऽरतिर्भवेत् तत—स्तदाऽनयानन्तरं वक्ष्यमाणया भावनया शीघ्रं निवर्तयेत् तामेवारतिमिति गाथार्थः ॥ २१४ ॥ तत्र तावद्गृहवासप्रतिपत्तिनिवृत्त्यर्थं भावनामाह—

सयलदुहाणावासो, गिहवासो तत्थ जीव ! मा रमसु । जं दूसमाए गिहिणो, उयरंपि दुहेण पूरंति ॥२१५॥

व्याख्या—सकलदुःखानामावासो यो गृहवासस्तत्र—गृहवासे रे जीव ! मा रमस्व । यस्मादस्मिन् दुष्षमाकाले गृहि[ण उदरमपि ]णोऽप्युदरं (!) दुःखेन पूरयन्ति, दुष्षमासुषमादिषु प्रायो निर्वाहः सुखेनैवासीदिदानीन्तु सोऽपि महाकष्टेनेति भाव इति गाथार्थः ॥ २१५ ॥ किञ्च—

जललवतरलं जीयं, अथिरा लच्छी वि भंगुरो देहो । तुच्छा य कामभोगा, निबंधणं दुक्खलक्खाणं ॥२१६॥

व्याख्या—जीवितं जललवतरलं कुशाग्रवर्त्तिजलचपलं, लक्ष्मीरप्यस्थिरा, भङ्गुरो—विनाशी देहः, एतत्त्रियमूलाः कामभोगाः शब्दरूपरसस्पर्शविषयरूपाश्चासारा—स्तुच्छाः, निबन्धनं चैहिकपारत्रिकदुःखलक्षाणां, अतः कस्यार्थे व्रतत्यागः ? इति गाथार्थः ॥२१६॥

को चक्कवट्टिरिद्धिं, चइउं दासत्तणं समभिलसइ ? । को वररयणाइं मोत्तुं, परिगिण्हइ ? उवलखंडाइं ॥२१७॥

व्याख्या—कश्चक्रवर्त्तिसमृद्धिं त्यक्त्वा दासत्वं समभिलषति ?, को वा रत्नानि मुक्त्वा परिगृह्णात्युपलखण्डानि ?, चक्रि-ऋद्धि—रत्नसमं व्रतं त्यक्त्वा को नाम दासत्वोपलखण्डकल्पं गार्हस्थ्यं प्रतिपद्यते ?, न कोऽपीति भाव इति गाथार्थः ॥१७॥ किञ्च—

नेरइयाण वि दुक्खं, झिज्झइ कालेण किं पुण नराणं ? । ता न चिरं तुह होहि, दुक्खमिणं मा समुव्विवसु ॥२१८॥

व्याख्या—पल्योपमसागरोपमायुषां निरन्तरदुःखानां नारकाणामपि तद्दुःखं गच्छता कालेन स्वायुःपर्यन्ते क्षीयते—त्रुट्यति, किं पुनः प्रतिक्षणं परिवर्त्तमानदुःखानां स्वल्पायुषां नराणां तच्च त्रुटिष्यति ? त्रुटिष्यत्येवेत्यर्थः । तस्मान्न तव दुःखमिदं चिरं—बहुकालं भविष्यति, मा समुद्विजस्व—मा व्रतत्यागलक्षणं वैक्लव्यं भजस्वेति गाथार्थः ॥ २१८ ॥ भावनोपसंहारार्थमाह—

**इय भावंतो सम्मं, खंतो दंतो जिइंदिओ होउं। हत्थिव्व अंकुसेणं, मग्गम्मि ठवेसु नियचित्तं ॥२२०॥**

व्याख्या—इत्येवं सम्यग्भावयन् 'क्षान्तः' कृतोपशमः 'दान्तो'ऽहङ्कृतिरहितो जितेन्द्रियश्च भूत्वा, विभक्तिव्यत्याद्धस्ति नमिवाङ्कुशेन 'मार्गे' व्रतपरिपालनशुभाध्यवसायलक्षणे स्थापय निजचित्तमिति गाथार्थः ॥ २१९ ॥

ननु वेषमात्रं चेन्न मुच्यते तर्हि किं मनसः शुभाशुभाध्यवसायचिन्तया ? इत्याह—

**जम्हा न कज्जसिद्धी, जीवाण मणम्मि अट्ठिए ठाणे । एत्थं पुण आहरणं, पसन्नचंदाइणो भणिया ।२२१।**

व्याख्या—यस्माच्च मोक्षप्राप्त्यादिका कार्यसिद्धिर्जीवानां, जायते इति शेषः, क्व सति ? शुभपरिणामादौ स्थाने मनसि अस्थिते सति । अत्र पुनरुदाहरणं प्रसन्नचन्द्रादयः सिद्धान्ते भणिता द्रष्टव्याः, तस्मात्सत्यपि वेषे मनोनिग्रहाभावे सप्तमनरकादि-गमनयोग्यकर्मबन्धाच्च वेषमात्रे तुष्टैर्भाव्यमिति गाथार्थः ॥ २२१ ॥

अत्र प्रसन्नचन्द्रकथानकं किञ्चिदुच्यते—पोतनपुरे नगरे सोमचन्द्रनृपः, धारिणी देवी, तयोः पुत्रः प्रसन्नचन्द्रः । अन्यदा राज्ञः शिरः सम्मार्जयन्त्या धारिण्या पलितं दृष्ट्वा हस्ते दत्त्वा प्रोक्तम्—देव ! जरयाऽयं दूतः प्रेषितोऽस्ति 'मा भणिष्यसि यन्नोक्तं, अहमागता, धर्मं कुरु' इति ज्ञापनार्थं । ततो जातवैराग्यः प्रसन्नचन्द्रं राज्ये संस्थाप्य सभार्यस्तापसदीक्षां प्रपेदे । तस्याः स्तोकदिनो गर्भ आसीत्, तत्समये पुत्रो जातः । सा च मृत्वा ज्योतिष्कामरेषूत्पन्ना, वनमहिषीरूपेण कुमारमुखे दुग्धं स्नेहेन क्षिपन्ती वृद्धिं तं नीतवान् । वल्कलावृतत्वाद्वल्कलचीरीति नामा जातः । अथ स कतिपयवर्षान्ते प्रसन्नचन्द्रेण पितुः प्रच्छन्नमेव स्वपार्श्वे आनाय्य युवराजत्वे स्थापितः, पश्चात्पितुर्ज्ञापितं, तथापि स्नेहेन रुदतस्तस्य नयनयोर्नीली जाता । अन्यदा वल्कलचीरी पितरं स्मरत्सबन्धुराथ-

मपदं प्राप्तः, ताभ्यां कृतप्रणामस्य पितुर्हर्षाश्रुनयनयोर्नील्यपगता। ततः प्रसन्नचन्द्रं कुशलं पृच्छति पितरि वल्कलचीरी कौतुकात्स्व-स्थापितानि वल्कलान्युन्मुद्र्य प्रमार्जयन् पूर्वमप्येवं क्वचिन्मया पात्रप्रमार्जना कृतेति चिन्तयन् सञ्जातजातिस्मृतिः कृतपूर्वां जिनदीक्षां वैमानिकामरत्वं चानुभूतवान्। ततः संवेगमुपगतस्य भावतः परिणता दीक्षा, कृता क्षपकश्रेणिः, केवलज्ञानं चोत्पन्नं। अथ तद्देशनया वैराग्यं प्राप्तः प्रसन्नचन्द्रो गृहं गतः। वल्कलचीर्यपि पितरं श्रीवीरजिनान्तिकं नीत्वा दीक्षां ग्राहयित्वा सिद्धः। अन्यदा पोतनपुरे श्रीवीरे प्राप्ते देशनां श्रुत्वा संवेगमागतः प्रसन्नचन्द्रः पुत्रं बालमपि राज्ये संस्थाप्य प्रव्रज्य उग्रं तपः कुर्वन् गीतार्थः श्रीवीरजिनेन समं राजगृहं प्राप्तः। तत्र च—

"एगचलणप्पइट्ठो, सूराभिमुहो समूसियभुयग्गो। चिट्ठइ काउस्सग्गे, आसन्नं समवसरणस्स ॥ १ ॥"

अथ भगवद्वन्दनार्थमागच्छतः श्रेणिकनृपतेः सेनामुखस्थेन सुमुखाभिधेनोक्तं—धन्योऽयं मुनिर्यस्येदृशं ध्यानं, अनेन मोक्षः स्वर्गो वा करस्थः कृतः। ततोऽन्येन दुर्मुखनाम्ना प्रोक्तं—'मैवं वादीः, यतः प्रसन्नचन्द्रोऽयं, येन बालोऽपि पुत्रः परित्यक्तः, इदानीं चैतत्सुतोऽनाथो नगररोधं विधाय दधिवाहनप्रभृतिभिर्भूपैर्मन्त्रिभिश्च राज्यभ्रष्टः क्रियते, तदसावप्रेक्षणीयः। इति श्रुत्वा राजर्षिः क्रोधपरवशः प्रत्यक्षानिव रिपुप्रभृतीन् वीक्ष्यमाणो 're कृतघ्नशेखरा मन्त्रिणो! यूयं तथा सम्मानिता लालिता अपीदानीमिति विपरीतास्तर्हि युष्मान् शिक्षयामि, रे नृपाधमा! इदानीं भवन्तोऽपि सज्जीभवन्त्विति भणित्वा योद्धुं लग्नः। ततः सुभटकरटितुरग-सम्मर्दं निजमनसि कुर्वतस्तस्य बाह्यतः सद्ध्यानसन्निवेशं दृष्ट्वा हृष्टः श्रेणिको भक्त्या चरणयोर्निपतितस्तद्गुणनिकरं स्तौति। रौद्रध्यानगतेन च तेनासौ न ज्ञातः, ततोऽधिकतरं तुष्टेन राज्ञा भगवत्समीपं गत्वा पृष्टं—भगवन्! मया यदा प्रणतः प्रसन्नचन्द्रस्तदैव

यदि कालं करोति तदा क गच्छति ? इति। भगवानाह–सप्तमपृथिव्यां। ततश्चिन्तयति राजा–क तद्ध्यानं क [च] तत्कारकत्व ?, किं मया सम्यग्न श्रुतमेतदिति विलम्ब्य पुनः पप्रच्छ–भगवन्निदानीं कालगतः प्रसन्नचन्द्रः क व्रजति ?, भगवान् भणति–सर्वार्थसिद्धौ। ततो विस्मितेन राज्ञाऽभाणि–नाथ ! कथं पूर्वं नरकगमनमिदानीं यूयमेव सुरत्वमादिशथ ?। स्वाम्याह–दुर्मुखवचनाच्चित्ते प्रवृत्ते रौद्रध्यानेऽरिभिर्युद्धयमानस्य तवेहागमने पुनर्मनोविकल्पादेव सकले प्रहरणवर्गे परिनिष्ठिते स चिन्तयत्येवं–निजशिरस्त्राणेनैनं रिपुं हन्मि। ततस्तेन स्पृष्टं हस्तेन शिरो विलुप्तकेशं ज्ञात्वाऽऽत्मानं निन्दन् लब्धविवेकः शुद्धध्यानात् क्षपकश्रेणिशिरस्समारूढो जातः पुनरपि सर्वार्थसिद्धियोग्यः, इति यावद्वदति स्वामी तावत्प्रसन्नचन्द्रस्योत्पन्नं केवलज्ञानं, सुराश्चक्रुर्महिमां, तत्प्रकर्षं श्रुत्वा भणति भूपः किमेतत् ?, शुद्धि प्रकर्षात्प्रसन्नचन्द्रर्षेः केवलज्ञानमुक्तं स्वामिना। ततः श्रेणिकश्चिन्तयति, सत्यमिदं वचः–

"वावाराणं गरुओ, मणवावारो जिणेहिं पन्नत्तो। जो नेइ सत्तमीए, अहवा मोक्खम्मि सो चेव ॥ १ ॥"

इति प्रसन्नचन्द्रकथा समाप्ता ॥

एवमन्येऽपि दृष्टान्ता द्रष्टव्या, अथ मनस्समाधौ यत्नो विधेय इत्येतदेवाह—

अहरगइपट्ठियाणं, किलिट्ठचित्ताण नियडिबहुलाणं। सिरतुंडमुंडणेणं, न वेसमेत्तेण साहारो ॥ २२१ ॥

व्याख्या—अधरगति–नरकं प्रति प्रस्थितानां क्लिष्टचित्तानां निकृति–र्माया बहुला येषां ते तथा, तेषां शिरस्तुण्डमुण्डनेन वेषमात्रेण रजोहरणादिना न साधार–स्त्राणं। वेषमात्रं धारयतां जनानां मिथ्यात्वोत्पादहेतुत्वेन प्रत्युताधोगतिपात एव स्यात् त्राणमिति भाव इति गाथार्थः ॥ २२१ ॥ किञ्च—

वेलंबगाइएसु वि, दीसइ लिंगं न कज्जसंसिद्धी । पत्ताइं च भवोहे, अणंतसो दव्वलिंगाइं ॥ २२ ॥

व्याख्या—विडम्बका–वेषविदूषकास्तेष्वपि यतिवेषग्रहणावस्थायां दृश्यते लिङ्गं रजोहरणादिकं, न च तेन तेषां काचिन्मोक्षप्राप्यादिका कार्यसिद्धिः, विडम्बकत्वादेव भावशून्यत्वात् । आदिशब्दात्स्वयम्भूरमणगतसाध्वाकारमत्स्यादिपरिग्रहः, तस्मादप्रमाणं वेषः । किञ्च यदि लिङ्गमात्रमपि साधकं स्यात् ? तर्हि तावन्तं कालं संसारेऽवस्थितिरेव न स्यात्, यतोऽनादिभवप्रवाहे भ्रमद्भिः प्रत्येकं सर्वैरपि जीवैः कचिदाजीविकाहेतोः कचिदुपरोधेन कचित्कीर्त्यादिकाङ्क्षया प्राप्तान्यनन्तशो वेषमात्ररूपाणि द्रव्यलिङ्गानि, द्रव्यतो भावतो वा गृहीतयतिलिङ्गस्यैव हि ग्रैवेयकेषूत्पत्तेरुक्तत्वात्, भणितश्च प्रज्ञप्त्यां सर्वजीवानां ग्रैवेयकेषूत्पादः, तथाहि—"सव्वजीवा वि णं भंते ! उवरिमगेविज्जेसु देवत्ताए देवित्ताए आसणसयणवणखंडभंडमत्तोवगरणत्ताए उववन्नपुव्वा ?, हंता गोयमा ! असइं अदुवा अणंतखुत्तो, नो चेव णं देवित्ताए" इति । अतः प्राप्तान्यनन्तशो द्रव्यलिङ्गानि । प्राप्तैरपि च तैर्न मोक्षलक्षणा काचित्कार्यसिद्धिस्तस्मान्मनःशुभपरिणामलक्षणे भावे एव यत्नो विधेय इति गाथार्थः ॥ २२२ ॥ एतदेवाह—

तम्हा परिणामो च्चिय, साहइ कज्जं विणिच्छओ एसो । ववहारनयमएणं, लिंगग्गहणं पि निद्दिट्ठं ॥२२३॥

व्याख्या—तस्मान्मनसः शुभपरिणाम एव कार्यं मोक्षरूपं साधयति, एष विनिश्चयो–निश्चयः । यद्येवं तर्हि लिङ्गग्रहणमपार्थकमेव ? इत्याह–व्यवहारनयमतेन लिङ्गग्रहणमपि जिनैर्निर्दिष्टमिति गाथार्थः ॥ २२३ ॥

ननु निश्चये एव यत्नो विधेयः, किं व्यवहारेण ? इत्याह—

जइ जिणमयं पवज्जह, ता मा ववहारनिच्छए मुयह । ववहारनउच्छेए, तित्थुच्छेओ जओ भणिओ ॥२२४॥

व्याख्या—यदि जिनमतं प्रपद्यध्वं, तदा मा व्यवहारनिश्चयौ मुञ्चथ, यतो व्यवहारनयोच्छेदे तदभिमतानि लिङ्गग्रहण-जिनार्चाचैत्यनिर्वर्तनवन्दनपूजनादीनि सर्वाण्यकर्तव्यानि स्युः, ततस्तीर्थोच्छेदः प्रतीत एवेति गाथार्थः ॥ २२४ ॥

स्यादेतत्, तथापि निश्चय एव बलवान्, नेतर इत्याशङ्क्याह—

**ववहारो वि हु बलवं, जं वंदइ केवली वि छउमत्थं। आहाकम्मं भुंजइ, सुयववहारं पमाणंतो ॥ २२५ ॥**

व्याख्या—न केवलं निश्चयोऽपितु व्यवहारोऽपि स्वविषये बलवानेव, यद्यस्मात्कारणादुत्पन्नकेवलज्ञानोऽपि शिष्यो व्यवहारं प्रमाणयन् छद्मस्थं गुरुं वन्दते, आसनदानाद्युपचारादिकं च विनयं पूर्ववदेव करोति यावदद्यापि न ज्ञायते, ज्ञाते पुनर्गुरुरपि निवारयत्येव। तथा च मुग्धेन केनचिद् गृहिणा कृतमाधाकर्म, तच्च श्रुतोपयुक्तेनाशठेन छद्मस्थसाधुना [शुद्धं] विज्ञाय तं गृहीत्वा केवलिनिमित्तमानीतं, यथास्थितं च तज्जानतः केवलिनो निश्चयनयमतेनाभोक्तव्यमपि श्रुतरूपं व्यवहारनयं प्रमाणीकुर्वन्नसौ तद्भुङ्क्त एव, अन्यथा श्रुतमप्रमाणं कृतं स्यात्तच्च न कर्तव्यं; प्रायः सर्वव्यवहारस्य श्रुतेनैव प्रवर्तमानत्वात्। ततो व्यवहारो बलवा-नेव, केवलिनाऽपि समर्थितत्वात्। ततः स्थितमिदं—निश्चयव्यवहारशुद्धे संयम एव मनो निश्चलं विधेयं, नतु कुतश्चिद् गृहवासाभि-लाषः कार्य इति गाथार्थः ॥ २२५ ॥ अथ तीर्थकरोद्देशेनापि यतिवेषेण संयमशिथिलीकरणे दोषमाह—

**तित्थयरुद्देसेण वि, सिढिलिज्ज न संजमं सुगइमूलं। तित्थयरेण वि जम्हा, समयम्मि इमं विणिद्दिट्ठं ॥२२६॥**

व्याख्या—तीर्थकरोद्देशेनापि पूजाद्यारम्भप्रवृत्त्या सुगतेः परमं निबन्धनं संयमं साधुर्न शिथिलीकुर्यात्। यस्मात्कारणात्त्वं यदर्थं पुष्पसङ्घट्टाद्यारम्भं चिकीर्षसि, तेनापि तीर्थकरेण सिद्धान्ते इदं वक्ष्यमाणं निर्दिष्टमिति गाथार्थः ॥ २२६ ॥ तदेवाह—

चेइयकुलगणसंघे, आयरियाणं च पवयणसुए य। सव्वेसु वि तेण कयं, तवसंजमउज्जमंतेण ॥ २२७ ॥

व्याख्या—चैत्ये जिनप्रतिमायतनरूपे, कुले विद्याधरादौ, गणे तत्समुदायरूपे, सङ्घे साध्वादौ, आचार्याणां च प्रतीतानां, प्रवचने सूत्रार्थरूपे द्वादशाङ्गे, श्रुते च केवलसूत्ररूपे, एतेषु सर्वेष्वपि यत्किमपि चैत्यनिर्वर्त्तनपूजनादिकं कृत्यं तत्तेन साधुना कृतमेव ज्ञेयं। किं कुर्वता? इत्याह–तपस्संयमयोर्विषये उद्यमं कुर्वता, चैत्यनिर्वर्त्तनादिकैर्हि कुशलानुबन्धक्रमेण संयमः प्राप्यते, ततो मोक्षः। येन च सोऽपि मुक्तिनिबन्धनः संयमः प्राप्तस्तेन चैत्यनिर्वर्त्तनादिकं कृतमेव, तत्फलत्वात्संयमस्येति भावः। किञ्च संयमवाननुपादेय-वाक्यो देशनादिद्वारेण शोभनचैत्यनिर्वर्त्तनादि करोत्यतः संयम एव यत्नो विधेयो, नान्यत्रेति गाथार्थः ॥ २२७ ॥

अथ चैत्यविधापनात्संयमपालनस्य बहुगुणत्वमाह—

सव्वरयणमएहिं, विभूसियं जिणहरेहिं महिवलयं। जो कारिज्ज समग्गं, तओ वि चरणं महिड्ढियं ॥२२८॥

व्याख्या—यः सकलमपि महीतलं सर्वरत्नमयैर्जिनगृहैर्विभूषितं कारयेत्, तस्मादपि, आस्तामेकचैत्यमात्रकृत्यात्, चरणं महर्द्धिकं, संयमपालनं बहुगुणमित्यर्थः, यतः सर्वोत्कृष्टगुणादपि श्रावकादनन्तगुणविशुद्धश्चारित्री भण्यते, अत एव कारितानेकचैत्या-द्योऽपि चक्रिशक्रादयस्तद्दिनदीक्षितद्रमकमपि चारित्रिणं प्रणमन्तीति गाथार्थः ॥ २२८ ॥

आगमोक्तेनैव प्रकारेण द्रव्यस्तवाद्भावस्तवो गरीयानित्याह—

दव्वत्थओ य भाव–त्थओ य बहुगुणोत्ति बुद्धि सिया। अनिउणवयणमिणं, छज्जीवहियं जिणा बिंति ॥२२९॥
छज्जीवकायसंजमो, दव्वत्थए सो विरुज्झए कसिणो। ता कसिणसंजमविऊ, पुप्फाईणं न इच्छंति ॥२३०॥

व्याख्या—द्रव्यशब्दोऽत्र गुणवचनः कारणपर्यायो वा, ततश्च द्रव्यरूपो गौणोऽप्रधानो भावस्तवकारणभूतो वा स्तव-श्चैत्यविधापनपूजाकरणादिना गुणवदभ्यर्चनं द्रव्यस्तवः। भावतः—परमार्थतः स्तवः—सद्गुणोत्कीर्त्तनान्तरङ्गप्रीत्याऽऽज्ञापालनादिना पूज्यपूजनं भावस्तवः। च शब्दौ द्रव्यभावस्तवयोः स्वस्वाधिकारिविधेयत्वे नैयत्यख्यापनपरौ। अनयोश्चान्योन्यापेक्षया द्रव्यस्तवो बहुगुणः, स्वपरयोः शुभाध्यवसायस्यैव हेतुत्वात्तीर्थोन्नतिनिमित्तत्वाच्चेति कस्यचिद्बुद्धिः स्यात्तदयुक्तं, यतोऽनिपुणमतिवचनमिदं द्रव्यस्तवबहुगुणत्वरूपं। कुतः? इत्याह—यतः षण्णां जीवानां पृथिव्यादीनां यत्किमपि हितं तदेव जिना ब्रुवते, प्रधानं मुक्तिकारण-मिति गम्यते, किं पुनस्तद्धितम्? इत्याह—षड्जीवनिकायविषयः—“पुढविदगअगणिमारुय-वणस्सइबितिचउपणिंदिअजीवे। पेहुप्पेहपमज्जण-परिठवणमणोवईकाए ॥१॥” इत्येवंलक्षणः संयमोऽप्ययमेव हितस्तर्हि द्रव्यस्तवेऽप्येष भविष्यति? इत्याह—द्रव्यस्तवे क्रियमाणे स संयमः पुष्पसङ्घट्टनाद्यारम्भतः कृत्स्नः—परिपूर्णो विरुद्ध्यते, ततः कृत्स्नसंयमप्रधाना विद्वांसः साधवः पुष्पाद्यारम्भसाध्यं द्रव्यस्तवं नेच्छन्तीति गाथाद्वयार्थः ॥ २२९-३० ॥

यद्येवं तर्हि न केनाप्यसौ द्रव्यस्तवो विधेय इत्याशङ्क्याह—

**अकसिणपवत्तगाणं, विरयाविरयाण एस खलु जुत्तो। संसारपयणुकरणे, दव्वत्थए कूवदिट्ठंतो ॥२३१॥**

व्याख्या—अकृत्स्नमसम्पूर्णं संयमं देशविरतिरूपं प्रवर्त्तयन्तीत्यकृत्स्नप्रवर्त्तकाः श्रावकास्तेषां विरताविरतानां, खलु एवार्थे, तत एव द्रव्यस्तवो युक्त एव, कुतः? इत्याह—यतोऽयं संसारप्रतनुत्वहेतुः। ननु प्रकृत्यैव य आरम्भरूपः स श्रावकाणामपि कथं युक्त इत्याशङ्क्याह—तस्मिंश्च द्रव्यस्तवे कर्त्तव्ये कूपदृष्टान्तोऽर्हद्भिरुक्तः, यथा हि तृष्णातापादिबाधितैस्तदुपशमनिमित्तं कूपख-

ननारम्भे क्रियमाणेऽधिकतरं तेषां तृष्णाश्रमादयो जायन्ते, स्वनिते च तस्मिन् विपुलं शीतलं जलमासाद्य तेषामन्येषां च तृष्णाद्युपशमः सम्पद्यते, एवं द्रव्यस्तवे यद्यप्यसंयमो भवेत्तथापि कारितान् जिनगृहादीन् दृष्ट्वा तेषामन्येषां च स कोऽपि विशुद्धपरिणामो भवेद्यो भूरिभवार्जितानि द्रव्यस्तवकृतानि च पापानि स्फेटयित्वा निर्वृतिं जनयति, तस्मान्नित्यमारम्भप्रवृत्तानां श्रावकाणां बहुलाभहेतुत्वाद्‌द्रव्यस्तवो युक्तो, न पुनस्त्यक्तारम्भाणां भावस्तवलाभवतां मुनीनां निषिद्धत्वात्, निजमतिविकल्पितं पुनस्सर्वं भवहेतुरेवेत्यलम्।

किं पुनस्तदालम्बनं ज्ञानादिशुद्धिहेतुः ? इत्याह—

**काहं अछित्तिं अदुवा अहीहं, तवोविहाणेण य उज्जमिस्सं ।**
**गच्छं च नीईए (नीई अइ?)सारइस्सं, सालंबसेवी समुवेइ मोक्खं ॥२३३॥**

व्याख्या—मां विना तीर्थोच्छेदापत्तेस्तस्याव्यवच्छित्तिं करिष्यामि, अथवा ज्ञानादिसाधकान् ग्रन्थानध्येष्ये, यदिवा तीव्रतपोविधानेन पुरस्तादुद्यमं करिष्यामि, अथवा मां विना गच्छेऽसमञ्जसापत्तेस्तं सिद्धान्तोक्तनीत्या सारयिष्यामि—सन्मार्गे प्रवर्त्तयिष्ये, एवमाद्यालम्बनेन सह वर्त्तत इति सालम्बः—पुष्टालम्बनवान्, एवम्भूतस्सन् रोगाद्यापदं प्राप्तो यः साधुर्गीतार्थोऽनन्यतदपगमोपायः किमप्यनेषणीयमौषधादिकं सेवत इति सालम्बसेवी। स च जिनाज्ञाऽनुल्लङ्घनान्मोक्षं समुपैति-गच्छति, तस्मात्तीर्थाव्यवच्छेदादिकमेव यथोक्तं ज्ञानादिशुद्धिजनकमालम्बनं, नान्यदिति गाथार्थः ॥ २३३ ॥

ननु कुतो रोगाद्यापदपगमेऽपि ज्ञानादिशुद्धिजनकमालम्बनमन्वेषणीयं ? इत्याह—

**सालंबणो पडंतो, अप्पाणं दुग्गमे वि धारेइ । इय सालंबणसेवा, धारेइ जइं असढभावं ॥ २३४ ॥**

व्याख्या—आलम्ब्यते-पतद्भिराश्रियते इत्यालम्बनं, तच्च द्रव्यभावभेदाद्द्विधा, ततश्च सहालम्बनेन वर्त्तते इति सालम्बनः, असौ पतन्नात्मानं दुर्गमेऽपि गर्त्तादौ दृढवल्ल्यादिपुष्टालम्बनेनावष्टम्भतो धारयति, इत्येवमेव सहालम्बनेन वर्त्तन्त इति सालम्बना जिनोक्ततीर्थाव्यवच्छित्त्यादिपुष्टालम्बना, न स्वमतिमात्रकल्पिता अपुष्टालम्बनेत्यर्थः, सा चासौ सेवा, निषिद्धाचरणरूपा च सालम्बनसेवा कर्तृभूता संसारगर्त्तायां पतन्तं यतिमशठभावं-मातृस्थानरहितं धारयति, एष आलम्बनान्वेषणे गुण इति गाथार्थः ॥२३४॥

यद्येवं ततः किम्? इत्याह—

**उस्सग्गेण निसिद्धं; अववायपयं निसेवए असढो। अप्पेण बहुं इच्छइ, विसुद्धमालंवणो समणो ॥२३५॥**

व्याख्या—उत्सर्गेण-सामान्यविधिरूपेण यन्निषिद्धमागमे, तदप्यपवादस्यानेषणीयपरिभोगादिरूपस्य पदे रोगप्राप्त्यादिरूपे स्थाने प्राप्तः सेवते अशठो-ऽमायावी, कुतः? इत्याह-यतोऽल्पेन संयमव्ययेन बहु संयमलाभमिच्छत्यसौ श्रमणः। कथम्भूतः सन्? इत्याह-विशुद्धं-मायारहितं आलम्बनं यस्यासौ विशुद्धालम्बनः, मकारोऽलाक्षणिक इति गाथार्थः ॥ २३५ ॥

ननु प्रतिषिद्धं कुर्वन्नप्यसौ कथं न दोषभाग्? इत्याह-

**पडिसिद्धं पि कुणंतो, आणाए दव्वखित्तकालन्नु। सुज्झइ विसुद्धभावो, कालयसूरिव्व जं भणियं॥२३६॥**

व्याख्या—कालकसूरिवद्द्रव्यादिस्वरूपज्ञो जिनाज्ञया-" साहूण चेइयाण य, पडिणीयं तह अवण्णवायं च। जिणपवयणस्स अहियं, सव्वत्थामेण वारेइ ॥ १ ॥ " तथा-"संघाइयाण कज्जे, चुण्णिज्जा चक्कवट्टिमवि" इत्यादिकया सामान्यतः प्रतिषिद्धमपि जन्तुघातादिकं कुर्वन् आज्ञापरतन्त्रप्रवृत्तेर्विशुद्धभावः शुद्ध्यत्येव-कर्म निर्जरयत्येव, अत्र च कालकाचार्यकथा-

विस्तारो निपुणैर्निशीथादवसेयः, तद्रहस्यं तु–

"भगिन्यार्यावतध्वंसि–विशाखेशं तथा तथा। उत्खनन्नपि संशुद्धः, कालकार्यैः स्फुटं ह्यदः ॥ १ ॥"

ननु कथमेवं कर्म निर्जरयतीत्येतज्ज्ञायते ? इत्याह–यद्यस्माद्भणितमागमे इति गाथार्थः ॥२३६॥ आगमोक्तमेवाह—

**जा जयमाणस्स भवे, विराहणा सुत्तविहिसमग्गस्स। सा होइ निज्जरफला, अज्झत्थविसोहिजुत्तस्स ॥२३७॥**

व्याख्या—'यतमानस्य विराधनारक्षणतत्परस्य सूत्रविधिसमग्रस्य गीतार्थस्य या काचित्पृथिव्यादिसङ्घट्टनादिका विराधना भवेत्साऽशुभकर्मनिर्जराफलैव स्यात्! यदपि 'यतमानस्य विराधनायामल्पं कर्म' तदपि प्रथमे समये बध्यते, द्वितीये निर्जरयति, तृतीये त्वकर्मा भवतीति सिद्धान्तरहस्यं। कीदृशस्य ? इत्याह–अध्यात्मविशुद्धियुक्तस्येति गाथार्थः ॥ २३७ ॥

कथं विराधनाऽपि निर्जराफला ? इत्याह—

**जे जत्तिया य हेऊ, भवस्स ते चेव तत्तिया मुक्खे। गणणाईया लोगा, दोण्ह वि पुण्णा भवे तुल्ला ॥२३८॥**

व्याख्या—रागद्वेषाज्ञानवतां जन्तूनां यथाद्यनिवृत्तानां वितथप्ररूपणादिप्रवृत्तानां ये सूक्ष्मबादरजीवसर्वद्रव्यादयो भावा यावन्मात्राश्च हेतवो–निमित्तानि संसारस्य, रागादिविरहितानां सम्यक् श्रद्धानवतामयथावितथप्ररूपणादिप्रवृत्तानां त एव सर्वजीवादयो भावास्तावन्मात्रा हेतवो मोक्षे–मोक्षस्यापीत्यर्थः, उक्तं च–"अहो ! ! ध्यानस्य माहात्म्यं, येनैकाऽपि हि कामिनी। अनुरागविरागाभ्यां, स्याद्भवाय शिवाय च ॥ १ ॥"

ननु भवत्येवं, किन्तु कियत्सङ्ख्या अमी भवशिवहेतवः ? इत्या–द्वयोरपि भवमोक्षयोः सम्बन्धिनां हेतूनां प्रत्येकं

गणनया एकद्विव्यादिरूपतयाऽतीता–अतिक्रान्ता लोका भवन्ति पूर्णाः, नैकेनाप्याकाशप्रदेशेनहनाः, परस्परं तुल्या–अन्यूनाधिकसङ्ख्याः । ननु त्रैलोक्यान्तर्वर्त्तिजीवादिपदार्थानामनन्तत्वेनानन्ता एव भवमोक्षयोर्हेतवो भवन्त्यतस्ते कथं असङ्ख्येया इत्युक्तं? सत्यं, यद्यपि जीवादयो भावा अनन्तास्तथापि तैः सर्वैरपि विसदृशान्यसङ्ख्येयान्येवाध्यवसायस्थानानि जन्यन्ते, नानन्तानि, तेभ्यः परतोऽन्याध्यवसायानां पूर्वाध्यवसायेष्वेवान्तर्भावात्, अतस्तज्जन्याध्यवसायस्थानानामसङ्ख्येयत्वेनार्थाः अप्युपचारादसंख्येयत्वेनोक्ता इत्यदोषः, अतः स्थितमेकाऽपि जीवोपमर्दादिका विराधना परिणामवैचित्र्येण कर्मबन्धहेतुस्तन्निर्जराहेतुश्च जायत इति गाथार्थः॥

अथ जीवादयोऽर्थाः येषां बन्धहेतवो येषां च मोक्षहेतवो भवन्ति, तदाह—

**इरियावहियाईया, जे चेव हवंति कम्मबंधाय । अजयाणं ते चेव उ, जयाण निव्वाणगमणाय ॥२३९॥**

व्याख्या—ईरणं ईर्या–गमनं, तदुपलक्षितः पन्था ईर्यापथो–गमनमार्गस्तत्र भवमैर्यापथिकं–गमनागमनं च, तदादिर्येषां भोजनशयनादीनां ते ऐर्यापथिकादयो भावा य एवायतानां–असंयतानां कर्मबन्धाय जायन्ते, त एव च यतानां–संयमोद्योगपराणां पुनर्निर्वाणगमनाय भवन्तीति गाथार्थः ॥ २३९ ॥

**एगंतेण निसेहो, जोगेसु न देसिओ विही वावि । दलियं पप्प निसेहो, होज्ज विही वावि जह रोगे ॥२४०॥**

व्याख्या—योगेषु–गमनागमनभोजनादिषु तीर्थकरैरेकान्तेन निषेधो विधिर्वा न दर्शितः, किन्तु दलिकं–जीवद्रव्यं 'प्राप्य' समाश्रित्य निषेधो विधिर्वा भवेत् । दृष्टान्तमाह–यथा रोगे । इदमुक्तं भवति–य कश्चिद्वैद्यो ज्वरादातुरस्य कश्चित्पवनपीडितं परिभाव्य तस्मिन् लङ्घनादिकं निषेधयति, स्निग्धोपचारादिकं त्वनुजानाति, अन्यं तु तस्मिन्नेव ज्वरेऽजीर्णपूर्णं परिभाव्य व्यत्यय-

मादिशति, एवं जिना अपि तथाविधसंहननविकलं अध्ययनादिप्रवृत्तं साधुरूपमाश्रित्य विकृष्टतपःकर्मादिकं निषेधयन्ति, स्निग्धाहारादिकं त्वनुजानन्ति, अन्यं तु दृढसंहननं विज्ञाय तस्मिन्नेव कर्मरोगे चिकित्सनीये व्यत्ययमेवादिशन्ति, एकस्यैव वा जीवद्रव्यस्य देशकालादिभेदेन कृत्यभेदमादिशन्तीति गाथार्थः ॥२४०॥ एवं च सति भुज्यमानाहारादिकोऽर्थः कस्यचिन्न बन्धादिकारणं, किन्तु स्वपरिणाम एवेत्याह—

**अणुमित्तोवि न कस्सइ, बंधो परवत्थुपच्चयो भणिओ। तह वि य जयंति जइणो, परिणामविसोहिमिच्छंता ॥२४१॥**

व्याख्या—परवस्तुप्रत्ययाद्बाह्यार्थकारणादणुमात्रोऽपि—स्वल्पोऽपि न कस्यचिद्बन्धो मोक्षो वा भणितः, किन्तु स्वपरिणामवशादेवेति भावः। यद्येवं तर्हि शुद्धमनसो बाह्यासु प्राणातिपातादिचेष्टासु यथेष्टं वर्तामहे इत्याशङ्क्याह—तथापि यतन्ते—प्रयत्नं कुर्वन्ति मुनयः, प्राणातिपातवर्जनादिष्विति शेषः, किं कुर्वन्तः? इत्याह—परिणामस्यैव विशुद्धिमिच्छन्तोऽन्यथा च तच्छुद्धेरयोगादिति गाथार्थः ॥ २४१ ॥

ननु प्राणातिपातादिकं कुर्वन्तः परिणामं शुद्धमेव करिष्यामः? इत्यत्राह—

**जो पुण हिंसाययणे-सु वट्टई तस्स णणु परिणामो। दुट्ठो न य तं लिंगं, होइ विसुद्धस्स जोगस्स ॥२४२॥**

व्याख्या—यः पुना रागादिदूषितचित्तः सन् तथा हिंसायतनेषु—हिंसास्थानेषु, उपलक्षणत्वान्मृषावादादिपदेषु चानेकशः प्रवर्तते, निरपेक्षभावो, हन्त तस्य परिणामो दुष्ट एव, न च बाह्यमात्रेणैव परिणामशुद्धता ज्ञायते, किन्तु क्रियाद्वारेण, न च वाच्यं कालकार्यस्येवास्माकमपि हिंसादिप्रवृत्तावपि शुद्धपरिणामस्य लिङ्गं भविष्यति इत्याह-न च तद्धिंसास्थानादिवर्तनं विशुद्धस्य योगस्य-मनःपरिणामरूपस्य लिङ्गं-चिह्नं भवति, यो हि सम्यग्ज्ञानवान् रागाद्यदूषितमना सर्वदा जीवरक्षादिपरिणतोऽनन्योपायसाध्ये महाकार्ये समुत्पन्ने कदाचिदेव हिंसादौ प्रवर्तते, तस्य शुद्धपरिणामचिह्नमपि तद्भवति, यस्तु रागादिदोषदुष्ट एव तेषु प्रवर्तते तस्य सङ्क्लिष्टपरिणामचिह्नमेवेति गाथार्थः ॥२४२॥

किम्बहुना ? सर्वप्रवचनतात्पर्यमेवाह—

पडिसेहो य अणुन्ना, एगंतेण न वन्निया समए । एसा जिणाण आणा, कज्जे सच्चेण होयव्वं ॥ २४३ ॥

व्याख्या—एकान्तेन समये-सिद्धान्ते प्रतिषेधोऽनुज्ञा च न वर्णिता, किन्त्वेषैव सर्वजिनानामाज्ञा—यत्कार्ये औषधादिविषये सत्येन-मायारहितेन भाव्यम् । एषणादिशुद्धे तस्मिन्नाप्यमाणे शठतयाऽनेषणीयादिदुष्टं तन्न ग्राह्यमित्यर्थः, इति गाथार्थः ॥२४३॥ तथा—

दोसा जेण निरुब्भंति, जेण खिज्जंति पुव्वकम्माइं । सो सो मुक्खोवाओ, रोगावत्थासु समणं व ॥२४४॥

व्याख्या—येनकेनापि च प्रकारेण दोषा रागादयो निरुध्यन्ते, येन च पूर्वार्जितानि कर्माणि क्षाप्यन्ते, स स मोक्षोपाय एव, यथा हि रोगावस्थायां तदेव शमनं-औषधं रोगमोक्षोपायो, येन पूर्वसञ्चिताजीर्णादयः क्षीयन्ते, वातादयस्तु निरुध्यन्ते इति गाथार्थः ॥ २४४ ॥

अपरञ्च—

बहुवित्थरमुस्स ग्गं-बहुयरमववायवित्थरं नाउं । जेण न संजमहाणी, तह जयसू निज्जरा जह य ॥ २४५ ॥

व्याख्या—बहुविस्तरं उत्सर्गं बहुतरविस्तरमपवादं च ज्ञात्वा येनोत्सर्गेणापवादेन वा सेवितेन संयमयोगानां हानिर्न भवति, यथा च कर्मनिर्जरा स्यात्तथा यतस्वेति गाथार्थः ॥ २४५ ॥ उक्तो बहुधोत्सर्गापवादविधिः, अथैतयोः स्वरूपमाह—

सामन्नेणुस्सग्गो, विसेसओ जो स होइ अववाओ । ताणं पुण ववारे, एस विही वण्णिओ सुत्ते ॥२४६॥

व्याख्या—सामान्येनैव यो विधिरुच्यते स उत्सर्गः, यथा—"गोयरग्गपविट्ठो य, न निसीएज्ज कत्थई । [ कहं च न पबंधेज्जा, चिट्ठित्ता णवसंजए ॥१॥ " ] इत्यादि [ दश० अ० ५ उ० २ गा० ८ ] विशेषतो—विशेषप्रोक्तो यो विधिः सोऽपवादः,

यथा—“ तिण्हमन्नयरागस्स, निसेज्जा जस्स कप्पई । जराए अभिभूयस्स, वाहियस्स तवस्सिणो ॥१॥” [दश० ६–६०]
तयोः पुनरुत्सर्गापवादयोर्व्यापारे एष वक्ष्यमाणो विधिर्वर्णितः सूत्रे–सिद्धान्ते इति गाथार्थः ॥२४६॥ सूत्रोक्तमेव चाह—

उस्सग्गे अववायं, आयरमाणो विराहओ होइ । अववाए पुण पत्ते, उस्सग्गनिसेवओ भइओ ॥ २४७ ॥

व्याख्या—ग्लानाद्यवस्थायामुत्सर्गे चिकित्सादिकं विनाऽपि संयमयोगनिर्वाहरूपे प्राप्ते अपवादं–चिकित्साकारणादिकमाचरन् साधुर्विराधको भवति, अपवादे–चिकित्साकारणादिके पुनः प्राप्ते उत्सर्गनिषेवकश्चिकित्सादिकमकुर्वन् भजनीयो–विकल्पनीयः, कश्चिच्छुद्धः कश्चिन्नेत्यर्थः इति गाथार्थः ॥२४७॥ एतदेव सप्रश्नोत्तरमाह—

किह होइ भइयव्वो ?, संघयणधिईजुओ समत्थो य । एरिसओ अववाए, उस्सग्गनिसेवओ सुद्धो ॥२४८॥
इयरो उ विराहेई, असमत्थो जं परीसहे सहिउं । धिइसंघयणेहिंतो, एगयरेणं व सो हीणो ॥२४९॥

व्याख्या—कथमसौ भजनीयो भवतीति शिष्यप्रश्नः, उत्तरमाह–वज्रर्षभनाराचादिदृढसंहननेन धृत्या च संयमस्थैर्यरूपया यो युक्तः, समर्थश्च–बलोपचयसम्पन्नश्च, ईदृशः साधुर्जिनकल्पिकादिरपवादप्राप्तावप्युत्सर्गं निषेवमाणः शुद्ध एव । तस्येत्थमप्यार्तध्यानाद्यसम्भवादिति हृदयम् । इतरस्तु कश्चिदसारवपुरपवादप्राप्तावुत्सर्गं सेवमानः आर्तध्यानादिसम्भवेन विराधयति, संयममिति गम्यते । कुतः ? इत्याह–यद्यस्मादसमर्थोऽसौ परीषहान् क्षुत्पिपासादीन् सोढुं । इदमपि कुतः ? इत्याह–धृतिसंहननाभ्यां द्वाभ्यामन्यतरेण वा यतोऽसौ हीनोऽस्ति इति गाथाद्वयार्थः ॥ २४८–२४९ ॥ अथोत्सर्गापवादादिज्ञानप्रधानं जिनवचनं विभाव्याह—

गंभीरं जिणवयणं, दुव्विन्नेयं अनिउणबुद्धीहिं । तो मज्झत्थेहिं इमं, विभावणीयं पयत्तेणं ॥ २५० ॥

व्याख्या—जिनवचनं तावद् गम्भीरं-महार्थं, अत एवानिपुणबुद्धिभिर्दुर्विज्ञेयम्, तस्मान्मध्यस्थै-रागद्वेषकदाग्रहाद्यदूषितचित्तैरेत-ज्जिनवचनं प्रयत्नेन विभावनीयं-विचारणीयमिति गाथार्थः ॥ २५० ॥

ननु यद्येवं तर्हि अतिगम्भीरे जिनप्रवचने कोऽपि चारित्री कोऽपि न वा इति न निश्चीयते, तदनिश्चये च सर्वव्यवहाराभावप्रसङ्ग इति कः पुनश्चारित्रविषये तावत्परमार्थः ? इत्याह—

उस्सग्गऽववायविऊ, गीयत्थो निस्सिओ य जो तस्स । अनिगूहंतो विरियं, असढो सव्वत्थ चारित्ती ॥ २५१ ॥

व्याख्या—यः स्वयमेवोत्सर्गापवादस्वरूपव्यापारादिवेत्ता, गीतार्थो-गृहीतसम्यक्परिणमितसिद्धान्तपरमार्थआचार्यादिः, यश्च स्वय-मनधीतस्तथाविधसूत्रार्थस्तस्येति गीतार्थस्य निश्रितः शिष्यादिः, सत्त्ववीर्यं सर्वथाऽनिगूहयन्, स्वशक्तितस्तपःसंयमादिषूद्यमं अमुञ्चन्नित्यर्थः, सर्वत्र च वैयावृत्त्यादिकर्त्तव्येऽशठः-ऽमायावी, कालौचित्येन यतमानश्चारित्रीति व्यवह्रियत इति गाथार्थः ॥ २५१ ॥

अथ चरणशुद्धेरेव फललक्षणं चरमद्वारमाह—

रागाइ दोसरहिओ, मयणमयट्ठाणमच्छरविमुक्को । जं लहइ सुहं साहू, चिंताविससेयणारहिओ ॥ २५२ ॥

तं चिंतासयसल्लिय-हियएहिं कसायकामनडिएहिं । कह उवमिज्जइ लोए, सुरवरपहुचक्कवट्टी हिं ॥ २५३ ॥

व्याख्या—रागादिदोषरहितो मदनेन मदस्थानैर्मत्सरेण च विमुक्तः, आदिशब्दलब्धा अपि मदनादयोऽतिदुर्जयत्वख्यापनार्थं पृथगुक्ताः, द्रविणोपार्जनरक्षणव्ययादिचिन्तैव विषवेदना, तया च रहितः साधुर्यत्सुखमत्रापि लभते तत्सुखं लोके चिन्ताशतशल्यितहृदयैः

कषायकामविडम्बितैश्च सुरवरप्रभुचक्रवर्त्तिभिः कथमुपमीयते ? कथं शक्रचक्रवर्त्तिसुखसदृशं साधुसुखं नीयते ?, न कथञ्चिदित्यर्थः । तस्मा-दनन्तगुणत्वात्तस्येति भावः । इदमुक्तं भवति—नारकास्तिर्यञ्चश्च प्रायो दुःखिता एवेति न तच्चिन्ता, देवा अपीर्ष्याविषादमदादिभिरार्त्तरौद्र-ध्यानोपगता नित्यं दुःखिता एव, मनुष्या अप्यद्य—" अन्नं नास्त्युदकं नास्ति, नास्ति तैलं घृतं धनं । इन्धनं लवणं नास्ति, कथं भावि ? कुटुम्बकम् ॥ १ ॥ अयं द्विष्टः प्रभू रुष्टः, कुमार्येषा सुता सुतः । नार्जयत्यर्थमित्यादि—महाचिन्ताविडम्बिताः ॥ २ ॥" अनेक व्याधि-बाधिताश्चेति । नित्यं चिन्तादिवर्जिता जिनवचनरताः साधव एवेहभवेऽपि सुखिन इति गाथाद्वयार्थः ॥ २५२–५३ ॥

ननु यदि शक्रादिभ्योऽप्यनन्तगुणसुखाः साधवस्तर्हि कथं परीषहादिदुःखाभावेन सुखितानेव तानावगच्छन्तः ? इत्यत्राह—

**जं लहइ वीयराओ, सुक्खं तं मुणइ सुचिय न अन्नो । नहि गत्तासूयरओ, जाणइ सुरलोइयं सुक्खं ॥२५४॥**

व्याख्या—विशेषेण 'इतः' सर्वथैवापगतो मन्दीभूतो वा रागो—मायालोभरूपो यस्य स तथा, रागापगमे च क्रोधमानात्मक-द्वेषापगमो लभ्यत एव, द्वेषक्षयं विना रागक्षयायोगात् । ततो वीतरागद्वेषो मुनिर्यत्प्रशमसुखं लभते तदनुभवसिद्धत्वात्स एव जानाति, नान्यो रागादिविषमूर्च्छितः, येन ह्यनादिभवाद्यावदद्यापि प्रशमसुखलेशोऽपि नानुभूतः स कथमिव पाकीयमनःस्वास्थ्यरूपं प्रशमसुखं कथ्यमानमपि जानाति श्रद्दधाति वा ? इति भावः । एतदेवाह—न हि स्वयमननुभूतं सुरलोकसुखं मदैवाशुचिगर्त्तानिमग्नो गर्त्ताशूकरो ग्रामकः सम्यगवैतीति गाथार्थः ॥ २५४ ॥ तदेवमैहिकं चरणफलसुखस्वरूपमभिधायैहिकं पारत्रिकं च तद्दर्शयितुमाह—

**इय सुहफलयं चरणं, जायइ एत्थेव तग्गयमणाणं । परलोयफलाइं पुण, सुरनरवरसिद्धिसोक्खाइं ॥२५५॥**

व्याख्या—" एत्थेव " त्ति इह लोके एव चरणं—चारित्रं इत्युक्तस्वरूपं सुखफलदं जायते, केषां ? इत्याह—तद्गतमनसां—चरण-

४ भावनाधिकारे अनौपम्यं वीतराग सुख-लौकिकं चरण-फलं च ।

भावितचित्तानां, न पुनस्तदुद्विग्नानां, उक्तं च—“देवलोगसमाणो य, परियाओ महेसिणं। रयाणं अरयाणं तु, महानिरयसारिसो ॥ १ ॥” त्ति [दश० चूलि० १ गा० १०], परलोकफलानि पुनरनन्तरभवे एव चारित्रिणां दिव्यदेवेन्द्रसुखानि जायन्ते, ततोऽपि च्युतानां नरवर-चक्रवर्त्यादयस्तत्सुखानि सम्पद्यन्ते, ततश्चानन्तानि सिद्धिसम्बन्धिसुखान्यपि भवन्तीति गाथार्थः ॥ २५५ ॥

तिष्ठतु तावत्परिपूर्णेन, एकदिनभाविनाऽप्यव्यक्तसामायिकचरणेन परलोके राज्यादिश्रीः प्राप्यत इत्येत्याह—

**अव्वत्तेण वि सामा-इएण लद्ध एगदिणपवन्नेणं। संपइराया रिद्धिं, पत्तो किं पुण समग्गेणं ? ॥ २५६ ॥**

व्याख्या—अव्यक्तेन तथैकदिनप्रपन्नेनापि सामायिकेन हेतुना सम्प्रतिराजः ऋद्धिं राज्यादिरूपां प्राप्तः, किं पुनः समग्रेण—पूर्णेन ? इत्यक्षरार्थः, भावार्थः कथानकेनोच्यते—

कौशाम्ब्यां दुर्भिक्षे प्रवृत्तेऽन्यदा सुहस्तिसूरिसाधूनां लोकैर्भक्तादिकं बह्वाग्रहे क्रियमाणे दीयमानं दृष्ट्वैकेन द्वारस्थेन रङ्कपुरुषेण चिन्तितं—'तुल्येऽपि जीवितव्येऽभ्यर्थनापरैः स्निग्धमधुराण्येकान्तनिरीहाणां पर्यटतामेतेषां जनो ददाति, मम पुनः पापस्य प्रतिगृहं प्रार्थयमानस्याप्यमनोज्ञं रूक्षाम्लभिक्षामात्रमपि न ददाति, केवलमाक्रोशाँल्लभे, तदेतान् सुकृतिनः किमपि प्रार्थये' इति प्रार्थिता मुनयो दीक्षां, तैरभाणि—गुरव इदं विदन्ति, ततः स पृष्ठलग्नो गुर्वन्तिकमगाद्दीक्षामयाचत, असौ शासनप्रभावको भावीति ज्ञात्वा गुरुभिर्दीक्षितः सद्भोजनेन भोजितश्च, रात्रौ गाढविसूचिकया गुरुभिर्निर्यामितः शुभध्याने वर्तमानो मृतः। इतश्च पाटलिपुत्रे पुरे चाणिक्यस्थापितचन्द्रगुप्तसुतो बिन्दुसारस्तत्सुतोऽशोकश्रीस्तस्य सुतः कुणालस्तस्य सुतो द्रमकजीवः सम्प्रतिनामाऽभवत्, स चाव्यक्तसामायिकप्रभावेण अनार्यानपि वशीकृत्य भरतार्द्धाधिपो जातः। अन्यदोज्जयिन्यां गवाक्षस्थो जीवन्तस्वामिप्रतिमावन्दनार्थमागतं श्रीसुहस्तिसूरिं नगरीराजमार्गे दृष्ट्वा जातजातिस्मृतिर्नरेश्वरः

समवसृत। गुरूणां पार्श्वे धर्मदेशनां श्रुत्वा पृष्टम्—किंफलो जिनधर्मः? इति, गुरु[भि]रूचे—स्वर्गापवर्गफलः। पुनः सामायिकस्य किं फलमिति प्रश्ने अव्यक्तसामायिकस्य राज्यं फलमित्युक्ते जातप्रत्ययो राजा पप्रच्छ—भगवन्! प्रत्यभिज्ञायते? कोऽहमिति। गुरवः श्रुतोपयोगपूर्वं ज्ञात्वा प्राहुः—काम जानीमः, राजन्! पुरा यूयं अस्मच्छिष्या अभवत कौशाम्ब्यां, ततो हृष्टो ज्ञानादिगुरुगुणविस्मितः श्रावकधर्मं प्रतिपद्य विधिवत्करोति। स च जिनप्रासादमण्डितां मेदिनीमकारयत्. श्रीजिनधर्मोन्नत्यर्थं साधुवेषैः प्रेषितश्राद्धैरनार्यदेशेषु तत्रस्थान्नृपमुख्या-न्मनुष्यान् [प्रति] जिनधर्मं कारितवान्। ततः कियत्कालं अनार्यदेशेष्वपि सुसाधुविहारोऽभवत्। पुनर्बहूनां अयोग्यकुलानां योगाद्दत्तानां च ग्रामकुलानां सम्भवः स्थितः। अथान्यदा नृपः पूर्वभवरङ्कत्वं स्मरन् चतुर्ष्वपि नगरद्वारेषु महादानशालाः कारयित्वा महादानं ददत्, मन्त्रोद्दीपितभक्तनादिमहानसिकेभ्यो मूल्येन गृहीत्वा साधुभ्यो यच्छति, प्रच्छन्नमूल्यदानं चाविदन्तः साधवस्तद्गृह्णन्ति। एवं च सति सर्वजनोऽप्येवमेव प्रवृत्तः। तच्च विदन्तोऽप्याचार्याः शिष्यानुरागान्न निवारयन्ति। अथैकदा तज्ज्ञात्वा आर्यमहागिरिगुरवः आर्यसुहस्तिन-मुपालभन्ते, स भणति-जनो राजानुवृत्त्या स्वयं ददाति, काऽत्रानेषणा? इति, ततः सूरिर्मायैषा इति कुपितः प्राह—आर्य! इतः प्रभृति त्वया सहासम्भोगोऽस्माकं। ततः सुहस्तिभिर्गुरून् क्षामयित्वा मिथ्यादुष्कृतं दत्तम्। ततोऽन्यत्र विजहुः। श्रीसम्प्रतिरपि श्रावकत्वं प्रपाल्य वैमानिको जातः, क्रमेण सिद्धिं यास्यति। अव्यक्तस्याप्येवं फलं किं पुनः प्रतिपूर्णं सामायिकमिति सम्प्रतिराजकथा समाप्ता॥

इत्युत्सर्गापवादाभ्यां, शुद्धं निगदितं जिनैः। चारित्रं प्रतिपन्नो हि, प्राप्नुयात्परमं पदम्॥ १॥

इति पुष्पमालाविवरणे भावनाद्वारे चरणशुद्धिरूपं प्रतिद्वारं समाप्तम्॥ ७॥

अथ करणजयलक्षणं प्रतिद्वारं विभणिषुः पूर्वद्वारेण सह सम्बन्धगर्भां गाथामाह—

अजिइंदिएहिं चरणं, कट्ठं व घुणेहिं कीरइ असारं। तो चरणत्थीहिं, दढं जयव्वं इंदियजयम्मि ॥२५७॥

व्याख्या—घुणैः-मध्ये सारभूतभक्षणपरैः कीटविशेषैः काष्ठमिव अजितेन्द्रियैः कष्टानुष्ठानं कुर्वद्भिरप्यनिगृहीतरसनादिलोलैः साधुभिः चरणमसारं-अन्तस्तत्त्वशून्यं क्रियते, ततः सारचरणार्थिभिरिन्द्रियजये दृढं यतितव्यमिति गाथार्थः ॥ २५७ ॥

अथ प्रस्तुतद्वारेण प्रविविक्षमाणार्थसङ्ग्रहमाह—

भेओ सामित्तं चिय, संठाण पमाण तह य विसओ य। इंदियगिद्धाण तहा, होइ विवागो य भणियव्वो॥

व्याख्या—इन्द्रियाणां भेदः-प्रकारो वाच्यः, तथा केषां जीवानां कतीन्द्रियाणि भवन्तीत्येवं रूपं स्वामित्वं च वाच्यम्, कदम्बपुष्पगोलकाद्याकारं संस्थानं, अङ्गुलासङ्ख्येयभागादिकं प्रमाणं, द्वादशयोजनादिको विषयः, इन्द्रियगृद्धजन्तूनां विपाक ऐहिकदुःखादिको भणितव्य इति गाथार्थः ॥ २५८ ॥ तत्र पञ्चविधस्वरूपं भेदमाह—

पंचेव इंदियाइं, लोयपसिद्धाइं सोयमाईणि। दव्विंदियभाविंदिय-भेयविभिन्नं पुणिक्किक्कं ॥ २५९ ॥

व्याख्या—लोकप्रसिद्धानि श्रोत्रादीनि पञ्चैवेन्द्रियाणि, तद्द्वैविध्यमाह—द्रव्येन्द्रियभावेन्द्रियभेदाभ्यां विभिन्नं पुनरेकैकं श्रोत्रादि द्विभेदमिति गाथार्थः ॥ २५९ ॥ तत्र द्रव्येन्द्रियभावेन्द्रिययोः स्वरूपमाह—

अंतो बहिं निव्वत्ती, तस्सत्तिसरूवयं च उवगरणं। दव्विंदियमियरं पुण, लद्धुवओगेहिं नायव्वं ॥२६०॥

व्याख्या—श्रवणादीन्द्रियाणां 'अन्त' र्मध्ये चक्षुर्गोचरातीता केवलिदृष्टा कदम्बपुष्पगोलकाद्याकारा देहावयवमात्ररूपा या निर्वृत्तिः साऽन्तर्निर्वृत्तिः, बहिर्निर्वृत्तिस्तु बहिरेव श्रोत्रादीनां कर्णशष्कुलिकादिका दृश्यमानाऽवगन्तव्या, तेषामेव कदम्बगोलकाकारादीनां या स्वस्वविषयग्रहणशक्तिस्तत्स्वरूपं चोपकरणं द्रष्टव्यम्, ततोऽन्तर्बहिश्च या निर्वृत्तिस्तस्या अन्तर्बहिर्निर्वृत्तेः शक्तिस्तत्स्वरूपं च यदुपकरणं, एतद्द्वितयमपि द्रव्येन्द्रियमुच्यते, "निर्वृत्त्युपकरणे द्रव्येन्द्रियम्" इति [तत्त्वा० २-१७] वचनात्। इतरद्—भावेन्द्रियं पुनर्लब्ध्युपयोगाख्यं ज्ञातव्यम्। तत्र ज्ञानावरणादिकर्मक्षयोपशमाज्जीवस्य शब्दादेर्ग्रहणशक्तिर्लब्धिः, उपयोगस्तु शब्दादीनामेव ग्रहणपरिणामः, एतत्तु द्वयमपि भावेन्द्रियमिति भावः, इति गाथार्थः ॥ २६० ॥ अथ स्वामित्वद्वारमाह—

**पुढविजलअग्गिवाया, वणस्सई एगिंदिया विणिदिट्ठा। किमिसंखजलूगालस-माइवहाई य बेइंदी ॥२६१॥**
**कुंथुपिपीलियपिसुया, जूया उद्देहिया य तेइंदी। विच्छुयभमरपयंगा, मच्छियमसगाइ चउरिंदी ॥२६२॥**
**मूसयसप्पगिलोईय--बंभणिया सरडपक्खिणो मच्छा। गोमहिस ससय सूअर--हरिणमणुस्सा य पंचिंदी ॥२६३॥**

व्याख्या—सूक्ष्मबादरादिभेदभिन्नाः पृथिव्यादयः एकं—स्पर्शनमेवेन्द्रियं येषां ते एकेन्द्रिया विनिर्दिष्टाः। कृम्यादयो द्वे—स्पर्शनरसने इन्द्रिये येषां ते द्वीन्द्रियाः। कुन्थ्वादयः त्रीणि—स्पर्शनरसनघ्राणानीन्द्रियाणि येषां ते त्रीन्द्रियाः। वृश्चिकादयश्चत्वारि—स्पर्शनरसनघ्राणचक्षूंषीन्द्रियाणि येषां ते चतुरिन्द्रियाः। मूषकाद्याः पञ्च—स्पर्शनरसनघ्राणचक्षुःश्रोत्राणीन्द्रियाणि येषां ते पञ्चेन्द्रियाः। "पिसुय" त्ति मत्कुणाः, सरडाः—कृकलासाः, "माइवह" त्ति मातृवहका ये काष्ठखण्डानि समानि सम्बध्नन्ति, शेषं व्यक्तमिति गाथात्रयार्थः ॥ २६१—६२—६३ ॥

संस्थानद्वारमाह—

कायंबपुप्फगोलय-मसूरअइमुत्तयस्स पुप्फं व । सोयं चक्खु घाणं, खुरप्पपरिसंठियं रसणं ॥ २६४ ॥
नाणागारं फासिं-दियं तु—

व्याख्या—श्रोत्रं चक्षुर्घ्राणं रसनमिति चत्वारीन्द्रियाण्यन्तर्निर्वृत्तिमाश्रित्य क्रमेण कदम्बपुष्पगोलक १ धान्यमसूर २ अतिमुक्तक काहलापुष्प ३ क्षुरप्र-प्रहरण ४ संस्थानानि मन्तव्यानि । स्पर्शनेन्द्रियं तु नानासंस्थानं, तद्व्याप्यानां सर्वजीवशरीराणामसङ्ख्येयत्वात् दाकारपरिणतं स्पर्शनमप्यसङ्ख्येयाकारमिति भाव इति सपादगाथार्थः ॥ १६४ ॥ प्रमाणद्वारमाभिस्याह—

बाहल्लओ य सव्वाइं । अंगुलअसंखभागं, एमेव पुहुत्तओ नवरं ॥ २६५ ॥
अंगुल पुहुत्तरसणं, फरिसं तु सरीरवित्थडं भणियं ।

व्याख्या—श्रोत्रादीनि सर्वाण्यप्यन्तर्निर्वृत्तिमाश्रित्य बाहल्यतः—स्थूलतया प्रत्येकमङ्गुलासङ्ख्येयभागप्रमाणान्येव, पृथुत्व माश्रित्याप्येतदेव प्रमाणं, नवरं—उत्कृष्टतो रसनेन्द्रियंकस्यचिदङ्गुलपृथक्त्वमपि पृथुलं भवति, स्पर्शनेन्द्रियं तु स्वाधारभूतशरीरविस्तारोपेत द्रष्टव्यमिति सार्द्ध[पादोन] गाथार्थः ॥ १६५ ॥ अथ विषयद्वारमाह—

बारसहिं जोयणेहिं, सोयं परिगिण्हए सद्दं ॥ २६६ ॥
रूवं गिण्हइ चक्खुं, जोयणलक्खाउ साइरेगाउं । गन्धं रसं च फासं, जोयणनवगाउ सेसाइं ॥ २६७ ॥

व्याख्या—श्रोत्रं तावन्मेघगर्जनादिशब्दरूपं स्वविषयमुत्कृष्टतो द्वादशभिर्योजनैर्व्यवहितमागतं परिगृह्णाति–शृणोति, न परतः ।

चक्षुः पुनरुत्कृष्टतो योजनलक्षात् सातिरेकाद्रूपं गृह्णाति, विष्णुकुमारादेर्हि कृतसाधिकलक्षयोजनमानवैक्रियदेहस्य स्वचरणपुरोवर्त्तिगर्त्ताद्यन्तर्वर्ति लेष्ट्वादिकं पश्यतश्चक्षुषः सातिरेकयोजनलक्षविषयता द्रष्टव्या, एतच्चाभास्वरद्रव्यापेक्षयोक्तं, भास्वरं त्वधिकमपि पश्यति, यथा—

"पणसयमसत्तीसा, चउतीससहस्सलक्खइगवीसा । पुक्खरदीवड्ढनरा, पुव्वेणऽवरेण पिच्छंति ॥ १ ॥" इति ।

शेषाणि पुनर्घ्राणरसनस्पर्शनेन्द्रियाणि यथासङ्ख्यं गन्धं रसं स्पर्शं च प्रत्येकमुत्कृष्टतो योजननवकादागतं गृह्णन्ति, न परतस्तथाविध—कश्चित्पटुघ्राणादिशक्तिर्देवादिः कर्पूरादीनामुत्कृष्टतो नवयोजनान्तरितानामपि आगतं गन्धं गृह्णाति, तिक्तकटुकादिरसं च वेत्ति, शीतादिस्पर्शमपि परिच्छिनत्तीति सार्द्धगाथार्थः ॥ ६६–६७ ॥ जघन्यतः पुनः कियद्दूरस्थितं स्वविषयमेतानि गृह्णन्तीत्याह—

**अंगुलअसंखभागा, मुणंति विसयं जहन्नओ मोत्तुं । चक्खुं तं पुण जाणइ, अंगुलसंखेज्जभागाओ ॥२६८॥**

व्याख्या—चक्षुर्मुक्त्वा शेषाणि सर्वाण्यपि इन्द्रियाणि जघन्यतोऽङ्गुलासङ्ख्येयभागे स्थितं प्रत्येकं स्वविषयं गृह्णन्ति, तर्हि चक्षुषः का वार्त्तेत्याह—तत्पुनश्चक्षुर्जानाति जघन्यतो रूपं अङ्गुलसङ्ख्येयभागे स्थितं, अतिसन्निकृष्टस्य चक्षुषा अनुपलम्भादसङ्ख्येयभागस्थितं अत्यासन्नं चक्षुर्न पश्यत्येवेति गाथार्थः ॥ २६८ ॥

नन्विन्द्रियार्थगृद्धिविपाक एव वाच्यः, तस्यैव वैराग्यजनकत्वात्, किमिन्द्रियभेदादिकथनेन ? इत्याह—

**इय नायतस्सरूवो, इंदियतुरए सएसु विसएसु । अणवरयं धावमाणे, निगिण्हइ नाणरज्जूहिं ॥ २६९ ॥**

व्याख्या—इत्युक्तप्रकारेण ज्ञातेन्द्रियभेदादिस्वरूप एव पुरुष इन्द्रियतुरगान् स्वेषु स्वेषु विषयेषु अनवरतं धावमानान् प्रवृत्तिमतो ज्ञानवल्गाभिः सुखेनैव निगृह्णाति, नाज्ञातं निगृहीतुं क्षमते, इति इन्द्रियभेदादयोऽपि कथनीया एवेति गाथार्थः ॥ २६९ ॥

कः पुनरिन्द्रियैरनिगृहीतैर्दोषः ? इत्याह—

तह सूरो तह माणी, तह विक्खाओ जयम्मि तह कुसलो। अजियंदियत्तणेणं, लंकाहिवइ गओ णिहणं ॥२७०

व्याख्या—'तथा' तेन लोकप्रसिद्धेन प्रकारेण शूरः, तथा 'मानी' अहङ्कारी, तथा जगति [विख्यातः]—प्रसिद्धस्तथा कुशलः, सोऽ लङ्काधिपती रावणः सीताहरणाभिष्वङ्गेनाजितेन्द्रियत्वेन विषयलोभीवितनाशलक्षणं निधनं गतः, किं पुनरितरः ? इति गाथार्थः ॥२७०

रावणकथानकं तु लोकेऽप्यतिप्रसिद्धमेवेति न किञ्चिदेवोच्यते, यदि वा रावणः शूर एव न भवतीत्याह—

देहट्ठिएहिं पंचहिं, खंडिज्जइ इंदिएहिं माहप्पं। जस्स स लक्खंपि वहिं, विणिज्जिणंतो कह सूरो ? ॥२७१॥

व्याख्या—देहस्थितैः पञ्चभिरिन्द्रियैर्यस्य सामर्थ्यं खण्ड्यते स बहिः पुरुषलक्षमपि विनिर्जयन् कथं शूरो ?, न कथञ्चिदि गाथार्थः ॥ २७१ ॥ कस्तर्हि शूरः ? इत्याह—

सोच्चिय सूरो सो चेव, पंडिओ तं पसंसिमो निच्चं। इंदियचोरेहिं सया, न लुंटियं जस्स चरणधणं ॥२७२॥

व्याख्या—स एव शूरः, स एव पण्डितः, तमेव नित्यं प्रशंसामो, यस्य चारणधनमिन्द्रियचौरैर्न लुण्टितमिति गाथार्थः ॥ २७२ ॥

अथोदाहरणद्वारेणोपदेशमाह—

सोएण सुभद्दाई, निहया तह चक्खुणा वणिसुयाई। घाणेण कुमाराई, रसणेण हया नरिंदाई ॥२७३॥

फासिंदिएण वसणं, पत्ता सोमालियानरेसाई। इक्किकेण वि निहया, जीवा किं पुण समग्गेहिं ? ॥२७४॥

व्याख्या—श्रोत्रेणानिगृहीतेन सुभद्रादयो निहताः, अत्रैव भवे मरणान्तिकीमापदं प्राप्ताः, तथा चक्षुषाऽनिगृहीतेन वणिक्सुतादयो निहताः, घ्राणेन पुनः (राज)कुमारादयो निहताः, रसनेनानिगृहीतेन हता नरेन्द्रादयः, स्पर्शनेन्द्रियेण [illegible]व्यसनं प्राप्ताः सुकुमालिकासक्तचित्तनरेन्द्रादयः, एवमेकैकेनापीन्द्रियेण जन्तवो निहताः किंपुनः समस्तैरिति गाथाद्वयार्थः ॥ २७३–७४ ॥

सुभद्रादीनां कथानकानि पुनः क्रमेणामूनि मन्तव्यानि, तद्यथा—

वसन्तपुरे धनसार्थवाहः समृद्ध्या धनद इव विख्यातः, तस्य सुभद्रा भार्या, अन्यदा धनो वाणिज्यार्थं देशान्तरं गतः। अन्यदा वसन्तपुरे मधुरस्वरः पुष्पशालनामा गायनः किन्नराणामपि श्रवणसुखं गानं कुर्वन् सुभद्रया कश्चित्कार्यप्रेषितदासीभिस्तद्गीतं पार्श्वे श्रुतं। ताश्चिरादागताः प्राप्ता निर्भर्त्सितास्ततः सुभद्रया भणन्ति—स्वामिनि! किं कोपं करोषि? अत्र कारणं शृणु—यद्यस्माभिर्गीतं पुष्पशालस्य श्रुतं तेनाक्षिप्ताः पशवोऽपि निश्चलास्तिष्ठन्ति, किं पुनर्मनुजाः?, ततो गच्छद्भिरपि कालो न ज्ञातः। सुभद्रा प्राह—यद्येवं तर्हि ममापि तद्गेयं श्रावयन्तु, दासीभिः प्रतिपन्नं, अन्यदैकत्र देवकुलयात्रायां प्रवृत्तायां मिलितेषु लोकेषु पुष्पशाले गीतं गायति सुभद्रा तं विलोकितुं गता, तावत्पुष्पशालो गानं कृत्वा देवकुलपृष्ठे स्थितः स तत्र दासीभिर्दर्शितः। तं च कुरूपं पिङ्गलकेशं दन्तुरं दृष्ट्वा थूत्कृत्य यादृशं रूपं तादृशमेवैतस्य गेयं भावि, आकृतिविरहे कुतो गुणाः? इति निन्दन्ती स्वगृहं पुनर्गता। तत्र सक्रोधितेन केनचित्पुष्पशालस्य सुभद्रास्वरूपमुक्तं। गायनो तत्स्वपतिदेशान्तरगमनस्वरूपं ज्ञात्वा तद्गृहासन्नं गत्वा यथा सार्थवाहश्चलितो देशान्तरं च प्राप्तः, यथा राज्ञा मानितो धनमर्जितं, यथा च वलितः क्रमेण गृहं प्राप्तः, इत्यादि सकलमेव रात्रौ तथा गातुं प्रवृत्तो यथा सा सर्वाङ्गप्रदीप्तविरहानला प्रासादोपरिस्थमप्यात्मानं भूमिस्थं मन्यमाना प्रकर्षप्राप्ते गीते आकाशे क्रमं दत्त्वा भूमौ पतिता मृता, एवं वैरनिर्यातनं कृत्वा पुष्पशालोऽन्यत्र

गतः । एवं श्रोत्रनिमित्तं सुभद्रा मृता, परलोकेऽपि दुःखमनुभविष्यति, आदिशब्दादन्येऽपि समयप्रसिद्धा ज्ञातव्याः ।

इति श्रोत्रे सुभद्राकथा समाप्ता ॥

काञ्चनपुरे श्रीनिलयश्रेष्ठी, यशोभद्रा भार्या, तयोः सुतो जातः, सर्वलक्षणलक्षितोऽपि लक्षणविद्भिश्चलचक्षुस्त्वात्स्त्रीलोलो भावीति प्रोक्तः, सोऽपि बालकालाद्यां यां नारीं पश्यति तत्र तत्र दृष्टिं बध्नाति, इति जनैर्लोलाक्ष इत्याख्यया जल्पितः, यौवने पुनः काश्चिद्रूपवतीर्युवतीर्दृष्ट्वा तदनु धावन् काश्चिदालिङ्गन् तद्व्यतिकरेण स्थानेस्थाने जनैः कुट्टितो दुःखानि विषहते । अन्यदा मगधदेशे रूपवती स्त्रीः श्रुत्वा व्यवसायादिमिषेण पणं धनमादाय गतस्तत्र हट्टं गृहीत्वा व्यवहरति । तत्र काश्चिद्रूपवतीं लोलाक्षत्वेन स्पृशन् बद्धो राजपुरुषैर्धनं सर्वं गृहीतं, राज्ञोऽग्रे नीयमानोऽन्तरा पितुर्मित्रेण द्रुमनाम्ना श्रेष्ठिनोपलक्ष्य बहुद्रव्यैर्मोचयित्वा स्वगृहे नीतः स, तत्रापि श्रेष्ठिभार्यायां धनवत्यां रूपवत्यां लुब्धः, तज्ज्ञात्वा श्रेष्ठी तद्गेहव्यापारसर्वं त्यक्त्वा प्राव्राजीत् । लोलाक्षस्तु तद्गृहवासेऽप्यन्यदा सुरसुन्दरीनाम्नीं राजपत्नीं रूपवतीं दृष्ट्वा धृतिमलभमानो रात्रौ तद्गृहं प्रति व्रजन् केनचिद्विद्यासाधकेनान्तराले धृतोऽरण्ये गृहीत्वा विद्यासाधनबलार्थं प्रतिदिनं छेदितसर्वाङ्गांशोऽत्रैव नरककल्पं दुःखमनुभवन् विद्यासाधकं प्रत्याह—भोः ! मम समाध्यर्थमेकदा राजपत्नीं दर्शय पश्चाज्जीवितं हर, इत्यादि मानसशारीरदुःखमन्तमस्तत्र दिनानि गमयति, तावदेकः काञ्चनपुरनिवासी श्रीनिलयश्रेष्ठिनो बालमित्रो भुवनोत्तमनामा सार्थवाहो वाणिज्ये आगत्य विनिवृत्तस्तस्मिन् प्रदेशे विश्राम्यन् दैवयोगाल्लोलाक्षं वीक्ष्य गतस्तत्समीपे सपरिवारः । लोलाक्षोऽपि प्रणष्टभयः स्वस्वरूपं प्रोक्तवान्, ततस्तेनौषधैः शरीरपरिकर्मणा कारयित्वा सज्जीकृत्य मुक्तः, पुनः राज्ञीदर्शनार्थं मोहितो राजगृहे गतः स्व [स्व गृहे] धनवत्या 'क्व इयन्ति दिनानि स्थितः ?' इति पृष्टे वस्त्वन्तरेणोत्तरं कृतवान् । ततः सुरसुन्दरीविरहनटितो राजभवनं गतश्चक्षुर्लोलः, राज्ञीं दृष्ट्वा तां प्रति धावन् राजपुरुषैर्बध्वा

नानाप्रकारैर्विडम्बितो राजादेशेनोल्लम्बितो बहिर्वटशाखायां, राजपुरुषैर्मृत इति ज्ञात्वा त्यक्तः, ततो दैवात्त्रुटितपाशो वनचरैर्लब्धाश्वासः पलाय्य गतो धनवतीगृहे । तया च सज्जः कृतः । अन्यदा तत्र वने केवलिनं समागतं नन्तुं नृपादयो ययुर्लोलाक्षोऽप्यगात् । तत्रापि लोलाक्षस्तद्राज्ञीं पश्यन् निस्सारितो राज्ञा । ततो गच्छन् सपत्नीं काञ्चित्समागच्छन्तीं पश्यन् चपेन हतो रौद्रध्यानात्तृतीयनरके उत्कृष्टायुर्नारको जातः अनन्तं च भवं भ्रमिष्यति, केवलिना दर्शिते ? [ चक्षुरि ]न्द्रियस्वरूपे प्राक्के वैराग्यान्नृपः प्रव्रज्य प्राप्तकेवलः सिद्धः । तदेवं लोलाक्षश्चक्षुषा हतः, एवमन्येऽपि वाच्याः समयप्रसिद्धाः, इति चक्षुषि लोलाक्षाख्यानकं समाप्तम् ॥

वसन्तपुरे नरसिंहनृपस्य ज्येष्ठसुतो राज्यार्हः सर्वगुणवान् परं घ्राणलोलः सुरभि दुरभि वा गन्धं दृष्ट्वा सर्वमेकदा जिघ्रति । पितृगुर्वादिभिर्निवारितोऽपि न तिष्ठति घ्राणलौल्यात् । अन्यदा सपत्न्या मात्रा स्वपुत्रराज्येच्छया मञ्जूषायां उज्ज्वलविषपुटिकां क्षिप्त्वा कुमारस्य नदीजले क्रीडतः उपरि पार्श्वे साऽमोचि, कुमारेण तां नदीनां तरन्तीमागच्छन्तीं दृष्ट्वा हृष्टेनोद्धृत्य विलोकयता पुटिकाऽदर्शि जघ्रे च । ततः कुमारः क्षणेन प्राणैः परित्यक्तः, अतो यदपि तदपि वस्तु नाऽऽघ्रातव्यं न च सुरभिदुरभिगन्धेषु मूर्च्छा कृत्वा वा कार्या, इति घ्राणेन्द्रिये राजसुतकथा समाप्ता ॥

मिथिलानगर्यां विमलयशानृपोऽन्यदा बहिरुद्याने केवलिनं नन्तुं गतस्तस्य धर्मकथां कथयता भगवतोक्तं—

"अक्खाण रसणी कम्माण मोहणी तह वयाण बंभवयं । गुत्तीण य मणगुत्ती, चउरो दुक्खेण चि(जि)प्पंति ॥१॥"

ततो नृपेणोक्तम्—भगवन् ! शेषेन्द्रियेभ्यो रसनं *कुतो दुर्जयम् ?, उच्यते—रसनस्य निग्रहे क्षुधाक्रान्तस्य गोपकपादीन्परति अनयन्ति,

---

* "रसनं—ध्वनिते स्वादे, रसनारास्नयोरपि ।" इति हैमानेकार्थः का. ३, श्लो. ४११ ।

विविधरसभोक्ता तु ललितगेयं रतिसुखं कर्पूरागरुचन्दनविलेपनादि च प्रार्थयते, यथा च वृक्षे सिक्ते तरुः फलति मूले शुष्के येषाङ्गान्यपि शुष्यन्ति, तथेन्द्रियतरुरपि रसने प्रीणिते बहुभिर्विकारैः फलति तस्मिन् पुनः शुष्के शुष्यति, तदिदमेव दुर्जेयं, अस्मिंश्च जिते निखिलान्यपि जितानि । अत्रोदाहरणम्——

धवलपनाम्नि पुरे जितकर्मा नृपः, तस्य द्वे भार्ये—शुभसुन्दरी अशुभसुन्दरी च । प्रथमायाः पुत्रो विबुधनामा दक्षः कृतज्ञः सरलो धीमान्, द्वितीयस्याः सुतो भक्तिविकलाख्यः पूर्वस्माद्विपरीतगुणो विशेषतो रसलोलतया लोके रसलोल इति विख्यातः । यथाकामं खाद्याखाद्यं पेयापेयं च भुङ्क्ते, सोऽन्यदा रोगैर्व्याप्तो वैद्यैर्लङ्घना (नं) र्थं प्रोक्तोऽपि न च लङ्घनं करोति, गाढं बहुभी रोगैः पीडितोऽन्यदा भ्रातुर्बन्धुना दाक्षिण्याल्लङ्घने स्थितो भ्रातरं भोज्यैर्भोजनं कुर्वाणं दृष्ट्वा चिन्तयति, यथा—दुष्टोऽयं, मां अत एव वारयति भोजनात्, यदहमेवैकाकी सर्वं स्निग्धमधुरं भुञ्जे, नूनं सपत्नीजो भ्राता वैरी स कथं हितः ? इति । ततो रे !! मां भोज्यान्निवार्य भवान् भुङ्क्ते ? इत्युक्त्वा स क्षुरिकामादाय भ्रातरं हन्तुं दधावे, विबुधो घातं वञ्चयित्वा वैराग्यात्प्राव्राजीत्, लीलया समं चूर्णितेन्द्रियसैन्यः प्राप्तकेवलः सोऽहमिहागतः । विमलयशानृपेण सकौतुकं पृष्टं—भगवन् ! भक्तिविकलतिना (?) पुरतः किं प्राप्तम् ?, भगवानाह—स च राज्ञा जातो विशेषेण रसगृद्धो बलितो बनद इव न किञ्चिद्यजन् पलं भुङ्क्ते, अन्यदा सूपकारेण पलपाके कृते तन्मार्जार्या भुक्तं, भीतेन सूपकारेण कस्यापि मृतस्य बालकस्य पलं ( लब्धं, तदेव ) ज्ञात्वा संस्कृत्य भोजितो नृपः । ततो मनुष्यपले लुब्धो बालकान् प्रतिदिनं नगरान्मुञ्चन् मन्त्रिभिर्वध्यार्ह-स्थानीं नीतः । अस्माल्लघुभ्राता राज्ये स्थापितः, अन्यो रक्षो भूत्वा मनुष्यान् भुङ्क्ते, अथैकदा भिक्षार्थिके च तस्मिन् क्रुद्धेन भिल्लेन बाणेन विद्धो मृतो गतरसतमावनौ (?) । ततोऽनन्तं संसारं भ्रमिष्यति । इत्याकर्ण्य विमलयशो नृपः प्रव्रज्य प्राप्तकेवलो विबुधकेवलिना समं सिद्धः, इति

जिह्वेन्द्रिये रसलोलनृपकथा समाप्ता ॥

वसन्तपुरे जितशत्रुर्नृपः, सुकुमालिका राज्ञी, तस्याः कोमलस्पर्शेऽत्यासक्तो नृपो देशराज्यपरिजनचिन्तां त्यक्तवान् । ततो मन्त्रिभिस्सराज्ञीको निद्राभरे बद्ध्वा महावने मुक्तः, तत्सुतो राज्ये स्थापितः । अथ तयोर्मार्गे महाऽटव्यां गच्छतो देवी परिश्रान्ता तृषिता पुरो गन्तुं न शक्नोति । राजा तां एकत्र स्थापयित्वा सर्वत्र गवेषयन् यावज्जलं न लभते तावत्क्षुरिकया स्वबाहुभ्यां शोणितं निष्कास्य पुटिकायां क्षिप्त्वा मूलिकाक्षेपेणाच्छं विधाय पाययतिस्म । ततो दृढं क्षुधिता जाता सा, अन्यस्याहारस्याभावे निजोर्वोर्मांसं छित्त्वा संरोहणमूलिकया व्रणरोधं कृत्वा दवाग्नौ भर्जयित्वा शशादिमांसच्छलेन राज्ञा सा भोजिता । एवं गङ्गातीरे कस्मिन्नगरे प्राप्तो नृपो देव्याभरणमूल्येन वाणिज्यं कुरुते । अन्यदा देवी प्राह—पूर्वमहं सखिभिर्नानागीतावैर्विनोदिता तदिदानीं कथमेकाकिनी तिष्ठामि ?, तत्कमपि मानुषं मे सखायं कुरु, ततो नृपेणायं कलावानिति विचिन्त्य पङ्गुर्गृहे स्थापितः, न पुनरिदं ज्ञातम्—यथा वनेषु वल्ल्यः प्रत्यासन्नमेव तरुमाश्रयन्ति आम्रं वा निम्बं वा, इति नार्योऽपि सगुणमगुणं वा नीचमुत्तमं वा आसन्नमेव पुरुषं भजन्ते, ततः पङ्गुस्वरादिमोहितया तेनैव समं लुब्धया अन्यदा गङ्गातीरे गतो नृपः प्रेर्य जले क्षिप्तः क्वापि पुरे तटलग्नः श्रान्तः सुप्तस्तरुतले । पुण्येन छाया तदुपरितो नापसरति । तत्र च तत्पुरनृपे अपुत्रे मृते दिव्यैरभिषिक्तो राजा जातः । सुकुमालिकाऽपि हस्तगतं द्रव्यं भुक्त्वा पङ्गुं चोल्लके क्षिप्त्वा भिक्षां मार्गयति, पङ्गुः प्रतिगृहं गीतं गायति, प्रतिपुरं च हिण्डमाना दैवाज्जितशत्रुनृपपुरे प्राप्ता, राज्ञा गवाक्षस्थेन दृष्टा, आकार्य पृष्टा, भूमिस्था प्राह—पितृदेवब्राह्मणैरेष एव दत्तो भर्त्ता, ततः शीलं पालयन्ती पतिव्रताऽहं । नृपः प्राह—" बाह्वो रुधिरमापीतं, उर्वोर्मांसं च भक्षितं । गङ्गायां वाहितो भर्त्ता,

साधु साधु पतिव्रता ॥ १ ॥" निर्विषयाऽऽक्षा। इति स्पर्शनेन्द्रियं व्यसनहेतुर्नृपस्य देव्याश्च सविशेषं ज्ञातम् ॥

॥ इति स्पर्शनेन्द्रिये सुकुमालिकानृपकथा समाप्ता ॥

**सेवंति परं विसमं, विसंति दीणं भणंति गुरुआवि । इंदियगेद्धा इहइं, अहरगइं जंति परलोए ॥२७५॥**

व्याख्या—इह इन्द्रियार्थगृद्धाः प्राणिनः पर-मन्यं सेवन्ते, विषमं सङ्ग्रामादिकं विशन्ति, तथा दीनं प्रार्थनादिरूपं भणन्ति महान्तोऽपि, परलोके च नारकतिर्यक्कुदेवमनुजरूपां अधरगतिं यान्तीति गाथार्थः ॥ २७५ ॥

इन्द्रियवशगानां यानि दुःखानि तेषामनन्तत्वात्स्वस्य तद्भणनाशक्तिमाह—

**नारयतिरियाइभवे, इंदियवसगाण जाइं दुक्खाइं । मन्ने मुणेज्ज नाणी, भणिउं पुण सो वि न समत्थो॥२७६॥**

व्याख्या—इन्द्रियवशगानां नारकतिर्यङ्नरामरभवेषु भ्रमतां यानि बन्धनताडनमारणादीनि दुःखानि जायन्ते तान्यहमेवं मन्ये-सर्वाण्यपि जानीयात्केवली, नात्र संशयः, भणितुं-प्रत्येकं कथयितुं पुनः सोऽपि न समर्थः, तेषामनन्तत्वात्केवलिनस्तु परिमितायुष्कत्वात्, ततः कुतोऽस्मादृशस्याज्ञानिनस्तद्भणनशक्तिः? इति गाथार्थः ॥ २७६ ॥

अथेन्द्रियजयद्वारमुपसंहरन् वक्ष्यमाणकषायनिग्रहद्वारप्रस्तावनामाह—

**तो जिणसु इंदियाइं, हणसु कसाए व जइ सुहं महसि । सकसायाण न जम्हा, फलसिद्धी इंदियजए वि ॥**

व्याख्या—यत एवं तस्मात्त्वमिन्द्रियाणि जय, तथा जहि-समुच्छिन्द्धि कषायान्, यदि स्वर्गापवर्गसुखं वाञ्छसि,

न त्विन्द्रियजयमात्रादेवोक्तफलप्राप्तिर्भविष्यतीत्याह—यस्मात्सकषायाणामिन्द्रियजयेऽपि फलसिद्धिर्न भवतीति गाथार्थः ॥ २७७ ॥

इति मतिधनाः सततं सम्यक् स्वकल्पजिनोदितां, प्रकृतिमशुभां पञ्चाक्षाणामनिग्रहदारुणाम् ।
शिवसुखरसाकाङ्क्षेणैषां जयाय महोद्यमः, शमदमवता कार्यः स्थैर्यं विधाय निजे हृदि ॥ १ ॥ [पृथ्वीवृत्तम्]

इति पुष्पमालाविवरणे भावनाद्वारे करणजयलक्षणं प्रतिद्वारं समाप्तम् ॥ ८ ॥

अथानन्तरमेव सम्बन्धितं कषायनिग्रहद्वारं विभणिषुर्भणिष्यमाणार्थसङ्ग्रहद्वारमाह—

**तेसि सरूवं[1] भेओ[2], कालो[3] गइमाइणो[4] य भणियव्वा । पत्तेयं च विवागो[5], रागद्दोसत्तभावो[6] य ॥ २७८ ॥**

व्याख्या—'तेषां' कषायाणां यथार्थाभिधानतारूपं स्वरूपं तावद्वाच्यम्, तथा भेदो वाच्यः, तदवस्थितिरूपः कालो, देवगत्यादिका गतिः, आदिशब्दान्नरकगत्यादिषु क्रोधाद्यधिकत्वादयो भणितव्याः । प्रत्येकं चैहिकामुष्मिकफलरूपः क्रोधादीनां विपाको वाच्यः । तथा रागद्वेषत्वेन भवनं—भावो वाच्यः, कः कषायो रागेऽन्तर्भवति ? को वा द्वेषे ? इति गाथार्थः ॥ २७८ ॥ तत्र स्वरूपद्वारं तावदाह—

**कम्मं कसं भवो वा, कसमाओ सिं जओ कसाया तो । संसारकारणाणं, मूलं कोहाइणो ते य ॥२७९॥**

व्याख्या—कष्यन्ते—हिंस्यन्ते जीवा अनेनेति कषं—कर्म अस्मिन्निति वा कष-श्चतुर्गतिको भवः । ततश्च "कसं" ति विभक्तिव्यत्ययात्कषस्य—कर्मणो भवस्य वा आयो—लाभः, "सिं" ति एतेभ्यः क्रोधादिभ्यो यतो भवति "तो" त्ति

तस्मात्कारणाद्यथार्थनामानः कषायाः क्रोधादयो भण्यन्ते । भवलाभहेतवश्च गौणवृत्त्याऽपि स्युरित्याह—संसारकारणानां असंयमादीनां मध्ये मूलं—प्रधानं कारणं कषायाः, के ते ? इत्याह—ते च क्रोधादयः, आदिशब्दान्मानमायालोभा इति गाथार्थः ॥२७९॥

भेदद्वारमभिधित्सुराह—

**कोहो माणो माया, लोभो चउरो वि होंति चउभेया । अणअपच्चक्खाणा, पच्चक्खाणा य संजलणा ॥२८०॥**

व्याख्या—क्रोधादयश्चत्वारोऽपि प्रत्येकं चतुर्भेदा भवन्ति, तदेवाह—सूचनात्सूत्रत्वादनन्तानुबन्धी क्रोधः, अप्रत्याख्यानावरणः क्रोधः, प्रत्याख्यानावरणः क्रोधः, सञ्ज्वलनः क्रोध इति । एवं मानाद्यभिलापेनापि चत्वारो भेदाः प्रत्येकं वाच्या इति गाथार्थः ॥ २८० ॥ अनन्तानुबन्धिन इति कः शब्दार्थः ? इत्याह—

**बंधंति भवमणंतं, ते(य)ण अणंताणुबंधिणो भणिया । एवं सेसा वि इमं, तेसिं सरूवं तु विन्नेयं ॥२८१॥**

व्याख्या—ये कषाया उदयप्राप्ताः सन्तोऽनन्तं भवमनुबध्नन्ति—भ्रमणीयत्वेनावस्थापयन्ति ते(च) सम्यक्त्वमात्रस्यापि घातका अनन्तानुबन्धिनः क्रोधादयस्तीव्रतमा इत्यर्थः । एवं "सेसा वि" त्ति यथाऽनन्तानुबन्धिनो व्युत्पादितास्तथा शेषा अपि व्युत्पादनीयाः, तथाहि—नञोऽल्पार्थत्वादल्पं काकमांसविरत्यादिमात्रमपि प्रत्याख्यानमावृण्वन्ति ये ते अप्रत्याख्यानावरणाः क्रोधादयस्तीव्रतरा इत्यर्थः, तथा ये प्रत्याख्यानं सर्वविरतिरूपमावृण्वन्ति—निवारयन्ति ते प्रत्याख्यानावरणाः क्रोधादयोऽथापि तीव्रा इत्यर्थः, चारित्रिणमपि ये सञ्ज्वलयन्ति—क्षणमात्रमौदयिकभावमानयन्ति ते सञ्ज्वलनाः क्रोधादयो मन्दतामापन्ना इत्यर्थः । अथैतेषां किञ्चिद्विशेषं व्याचिख्यासुराह—तेषां पुनरनन्तानुबन्ध्यादिक्रोधादीनामिदं पश्चानुपूर्व्या वक्ष्यमाणं स्वरूपं विज्ञेयमिति गाथार्थः ॥२८१॥

किं पुनस्तदित्याह—

जलरेणुपुढविपव्वय-राईसरिसो चउव्विहो कोहो। तिणिसलयाकट्ठट्ठिय-सेलत्थंभोवमो माणो ॥२८२॥
मायाऽवलेहिगोमुत्ति-मिंढसिंगघणवंसिमूलसमा। लोहो हलिद्दखंजण-कद्दमकिमिराग[+]सामाणो ॥२८३॥

व्याख्या—प्रथमार्द्धे प्रत्येकं राजिशब्दसम्बन्धाज्जलराजिसमानः सञ्ज्वलनः क्रोधः, यथा जले रेखा क्रियमाणा शीघ्रमेव निवर्त्तते, तथा यः कथमप्युत्पन्नोऽपि सत्वरमेव व्यावर्त्तते स सञ्ज्वलनः क्रोध इत्यर्थः, रेणुरेखातुल्यस्तु प्रत्याख्यानावरणः, अयं हि रेणुमध्यविहितरेखावचिरेण निवर्त्तत इति भावः, पृथ्वीराजिसमानोऽप्रत्याख्यानावरणः, यथा स्फुटितपृथ्वीसम्बन्धिनी रेखा कचवरादिभिः पूरिता कष्टेनापनीयते, एवमेषोऽपीति भावः, विदलितपर्वतरेखातुल्यस्त्वनन्तानुबन्धी, कथमपि निवर्त्तयितुं न शक्यत इत्यर्थः, इति चतुर्विधः क्रोधः। मानस्तु तिनिसो—वनस्पतिविशेषस्तस्य लतोपमः सुखेनैव नमनीयः सञ्ज्वलनः, काष्ठोपमः प्रत्याख्यानावरणो मानः, यथाऽग्निस्वेदादिभिः कष्टेन काष्ठं नमति तथाऽयमपीति भावः, अस्थि—हड्डं, तदुपमः कष्टतरनमनीयोऽप्रत्याख्यानावरणो मानः, शिलायां घटितः शैलः, स चासौ स्तम्भश्च शैलस्तम्भस्तदुपमस्त्वनन्तानुबन्धी मानः, कथमप्यनमनीय इत्यर्थः। माया पुनरुल्लिख्यमानानां धनुरादीनां याऽवलेखिका वक्रत्वरूपा, तत्समाना सा सञ्ज्वलनीत्युच्यते, सुखेनैवार्जवमापादनीयेत्यर्थः, गोमूत्रिकासमाना किञ्चित्कष्टेनापनीया प्रत्याख्यानावरणी माया, एवं मेषशृङ्गोपमा कष्टतरनिवर्त्तनीया अप्रत्याख्यानावरणी माया, घनं—दृढं यद्वंशीमूलं, तत्समाना त्वनन्तानुबन्धिनी, यथा निबिडवंशीमूलस्य कुटिलता किल वह्निनाऽपि न दह्यते, एवं या कुटिलता कथमपि न निवर्त्तते साऽनन्तानुबन्धिनी मायेत्यर्थः। लोभस्तु हरिद्रारागोपमः सुखनिवर्त्तनीयः

+ 'स'कारस्य दीर्घत्वं प्राकृतत्वात्।

धमत्थकामभोगाण, हारणं कारणं दुहसयाणं। मा कुणसु कयभवोहं, कोहं जइ जिणमयं मुणसि ॥२८८॥

व्याख्या—धरति दुर्गतिपतन्तं प्राणिनमिति धर्मो जीवदयादिः, अर्ज्य[अर्थ्य]त इत्यर्थो-धनं, काम्यन्त इति कामाः शब्दादयः, भुज्यन्त इति भोगाः स्पर्शादयस्तेषां हारणं-नाशनं, दुःखशतानां च कारणं-साधनं, तथा कृतो भवौघः-संसारप्रवाहो येन स तथा, तं, एवंविधं क्रोधं मा कुरुष्व, यदि जिनमतं जानासि ? "ज्ञोजाणमुणौ" इति[हैमप्रा० ९४-७] मुणादेश इति गाथार्थः ॥ २८८ ॥ किञ्च—

इह लोए च्चिय कोवो, सरीरसंतावकलहवेराइं। कुणइ पुणो परलोए, नरगाइसु दारुणं दुक्खं ॥२८९॥

व्याख्या—इह लोके एतस्मिन् भवे एव तावत्कोपः शरीरसन्तापकलहवैराणि प्रसिद्धानि करोति, धातूनामनेकार्थत्वाज्जनयति, परलोकेऽन्यभवे पुनर्नरकादिषु दारुणं-असह्यं दुःखं जनयतीति गाथार्थः ॥ २८९ ॥ अथ व्यतिरेकमाह—

खंती सुहाण मूलं, मूलं धम्मस्स उत्तमा खंती। हरइ महाविज्जा इव, खंती दुरियाइं सयलाइं ॥२९०॥

व्याख्या—क्षान्तिः सर्वेषां सुखानां मूलं-मुख्यमुत्पत्तिनिबन्धनं स्थानमिति यावत्, तथोत्तमा क्षान्तिर्धर्मस्य मूलं, स्फुरत्प्रभावा महाविद्येव क्षान्तिः सकलानि दुरितानि हरतीति गाथार्थः ॥ २९० ॥

इह च कोपे क्षमायां च दोषगुणदर्शनपरं दृष्टान्तद्वयमाह—

कोवम्मि खमाए वि अ-चंकारियखुड्डओ य आहरणं। कोवेण दुहं पत्तो, खमाए नामिओ सुरेहिं पि ॥२९१॥

व्याख्या—कोपे क्षमायां च, एकदेशे समुदायस्य गम्यमानत्वात्, अचङ्कारितभट्टिका तथा क्षुल्लकश्च नागदत्ताभिधानः

'कूरगड्डुक' इति प्रसिद्धः, तावदुदाहरणं, कथम्भूतोऽयम् ? इत्याह—पूर्वं कोपेन दुःखं प्राप्तः, पश्चात्तु विहितया क्षमया प्रणतः सुरैरपि मोक्षं च गतः, अचङ्कारितभट्टिकाऽपि कथम्भूता ? पूर्वं कोपेन दुःखं प्राप्ता, पश्चात्तु विहितया क्षमया सुरैरपि प्रणतेत्यावृत्त्या योज्यते, का पुनरसावित्युच्यते—

उज्जयिन्यां धनश्रेष्ठी, कमलश्री भार्या, तयाऽष्टपुत्रोपरि सुता प्रसूता भट्टिकेति नाम्नी, श्रेष्ठिनाऽभाणि—नैषा केनापि मत्सुता चङ्कारयितव्येति लोकेऽचङ्कारितभट्टिकेति प्रसिद्धा, प्राप्तयौवना परिणयनार्थं अनेकैर्याच्यमानाऽपि श्रेष्ठिना न दीयते, भणति—य एतस्या आज्ञावचनं नित्यमेव सपरिजनो न खण्डयति तस्यैव ददामि, नान्यस्य। ततः सुबुद्धिनाऽमात्येन कामातुरेण तत्तथा प्रतिपद्य महाविभूत्या परिणीता, नीता निजगृहं। स तदाज्ञया वर्त्तमानो भोगान् भुङ्क्ते। अन्यदा तया भणितो, यथा—अस्तमिते सूर्ये क्षणमपि न बहिः स्थेयं, गृहमागन्तव्यं, तथैव नित्यं करोति। अन्यदा राज्ञा ज्ञाततद्भार्यावृत्तान्ते कौतुकेन कार्यच्छलेनामात्यो धृतः। अर्द्धरात्रिसमये विसृष्टो गृहं गतः, तावत् दृढजटितकपाटसम्पुटवासगृहस्थिता नानोक्तिभिर्भाषिताऽपि न कपाटमुद्घाटयति सा, ततः कटुवचनोक्तौ झगित्येव कपाटमुद्घाट्यामात्यस्य दृष्टिं वञ्चयित्वा निर्गता पितृगृहं प्रति, मार्गे चौरैर्गृहीता, विलपन्ती मुखे वस्त्रपिण्डं दत्त्वा नीता नगराद्बहिः, गृहीतानि कोटिमूल्यान्याभरणानि, ततः पल्ल्यां नीत्वा विजयनाम्नो निजाधिपतेर्दत्ता, तेनापि हृष्टेन चौराणां बहुधनं दत्तं, समयेऽनेकप्रकारैः परिलपतिना प्रार्थिताऽपि सर्वथा तं नेच्छति, ततः कुपितेन बाढं ताडिता, कण्ठगतप्राणाऽपि यावन्नेच्छति तावद्विक्रीता एकस्य सार्थवाहस्य हस्ते बहुद्रविणेन। सोऽपि प्रार्थयतेऽनुकूलैः प्रतिकूलैश्चोपायैः, यावन्नेच्छति तावद्विक्रीता पार्श्वकूले कम्बलवणिजो दत्ता, सोऽपि तथैव प्रार्थय, तत एषा

कर्पासपाण्डुरदेहा क्षीणाङ्गी जाता। ततो दैवात्कथमप्यत्रागतेन ज्येष्ठेन तद्बन्धुनासौ दृष्टा प्रत्यभिज्ञाता, कथञ्चिन्नीता स्वगेहं, यदेवं तया पदे पदे दुःखं अज्ञानकोपकरणादनुभूतं, ततः संविग्ना साध्वीनां पार्श्वे धर्मं श्रुत्वा व्रतं प्रतिपद्य मार्यमाणाऽप्यहं कस्याप्युपरि कोपं न करिष्ये इति घोरमभिग्रहं गृहीत्वा तिष्ठति। अन्यदा तस्याः शरीरबलकरणव्रणरोधनार्थं लक्षपाकतैलघटत्रयं कृतं, तत्तैलार्थं च मुनयोऽन्यदा तत्रागताः, अचङ्कारितभट्टिकया दास्याः सकाशाद्घट आनायितः, अत्रान्तरे शक्रेणाचङ्कारित-भट्टिकायाः क्षमादृढत्वं प्रशंसितम्। तदैको देवोऽसहमानस्तदा तत्रागत्य दास्या हस्तात्तैलघटं स्फोटयतिस्म, द्वितीय आनायितः सोऽपि स्फोटितः सुरेण, अथ प्रशस्तभावा स्वयं गत्वा तृतीयं घटमानीय साधुभ्यस्तैलं दत्वा हृष्टा। ततः सुरः प्रत्यक्षीभूय स्तुत्वा स्वर्गं गतः, साधवोऽपि स्वोपाश्रयं गताः। इतराऽपि गतगर्वा श्रावकधर्मं पालयित्वा स्वर्गं गता। एवं कोपेन दुःखं प्राप्ता, क्षमया पुनरसौ सुरैर्नता, इति अचङ्कारितभट्टिकाकथा समाप्ता॥

अथ क्षुल्लककथोच्यते–क्वापि गच्छे मासक्षपकः साधुरासीत्, अन्यदा मास[क्षपण]पारणके भिक्षायां क्षुल्लकेन समं व्रजता तेन प्रमादान्मण्डूकी चम्पिता मृता। ततः क्षुल्लकेनोक्तं–महर्षे! एषा त्वया पादेन चम्पिता, ततः क्रुद्धः क्षपकः पूर्वं मृतास्ता दर्शयन् प्राह--रे रे दुष्ट! किमेषाऽपि मया हता?, अन्या अपि किं मया हता?, ततो भावं ज्ञात्वा क्षुल्लकस्तूष्णीकः स्थितः, अथाऽऽवश्यककाले स्वस्थावस्थं क्षपकं प्रत्याह क्षुल्लकः–'मण्डूकीमालोचय महर्षे!'। ततोऽधिकं ज्वलितकोपानलः क्षुल्लकाभिमुखं धावन् कोऽप्यन्धः स्तम्भे आस्फाल्य मर्मप्रदेशे स्फुटितशिरो मृत्वोत्पन्नो ज्योतिष्केषु, ततश्च्युत्वा [उत्पन्नः] क्वाप्यरण्ये दृष्टिविषयुतानां पूर्वभवविराधितश्रामण्यानां भुजङ्गानां कुले, जातिस्मृतिश्चैषामस्तीति ते सर्वे च रात्रौ भ्रमन्ति, भुञ्जते च

प्रासुकाहारं, माऽस्माकं दृष्टिविषेण प्राणिघातो भूयादिति । स तु बिलेऽपि अधोमुखः कृतानशनस्तिष्ठति । इतश्च वसन्तपुरेऽरिदमन-
नृपतेः सुतः सर्पेण दष्टो मृतः, ततः कुपितो भूपो भुजङ्गान् स्वयमन्यैश्च मारयति, यो यः सर्पं हत्वा शिरो राज्ञः समर्पयति
तस्य दीनारमर्पयति । अन्यदैको गारुडिको मन्त्रौषधैर्बिलात् सर्पान्निष्कास्य शिरो गृह्णंस्तं सर्पं निष्कासयति, सोऽपि धर्मबुद्ध्या-
ऽधोमुखः पुच्छेन निर्गच्छति, तावत्स गारुडिको निर्गतं निर्गतं छिनत्ति, ततो दृढं दुःखे उत्पद्यमाने भुजङ्गः सम्यक् संवेगात्सहते ।
एवं सोऽपि गारुडिकेन हतः, सर्वेऽपि नृपस्य दर्शिताः, लब्धमुचितं द्रव्यं । अत्रान्तरे भूपः केनापि नागदेवेन पुत्रस्ते भविष्यती-
त्युक्त्वा सर्पवधान्निवर्तितः, तदा च स भुजङ्गो मृत्वा तत्पुत्रत्वेनोत्पन्नस्तस्य नागदत्त इति नाम कृतम् । स च रूपादिगुणाकरोऽपि
धर्ममेव पुरुषार्थं मन्यमानः साधूनुपास्ते । अन्यदा सञ्जातजातिस्मृतिः पितृप्रभृतिस्वजनान्वितः संविग्नः प्रव्रजितः, पालयति
निष्कलङ्कं चारित्रं, केवलं क्षुधा बहुस्ततो द्विस्त्रिर्भुङ्क्ते निरवद्यमाहारं, ततः 'कूरगडुयक'इति प्रसिद्धाख्योऽजनि । तस्मिंश्च गच्छे
चत्वार एकद्वित्रिचतुर्मासिकाः क्षपकाः सन्ति, तान् दृष्ट्वा चिन्तयति-सफलमेतेषां जीवितं, ये कर्मशैलकुलिशमेवं तपः कुर्वन्ति,
अहं पुनर्मन्दभाग्यो, यः प्रत्यहं बहुवारमाहारं गृह्णामि, इति भावनाशुद्धमना वैयावृत्त्येनापि महती निर्जरा इति विचिन्त्य क्षपकानां
वैयावृत्त्याभिग्रहं गृहीतवान् । अन्यदा क्षपकानतिक्रम्य देवतया स एव प्रणतः साधुः, ततो निवर्तमाना सा चातुर्मासिकक्षपकेन
कोपेन वस्त्राञ्चले धृता भणिता-पापे कटपूतने ! किमिह प्राप्ताऽसि ? यन्महाक्षपकानुल्लङ्घ्य त्रिकालभोजिनं वन्दसे, ततो
देवतयोक्तं-तपस्विन् ! मा कुरु अकार्यं कोपं, भावक्षपकं वन्दे, न द्रव्यक्षपकं । जानीथ यूयं स्वयमेव यादृशी आत्मनो द्रव्य
क्षपकता सुलभाऽनन्तशः प्राप्ता च । एष त्रिकालं भुङ्क्ते इति यद्भणसि स मत्सरः, ईदृशानां नित्यमुपवास एव, यदुक्तं—

"निरवज्जाहाराणं, साहूणं निचमेव उववासो । उत्तरगुणवुड्ढिकरा, तहविहु उववासमिच्छंति ॥ १ ॥"
"सत्तीए तवो जिणेहिं, भासिओ तं च गोवए न इमो । ता किह्नु तवेण हीणो ?, एसो किह समहिया तुब्भे? ॥२॥

इत्यादिप्रशंसां कृत्वा गता देवता, प्रातर्दत्त्वमादाय समागतः साधुर्निमन्त्रयति चतुर्मासिकक्षपकं, सोऽपि कुपितस्तत्पात्रके खेलमकरोत्, शेषा अपि निमन्त्रितास्तथैव चक्रुः, संविग्नो मुनिर्भणति—धिग्धिग् मां प्रमादिनं, क्षपकानां खेलमल्लको न कृतः, अहमेतेषामसमाधिकारणं जातः, "इत्याद्यात्मानं निन्दन् तमाहारं भुञ्जानस्तथोपशमप्रकर्षं प्राप्तो यथोत्पन्नं केवलज्ञानं देवैः सुरभिवायुगन्धोदककुसुमवृष्टिसुवर्णकमलादिमहिमा कृतः, देवतोक्तं—भोः क्षपकाः ! पश्यन्तु त्रिकालभोजिनो माहात्म्यं ततस्ते सर्वे स्वकोपनिन्दां तस्योपशमश्लाघां च कुर्वन्तस्तथा संवेगमापन्ना यथा प्राप्तं केवलज्ञानं । पश्चापि क्रमेण सिद्धाः इत्यसौ नागदत्तः कोपेन दुःखं प्राप्तः, पुनः क्षमया सुरैर्नत इति क्षमा कार्या, कोपस्त्याज्यः, इति नागदत्तमुनिकथासमाप्ता।

उक्तः सोदाहरणः क्रोधविपाकोऽथाधिकृतमानस्याष्टधात्वोपदर्शनपूर्वं हेयत्वमाह—

**जाइकुलरूवसुअबल-लाभतविस्सरियअट्ठहा माणो । जाणियपरमत्थेहिं, मुक्को संसारभीरूहिं ॥२९२॥**

व्याख्या—जातिकुलरूपश्रुतबललाभतपऐश्वर्यैर्मदोऽसमा जातिरित्यादिरूपोऽष्टधा मानो ज्ञातपरमार्थैः संसारभीरुभिर्मुक्तो, नैव कृत इति गाथार्थः ॥ २९२ ॥ अथैतेष्वन्यतरोऽपि क्रियमाण इह लोकेऽपि महते दोषायेत्याह—

**अन्नयरमउम्मत्तो, पावइ लहुयत्तणं सुगुरुओ वि । विबुहाण सोयणिज्जो, बालाण वि होइ हसणिज्जो ॥२९३॥**

व्याख्या—जात्यादीनामन्यतरेणैकेनापि मदेनोन्मत्तः, आस्तां लघुः, सुगुरुकोऽपि—अतिमहानपि लघुत्वं प्राप्नोति,

विबुधानां शोचनीयो भवति, किं बहुना ? बालानामपि हसनीयो भवतीति गाथार्थः ॥ २९३ ॥ किञ्च—

**जइ नाणाइमओ वि हु, पडिसिद्धो अट्ठमाणमहणेहिं । तो सेसमयट्ठाणा, परिहरियव्वा पयत्तेणं ॥२९४॥**

व्याख्या—यदि ज्ञानादीनां शुभानामपि पदार्थानामहं ज्ञानीत्याद्यात्मबहुमानरूपोऽपि मदोऽष्टविधमानमथनैस्तीर्थकरगणधरैः प्रतिषिद्धः, ततः शेषाण्यशुभानि जात्यादिमदस्थानानि बुद्धिमता प्रयत्नेन परिहर्त्तव्यानीति गाथार्थः ॥ २९४ ॥

विशेषेण ज्ञानमदस्याकर्त्तव्यतामाह—

**दप्पविसपरमसंतं, नाणं जो तेण गव्वमुव्वहइ । सलिलाओ तस्स अग्गी, समुट्ठिओ मंदपुन्नस्स ॥ २९५ ॥**

व्याख्या—जात्याद्यर्थविषयस्यापि दर्पविषस्योत्तारणार्थं किल ज्ञानमिष्यते, यस्तु तेनापि गर्वमुद्वहति तस्यापुण्यवतो वराकस्य सलिलादप्यग्निरुत्थितो, ज्ञानस्य सलिलकल्पत्वाद्दर्पस्य त्वग्नितुल्यत्वादिति गाथार्थः ॥ २९५ ॥

ननु दर्पे क्रियमाणे को दोषो ? येन प्रतिषिध्यत इत्याशङ्कयाह—

**धम्मस्स दया मूलं, मूलं खंती वयाण सयलाणं । विणओ गुणाण मूलं, दप्पो मूलं विणासस्स ॥२९६॥**

व्याख्या—यथा धर्मस्य जीवदयादयो (?) मूलं, यथा च सकलानां व्रतानां क्षान्तिर्मूलं, यथा विनयो गुणानां मूलं, तथा विनाशस्य दर्पो मूलं-मुख्यमेव निबन्धनमिति गाथार्थः ॥ २९६ ॥ अथवा इदानीं गर्वकरणावकाश एव नास्तीत्याह—

**बहुदोससंकुले गुण-लवम्मि को होज्ज गव्विओ इहइं ? । सोऊण विगयदोसं, गुणनिवहं पुव्वपुरिसाणं।२९७**

व्याख्या—साम्प्रत तावद्दुष्षमासमानुभावाद्गुणलव एव कश्चित्प्राप्यते, न तु सम्पूर्णः कोऽपि ज्ञानादिको गुणः, सोऽपि च बहुभिः क्रोधादिभिर्दोषैः सङ्कुलो—व्याप्तः, ततस्तस्मिन्नपि बहुदोषसङ्कुले गुणलवमात्रे सति को नाम सविवेकः सन् गर्वितो भवेत् ?, न कश्चिदिति भावः। किं कृत्वा ? इत्याह-पूर्वपुरुषाणां-तीर्थकरगणधरचक्रवर्त्यादीनां विगतदोषं गुणनिवहं अनन्तज्ञानैश्वर्यादिरूपं श्रुत्वा। अयम्भावः-मात्सर्यादिदोषलेशेनाप्यकलङ्कितान् प्रत्येकमनन्तान् पूर्वपुरुषाणां ज्ञानैश्वर्यादिगुणान् श्रुत्वाऽनेकदोषकलङ्किते गुणलवे गर्वस्य कोऽवकाशः ?, इति गाथार्थः ॥ २९७ ॥

विभवविना गुणिना च विशेष(तः) एवाहङ्कारो न कर्त्तव्य इत्याह—

**जइवि हु दोसाभावो, गुणो य जइ होइ मच्छरुत्तिण्णो। विहवीसु तह गुणीसु य, दूमेइ ठिओ अहंकारो ॥२९८॥**

व्याख्या—प्रायो दोषाभावोऽपि यदि मत्सरोत्तीर्णो भवति, अहङ्कारमिश्रितो न भवति, तर्हि गुणवच्छोभत एव, अहङ्कारः पुनर्विभविषु गुणिषु च स्थितो दूनोति-शिष्टजनस्य महतीं मनोबाधां जनयति, अन्येनाप्यहङ्कारो न कर्त्तव्यो, विशेषतो विभविना गुणवता चेति भाव इति गाथार्थः ॥ २९८ ॥ अथ दृष्टान्तद्वारेण मानविपाकमाह—

**जाइमएणिक्केण वि, पत्तो डुंबत्तणं दियवरो वि। सव्वमएहिं कहं पुण, होहिंति ? न सव्वगुणहीणा ॥२९९॥**

व्याख्या—एकेनापि जातिमदेन हेतुभूतेन द्विजवरोऽपि-पुरोहितपुत्रोऽपि डुम्बत्वं जन्मान्तरे प्राप्तः, ततः सर्वैर्जात्यादिविषयैर्मदैः क्रियमाणैः कथं पुनस्तैः सर्वैरपि सुकुलोत्पत्त्यादिगुणैर्हीना न भविष्यन्ति ?, अपि तु भविष्यन्त्येवेत्यक्षरार्थः ॥ २९९ ॥

अथ कथ द्विजवरेण डुम्बत्वं प्राप्तमित्युच्यते-गजपुर(वरे)पुरे सोमदत्ताभिधपुरोधसः पुत्रो ब्रह्मदेवनामा सर्वविद्यागृहमपि

बालकालाज्जातिमदं कुर्वन्ननेकयुक्तिभिः पित्रादिभिर्वारितोऽपि ब्राह्मणजातिं त्यक्त्वाऽन्यत्सर्वमवस्तु मन्यमानः सञ्चरद्भिः शूद्रै-रप्यपावित्र्यशङ्कया पुनः पुनः सचेलस्नानं कुर्वन् जातिमत्तस्तिष्ठति । अन्यदा पितर्युपरते राज्ञा तं जातिमदग्रस्तं ज्ञात्वा तत्पदेऽन्य-पुरोधाः कृतः । स ब्रह्मदेवो निर्धनो व्यवहाररहितो लोकैर्निःशङ्कमुपहस्यमानश्चिन्तयति–तत्र मया गन्तव्यं यत्र सर्वोऽप्यशुद्धजनो न दृष्ट्याऽपि दृश्यते, न च सञ्चरति क्वचिन्मार्गेऽपि । ततो निर्गतोऽटव्यां एकाकी मार्गमजानन् भ्रान्तो डुम्बपल्ल्यां प्राप्तो बहून् डुम्बान् पश्यति, तावदेकेन डुम्बेनागत्य स्पृष्टः क्रुद्धो डुम्बं निन्दन् गणति, डुम्बेन कुपितेन क्षुरिकया हतो मृत्वा तस्यैव डुम्बस्य सुतो जातः, तस्य दमन इति नाम कृतं । स च काणः खञ्जः कुब्जः पितुरप्युद्वेजकरूपः पापर्द्धिप्रभृतिबहुपापानि कृत्वा मृतः पञ्चमनरकपृथिव्यां नारको जातः । ततो मत्स्यभवान्तरितो नरकेषु भ्रान्त्वा प्रायः सर्वत्र हीनजातिषूत्पद्य महादुःखितो जातः । अथान्यदा कथमप्यज्ञानतपोऽनुभावाज्जातो ज्योतिष्केषु । ततो भरते पद्मखेटे नगरे कुन्ददन्तायाः गणिकायाः मदननामा सुतो सुरूपः कलावान् विद्यावान् जातः । स च कृतज्ञः परोपकाररसिको गम्भीरस्तथापि जनो भणति–किमेष ? भो दारिकापुत्र ! । ततो गुणानुरूपं फलं अप्राप्नुवन् कदाचिच्चित्ते चिन्तयति–धात्रा यद्यहं हीनजातौ क्षिप्तस्ततोऽयं गुणप्रकर्षः कथं कृतः ? यदि चासौ तत्कृतोऽधमा जातिः ?, अथवा “सयलगुणमीलणेसुं, सव्वं विहिणो परम्मुहा बुद्धी । रयणेहिं पूरिऊण वि, खारो जं निम्मिओ जलही ॥ १ ॥” इत्यादि यावद्विषण्णश्चिन्तयति तावत्केवलिनं आसन्नवने समवसृतं ज्ञात्वा तत्र गतः, धर्मदेशनां श्रुत्वा स्वस्या-धमजातिकारणमपृच्छत् । ततः केवलिवचनात्प्राग्भवान् विप्रभवादारभ्य ज्ञात्वा वैराग्याद्दीक्षां याचितवान्, दीक्षानर्हजातिरपि केवलिनाऽतिशयज्ञानेनाराधको भावीति मत्वा दीक्षितः सम्यगाराध्य पर्यन्ते मासं पादपोपगमनानशनेन माहेन्द्रकल्पे देवो जातः,

महाविदेहे सिद्धिं गमिष्यति। इति जातिमानविपाके (ऋषभदेव)विप्रकथासमाप्ता ॥ अथ मायाविपाकमधिकृत्याह—

**जे मुद्धजणं परिवं-चयंति बहुअलियकूडकवडेहिं। अमरनरसिवसुहाण, अप्पा वि हु वंचिओ तेहिं ॥३००॥**

व्याख्या—ये पुरुषा मुग्धजनं परिवञ्चयन्ति, कैः? इत्याह—बहून्यलीकवचनरचनाप्रधानानि कूटकपटानि बह्वलीककूट-कपटानि, तैः, अत्र कूटानि हीनाधिकतुलादीनि, कपटानि अन्यथा चिकीर्षितस्यान्यथा बहिः प्रकाशनादीनि, तैः, खलु अमर-नरशिवसुखेभ्यः स्वात्माऽपि वञ्चित एवेति गाथार्थः ॥ ३०० ॥ अथ दृष्टान्तदर्शनेन मायाविपाकमाह—

**जइ वणिसुयाइ दुक्खं, लद्धं एक्कसि कयाइ मायाए। तो ताण को विवागं, जाणइ? जे माइणो निच्चं ॥३०१॥**

व्याख्या—यद्येकशः कृतयाऽपि मायया वणिक्सुतया वसुमतीनाम्न्या दुःखं लब्धं, ततो ये नित्यं मायिनस्तेषां विपाकं को जानातीति गाथार्थः ॥ ३०१ ॥

कथं पुनस्तया वणिक्सुतया दुःखं लब्धं? इत्युच्यते—श्रावस्त्यां (सुधनुः श्रेष्ठी, तस्य अमृतश्री-कमलश्रीनाम्न्यौ द्वे भार्ये,) अमृतश्री वसुमतीं सुतां प्रसूता, सा सकलकलासु निपुणा बालपण्डितेति सर्वत्र विख्याता श्रेष्ठिनः प्रेमपात्रं जाता। अन्यदा रागकेसरिसुता मोहनरेन्द्रनप्त्री बहुलानाम्नी तस्याः सखी जाता। तस्याः कुमारत्वेऽपि परभवं प्राप्ताऽमृतश्रीः। अन्यदा वसुमत्या मातृमत्सरेण मातुः सपत्न्याः कमलायाः कलङ्कदानार्थं पितरं गृहान्तः सुप्तं जागृतं ज्ञात्वा शनैर्बहुलानाम्नी सखी भाषिता—सखे! मम माता कमला शाटिकया चोक्षा न वर्त्तते, सख्योक्तं—किमिदं?, तया मायया पुनरुक्तं—किं (अनेन)? सम्प्रति निद्रा समायाती(ति) सुप्ता सा। श्रेष्ठिना तच्छ्रुत्वा सञ्जातकोपेन त्यक्ता कमला, तद्दुःखेन द्वादशप्रहरान्निरन्तरं रुदन्तीं कमलां दृष्ट्वा कृपया तत्कलङ्को-

स्मरणार्थं पितरमाह–तात ! किं कमलां मातरमवजानासि ?, स आह–ननु त्वयैवोक्तं यदसावचोक्षशाटिकेति, साऽऽह–नासौ तां धावयतीति मया तदुक्तं, न शीलमालिन्येनेति । ततो व्यावृत्तचित्तो धनुस्तथैव कमलां स्नेहेनालोकते । वसुमत्यपि चिरं गृहवासे स्थित्वा प्रान्ते तापसीत्वं गृहीत्वा मृत्वा व्यन्तरेषु वेश्या जाता । ततो मृत्वा ऋषभपुरे सत्पथश्रेष्ठिसुता कमलिनी नाम्नी जाता । चम्पायां सुव्रतश्रेष्ठिपुत्रवसुदत्ताय दत्ता सा । वसुदत्तस्य च केनचित्कर्मणा कमलिन्याः कार्ष्ण्यकाणत्वकुब्जत्वकुरूपत्वादिदोषास्तथोक्ता यथा तान् श्रुत्वा तामनिच्छन्नपि पित्रा परिणाय्यमानो वसुदत्तश्चक्षुर्दूषणमिषेण नेत्रयोः पट्टं बद्ध्वा तस्या आस्यमनालोक्य परिणीय पूर्वभवकर्मणा द्वादशवर्षाणि तां तत्याज । पित्रादिभिः प्रार्थ्यमानोऽपि नाङ्गीचक्रे । अन्यदा मतिमन्दिरमित्रेण तामानाय्य राजपत्नीवेषां विधाय क्वापि दर्शयित्वा वसुदत्तस्तदनुरक्तो व्यधायि, प्रोक्तश्च मा दुःखमावहेस्त्वमेनां सम्पादयिष्यामीति प्रकारेण प्राक्कर्मणः क्षयाद्रतौ प्रीतिभाजौ जातौ कमलिनीवसुदत्तौ । कालेनावधिज्ञानिनः पार्श्वे धर्मं श्रुत्वा प्राप्तावसरा कमलिनी प्राह–भगवन्! किं कर्म मया पूर्वभवे कृतं ? येन तथा प्रियेण परित्यक्ता ?, ज्ञानी प्राह–वसुमतीभवे बहुलासखीत्वेन कमला द्वादशप्रहरांस्तीव्र प्रियावमानना-दुःखे पातिता यत्त्वया तत्कर्मविपाकेन द्वादशवर्षाणि तवैवं दुःखं जातम् । प्रश्ने सति वसुमतीभवात्सविस्तरं पूर्वभवानुवाच ज्ञानी, तच्छ्रुत्वा संवेगं प्राप्तौ कमलिनीवसुदत्तौ प्रव्रज्य दशमं देवलोकं गतौ, इति मायायां वणिक्सुतावसुमतीकथा समाप्ता ॥

अथ लोभस्य बलीयस्त्वमतिव्याप्तिं चाह–

**को लोभेण न निहओ?, कस्स न रमणीहिं भोलियं? हिययं। को मच्चुणा न गसिओ?, को गिद्धो नेव विसएसु?**

व्याख्या—लोभेन को न निहतः ?, नारीभिः कस्य हृदयं न भोलितं–व्यामोहितं ?, मृत्युना च को न ग्रस्तो ?, विषयेषु

को न गुरुः ?, अपि तु सर्वेऽपीत्यर्थः । यथा स्मर्णामृत्युविषयप्रभृतयः पदार्था व्यामोहनादिष्वतीव समर्थाः सर्वत्रास्खलिताश्च तथा लोभोऽपीति भावः, इति गाथार्थः ॥ २०२ ॥ गरीयस्त्वमेव लोभस्य प्रकारान्तरेणाह—

**पियविरहाउ न दुसहं, दारिद्दाओ परं दुहं नत्थि। लोभसमो न कसाओ, मरणसमा आवइ नत्थि ॥२०३॥**

व्याख्या—प्रियविरहादन्यद् दुस्सहं नास्ति, दारिद्र्यात्परं दुःखं नास्ति, लोभसमानोऽन्यः कषायो न, मरणसमा अन्याऽऽपन्नास्तीति गाथार्थः ॥ २०३ ॥ शेषकषायेभ्यो लोभस्य गरीयस्त्वे किं कारणं ? इत्याह—

**थोवा माणकसाई, कोहकसाई तओ विसेसऽहिया। मायाए विसेसऽहिया, लोहंमि तओ विसेसऽहिया॥२०४**
**इय लोभस्सुवओगो, सव्वेवि हु दीहकालिओ भणिओ। पच्छा य जं खविज्जइ, एसोच्चिय तेण गरुययरो ॥२०५॥**

व्याख्या—चतसृष्वपि गतिषु केवलिना चिन्त्यमानेषु जीवेषु स्तोकास्तावन्मानकषायवन्तः, मानकषायोपयोगस्य ह्रस्वकालत्वात्स्तोका एव तदुपयोगे प्राप्यन्त इत्यर्थः । तेभ्यः क्रोधकषायवन्तो विशेषाधिकाः । तेभ्योऽपि मायोपयोगे वर्त्तमाना विशेषाधिकाः । तेभ्योऽपि लोभकषायोपयोगयुक्ता विशेषाधिकाः । एतेषां यथोत्तरमुपयोगकालस्य विशेषाधिकत्वादित्युक्तप्रकारेणैव शेषकषायोपयोगमधिकृत्य लोभस्यैवोपयोगः सर्वेऽपि—आगमेऽपि दुर्यस्यादीर्घकालिको भणितः । क्षपकश्रेण्यां चानिवृत्तिबादरसम्परायगुणस्थाने सर्वेष्वपि शेषकषायेषु क्षपितेषु यतः पश्चान्महता कष्टेन सूक्ष्मसम्परायगुणस्थानक एव लोभः क्षप्यते, तेनामुना कारणद्वयेन एष एव—लोभ एव गुरुतरः शेषेभ्य इति गाथार्थः ॥ २०५ ॥ तृतीयमपि कारणमाह—

**कोहाइणो य सव्वे, लोभाओच्चिय जओ पयट्टंति । एसोच्चिय तो पढमं, निग्गहियव्वो पयत्तेणं ॥२०६॥**

व्याख्या—क्रोधादयश्च सर्वे लोभादेव यतः प्रवर्त्तन्ते, अतोऽप्ययमेव गुरुतर इति शेषः। नहि सर्वथा निष्परिग्रहस्य शरीरमात्रेऽपि निर्ममस्य निरालम्बनाः क्रोधादयः प्रवर्त्तन्ते, किन्तु धनादिमूर्च्छावत एवेति भावः। ततः किं? इत्याह—एष एव-लोभ एव ततः प्रथमं प्रयत्नेन निगृहीतव्यः, तस्मिन्निगृहीते चैतत्युक्त्या निगृहीता एव शेषा इति गाथार्थः ॥३०६॥

यद्येवं तर्हि प्रभूतं विभवमेवार्जयित्वा तं शमयिष्याम इत्याह—

न य विहिवेणुवसमिओ, लोभो सुरमणुयचक्कवट्टीहिं। संतोसोच्चिय तम्हा, लोभविसुच्छायणे मंतो ॥३०७॥

व्याख्या—न च-नैव सुरमनुजचक्रवर्त्तिभिर्विभवेन लोभ उपशमितः, तस्मात्सन्तोष एव लोभविषोत्सादने-लोभविषपराकरणे मन्त्र इव मन्त्र इति गाथार्थः ॥३०७॥ विभववृद्धौ च प्रत्युत लोभोऽपि वर्द्धत एवेत्याह—

जहजह वड्ढइ विहवो, तहतह लोभोवि वड्ढए अहियं। देवा इत्थाहरणं, कविलो वा खुड्डओ वा वि॥३०८॥

व्याख्या—यथा यथा वर्द्धते विभवस्तथा तथा लोभोऽप्यधिकं वर्द्धत एव, देवा अत्रोदाहरणं, तेषां हि विभवस्तावन्महानिति प्रतीतमेव, लोभोऽप्यागमे शेषजीवेभ्यो देवानामेवाधिक उच्यते, मर्त्येष्वपि च दृश्यते विभविनां प्रायो मूर्च्छाधिक्यं, कपिलश्चेहोदाहरणं, तथा क्षुल्लकश्चापि। तत्र कः पुनः कपिलः?, उच्यते—

कौशाम्ब्यां पुर्यां राजदत्तबहुमानः काश्यपनामा पुरोहितस्तद्भार्या जसा, कपिलनामा पुत्रस्तस्य बाल्येऽपि पिता ब्रह्मत्वं जगाम। राज्ञा तदधिकारोऽन्यस्मै सचिवविप्राय प्रदत्तः। सोऽन्यदा शिरोधृतधवलातपत्रः पुरमध्ये भ्रमन् दृष्टस्तज्जनन्या। सा सदुःखं करुणस्वरं रोदितुं प्रवृत्ता। समीपस्थेन कपिलबालकेन पृष्टा-हे मातः! किमिति रोदिषि?। हे वत्स! तव पितुरियं विभूतिरनेन प्राप्ता।

राज्ञाऽस्माकं किं न दत्ता ? । सा प्राह—वत्स ! त्वं लघुवया मूर्खः, इहत्या अध्यापका मत्सरेण न त्वां पाठयन्ति, अतः श्रावस्त्यां त्वत्पितृमित्र इन्द्रदत्तनामाऽध्यापकोऽस्ति, स त्वां पाठयिष्यतीत्यादि श्रुत्वा मातुराशिषं गृहीत्वोपपितृमित्रं गतः कपिलः । आगमनकारणादिव्यतिकरः सर्वोऽपि साधितः । तत इन्द्रदत्तेन गुरुतरस्नेहेनालिङ्ग्योक्तं-वत्स ! सम्यग्विहितं, भवादृशामुत्तमकुलप्रभवानां युक्तमेतत्, परमत्र न भोजनसम्पत्तिः, तामन्तरेण पठनं न स्यात् । यतः—"आरोग्यबुद्धिविनयोद्यमशास्त्ररागाः, पञ्चान्तराः पठनसिद्धिगुणा भवन्ति । आचार्यपुस्तकनिवाससहायवस्त्रा, बाह्यास्तु पञ्च पठनं परिवर्द्धयन्ति ॥१॥"

ततः स वसन्तक्रीडार्थमुद्यानप्राप्तमिभ्यं शालिभद्रश्रेष्ठिनं "ॐ भूर्भुवः स्वस्तत्सवितुर्वरेण्यं भर्गो देवः स्वधीमहि धियोयोनिं प्राणे देवे"त्याद्याशीर्वादपुरस्सरं प्रार्थयामास । तत्पुरः सर्वोऽपि स्वोदन्तो निवेदितः, प्रतिपन्नं भोजनं । ततः पठति, तद्गेहे भुङ्क्ते । सोऽन्यदा तत्परिवेषणाधिकारिण्यां दास्यामनुरक्तो भोगान् विलसति, अन्यदा दास्युत्सवे शृङ्गारितदासीः प्रेक्ष्य सा शृङ्गारकुसुमताम्बूलविरहिता रुदति, 'अहो !! मन्दभाग्याया मे पतिर्दरिद्र' इति तद्वचः श्रुत्वा सोऽप्यधृतिं गतोऽहो !! निर्धनानां पदे पदे पराभव इति । तत्रैको धनश्रेष्ठी निद्रान्ते प्रत्यूषे प्रथममेव यस्तं प्रार्थयते तस्मै पलद्विकं स्वर्णं प्रयच्छति, ततश्चिन्तावशगतः सद्य एव तस्मिन् सुप्त एव व्रजामीत्यादि विचिन्त्य अर्द्धरात्रे उत्थाय व्रजन्नन्तरा आरक्षकैर्बद्धः, प्रभाते राज्ञः समर्पितस्तेनेङ्गितादिना शुद्धो विज्ञातः, पृष्टश्च स सर्वं यथार्थमुक्तवान् । तुष्टेन करुणापरेण राज्ञोक्तं—'यावत्स्वर्णं याचिष्यसि तावन्मात्रं दास्यामीति वद'। ततः सोऽशोकवनिकामध्ये विमर्ष्टुं लग्नो द्वाभ्यां पलाभ्यां वासांस्यपि न भविष्यन्ति, तत : सुवर्णशतं सुवर्णसहस्रं सुवर्णलक्षं सुवर्णकोटिं सुवर्णकोटाकोटिं यावच्चिन्तयतोऽपि नैव मनस्सन्तोषः, तदिन अवसरे समुदीर्णं किमपि शुभकर्म, तेनेति चिन्तयितुं लग्नः-किं मया मूढ-

मानसेन दुष्कृतं प्रारब्धमिति भावयतः समुत्पेदे जातिस्मरणं, ज्ञातं च पूर्वभवे पञ्चशतसाधुमध्ये श्रामण्यं सुरलोकगमनं च । ततो ज्ञातभवपरमार्थो दीक्षां प्रपेदे, वेषो देवतयाऽर्पितः, तदनु नृपवरस्य धर्मलाभो दत्तः, किमेतदिति राज्ञा पृष्टे इदमेवालोचितं, सन्तोषजलेन तृष्णाग्निरुपशामितः, धर्मोपदेशप्रदानेन सर्वोऽपि राजलोकः प्रबोधितः । ततो नवकल्पविहारेण विहरन् उग्रं तपःकर्म समाचरन् स्वयम्बुद्धः कपिलः षष्ठे मासे केवललक्ष्मीं पर्यणैषीत्, तस्मिन् समये पूर्वभवसम्बन्धिनं साधुशतपञ्चकं मृत्वा स्वर्गसुखमनुभूय राजगृहासन्नाटविषु सञ्जातकिरातसमूहं वीक्ष्य प्रतिबोधितुं जगाम । तस्करैः सेनापतिसमीपं धृत्वा नीतः स ऋषिस्ततस्ते नर्तितुं लग्नाः,ऋषिः-"अधुवेसासयम्मि, [संसारम्मि दुक्खपउराए । किं नाम होज्ज तं कम्मं?,जेणाहं दुग्गइं न गच्छिज्जा ॥१॥" उत्तरा० ८ अ०]"संबुज्झह मा विमुज्झह, [संबोही पुणरावि दुल्लहा । नो हूवणमंति राइओ, नो सुलभं पुणरावि जीवियं ॥१॥" सूत्रकृ० वेतालीयाध्ययन ] इत्यादिध्रुवकान् कथयामास, सर्वेऽपि ते प्रतिबोधिता दीक्षां प्रतिपद्य क्रमेण मोक्षं यास्यन्ति, एवमन्यानपि जन्तून् प्रबोध्य कपिलः केवली सिद्धिं प्राप । इति कपिलकेवलीकथा समाप्ता ॥

अथ क्षुल्लककथोच्यते-राजगृहे नगरे श्रीसिंहरथराजा राज्यं करोति, अन्यदा तत्र गुणशिले चैत्ये धर्मरुचिसूरयः समागतास्तच्छिष्य आषाढभूतिः, सोऽन्यदा भिक्षार्थं व्रजन्नृपनटगेहे प्रविष्टः, तत्रैको मोदको रसगन्धाढ्यः प्राप्तः, ततो निर्गत्याचिन्ति-एष तावद्गुरूणां भविता, पुनरात्मनेऽन्यं याचयामीति चक्षुः काणीकृत्य पुनर्गतो, दत्तो मोदकश्चैकः, पुनरेष उपाध्यायानां भवितेति मनसि निधाय कुब्जरूपं विधाय गतो, विहारितश्चैको मोदकः, एष सङ्घाटकसाधोर्भवितेति विचिन्त्य पश्चात्कुष्ठिरूपं विधाय पुनर्गतो, विहारितश्चेत्यादि क्षुल्लकचरित्रं प्रासादोपरि स्थितेन नटेन दृष्ट्वा चिन्तितं-एष सुन्दरो नटो भवति, केनाप्युपचारेण रक्ष्यः, लब्धोपायेन

तेन पुनराकारितस्साधुर्मोदकैर्भृतस्थालैः प्रतिलाभितः, पुनर्भणितश्च–त्वयेह प्रतिदिनं मोदकार्थं समेतव्यमिति श्रुत्वा निर्गतः। तदनु भार्यां प्रत्युक्तं–एष साधुर्मोदकादिना प्रतिलाभ्यः, निजपुत्र्योः प्रत्युक्तं च–सानुकूलोपचारैरेनं वशीकुरुत। ततस्ताभ्यां मुदा शृङ्गारहावभावादिभिस्तस्य चेतस्तथा भिन्नं यथा नष्टः कुलाभिमानः विस्मृतस्सुगुरुवाङ्मन्त्रः सञ्जातो निस्त्रप उदितं चरणावरणं कर्म तस्य, ततः सोऽपि परिहासादि कर्तुं प्रवृत्तः, प्रतिपद्य विवाहादि उपश्रीआचार्यं गतो, भणितो निजपरिणामविशेषस्ततो गुरुराह–

"उत्तम कुलुब्भवाणं, विवेयरयणायराण होऊणं। इहपरलोयविरुद्धं, किं जुत्तं ? एरिसं काउं ॥१॥"

"दीहरसीलं परिपा-लिऊण विसएसु वच्छ ! मा रमसु। को गोपयम्मि बुड्डइ?, जलहिं तरिऊण बाहाहिं ॥२॥"।

ततः क्षुल्लकेनोक्तं एतत्सत्यमेव, परं प्रव्रज्यां कर्तुमहं न शक्नोमि साम्प्रतं। लिङ्गं मुक्त्वा वसतेर्निर्गतो नटगृहं प्राप्तो, नटेन स्वसुते तस्मै परिणायिते,उक्ते चायं धर्मानुरक्त उत्तमप्रकृतिः सत्पुरुषस्ततो युवाभ्यामप्रमत्ताभ्यां शुचिभूताभ्यां उपचरणीयः,यथा वैराग्यं न गच्छति। एवं पञ्चविधविषयसुखमनुभवतः कालो व्रजति, अन्यदा राज्ञा दिवसे आषाढभूतिप्रमुखा नटा नाटकनिरीक्षणार्थमाकारिताः, तस्मिन् प्रस्तावे नटवधूभिः क्षुल्लवधूभिस्सह मद्यं पीतं यथेच्छम्, ततस्ता विलुठितकेशकलापाः प्रसृतदुर्गन्धा जाताः। ततो राजकुलादागतेन तेन तच्चेष्टितं वीक्षितम्। ततः प्राप्तवैराग्यपरश्चिन्तयति–'किं मयेदं विलसितं ?, चारित्रचिन्तामणिर्वृथैव हारित एतयोः कृते' इत्यादि, ततो निर्गच्छन् गेहान्नटेन दृष्टश्चेष्टितैर्ज्ञातो विरक्तचित्तोऽसाविति। तेन पुत्र्यौ भणिते–आः पापे ! किं युवाभ्यां विलसितम् ?, युष्मद्भर्ता चारित्राय व्रजतीत्युक्ते विगलितमदे पतिपादमूले निपत्य वदतः क्षमस्वापराधं, एहि गेहं, नो चेदाजीविकां दत्वा व्रज। ततस्समरात्रेण निर्मितं भरतचक्रिचरित्रप्रतिबद्धं नाटकं, ततो राज्ञे निवेदितं नटैः, राज्ञोक्तं तच्छीघ्रं मत्पुरतो नाटयन्तु, ततो नटेन

राज्ञः पार्श्वात्पञ्चशतं पात्राणां सर्वालङ्कारप्रवराणां राजपुत्राणां प्राप्य आषाढभूतिः स्वयं भरतीभूय पञ्चशतपात्रैस्समं तन्नाटकं नाटयति, यथा भरतक्षेत्रं साधितं, यथा निधयः प्राप्ताः, यथा द्वादशवर्षाणि राज्याभिषेकः, यथा च भुक्ताः कामभोगाः, यथा च राज्यं पालयति श्रीभरतस्तथा तेन साभिनयं सर्वमपि सत्यचित्रेन नाटयता नृपतिः प्रवरनाटकरसेन तथा प्रतोषं नीतस्सपरिजनः, यथैतस्य मुकुटाद्यलङ्कारो दत्तः, शेषजनाभरणैश्च तत्र कनकस्तूपो जातः। तत आषाढभूतिः श्रीभरतनृप इव प्रविष्ट आदर्शगृहे, मुद्रापतनादिक्रमेण पञ्चशतपात्रैस्समं गृहीतश्रमणलिङ्गः पञ्चमौष्टिकं लोचं कृत्वा नृपं धर्मं लाभयित्वा निर्गतः. ततो हा हा!! किमेतदिति भणन्नृपप्रभृतिलोको बाहौ लगित्वा निवर्त्तयति तं, आषाढभूतिर्भणति–यदि भरतो दीक्षां गृहीत्वाऽपि विनिवृत्तस्तर्हि मामपि निवर्त्तयत, मुञ्चतान्यथा असद्ग्रहं। ततो भावं ज्ञात्वा मुक्तः। शेषाणां पञ्चशतराजपुत्राणां लज्जया कुलाभिमानेन दीक्षामगृह्णत भावतोऽपि परिणता। आषाढभूतिरपि आलोच्य प्रतिक्रम्य उग्रं तपः कृत्वा प्राप्तकेवलः सिद्धः। केचित्पुनरेवमाहुः–श्रीभरत इवादर्शगहे प्रविष्टः श्रीआषाढभूतिरङ्गुलीयकरत्नपातात्तथैव भरतवद्भूरिभावनया लब्धकेवलालोको गृहीतद्रव्यलिङ्गो राजादीन् सम्बोध्य पात्रीकृतराजसुतपञ्चशत्याः प्रदत्तव्रतो भव्यलोकमबोधयत्। अथ कुसुमपुरेऽप्यस्मिन्नाटके नर्तिते प्रव्रजितो बहुजनः, ततो नागरैस्तद्दग्धं। आषाढभूतितुल्याः कियन्तो भविष्यन्ति? तस्मात्प्रथममेवाहारादिषु लोभो न कार्यः॥ इति लोभे आषाढभूतिकथा समाप्ता॥

तदेवं चतुर्णामपि कषायाणां प्रत्येकं विपाकमभिधायाथ समुदितानां तमाह——

**सामन्नमणुचरंतस्स, कसाया जस्स उक्कडा हुंति। मन्नामि उच्छुपुप्फं व, निरत्थयं तस्स सामन्नं ॥३०१॥**

व्याख्या——श्रामण्यं-चारित्रमनुचरतो यस्य कषायाः क्रोधादय उत्कटा भवन्ति, तस्य श्रामण्यमिक्षुपुष्पमिव निरर्थकं मन्ये

इति गाथार्थः ॥ २०९ ॥ कुत एतदित्याह—

**जं अज्जियं चरित्तं, देसूणाए वि पुव्वकोडीए । तंपि कसाइयमित्तो, हारेइ नरो मुहुत्तेणं ॥ २१० ॥**

व्याख्या—पूर्वकोट्यधिकायुष्कस्याकर्मभूमिजादेस्तावद्व्रतमेव न भवति, पूर्वकोट्यायुष्कस्यापि वर्षाष्टकोपर्येव दीक्षा, अतो देशोनयाऽपि पूर्वकोट्या यदर्जितं चारित्रं-दुश्चरतपश्चरणलक्षणं, तत्सर्वमपि कश्चिन्नरः केनचित्कर्मवशेन कषायितमात्रोऽन्तर्मुहूर्तमात्रमपि कालमनन्तानुबन्धिकषायोदये वर्तमानो हारयति - विफलीकुर्यात्, तथाविधकषायतीव्रत्वे मृतः कदाचिन्नरकेष्वप्युत्पद्यत इत्यर्थः इति गाथार्थः ॥ २१० ॥ एतदेवाह—

**जइ उवसंतकसाओ, लहइ अणंतं पुणो वि पडिवायं । न हु भे वीससियव्वं, थेवे वि कसायसेसम्मि ॥२११॥**

व्याख्या—यद्युपशान्तकषायः-उपशमितसमस्तमोहप्रकृतिकः, एकादशगुणस्थानवर्ती, केवलिज्ञानचारित्रयुक्त इत्यर्थः, सोऽपि कश्चित्पुनरप्यनन्तभवभ्रमणलक्षणमनन्तं प्रतिपातं लभते, तदा भवद्भिरनुपशान्तकषायैः स्तोकेऽपि कषायशेषे न खलु विश्वसनीयं-नोपेक्षा कार्या, किन्तु सर्वथोपशमनीय एवेति गाथार्थः ॥ २११ ॥ अथ के कषायाः कं गुणं घ्नन्तीत्याह—

**पढमाणुदये जीवो, न लहइ भवसिद्धिओ वि सम्मत्तं । बीयाण देसविरइं, तइयाणुदयम्मि चारित्तं ॥३१२॥**

**सव्वे वि य अइयारा, संजलणाणं तु उदयओ हुंति । मूलच्छेज्जं पुण होइ, बारसण्हं कसायाणं ॥ ३१३ ॥**

व्याख्या—प्रथमानां-अनन्तानुबन्धिनां कषायाणामुदये, भवा—तस्मिन्नेव भवे भाविनी सिद्धिर्यस्यासौ भवसिद्धिकः, सोऽपि जीवः सम्यक्त्वं न लभते, तथा पूर्वलब्धमपि तत्समुदये वमत्येवेत्यपि द्रष्टव्यम् । द्वितीयानां अप्रत्याख्यानावरणकषायाणामुदये देश-

विरतिं न लभते, पूर्वप्रतिपन्नामपि च तां त्यजत्येवेति । तृतीयानां तु प्रत्याख्यानावरणकषायाणामुदये चारित्रं न लभते, लब्धमपि चोज्झतीति। सञ्ज्वलनानां चतुर्थकषायाणामुदये लब्धस्यापि चारित्रस्य मालिन्यहेतवो वितथाचरणरूपाः सर्वेऽपि-मूलोत्तरगुणविषया अतिचारा भवन्ति । सञ्ज्वलनोदये यथाख्यातचारित्रं तावत्सर्वथैव न लभते, शेषस्यापि सामायिकादिचारित्रचतुष्टयस्य मालिन्यजनकत्वेन देशघातिन एते इति भावः । तर्हि कथं शेषचारित्रस्य सर्वघातः ? इत्याह-द्वादशानां पुनरनन्तानुबन्ध्यप्रत्याख्यानावरणप्रत्याख्यानावरणरूपाणां कषायाणां प्रत्येकं समुदितानां वा उदये, मूलेन-अष्टमप्रायश्चित्तविशेषेण छिद्यते-ऽपनीयते यद्दोषजालं तन्मूलच्छेद्यं भवति, अशेषचारित्रघातकं दोषजातं तदुदये सम्भवत इति गाथाद्वयार्थः ॥ २१२-१३ ॥

अथ कषायनिग्रहानिग्रहफलस्य व्यक्तितो भणितुमशक्यत्वात्सामान्यतस्तदाह—

**जं पिच्छसि जियलोए, चउगइसंसारसंभवं दुक्खं । तं जाण कसायफलं, सोक्खं पुण तज्जयस्स फलं ॥२१४॥**

व्याख्या—यज्जीवलोके चतुर्गतिसंसारसम्भवं दुःखं प्रेक्षसे तत्कषायफलं जानीहि, सौख्यं पुनस्तज्जयस्य-कषायजयस्य फलमिति गाथार्थः ॥ २१४ ॥ यद्येवं तर्हि किं विधेयं कश्चेह परमार्थः ? इत्याह—

**तं वत्थुं मुत्तव्वं, जं पइ उप्पज्जए कसायऽग्गी । तं वत्थुं घित्तव्वं, जत्थोवसमो कसायाणं ॥ २१५ ॥**

**एसो सो परमत्थो, एयं तत्तं तिलोयसारमिणं । सयलदुहकारणाणं, विणिग्गहो जं कसायाणं ॥ २१६ ॥**

व्याख्या—तद्वस्तु मोक्तव्यं, यत्प्रति-यद्वस्त्वाश्रित्योत्पद्यते कषायाग्निः । तद्वस्तु ग्राह्यं, यत्रोपशमः कषायाणां । एष स परमार्थः, एतत्तत्त्वं-त्रैलोक्यसारमेतत्, सकलदुःखकारणानां विनिग्रहो यत्कषायाणामिति गाथाद्वयार्थः ॥ २१५-१६ ॥

गतं विपाकद्वारमथ कषायाणामेव रागद्वेषरूपतापरिणमनरूपमन्त्यद्वारमाह—

**माया लोभो रागो, कोहो माणो य वण्णिओ दोसो। निज्जिणसु इमे दोन्नि वि, जइ इच्छसि तं पयं परमं॥२१७**

व्याख्या—मायालोभश्चेत्येतौ द्वावपि रागः, मायासहितो लोभपरिणाम एव रागव्यपदेशभाग्भवतीत्यर्थः। क्रोधमान-योस्तु संवलितपरिणामो द्वेषो वर्णितः। ततः किम्? इत्याह—एतौ द्वावपि [रागद्वेषौ] क्रोधमानौ (?) निर्जय-तिरस्कुरु, यदि इच्छसि तत्समयप्रसिद्धं पदं-मोक्षलक्षणं स्थानं परमं-प्रधानमिति गाथार्थः॥ २१६ ॥

अथ ये रागद्वेषौ जयन्ति त एव सुभटा इत्याह—

**ससुरासुरं पि भुवणं, निज्जिणिऊण वसीकयं जेहिं। ते रागदोसमल्ले, जयंति जे ते जये सुहडा ॥ २१८**

व्याख्या—सुरा-भवनपत्यादयश्चतुर्विधा देवाः, न सुरा असुराः, नञो निषेधमात्रसूचित्वात्, सुरव्यतिरिक्ताः शेषा नारक-तिर्यङ्मनुष्याः, सह सुरासुरैर्वर्तत इति ससुरासुरं, तदशेषमपि भुवनं याभ्यां रागद्वेषाभ्यां निर्जित्य वशीकृतं-संसार एव सम्पिण्ड-विधृतं, तावेवम्भूतौ सर्वजगज्जेतारौ रागद्वेषमल्लौ ये केचिज्जिनवचनरता महासत्त्वा जयन्ति-अभिभवन्ति त एव जगति सुभटा इति गाथार्थः॥ २१८ ॥ अथ रागभेदाभिरूपयन् तेषु द्वेषे चोदाहरणान्याह—

**रागो य तत्थ तिविहो, दिट्ठिसिणेहाणुरायविसयाहिं। कुप्पवयणेसु पढमो, बीओ सुयबंधुमाईसु ॥ २१९**

**विसयपडिबंधरूवो, तइओ दोसेण सह उदाहरणा। लच्छीहरसुंदर-अरिहदत्तनदाइणो कमसो ॥ २२० ॥**

व्याख्या—तत्र तयो-रागद्वेषयोर्मध्ये रागस्तावत्त्रिविधः, कथम्? इत्याह-इहानुरागशब्दो डमरुकमणिन्यायेन पश्चादग्रतश्च

योज्यते, ततश्च विभक्तिव्यत्ययादयमर्थो–कुदृष्टिषु-शाक्यादिकुप्रवचनरूपास्वनुरागो दृष्ट्यनुरागः प्रथमः। स्नेहः–सुतबान्धवादिषु प्रतिबन्धस्तद्रूपोऽनुरागः स्नेहानुरागो द्वितीयः। विषयेषु शब्दादिषु प्रतिबन्धो-गाद्धर्यं, तद्रूपोऽनुरागो विषयानुरागस्तृतीयः। अस्मिंश्च त्रिविधे रागे द्वेषेण सहेति चतुर्थे द्वेषे लक्ष्मीधरादयश्चत्वारोऽपि क्रमेणोदाहरणानि, तद्यथा-विन्ध्यपुरे वरुणश्रेष्ठी, तस्य श्रीकान्ता-विजयानाम्न्यौ द्वे भार्ये। श्रीकान्तायां लक्ष्मीधर-सुन्दर-अर्हद्दत्तनामानस्त्रयः सुता जाताः, विजयायां नन्दनामा नन्दनोऽभूत्। तत्कुटुम्बं जिनधर्मभावितं। पुत्रा वर्द्धिताः, पित्रा परिणायिताः। इतश्चानादिभवपुरे मोहनृपः स्वास्थानसंस्थः चिन्तापरो यावज्जातस्तावत्कुदृष्टिराग-स्नेहराग-कामराग-द्वेषगजनामानश्चत्वारोऽपि पुत्रा आगत्य प्राहुः–तात! का ते चिन्ताऽस्मासु सत्सु?, मोहः प्राह–हे वत्साः! वैरी चारित्रधर्मराजस्तेन वरुणश्रेष्ठिकुटुम्बं वासितम्। तत्र चत्वारोऽपि श्रेष्ठिसुता अद्यापि सम्यग्वासिता न सन्ति, अवसरोऽयमात्मनां। तच्छ्रुत्वा चत्वारोऽपि मोहसुता धाविताः, मेलितो दृष्टिरागेण लक्ष्मीधरस्य त्रिदण्डी, तेनावर्जितो मन्त्र-तन्त्रादिभिः कुमारः प्रथमः। स्नेहरागेण सञ्जातपुत्रस्य सुन्दरस्य कारितः पुत्रलालनादिव्यापारस्त्यक्तधर्मकृत्यो जातो द्वितीयः कुमारः। विषयरागेणार्हद्दत्तस्य भार्यावशित्वे कारिते तद्वचसा पातितो महाचिन्तायां, जातो धर्मपराङ्मुखस्तृतीयोऽपि कुमारः। द्वेषगजेन नन्दस्य शिक्षितं कलहकरणं पित्रादिष्वपि, कारितं दुर्भाष्यभाषणं, त्याजितो जिनधर्मपरिणामाच्चतुर्थोऽपि कुमारः। ततो वरुणश्रेष्ठी सुतान् धर्मविमुखान् वीक्ष्य दुःखितः साधूनां पार्श्वे प्रव्रज्य सुगतिभागभवत्। सुता रागद्वेषैर्व्याप्ताश्चत्वारोऽपि मारणान्तिकं दुःखं प्राप्ताः दुर्गतिष्वनन्तं भवं भ्रमिष्यन्ति, प्राप्स्यन्त्यनन्तानि दुःखानि, तानि च केनापि सर्वायुष्केण वक्तुं न पार्यन्त इति।

"ता जाणिऊण एयं, अप्पमत्ता निज्जिणेह दोवि इमे। रागद्दोसे दुज्जय-सत्तू अइविरसपरिणामे ॥ ९ ॥"

इति लक्ष्मीधरादीनां कथानकं समाप्तम् ॥

यतश्चेहामुत्र चानन्तदुःखदायकौ रागद्वेषावत आह—

**सत्तू विसं पिसाओ, वेयालो हुयवहो य पज्जलिओ। तं न कुणइ जं कुविया, कुणंति रागाइणो देहे ॥३२**

व्याख्या—शत्रुर्विषं पिशाचो वेतालः प्रज्वलितो हुतवहश्च तद्दुःखं देहे न करोति, यत्कुपिता–बाहुल्यं प्राप्ता रागादय कुर्वन्ति । शत्रुप्रभृतयो ह्यैहिकदुःखमात्रप्रदानेऽपि सन्दिग्धाः, रागादयस्तु परभवेऽप्यसङ्ख्यदुःखप्रदाः, अतस्त एव यत्नतो जेतव्य इति भावः। इति गाथार्थः ॥ ३२१ ॥ अथ रागादिविपाकस्य तज्जयस्य च फलमनन्तं पश्यन् सङ्क्षेपतस्तदाह—

**जो रागाईण वसे, वसम्मि सो सयलदुक्खाणं । जस्स वसे रागाई, तस्स वसे सयलसुक्खाइं ॥ ३२२ ॥**

व्याख्या—यः प्राणी रागादीनां वशे, स निःशेषदुःखानां वशग इति मन्तव्यम् । यस्य तु वशे रागादयस्तस्य सर्वाण्यपि सौख्यानि वशवर्तीन्येवेति त एव जेतव्या इति गाथार्थः ॥ ३२२ ॥

इत्थं कषायान् विषमान् विभाव्य, प्रोज्झ्य प्रमादं प्रशमं श्रयध्वम् ।
यथा शिवेऽनन्तसुखे सुखेन, लक्ष्मीं लभध्वं लघु देहभाजः! ॥ ९ ॥

इति पुष्पमालावृत्तौ भावनाऽधिकारे कषायनिग्रहलक्षणं प्रतिद्वारं समाप्तम् ॥ ९ ॥

अथ गुरुकुलवासद्वारं विभणिषुः पूर्वद्वारेण सह सम्बन्धगर्भां गाथामाह—

**पुव्वुत्तगुणा सव्वे, दंसणचारित्तसुद्धिमाईया । होंति गुरुसेवणच्चिय, गुरुकुलवासं अओ वुच्छं ॥ ३२३ ॥**

व्याख्या—एवं सम्यक्त्वचारित्रादिकषायनिग्रहान्तेषु द्वारेषु तच्छुद्धयादयः कषायजयान्ता गुणा उक्तास्ते सर्वेऽपि गुरुसेवाप्रवृत्तस्यैव भवन्ति, तदुपदेशादेव तत्परिज्ञानादित्यतोऽनन्तरं गुरुकुलवासं वक्ष्य इति गाथार्थः ॥ २२३ ॥

अथ प्रस्तुतद्वारं भणिष्यमाणार्थसङ्ग्रहमाह—

**को य गुरू? को सीसो?, के य गुणा? गुरुकुले वसंतस्स । तप्पडिवक्खे दोसा, भणामि लेसेण तत्थ गुरुं ॥२२४॥**

व्याख्या—को गुरुः?- कीदृग्गुणयुक्तो गुरुर्भवतीति तावत्प्रथमं वक्तव्यम् । कश्च शिष्यः? इति वाच्यम् । के च गुणा गुरुकुले वसतः शिष्यस्येति वाच्यम् । तस्य च गुरुकुलवासे वसनस्य प्रतिपक्षे तत्परित्यागरूपे ये दोषाः शिष्यस्य भवन्ति तानपि भणिष्यामि । तत्र तेषु यथोक्ताधिकारेषु मध्ये लेशेन-सङ्क्षेपतस्तद्गुणनिरूपणद्वारेण गुरुं तावद्भणामीति गाथार्थः ॥२२४॥ तदेवाह—

**विहिपडिवन्नचरित्तो, गीयत्थो वच्छलो सुसीलो य । सेवियगुरुकुलवासो, अणुयत्तिपरो गुरू भणिओ ॥२२५॥**

व्याख्या—विधिना-शुभमुहूर्त्तकरणादिना प्रतिपन्नचारित्रः, गीतार्थः- समस्तसूत्रार्थवेत्ता, वत्सलः—सर्वजीवेषु हितः, सुशीलश्च, सेवितगुरुकुलवासः, शिष्यजनादेरनुवृत्तिपरो गुरुर्भणित इति गाथार्थः ॥ २२५ ॥ भङ्ग्यन्तरेण गुरुगुणानेवाह—

**[1]देस[2]कुल[3]जाइ[4]रूवी, [5]संघयण[6]धिईजुओ [7]अणासंसी । [8]अविकत्थणो [9]अमाई, [10]थिरपरिवाडी [11]गहियवक्को ॥२२६॥**

**[12]जियपरिसो [13]जियनिद्दो, [14]मज्झत्थो [15]देस[16]काल[17]भावण्णू । [18]आसन्नलद्धपइभो, [19]नाणाविहदेसभासण्णू ॥२२७॥**

**पंचविहे आयारे, [20]जुत्तो सुत्तऽत्थतदुभय[24]विहिण्णू । [25]आहरण[27]हेउ[28]उवणय-[29]नयनिउणो [30]गाहणाकुसलो ॥ २२८ ॥**

**[31]ससमय[32]परसमयविऊ, [33]गंभीरो [34]दित्तिमं [35]सिवो [36]सोमो । गुणसयकलिओ एसो, पवयणउवएसओ य गुरू ॥२२९॥**

व्याख्या—"देस"त्ति, अत्र सर्वत्र सूचामात्रत्वात्सूत्रस्यार्यदेशोत्पन्न एव गुरुः स्यादित्यर्थः१,तथा "कुल"त्ति पितृपक्षशुद्धः२, "जाइ"त्ति मातृपक्षशुद्धः ३, तथा रूपवान्—प्रतिरूपः ४, संहननेन-विशिष्टशरीरसामर्थ्येन युक्तः ५, धृत्या-संयमादिनिर्वाहणप्रत्यलमनोबलेन युक्तः६, धर्मकथादिप्रवृत्तौ वस्त्रभोजनाद्याशंसाविरहितः७, स्वल्पेऽपि केनचिदपराद्धे तुच्छतया पुनःपुनस्तदुत्कीर्त्तनं विकत्थनं, तद्रहितः८, मायाविनिर्मुक्तः९, स्थिरपरिपाटिः- अविस्मृतसूत्रार्थः १०, गृहीतवाक्यः-आदेयवचनः११, जितपरिषत्-महत्यामपि सभायां क्षोभरहितः१२, जितनिद्रः१३, मध्यस्थो-रागद्वेषरहितः१४, देशौचित्येन यः प्रवर्त्तते स देशज्ञः१५, एवं कालज्ञः१६, भावः— पराभिप्रायस्तदौचित्येन प्रवर्त्तको भावज्ञः१७, आसन्ना—शीघ्रैव लब्धा—कर्मक्षयोपशमेनाविर्भूता प्रतिभा-परतीर्थिकादीनां उत्तरप्रदानशक्तिर्यस्येत्यासन्नलब्धप्रतिभः१८, नानाविधदेशभाषाकुशलः१९,ज्ञानदर्शनचारित्रतपोवीर्याचाररूपपञ्चविधाचारयुक्तः२४, सूत्रार्थतदुभयविधिज्ञः२५, आहरणं-दृष्टान्तः२६, साध्याऽगमको हेतुः, कृतकत्वादिः२७, दृष्टान्तदर्शितस्यार्थस्य प्रकृते योजना उपनयः२८, नया नैगमादयः, एतेषु सर्वेष्वपि निपुणः२९, ग्राहणाकुशलः-प्रतिपादकशक्तियुक्तः३०, स्वसमयवेत्ता ३१, परसमयवेत्ता ३२, गम्भीरः—परैरलब्धमध्यः३३, दीप्तिमान्-कुतीर्थिकादीनामसह्यप्रतिभः३४, विद्यादिसामर्थ्यादुपद्रवशमकत्वेन शिवहेतुत्वाच्छिवः३५, सौम्यो-ऽरौद्रप्रकृतिः३६, इति षट्त्रिंशद्गुणोपेतः, उपलक्षणत्वाच्चामीषामपरैरपि गुणशतैः कलितः, एष प्रवचनोपदेशकश्च गुरुर्भवतीति गाथाचतुष्टयार्थः ॥ ३२६–३२९ ॥ पुनर्भङ्ग्यन्तरेण गुरोः षट्त्रिंशद्गुणानाह—

**अट्ठविहा गणिसंपय, आयाराई चउविहिक्केक्का। चउहा विणयपवित्ती, छत्तीसगुणा इमे गुरुणो॥३३०॥**

व्याख्या—गणोऽस्यास्तीति गणी-आचार्यस्तस्य सम्पत्-समृद्धिः, सा चेहाचारादिभेदादष्टविधा, तद्यथा—आचारसम्पत् १,

श्रुतसम्पत् २, शरीरसम्पत् ३, वचनसम्पत् ४, वाचनासम्पत् ५, मतिसम्पत् ६, प्रयोगमतिसम्पत् ७, सङ्ग्रहपरिज्ञासम्पत् ८। तथा चोक्तं

"आयारसुअसरीरे, वयणे वायणमई पओगमई। एएसु संपया खलु, अट्ठमिया संगहपरिण्णा ॥ १ ॥

एतासु चैकैका चतुर्विधा, तत्र तावदाचारसम्पदित्थं चतुर्द्धा–नित्य चारित्रोद्युक्तता १, जात्यादिमदमुक्तत्वं २, अनियतविहारस्वरूपता ३, निर्विकारता ४ ॥ अथ श्रुतसम्पच्चतुर्द्धा–बहुश्रुतता १, परिचितसूत्रता २, घोषविशुद्धिकरणता ३, उदात्तानुदात्तादिस्वरविशुद्धिविधायिता ४। अथ शरीरसम्पच्चतुर्द्धा–लक्षणप्रमाणोपेतदैर्घ्यविस्तारयुक्तता १, सम्पूर्णाहीनसर्वाङ्गत्वेन लज्जयितुमनर्होऽशक्यो वा अलज्जनीयस्तद्भावोऽलज्जनीयता २, परिपूर्णेन्द्रियता ३, स्थिरसंहननता चेति ४। अथ वचनसम्पच्चतुर्द्धा–आदेयवचनता १, मधुरवचनता २, रागाद्यनिश्रितवचनता ३, परिस्फुटासन्दिग्धवचनता ४। अथ वाचनासम्पच्चतुर्द्धा–शिष्याणां यथायोग्यं सूत्रस्योद्देशनं १, एवं समुद्देशनं २, पूर्वप्रदत्तसूत्रालापकान् सम्यक् परिणमय्य ततोऽपरालापकानां वाचना ३, पूर्वापरसाङ्गत्येन विमृशतः प्ररूपयतो वा सूत्राभिधेयस्य सम्यग्निर्वाहणाना ४। अथ मतिसम्पच्चतुर्द्धा–अवग्रह १, ईहा २, अवाय ३ धारणा ४ भेदात्, तत्स्वरूपं च–"अत्थाणं उग्गहणम्मि, उग्गहो तह वियारणे ईहा। ववसायम्मि अवाओ, धरणं पुण धारणं विंति ॥१॥"
इत्यादि। अथ प्रयोगमतिसम्पच्चतुर्द्धा–वादादिव्यापारकाले किममुं वादिनं जेतुं मम शक्तिरस्ति न वा ? इत्याद्यात्मस्वरूपपर्यालोचनं १, किमयं वादी साङ्ख्यः सौगतोऽन्यो वा ? प्रतिभादिमानितरो वा इत्यादि पुरुषपरिभावनं २, किमिदं क्षेत्रं साधुभिर्भावितमभावितं वा? इत्यादि विमर्शनं ३, किमिदमाहारादिवस्तु मम हितं न वा? इत्यादि विचारणं चेति ४। सङ्ग्रहोपसम्पदपि चतुर्द्धा–बालग्लानबहुश्रुतादिनिर्वाहयोग्यक्षेत्रग्रहणं १, वर्षासु निषद्यादिमालिन्यजन्तुघातादिपरिहाराय पीठफलकोपादानम् २, यथासमयमेव

स्वाध्यायप्रत्युपेक्षणाभिक्षाटनोपधिसमुत्पादनं ३, प्रव्राजकाध्यापकरत्नाधिकादीनामुपधिवहनविश्रामणाभ्युत्थानादिरूपा चतुर्थी ४ तदेवं दर्शिता: प्रत्येकं चतुर्विधा अष्टावपि गणिसम्पद:। अथ चतुर्विधा विनयप्रतिपत्ति:, तद्यथा-संयमतप:प्रभृतीनामाचरणकारापणस्थिरीकरणादिरूप आचारविनय:१, सूत्रवाचनव्याख्यानादिरूप: श्रुतविनय:२, मिथ्यादृष्ट्यादीनां सम्यक्त्वधर्मादिस्वीकारणादिलक्षणो विक्षेपणाविनय:३, कषायविषयादिभिर्दुष्टस्य तद्भावनिवर्त्तनादिरूपो दोषनिर्घातनाविनय:४। तदेवमेते सर्वेऽपि षट्त्रिंशद् गुणा गुरोर्भवन्तीति गाथार्थ: ॥ ३३० ॥

नन्वेते सम्पूर्णा गुणा: साम्प्रतं न सम्भवन्ति, तदसम्भवे च गुरोर्व्यवच्छित्तिप्रसङ्ग इत्याशङ्क्याह—

**कालाइदोसवसओ, एत्तो एक्काइगुणविहीणो वि। होइ गुरू गीयत्थो, उज्जुत्तो सारणाईसु ॥ ३३१ ॥**

व्याख्या—कालादिदोषवशत:, आदिशब्दात्क्षेत्रादिपरिग्रह:, इत: षट्त्रिंशद्गुणसमुदायादेकद्वित्र्यादिगुणैर्विहीनोऽपि गुरुर्भवति, यदि पुनर्गीतार्थ उद्युक्तश्च सारणादिष्वित्येतद्गुणद्वयं गुरोर्विशेषेणान्वेषणीयम्। सारणादीनां चैष विशेष:-"पम्हुट्ठे सारणा वुत्ता, अणायारस्स वारणा॥ चुक्काणं चोयणा वुत्ता, निट्ठुरं पडिचोयणा ॥ १ ॥" इति गाथार्थ: ॥ ३३१ ॥

अथ सारणाद्यभावे दोषानाह—

**जीहाए विलिहिंतो, न भद्दओ जत्थ सारणा नत्थि। दंडेण वि ताडंतो, भद्दओ सारणा जत्थ ॥३३२॥**

व्याख्या—अतिवत्सलतया गुरु: शिष्यं जिह्वयाऽपि लेढि-अवलेढि, शेषवात्सल्यातिशयोक्ति परमेवेदं विशेषणं, सोऽप्येवम्भूतो गुरुर्न भद्रको-न शोभनो, यत्र गुरौ सारणा नास्ति, उपलक्षणं चेदं वारणादिनां। दण्डेनापि ताडयन् स एव गुरुर्भद्रको, यत्र

सारणादय इति गाथार्थः ॥ ३३२ ॥ कः पुनरसारणायामत्र गुरोर्दोषः ? इत्याह—

**जह सीसाइं निकिंतइ, कोई सरणागयाण जंतूणं । तह गच्छमसारंतो, गुरू वि सुत्ते जओ भणियं ॥३३३॥**

व्याख्या-यथा कश्चित्पापकर्मा शरणागतानामपि जन्तूनां शिरांसि निकृन्तति-छिनत्ति, तथा-तेनैव प्रकारेण गुरुरपि संसार-भीत्या शरणमुपागतं गच्छं-साधुसाध्वीसमुदायरूपमसारयन् ज्ञानदर्शनचारित्ररूपतच्छिरःकर्त्तको द्रष्टव्यः । द्रव्यशीर्षे हि कर्तिते एकभविकं क्षणिकमेव दुःखं, गुरुणा तु दोषेभ्योऽनिवर्त्तितानां प्रशिष्याणां ज्ञानादिरूपे भावशिरसि कर्तितेऽनन्तभविका निरवधिरेव दुःखप्राप्तिः, सूत्रे-आगमेऽपि यतो भणितमिति गाथार्थः ॥ ३३३ ॥ किं तदित्याह—

**जणणीए अनिसिद्धो, निहओ तिलहारओ पसंगेणं । जणणी वि थणच्छेयं, पत्ता अनिवारयंती उ ॥३३४॥**

**इय अनिवारियदोसा, सीसा संसारसागरमुविंति । विणियत्तपसंगा उण, कुणंति संसारवुच्छेयं ॥३३५॥**

व्याख्या — जनन्या अनिषिद्धो निहतो-निपातितस्तिलहारकः प्रसङ्गेन जनन्यपि चानिवारयन्ती स्तनच्छेदं प्राप्ता । इत्यनि-वारितदोषाः शिष्याः संसारसागरं प्राप्नुवन्ति, विनिवृत्तप्रसङ्गाः पुनः कुर्वन्ति संसारोच्छेदमित्यक्षरार्थो, भावार्थः किञ्चिदुच्यते—

वसन्तपुरवासिन्या, एकस्या विधवस्त्रियः । पुत्रो बाल्ये कृतस्नानः, स्विन्नाङ्गो निरगाद् गृहात् ॥ १ ॥ कस्यचिद्वणिजो हट्ट-द्वारेऽसौ तिलराशिषु । आरुरोह पतितो लग्ना-स्तदङ्गे बहवस्तिलाः ॥ २ ॥ ततो गेहे गतस्यास्य, माता तानादधे तिलान् । एवमेव द्वितीयेऽपि, दिनेऽसावकरोत्ततः ॥ ३ ॥ अन्यथाऽपि गृहीतास्ते, तथैवेति दिनं प्रति । अन्यान्यवणिजो धान्या-न्याहरेत्सुख-

मुष्टिभिः ॥ ४ ॥ निवारयति नो माता, तुष्टा तद्बहुमन्यते । प्रसङ्गादलगच्चौर्ये, स्थूलेऽप्येष ततोऽन्यदा ॥ ५ ॥ प्राप्तः स राजपुरुषैः, सलोप्त्रः प्राप्तयौवनः । वधस्थाने समानीत–स्तान्प्रति प्राह च स्वयम् ॥ ६ ॥ एकवारं ममाम्बां मे, मेलयन्त्विति तैस्तथा । प्रतिपन्नं समासन्ना, समानीता जनन्यपि ॥ ७ ॥ तेन स्वमातुस्तत्कालं, कृपाण्या कर्त्तितौ स्तनौ । जनो हाहारवं कृत्वा–ऽपृच्छदेनं ततोऽवदत् ॥ ८ ॥ एषा हेतुरनर्थाना–मेतेषां मेऽभवद्यतः । न्यवारिष्यन्माकरिष्य, चौर्यं बाल्येऽधुनाऽप्यदः ॥ ९ ॥ जनैस्सत्यमिदं ज्ञात–मेवं नाशयति द्वयं । निजं शिष्यांश्च दोषेभ्यो, गुरुरप्यनिवारयन् ॥ १० ॥ यदि यत्र गच्छे सारणादयो न दृश्यन्ते तत्र किं कर्त्तव्यं ? इत्याह–

जहिं नत्थि सारणवारणा, य चोयणपडिचोयणा य गच्छम्मि । सो य अगच्छो गच्छो, संजमकामीहिं मुत्तव्वो २२६

व्याख्या–यत्र गच्छे उक्तस्वरूपाः सारणादयो न भवन्ति स गच्छोऽपि गच्छकार्याकरणादगच्छ एव, ततः संयमाभिलाषिभिर्मोक्तव्यः । यत्र च सारणादयः स एवाश्रयणीय इति गाथार्थः ॥ २२६ ॥ ततः किम् ? इत्याह—

अणभिओगेण तम्हा, अभिओगेण य विणीयइयरे य । जच्चियरतुरंगा इव, वारेअव्वा अकज्जेसु ॥२२७॥

व्याख्या—तस्माद्गुरुणा अकार्येषु प्रवर्तमानाः शिष्या विनीतास्तावदनभियोगेन–कोमलवचनादिरूपेण निवारणीयाः, इतरे–अविनीतास्त्वभियोगेन–निष्ठुरवचनादिरूपेण निवेद्धाः । दृष्टान्तमाह–जात्येतरतुरङ्गा इव, यथा जात्यतुरङ्गा वल्गासञ्चारादिसुकुमारोपायेनाप्युन्मार्गान्निवर्त्यन्ते, इतरे–दुष्टाश्वाः कशाघातादिनिष्ठुरोपायेन, एवं शिष्या अपीति गाथार्थः ॥ २२७ ॥

अथ गच्छस्य सारणाद्यप्रदाने गुरोर्दोषं तत्प्रदाने गुणं चाह—

गच्छं तु उवेहिंतो, कुव्वइ दीहं भवं विहीए उ। पालंतो पुण सिज्झइ, तइयभवे भगवई सिद्धं ॥२३८॥

व्याख्या–सारणाद्यप्रदानेन गच्छमुपेक्षमाणो गुरुर्दीर्घं भवं करोति, विधिना पुनस्तं पालयंस्तृतीयभवे सिध्यति, भगवत्यां–पञ्चमाङ्गे सिद्धमिदम्, यदाह–"आयरियउवज्झाएणं भंते! अगिलाणीए गणं संगिण्हमाणे उवगिण्हमाणे कईहिं भवग्गहणेहिं सिज्झइ? जाव सव्वदुक्खाणमंतं करेइ? गोयमा! अत्थेगइया तेणं चेव भवग्गहणेणं सिज्झइ जाव अंतं करेइ, तच्चं पुण भवग्गहणं नाइक्कमइ" अग्लान्या-अनिर्विण्णतयेत्यर्थः इति गाथार्थः ॥२३८॥

उक्तं गुरुगुणद्वारं, अथ गुणद्वारेण शिष्यस्वरूपमाह–

गुरुचित्तविऊ दक्खा, उवसंता अमुइणो कुलवहुव्व। विणयरया य कुलीणा, होंति सुसीसा गुरुजणस्स २३९

व्याख्या–गुरुचित्तविदोऽत एव दक्षाः, उपशान्ताः, यथा कुलवधूः स्वभर्त्रा आक्रुष्टा प्रहता वा न कथञ्चित्तं मुञ्चत्येवं सुशिष्या अपि "अमुइणो" त्ति अमोचकाः, न कथञ्चिद्गुरुं मुञ्चन्तीत्यर्थः। गुरुजनस्य विनयरताश्च, तथा कुलीनाः, एवंविधाः सुशिष्या भवन्तीति गाथार्थः ॥ २३९ ॥ पुनरपि सुशिष्यः किं कुर्यादित्याह–

आगारिंगियकुसलं, जइ सेयं वायसं वए पुज्जा। तहवि य सिं न विकूडे, विरहम्मि य कारणं पुच्छे २४०

व्याख्या–आकारः–प्रस्थानादिभावसूचको दिगवलोकनादिः, इङ्गितं तु प्रवृत्तिनिवृत्तिसूचकमीषद्भ्रुशिरःकम्पादि, तयोः कुशलं शिष्यं यदि कथञ्चिद्विनयपरीक्षादिनिमित्तं पूज्या-गुरवः श्वेतं वायसं पश्येत्यादि वदेयुस्तथापि 'सिं'ति एतेषां पूज्यानां वचो न विकूटयेत्,

यथा-किमाचार्य ! न पश्यसि चक्षुर्भ्यां ? यत्कृष्णमप्यमुं वायसं श्वेतं ब्रवीषीत्यादि न विकत्थयेत्, किन्तु तथैव प्रतिपद्येत । पुनः कि
कुर्यादित्याह–विरहे-एकान्ते प्राप्ते सति तच्छ्वेतत्वाभिधाने कारणं पृच्छेद्गुरुं सुशिष्य इति गाथार्थः ॥ २५० ॥

दृष्टान्तपूर्वं सुशिष्यस्योपदेशमाह–

निवपुच्छिएण गुरुणा, भणिओ गंगा कओमुही वहइ ? । संपाइयवं सीसो, जह तह सव्वत्थ कायव्वं २५

व्याख्या–नृपपृष्टेन गुरुणा गङ्गानदी किंमुखी वहतीति भणितः शिष्यो यथा सम्यग्विनयपूर्वकं सर्वं सम्पादितवान् कृतवांस्तथ
सर्वेष्वपि प्रयोजनेषु सुशिष्येण कर्त्तव्यमित्यक्षरार्थः । भावार्थस्तु यथा–

प्राभवंत पुरा जल्पो, राज्ञस्त्वेव कस्यचित् । राजा विनीतांस्तत्राह, राजपुत्रान् गुरुर्मुनीन् ॥१॥ परीक्षाय ततो राज्ञा–ऽऽज्ञापिते
राजपुत्रकः । निवेदय निरीक्ष्य त्वं, गङ्गा वहति किम्मुखी ? ॥ २ ॥ आदावेव च तेनोक्तं, प्रेक्षणीयं किमत्र यत् । सुप्रतीतमिदं पूर्वा
भिमुख्येव वहत्यसौ ॥ ३ ॥ ततः कथञ्चिन्महता, कष्टेन प्रेषितोऽप्ययं । अपान्तरालादागत्य, प्रोक्तवानिति तद्यथा ॥४॥ आगतोऽ
द्भुतं राजन् !, गत्वा तत्र निरीक्ष्य च । न चलेन्मद्वचः पूर्वा–भिमुख्येव वहत्यसौ ॥ ५ ॥ ततश्च गुरुणा साधुः, प्रेषितो नवदीक्षितः
सोऽप्यचिन्तयदित्येवं–ह्रिदन्ति गुरवोऽप्यदः ॥ ६ ॥ यत्पूर्वाभिमुखी गङ्गा, वहतीह पुरे परं । केनचित्कारणेनेह, भाव्यमेवं विमृश्य
च ॥ ७ ॥ जानन्नपि गतो गङ्गां, स्वतश्च परतश्च सः । विशेषतो विनिश्चित्य, गुरुभ्योऽसौ न्यवेदयत् ॥ ८ ॥ यथा-मया तावदिदं
ज्ञातं यद्युत पूर्वगा । गङ्गा तत्त्वं पुनः पूज्याः, जानन्तीह महाशयाः ॥९॥ उभयोरपि चेष्टेयं, राज्ञः प्रच्छन्नपूरुषैः । निवेदिता भूमिभुजे
प्रतिपन्नमनेन च ॥१०॥ साधूनां विनयः कामं, प्रतिबुद्धश्च शुद्धधीः । तत्सर्वमन्येनाऽप्येवं, कार्यं विनयपूर्वकम् ॥११॥ इति गाथार्थः

॥२४१॥ सुशिष्यमुक्त्वा तद्व्यतिरेकमाह—

नियगुणगारवमत्तो, थद्धो विणयं न कुव्वइ गुरूणं । तुच्छो अवण्णवाई, गुरुपडिणीओ न सो सीसो २४२

नेच्छइ य सारणाई, सारिज्जंतो अ कुप्पइ स पावो । उवएसं पि न अरिहइ, दूरे सीसत्तणं तस्स ॥ २४३ ॥

व्याख्या— अहं गुणवानिति निजगुणगौरवमत्तोऽत एव स्तब्धोऽनम्रोऽत एव च विनयं न करोति गुरूणां, तथा तुच्छो गुरोरप्यवर्णवादी, अत एव गुरुप्रत्यनीकः, स एवंविधो न सुशिष्यः । तथा यो नेच्छति गुरुणा दीयमानान् सारणादीन् उपकरूपान्, ततश्च सार्यमाणो गुरुं प्रति कुप्यति स पापः—पापवान्, उपदेश—साध्वाचारादिकथनलक्षणमपि नार्हति, दूरे पुनस्तस्य शिष्यत्वं, उपदेशदानमात्रेऽपि कुप्यमानत्वादिति गाथाद्वयार्थः ॥ २४२-२४३ ॥ तर्हि तस्य किं विधेयम् ? इत्याह—

छंदेण गओ छंदेण, आगओ चिट्ठिओ य छंदेण । छंदे अवट्टमाणो, सीसो छंदेण मुत्तव्वो ॥ २४४ ॥

व्याख्या—यः छन्देन—स्वाभिप्रायेण गुरुमनापृच्छ्यैव कस्मिंश्चित्स्वाभिमते प्रयोजने गतः, छन्देनैव चागतः, छन्देनैव चोपाश्रय एव स्थितः, उपलक्षणत्वादन्या अपि क्रियाः स्वाभिप्रायेणैव करोति, स एवम्भूतो गुरूणां छन्दे—ऽभिप्रायेऽवर्त्तमानः शिष्यो गुरुभिश्छन्देन—स्वाभिप्रायेणैव मोक्तव्यः—परिहर्त्तव्यः, अन्यथा शटितपत्रन्यायेनान्येषामपि विनाश आपद्यते इति गाथार्थः ॥ २४४ ॥

समर्थितं शिष्यद्वारं, अथ गुरुकुलवाससेवागुणद्वारमभिधित्सुराह—

नाणस्स होइ भागी, थिरयरओ दंसणे चरित्ते य । धन्ना आवकहाए, गुरुकुलवासं न मुंचंति ॥ २४५ ॥

व्याख्या–गुरुकुलवाससेवी ज्ञानस्य भागी–भाजनं भवति, तथा दर्शने चारित्रे च स्थिरतरको-ऽतिस्थिरो भवति, अतो धन्या यावत्कथया-यावज्जीविकया गुरुकुलवासं न मुञ्चन्तीति गाथार्थः ॥ २४५ ॥

ननु गुरुकुलवासे वसतां शिष्याणां गुरोः प्रेरणावाक्यानि दुःखमुत्पादयेयुस्तत्कथमसौ प्रशस्यः ? इत्याह—

पढमं चिय गुरुवयणं, मुम्मुरजलणोव्व डहइ भन्नंतं। परिणामे पुण तं चिय, मुणालदलसीयलं होइ ॥ २४६ ॥

व्याख्या–प्रथममेव तावद्गुरुवचनं मुर्मुरज्वलन इव दहति, दाघसदृशदुःखजनकत्वात्, शिष्यार्थं भण्यमानं। परिणामे-विपाके पुनस्तदेव गुरुवचनं मृणालदवलच्छीतलं भवति, तदेव सुखसम्पादकत्वादिति गाथार्थः ॥ २४६ ॥

किं गुरुकुलवाससेवायां केवलमात्मोपकार एव ? परोपकारोऽपीत्याह—

तह सेवंति सउन्ना, गुरुकुलवासं जहा गुरूण पि। नित्थारकारणं चिय, पंथगसाहुव्व जायंति ॥ २४७ ॥

व्याख्या — सपुण्याः–पुण्यवन्तस्तथा-तेन प्रकारेण गुरुकुलवासं सेवन्ते, यथा क्वचित्कथञ्चिदमार्गसेविनां गुरूणामपि निस्तार-कारणमेव जायन्ते, पन्थकसाधुवदिति गाथाऽक्षरार्थः ॥ २४७ ॥

पन्थककथानकमेवम् -श्रीद्वारवत्यां नगर्यां जगत्प्रसिद्धो नारायणप्रभुः, तत्र सार्थवाहभार्यास्थावच्चानाम्न्या गाथापतिपत्न्याः पुत्रस्थावच्चापुत्र इति नाम्ना विख्यातो धनधान्यकनकरत्नसमृद्ध्या च। क्रमेण प्राप्ततारुण्येन तेन परिणीतद्वात्रिंशत्कन्यकाभिर्दिव्यान् भोगान् भुञ्जता रैवतकाचले श्रीनेमिस्वामिसमवसरणं श्रुत्वा वन्दनार्थं सपरिकरेण गतम्। तत्र च सरसां मधुरां भगवद्वाणीं निशम्य प्राप्तसंवेगेन स्वजनन्या निवेदितः स्वाभिप्रायः, ततो जनन्या सुतनिष्क्रमणमहोत्सवार्थं तदा चामरमुकुटादीन्याभरणानि राज्ञः पार्श्वे

घाषितानि, तन्निशम्य ससैन्यस्तद्गृहमागतो राजा, बहुशो निवारितोऽपि थावच्चापुत्रो न स्नेहवशं गमितः, ततः कृष्णेन स्वपुरमध्ये
पटहो वादितः, अन्योऽपि यः कश्चिदनेन सह दीक्षां गृह्णाति तस्यापि निष्क्रमणमहोत्सवमहं कारयिष्यामि, तत्स्त्रीनिर्वाहं च ददामि,
ततस्थावच्चापुत्रो राजेश्वरसार्थवाहप्रमुखराजसहस्रयुतः श्रीकृष्णकारितमहोत्सवे श्रीनेमिनाथमूले प्रव्रज्यामग्रहीत् । ततो द्विविधशिक्षाशि-
क्षितः पठितचतुर्दशपूर्वः श्रमणसहस्रपरिवृतस्थावच्चापुत्रो महामुनिः श्रीनेमिनाथाज्ञया महीमण्डलं स्वपादैः पवित्रयन् शैलकपुरं प्राप्तः, तत्र
शैलकनामा नृपतिः पन्थकप्रमुखप्रवरपञ्चशतमन्त्रिसहितः श्रावकधर्मे नियोजितः, ततः सौगन्धिकनगरे शुकनामा (परिव्राजकः) प्रतिबोध्य
दीक्षितः । स द्विविधशिक्षाशिक्षितः क्रमेण चतुर्दशपूर्वधरो जातः । अन्यदा सशुकस्थावच्चापुत्रः पुनः शैलकपुरं प्राप्तस्तदा शैलकनृप-
पञ्चशतपरिकरो मुण्डकाभिधानं सुतं राज्ये संस्थाप्य निष्क्रान्तः । कालेन जातो गीतार्थः । अस्मिन्समये साधुसहस्रयुतः सशुकस्थावच्चा-
पुत्रो महामुनिः श्रीपुण्डरीकगिरौ अनशनं प्रपद्य सिद्धः । ततः शैलकमुनिः स्थापितस्सूरिपदे । अन्यदा जातोऽस्य व्याधिरकारि सुतेन
चिकित्सा, पश्चात्प्रगुणीभूतोऽपि रसादिलाम्पट्याच्छीतलविहारितां जगाम । पन्थकमेकं विहाय त्यक्तः शेषशिष्यैः । अन्यदा चातुर्मासिकं
क्षामयता गाढनिद्राप्रसुप्तः सङ्घट्टितस्तेन सूरिश्चरणयोः । ततोऽसावकाण्डनिद्राव्यपगमादुग्रकोपस्तं प्रत्याह–क एष दुरात्मा मां प्रेरयति ?,
शिष्योऽब्रवीत्-भगवन् ! पन्थकसाधुरहं चातुर्मासिकं क्षामयामि, ततः पादयोर्लग्नो, न पुनरेवं करिष्ये, क्षमध्वमेकमपराधं मन्दभाग्यस्य मे,
'मिथ्यादुष्कृत' मिति वदन् पतितः पुनः पादयोः । ततोऽहो !! अस्य प्रशमो गुरुभक्तिः कृतज्ञता च मम तु प्रमादातिरेको निर्विवेकत्वं
चेति जातसंवेगोत्कर्षस्सूरिराह–महात्मन् ! इच्छामि वैयावृत्त्यमुद्धृतोऽहं भवता भवगर्तापातादिति । । ततः प्रभृत्युद्यतविहारेण बहु-
कालं विहृत्य पश्चाच्छत्रुञ्जये गिरौ पञ्चशतसाधुपरिवारः सिद्धः शैलकाचार्य इति । एवं गुरुकुलवासं सेवमानाः केऽप्युत्तमप्रकृतयः

आत्मानं च परं च भवदुःखान्मोचयन्ति, इति पन्थकसाधुकथा समाप्ता ॥

न केवलं पन्थकेन, श्रीगौतमादिभिरपि गुरुकुलवास एव निषेवित इत्याह—

**सिरिगोयमाइणो गण-हरा वि नीसेसअइसयसमग्गा । तब्भवसिद्धीया वि हु, गुरुकुलवासं चिय पवन्ना २४८**

व्याख्या—श्रीगौतमादयो गणधरा अपि निःशेषातिशयैः समग्राः—सम्पूर्णाः, निश्चिततद्भवसिद्धिका अपि गुरुकुलवासमे प्रपन्ना इति गाथार्थः ॥ २४८ ॥ अथ गुरुकुलवासत्यागे दोषप्ररूपणारूपं चरमद्वारमाह—

**उज्झियगुरुकुलवासो, एक्को सेवइ अकज्जमविसंको । तो कूलवालओ इव, भट्ठवओ भमइ भवगहणे २४९**

व्याख्या—परित्यक्तगुरुकुलवास एकाकी अविशङ्को—गतान्यशङ्कोऽकार्यं सर्वमज्ञलोपलक्षणं सेवते, ततः किम्? इत्याह—ततोऽकार्यसेवनाद्भ्रष्टव्रतः कूलवालक इव भवगहने भ्रमतीति गाथार्थः ॥ २४९ ॥

कूलवालककथानकं पुनरेवम्—कश्चित्क्षुल्लकः केलिपरः श्रीसिद्धाचलतीर्थादेवनमस्कृत्योत्तरतां गुरूणां पृष्ठिस्थपतन्त्वाच्छिलाम चालयत्, सा पतन्ती गुरूणां झगिति प्रसारितपादानां कथमपि न लग्ना । गुरुभिः क्षुल्लकस्योक्तं—रे दुष्ट! त्वया किं कृतं?, यद्येवंवि धोऽसि तत्स्त्रीतस्तव विनाशो भविष्यति, ततः क्षुल्ल आचार्यवचोऽलीककरणाय महाऽरण्ये स्त्रीप्रवेशरहिते गत्वा महातपः करोति कदाचित्क्वापि तत्रागतसार्थाद्भिक्षां गृह्णाति । वर्षाकाले नद्यां कायोत्सर्गस्थस्य तस्य देवतया कूलमन्यत्र वालितं, ततः कूलवालकनाम्ना प्रसिद्धः । इतश्चाशोकचन्द्रापरनामा कोणिकनृपः पद्मावतीभार्याप्रेरितो हल्लविहल्लाभ्यां हारकुण्डलादियाचमानस्ताभ्यां सेचनकं गृहीत्वा मुक्तोऽशोकचन्द्रः, आश्रितो विशालायां चेटको मातामहः । तन्निमित्तं तयोर्नृपयोर्लग्नं युद्धं, यावच्छिलाकण्टकं नाम युद्धमभवत् ।

तस्मिंश्चतुरशीतिलक्षा जनाः पतिताः । अन्यच्च रथमुशलं नाम युद्धं जातम् । तत्र षण्णवतिलक्षा जनाः पतिताः । ततो विशालायां प्रविष्टश्चेटकनृपः, इतरो रोधं कृत्वा स्थितः । श्रीमुनिसुव्रतस्तूपप्रभावाच्च सा न गृह्यते, ततो विषण्णं कोणिकं देवताऽऽकाशस्था प्राह—

"समणे जइ कूलवालए, मागहियं गणियं रमिस्सई । राया असोगचंदए, वेसालिं नगरिं लहिस्सई ॥ १ ॥"

तत् श्रुत्वा नृपेण मागधिका प्राध्यं प्रेषिता । तया श्राविकावेषेण सद्युक्त्या तत्र गत्वा यात्रार्थं प्राध्यं कूलवाल(क)श्चालितः । कुद्रव्यमिश्रमोदकदानेनोत्पादितातिसारो वैयावृत्त्योद्वर्तनाद्यतिभक्तिपरिचयेन पातितः संयमात्, नीतः कोणिकपार्श्वे, नृपेण पृष्टो विशालाग्रहणार्थं । स च नैमित्तिकवेषेण विशालामध्ये गत्वा तत्र सप्रभावं श्रीमुनिसुव्रतस्तूपं ज्ञात्वा बहुदिनरोधव्याकुलाञ्जनान् प्राह—यावदसौ स्तूपस्तावन्नगररोधो नोपशमिष्यतीति, तत् श्रुत्वा जनैः स्तूपः पातितः । ततः कोणिकेन विशालायाः कोट्टे पातिते निर्गच्छन् चेटकनृपो भणितः—कथय किमिदानीं करोमि ?, चेटकः प्राह—क्षणमेकमहैव तिष्ठ, मा प्रविश नगरीम्, यावदहं पुष्करिण्यां स्नानं कृत्वा समागच्छामि इति, प्रतिपन्नं तेन, ततश्चेटकस्तत्र गत्वा लोहमयीं प्रतिमां गले बध्वा वाप्यां पतन् धरणेन्द्रेण स गृहीतः, साधर्मिकबहुमानान्नीतश्च निजभवने, तत्रासौ कृतानशनो गतः सहस्रारकल्पे । तदुच्चवासनगरीजनश्च नीतो नीलवद्गिरौ (सत्यकिना) । कोणिकश्च विशालायां गर्दभयोजितानि हलान्यवाहयत् ।

"गुरुकुलवासब्भट्ठो, भट्ठवओ थूभभंजणाईयं । जं कूलवालओ वि हु, काऊणऽसमंजसं सव्वं ॥ १ ॥
भमिही भवं स बहुयं, सहमाणो दारुणं महादुक्खं । तम्हा गुरुकुलवासं, मा मुंचसु पाणचाए वि ॥२॥"

कूलवालककथा समाप्ता ॥ अथ प्रकृतमुपसंहरन् वक्ष्यमाणद्वारेण सह सम्बन्धमाह—

तो सेविज्ज गुरुं चिय, मुक्खत्थी मुक्खकारणं पढमं । आलोएज्ज सुसम्मं, पमायखलियं च तस्संतो २५०

व्याख्या—यत एवं तस्मान्मोक्षार्थी गुरुमेव सेवते, यतो गुरुसेवनमेव प्रथमं कारणं मोक्षस्य, तदन्तरेण ज्ञानादिगुणावाप्त्यभावात्, गुरुसेवनं कुर्वन् यत्किमपि प्रमादवशात्स्खलितमापच्छति तत्सर्वं तदन्तिके सम्यगालोचयेत्, अन्यथा तत्सेवनस्य निष्फलत्वादिति तद्द्वारमुच्यत इति गाथार्थः ॥ २५० ॥

इति गुरुकुलवासस्सर्वदा सेवनीयः, सुकृतिभिरभियुक्तैर्मोक्षमाकाङ्क्षमाणैः ।
न खलु भवति मोक्षो ज्ञानलाभादृते यत्, स च पुनरिह सम्यक्सद्गुरोस्सेवनेन ॥ १ ॥

इति पुष्पमालाविवरणे भावना द्वारे गुरुकुलवासलक्षणं प्रतिद्वारं समाप्तम् ॥ १० ॥

अथोक्तसम्बन्धे आलोचनाद्वार एव भणिष्यमाणार्थसङ्ग्रहमाह—

[१]कस्सालोयण ? [२]आलो-यओ य [३]आलोइयव्वयं चेव । [४]आलोयणविहिमुवरिं, [५]तद्दोस[६]गुणे य वुच्छामि ॥२५१॥

व्याख्या-कस्य गुरोस्तावदालोचना दातव्येति वक्तव्यम्, आलोचकः शिष्यश्च कीदृशो भवतीति वाच्यम्, किञ्च वस्तु गुर्वन्तिके आलोचनीयमिति च वाच्यम् । तथा उपरि आलोचनाविधिं तथा तद्दोषान्-आलोचनाविषयाणि दूषणानि तथा तद्विषयानेव गुणांश्च वक्ष्यामीति गाथार्थः ॥ २५१ ॥ तत्राद्यद्वारमधिकृत्याह—

[१]आयारव[२]माहारव, [३]ववहारो[४]ऽव्वीलए [५]पकुव्वे य । [६]अपरिस्सावी [७]निज्जव, [८]अवायदंसी गुरू भणिओ ॥ २५२ ॥

व्याख्या—तत्राचारवान्-ज्ञानादिपञ्चप्रकाराचारयुक्तः, मकारोऽलाक्षणिकः, 'आहारव' त्ति आलोचितापराधानामवधारणासमर्थः, 'ववहारव' त्ति अनन्तरवक्ष्यमाणआगमश्रुतादिपञ्चप्रकारव्यवहारवान्, अपव्रीडकः—लज्जयाऽतीचारान् गोपायन्तं विचित्रवचनैर्विलज्जीकृत्य सम्यगालोचनाकारयितेत्यर्थः ।, प्रकुर्वकः-सम्यक् प्रायश्चित्तदानतो विशुद्धिं कारयितुं समर्थः, अपरिस्रावी—आलोचकनिवेदितदोषाणामन्यस्यानिवेदकः, निर्यापकः-असमर्थस्य प्रायश्चित्तिनस्तदुचितप्रायश्चित्तदानतो निर्वाहकः, 'अवायदंसी' त्ति सम्यगनालोचयतः पारलौकिकापायदर्शकः, एवंविध एवालोचनीयवस्तुकथनयोग्यो गुरुर्भणित इति गाथार्थः ॥ २५२ ॥

अत्र यदुक्तं व्यवहारवानिति, तत्र पञ्चप्रकारव्यवहारस्वरूपदर्शनार्थमाह—

**आगम[१]सुय[२]आणा[३]–धारणा[४] य जीयं[५] च होइ ववहारो । केवलमणोहिचउदस–दसनवपुव्वाइं पढमोऽत्थ २५३**

व्याख्या—आगम्यन्ते-परिच्छिद्यन्ते पदार्था अनेनेत्यागमः १, श्रवणं श्रूयत इति वा श्रुतं २, आज्ञाप्यते-आदिश्यत इत्याज्ञा ३, धारणं धारणा ४, जीयत इति जीतं ५, इति पञ्चधा व्यवहरणं व्यवहारो-मुमुक्षुप्रवृत्तिरूपस्तत्कारणत्वाज्ज्ञानविशेषोऽपि व्यवहारो भवति । क आगमव्यवहारः ? इत्याह—केवलज्ञानं मनःपर्यायज्ञानं अवधिज्ञानं चतुर्दशपूर्वाणि दशपूर्वाणि नवपूर्वाणि, एष प्रथम आगमव्यवहार उच्यते । इह च यदि केवली प्राप्यते तदा तस्यैवालोचना दीयते, तदभावे मनःपर्यायज्ञानिनस्तस्याप्यभावेऽवधिज्ञानिन, इत्यादि यथाक्रमं वाच्यमिति गाथार्थः ॥ २५२ ॥

ननु केवली सर्वं जानन् शिष्यापराधान् स्वयमपि प्रकटीकृत्य प्रायश्चित्तं ददाति न वा ? इत्याशङ्क्याह—

कहेहि सव्वं जो वुत्तो, जाणमाणो वि गूहइ । न तस्स दिंति पच्छित्तं, बिंति अन्नत्थ सोहय ॥ ३५४ ॥
न संभरइ जो दोसे, सब्भावा न य मायओ । पच्चक्खी साहए ते उ, माइणो न उ साहई ॥ ३५५ ॥

व्याख्या—कथय सर्वं दोषजातमिति केवलिना प्रोक्तो यः शिष्यो जानन्नपि स्वदोषान्मायावितया गोपायति, न तस्मै मायाविने प्रायश्चित्तं ददति केवलिनः, किन्त्वेतदेव ब्रुवन्ति–यदुतान्यत्र क्वचिदात्मानं शोधयेति । यस्तु न स्मरति सद्भावेन काँश्चित्स्वदोषान्, न पुनर्मायातः, तस्य तान् दोषान् प्रत्यक्षी–केवली साधयति, मायाविनस्तु न साधयतीति श्लोकद्वयार्थः ३५४–५

इत्यलं प्रसङ्गेन । अथ प्रस्तुतश्रुतादिव्यवहारनिरूपणार्थमाह—

आयारपकप्पाई, सेसं सव्वं सुयं विणिद्दिट्ठं । देसंतरट्ठियाणं, गूढपयालोयणा आणा ॥३५६॥

व्याख्या—आचारप्रकल्पो–निशीथस्तदादिकं कल्पव्यवहारदशाश्रुतस्कन्धादिकं शेषं श्रुतं–सर्वमपि श्रुतव्यवहारः । चतुर्दशादिपूर्वाणां तु श्रुतत्वाविशेषेऽपि विशिष्टज्ञानहेतुत्वेन सातिशयत्वादागमत्वेन व्यपदेशः । आज्ञाव्यवहारमाह–देशान्तरस्थितानां गुरूणामन्तिके गन्तुमशक्तः शिष्यो गच्छदगीतार्थहस्ते आगमभाषया गूढान्यपराधपदानि लिखित्वा प्रस्थापयति, गुरुरपि तथैव गूढपदैः प्रायश्चित्तं लिखित्वा प्रेषयति, तदाऽसौ आज्ञालक्षणस्तृतीयो व्यवहार इष्यत इति गाथार्थः ॥ ३५६ ॥ धारणाव्यवहारमाह—

गीयत्थेणं दिन्नं, सुद्धिं अवधारिऊण तह चेव । दिंतस्स धारणा सा, उद्धियपयधरणरूवा वा ॥ ३५७ ॥

व्याख्या—इह केनचिद्गीतार्थसंविग्नेन गुरुणा कस्यापि शिष्यस्य क्वचिदपराधे द्रव्याद्यपेक्षया शुद्धिः प्रदत्ता, तां शुद्धिं

तथैवापराधे सोऽपि शिष्यो यदाऽन्यत्रापि तद्रूप एवापराधे तथैव प्रयुङ्क्ते तदाऽसौ तुर्यो धारणाव्यवहार इष्यते, अथवा यदा गुरुरशेषच्छेदश्रुतायोग्यस्य कस्यचिच्छिष्यस्यानुग्रहं कृत्वोद्धृतान्येव कानिचित्प्रायश्चित्तपदानि कथयति, तदा तेषां पदानां धरणं धारणाऽभिधीयत इति गाथार्थः ॥ ३५७ ॥ जीतव्यवहारमाह—

दव्वाइ चिंतिऊणं, संघयणाईण हाणिमासज्ज । पायच्छित्तं जीयं, रूढं वा जं जहिं गच्छे ॥ ३५८ ॥

व्याख्या — येष्वपराधेषु पूर्वाचार्या बहुतपःप्रकारेण शुद्धिं कृतवन्तस्तेष्वेव साम्प्रतं द्रव्यक्षेत्रकालभावान्विचिन्त्य संहननादीनां च हानिमासाद्य समुचितेन केनचित्तपःप्रकारेण यत्प्रायश्चित्तं गीतार्था निर्दिशन्ति तत्समयभाषया जीतमुच्यते, अथवा यद्यत्र गच्छे सूत्रातिरिक्तं कारणतः प्रायश्चित्तं प्रवर्तितं, अन्यैश्च बहुभिरनुवर्तितं, तत्तत्र रूढं जीतमुच्यत इति गाथार्थः ॥ ३५८ ॥

एतेषां च व्यवहाराणामन्यतरेणापि युक्तो गीतार्थो गुरुः प्रायश्चित्तदानेऽधिकारी, न त्वगीतार्थः, कुतः? इत्याह—

अगीओ न वियाणेइ, सोहिं चरणस्स देइ ऊणऽहियं । तो अप्पाणं आलो-यगं च पाडेइ संसारे ॥३५९॥

व्याख्या—अगीतार्थो हि चरणस्य (शोधिं)-शुद्धिं न विजानात्यतः सूत्रोक्तादूनामधिकामपि च तां ददाति, ततो न्यूनाधिकप्रायश्चित्तदानादात्मानमालोचकं च संसारे पातयतीति गाथार्थः ॥ ३५९ ॥ यत एवं तत आह—

तम्हा उक्कोसेणं, खित्तम्मि उ सत्तजोयणसयाइं । काले बारसवरिसा, गीयत्थगवेसणं कुज्जा ॥ ३६० ॥

व्याख्या-तस्मादुत्कर्षेण क्षेत्रे-क्षेत्रमाश्रित्य सप्तयोजनशतानि यावत्, काले-कालमाश्रित्य द्वादशवर्षाणि यावद्गीतार्थगुरुगवेषणां

कुर्यात्, एतावति क्षेत्रे तदन्वेषणार्थं पर्यटेदेतावन्तं च कालं तमागच्छन्तं प्रतीक्षेतेत्यर्थः इति गाथार्थः ॥ २६० ॥

ननु एवं कुर्वन्नसौ यद्यन्तरालेऽप्रदत्तालोचनो म्रियते तदा किमाराधको न वा ? इत्याह—

**आलोयणपरिणओ, सम्मं संपट्ठिओ गुरुसगासे । जइ अंतरा वि कालं, करेइ आराहओ तह वि ॥२६१॥**

व्याख्या—आलोचनां दातुं सम्यक्परिणतो गुरुसकाशे गन्तुं च सम्प्रस्थितो यदि कदाचिदन्तराऽपि कालं करोति-म्रिय
तथाप्ययमाराधक एव, विपर्यये तु विराधक इति गाथार्थः ॥ २६१ ॥ अथालोचकद्वारं विवक्षुराह—

**जाइकुलविणयउवसम-इंदियजयनाणदंसणसमग्गा । अणणुतावी अमाई, चरणजुयालोयगा भणिया २६२**

व्याख्या—जातिसम्पन्नाः स्वदोषान् सम्यगालोचयन्तीति, कुलसम्पन्ना हि प्रतिपन्नप्रायश्चित्तवोढारः स्युः, विनयसम्पन्
वन्दनाद्यालोचनासामाचार्याः प्रयोक्तारः, उपशमसमग्राः गुरूपालम्भादितर्जिता अप्यकोपनाः, इन्द्रियजयसम्पन्नाः सम्यक्तपःकर्त्तार
ज्ञानसम्पन्नाः कृत्याकृत्यविभागज्ञाः, दर्शनसमग्राः प्रायश्चित्तेन शुद्धिं श्रद्दधाना, अननुतापिनः आलोचितापराधेषु किमिति मयेदम
लोचितमित्यादिपश्चात्तापरहिताः, अमायाविनो-ऽगोपायन्तः, चारित्रयुक्ताः, नान्ये, शोधनीयस्यैवाभावात् । एवंविधगुणोपे
आलोचका भणिता इति गाथार्थः ॥२६२ ॥ अथालोचयितव्यद्वारमाश्रित्याह—

**मूलुत्तरगुणविसयं, निसेवियं जमिह रागदोसेहिं । दप्पेण पमाएण व, विहिणाऽऽलोएज्ज तं सव्वं ॥२६३॥**

व्याख्या-प्राक्प्रदर्शितमूलोत्तरगुणविषयं यद्वितथमिह रागद्वेषाभ्यां दर्पेण-उपेक्ष्य करणेन प्रमादेन-अनाभोगादिना वा निषेवितं

तत्सर्वं सूक्ष्मबादरभेदभिन्नं विधिना वक्ष्यमाणलक्षणेनालोचयेदिति गाथार्थः ॥२६३॥ आलोचनाविधिद्वारमेवाभिधित्याह—

**चाउम्मासियवरिसे, दायव्वाऽऽलोयणा चउछकन्ना । संवेयभाविएणं, सव्वं विहिणा कहेयव्वं ॥ २६४ ॥**

व्याख्या—त्रिषु चतुर्मासकेषु पर्युषणायां चावश्यमालोचना प्रदातव्या । केन विधिना ? इत्याह—चतुःकर्णा षट्कर्णा च । यदा पुरुषः शुद्धिं प्रतिपद्यते तदा गुरुशिष्ययोः प्रत्येकं द्विकर्णत्वाच्चतुःकर्णाऽऽलोचना भवति । योषितस्त्वेकाकिन्या आलोचना न दीयते, किन्तु सद्वितीयायाः, ततश्च द्वयोर्योषितोश्चत्वारः कर्णाः, द्वौ च गुरोरित्येवं षट्कर्णालोचना भवतीति, संवेगभावितेन सर्वं सूक्ष्म-बादररूपं दोषजातं सूत्रोक्तेन विधिना कथनीयमिति गाथार्थः ॥२६४॥ कः पुनरसौ विधिः ? इत्याह—

**जह बालो जंपंतो, कज्जमकज्जं च उज्जुयं भणइ । तं तह आलोएज्जा, मायामयविप्पमुक्को उ ॥२६५॥**

व्याख्या—यथा किल बालो जल्पन् कार्यमकार्यं च ऋजुकं—सरलमेव भणति, तथा मायामदविप्रमुक्तः संस्तत्त्वद्दोषजातं समालोचयेदिति गाथार्थः ॥२६५॥ इयं चालोचना सर्वैरपि परसाक्षिक्येव विधेयेत्याह—

**छत्तीसगुणसमन्ना—गएण तेण वि अवस्स कायव्वा । परसक्खिया विसोही, सुट्ठुवि ववहारकुसलेणं ॥२६६॥**

व्याख्या—षट्त्रिंशद्गुणैस्समन्वागतेन—आश्लिष्टेन तेन गुरुणाऽप्यवश्यं परसाक्षिकी विशुद्धिः कर्त्तव्या, कथम्भूतेन ? इत्याह—सुष्ठु—अतिशयेनागमादिपञ्चप्रकारव्यवहारकुशलेनापि, किं पुनरितरेणेति गाथार्थः ॥२६६॥ एतदेव समर्थयन्नाह—

**जह सुकुसलो वि विज्जो, अन्नस्स कहेइ अत्तणो वाहिं । एवं जाणंतस्स वि, सल्लुद्धरणं परसगासे २६७**

व्याख्या — यथा सुकुशलो-नानाचिकित्साचतुरोऽपि वैद्य आत्मनो व्याधिं अन्यस्य कथयति, एवं शुद्धिं जानतोऽप्याचार्यो
परसमीपे एव शल्योद्धरणमिति गाथार्थः ॥३६७॥ विधिविस्तारस्तु छेदग्रन्थेभ्योऽवसेयः, अथ तद्दोषद्वारं बिभणिषुः सूक्ष्मेऽप्यपराधप
अनालोचिते यो दोषः सम्पद्यते तं सदृष्टान्तमाह—

अप्पं पि भावसल्लं, अणुद्धियं रायवणियतणएहिं । जायं कडुयविवागं, किं पुण बहुयाइं पावाइं? ॥ ३६८ ॥

व्याख्या-इह च राजतनयेनार्द्रकुमारेण वणिक्तनयेन इलापुत्रेण चानुद्धृतं-गुरुभ्योऽनिवेदितं स्वल्पमपि भावशल्यं जीवघात
मृषावादादि, कटुविपाकं-दारुणफलं जातं, किं पुनर्बहूनि पापानि ? ।

तत्रार्द्रकुमारकथा त्वेवं-कश्चिद्वसन्तपुरवासी सोमादित्यनामा बन्धुमतीपत्न्या सह श्रीसुस्थितसूरिसकाशे वैराग्यात्प्राव्राजीत्
सम्यगध्ययनतपोवैयावृत्त्यादिपरो गुरुभिस्समं विहरति। अन्यदा भार्यां साध्वीं दृष्ट्वा पूर्वविलसितानि स्मृत्वा तस्यां तस्य साधोर्मन
सरागमभूत् । ततो भावनासहस्रैर्निवर्त्यमानमपि य(दा)दि तस्यां मनो न निवर्तते ततस्तेन सङ्घाटकसाधोरुक्तं—भो ! यदाऽहमेनां पश्यामि
तदा मे मनः सरागं स्यादिति । तेनापि तदुक्तमुक्तं बन्धुमतीसाध्व्याः, ततः साऽऽत्मानं तस्य कर्मबन्धकारणभूतं विचिन्त्य गुरुण्याश्च
व्याख्यानशनं गृहीत्वा स्वर्गं गता । स साधुरपि तद्विज्ञायाहो !! सा मद्व्रतरक्षार्थं प्राणानत्याक्षीदहं तु भावतो व्रतभङ्गकार्यं तस्याश्च
मृत्यवे जातस्तदथो महापातकिनः किं मे जीवितव्येन ? इति विचिन्त्यानशनं गृहीत्वा तत्स्थानमनालोच्यैव स्वर्गं गतः । ततश्च्युत्वाऽनार्ये
आर्द्रदेशे आर्द्रपुरे आर्द्र(क)राजस्यार्द्रनाम्ना स पुत्रो जातः । सकलकलाकुशलस्तारुण्यं प्राप । अन्यदा क्रमागतस्नेहवृद्ध्यर्थं श्रीश्रेणिक
क्ष्मापालेन प्रेषितं प्राभृतं गृहीत्वा श्रीआर्द्रकराजोपान्तिकमागतेभ्यः प्रधानेभ्यः सकाशात् श्रीअभयकुमारगौरवमाकर्ण्य तेन सह प्रीतिं

चिकीः श्रीआर्द्रकुमारः श्रीअभयार्थं तेषां मुक्ताफलादि समर्पयति सन्दिशति च—

"दूरस्थान्यपि मित्राणि, मित्राणामुपकुर्वते। नभस्यप्यन्तरे पश्य, पद्मेषु रविणा कृतम् ॥१॥
त्वन्निर्मलगुणग्राम-रज्जुसन्दानितं मनः। मदीयं श्रीमदभय!, जानीहि त्वान्तिके स्थितम् ॥२॥"

अथ प्रतिप्राभृतं दत्त्वाऽऽर्द्रराजेन विसृष्टास्ते राजगृहं गत्वा श्रेणिकाभयौ तद्दत्त्वाऽऽर्द्रकुमारसन्दिष्टमभयायाख्यन्, अभयस्त्वचिन्तयत्-

"मृगा मृगैस्सङ्गमनुव्रजन्ति, गावश्च गोभिस्तुरगास्तुरङ्गैः।
मूर्खास्तु मूर्खैस्सुधियः सुधीभिः, समानशीलव्यसनेषु सख्यम् ॥१॥"

तन्नूनमयं मया मैत्रीमाकाङ्क्षन् कोऽप्यासन्नसिद्धिकः पूर्वमीषद्विराद्धश्रामण्यादनार्येषूत्पन्नस्तत्केनाप्युपायेनैनं जिनधर्मं बोधयामि, यतः— "प्रवर्तयति धर्मे यज्जीवं मोहवशानुगं। निवर्तयति पापात्तु, तत्सुमित्रमुदाहृतम् ॥१॥"

तदद्भुतां काञ्चिज्जिनप्रतिमां प्रेषयामि, तद्दर्शनात्कदाचिज्जातिं स्मरेदिति युगादिजिनप्रतिमामनुपमरत्नमयीं धूपदहनघण्टाद्युपकरणसहितां मञ्जूषायां क्षिप्त्वा मुद्रां च कृत्वा राजपुरुषाणां हस्ते प्रस्थापयति सन्दिशति च-साधुशिरोमणे! तव न किञ्चिदुपकर्तुमहं क्षमस्तथापि किञ्चिदिदं प्रेषितमस्ति, तन्मामनुगृह्य क्वचिद्गूढापवरके महान्धकारे एकाकिनोद्घाट्य यत्नेन निरीक्षणीयमिति। तैरपि नीत्वा तदार्द्रकुमारस्यार्पितं सन्देशश्चोक्तः। हृष्टेन तेनापि सन्दिष्टरीत्योद्घाटिता मञ्जूषा, दृष्टा च निजप्रभापटलेन प्रद्योतनमप्युपहसन्ती युगादिजिनप्रतिमा। ततोऽहो!! अपूर्वमहो! अपूर्वमिदमाभरणं शीर्षकण्ठादौ क्व परिधीयते? इति न जाने, अथवा क्वचिद्दृष्टमिति चिन्तयतस्तस्य जातिस्मरणमुत्पन्नं। ततः पूर्वं यथा गृहीतं यथा च विराद्धं श्रामण्यं तथा स्मृत्वा संवेगमापन्नश्चिन्तयत्यहो!! मनः-

कल्पितविराधनाफलमिदं, यदहमनार्येषूत्पन्नो, यत्र धर्मस्याक्षरश्रुतिरपि न, किन्तु येनैवं करुणयाऽहमनुगृहीतः स श्रीअभयकुमार ए
मे परमबन्धुः, यदुक्तं—" कस्तस्मात्परमो बन्धुः?, प्रमादाग्निप्रदीपिते। यो मोहनिद्रया सुप्तं, भवगेहे प्रबोधयेत् ॥१॥"
तदार्येषु गत्वा प्रव्रज्यां गृह्णामीति। ततः प्रतिमां प्रपूज्य पितरमाह, यथा—तात! कृता मया मैत्र्यभयेन, साम्प्रतं तं द्रष्टु मु[त्क]
इति। ततो न वत्स! वैरिवारान्तरितेऽस्माकं गमनमुचितमिति राज्ञा निषिद्धः कुमारः संसारोद्विग्नो न विलासादि कुरुते। अथ
ज्ञाततदभिप्रायेण राज्ञा त[द्र]क्षार्थमादिष्टा नृपपुत्रपञ्चशती। सा च सर्वत्र तेन सहैव यात्यायाति च। ततस्तया सह वाह्याली याति,
तुरगान् वाहयन्नधिकमपि गत्वा पुनरायात्येवं प्रतिदिनं कुर्वता सा विश्वस्ता। इतश्चाब्धितीरेऽतिप्रतीतनरैः प्रवहणं रत्नैः पूरितं, प्रतिमा
च तत्र क्षिपिता। सर्वथा प्रगुणीकृते प्रवहणे कुमारस्तुरगमारुह्य पलायितस्समुद्रतीरे गत्वा प्रवहणमारुह्यार्यदेशं सम्प्राप्तः। ततो जिनप्रतिमां
अभयकुमारस्य सम्प्रेष्य रत्नानि धर्मे दत्त्वा स्वयं यावत्पञ्चमौष्टिकं लोचं करोति तावद्देवतया गगने भूत्वोक्तं— भोः! तवाद्यापि भोगफल
कर्मास्ति, ततो मा दीक्षां गृहाणेति। ततः कुमारः किं तेन कर्मणा?, यदि प्रत्याख्यातान् भोगान् भोक्ष्येऽहं, तर्हि किं करिष्यति? भो
भोगफलं कर्मेति दीक्षां गृहीत्वा विहरन् वसन्तपुरं प्राप्तो बहिः कायोत्सर्गे स्थितः। इतश्च पूर्वभवभार्याऽपि देवलोकाच्च्युत्वाऽत्रैव
श्रेष्ठिपुत्री धनश्रीनाम्नी जाता। साऽपि च दैवयोगात्तस्मिन्नेव प्रदेशे बालिकाभिस्समं पति[वरण]क्रीडया क्रीडति, ताभिः परस्परं
भणितम्—स्वाभिरुचितं वरं वृणुध्वं, ततो धनश्रिया वृत आर्द्रकुमारर्षिः, शेषाभिश्च कोऽपि कोऽपि। अत्रान्तरे काऽपि देवता सुवृतं
भणन्ती गर्जितं कृत्वा रत्नवृष्टिं चकार। ततो गर्जितक्षुब्धा धनश्रीर्मुनीन्द्रचरणयोर्लग्ना। तत उपसर्गं ज्ञात्वाऽन्यत्र गतस्साधुः। ततो
नृपो रत्नानि गृहीतुमागतो देवतया निवार्यैवं भणितः— मयाऽमूनि कन्याया वरणे दत्तानि सन्ति, ततो नान्यस्यात्राधिकारः। ततः

कन्यां रत्नानि च गृहीत्वा निजगृहं गतो जनकः। अथागच्छत्सु वरणार्थं बहुषु भणत्येषा—किमेते समायान्ति?, पिता प्राह—त्वद्वरकाः। सा प्राह—"सकृत्कन्याः प्रदीयन्ते" इति वचनोल्लङ्घनं किमिदमारब्धं?, यस्य वरणधनं त्वया रक्षितं तस्याहं दत्तैव प्राक्। ततः पित्राऽभाणि—ननु स भ्रमी न परिणयति को वा तमुपलक्षयति?। सा भणति—स एव मे गतिरग्निर्वा, लक्षणं चास्ति तदङ्घ्रियाह्नौ, ततस्तदुपलक्षणार्थं पित्रादेशाद्दानशालायां सा सर्वभिक्षाचराणां दानं दत्ते, द्वादशवर्षान्ते कर्मवशात्तत्रागतमार्द्रकमुनिमुपलक्ष्य चरणयो-र्लगित्वा सा भणति—हा नाथ! अनाथां मां मुक्त्वेयच्चिरं क्व भ्रान्तः?, सम्प्रति न त्यक्ष्यामि न त्यक्ष्यामि त्वच्चरणौ, तावता श्रेष्ठी राजा च समागतौ साधुं भणतः—भो महानुभाव! बहुशो भण्यमानाऽप्येषा त्वय्येव कृतप्रतिज्ञा, नान्यनामापि सहते, त्वयाऽनङ्गीकृता च कृतज्वलज्ज्वलनप्रवेशप्रतिज्ञा, तत्करुणां कुरु। परिणयेमां बालां, करुणैव हि धर्मो विशि[ष्टो]ष्यः (?) युष्मन्मार्गे, तदेवं तया राज्ञः श्रेष्ठिनश्च शृङ्गारदैन्यप्रार्थनागर्भभणितैरुदितभोगफलकर्मा मुनिर्विवाहमकरोत्। अथ भोगप्रसङ्गात्पुत्रे जाते साधुः प्रियां भणति—जातोऽयं तव सहायो, विसर्जय मां, गृह्णामि दीक्षाम्। ततो दूनेयं स्वपुत्रमेकान्ते शिक्षयित्वा कर्त्तयितुं लग्ना। इतश्च तनुजोऽवादीदम्ब! किं त्वयेदमसदृशमारब्धं?, सा प्राह—पुत्र! पत्यौ परोक्षे स्त्रीणामिदमेव मण्डनं, स प्राह—मातः! ताते विद्यमाने किमिदमसम्बद्धं ब्रूषे?, सा प्राह—वत्स! क्वचिच्चलितोऽयं तव पिता, ततः क्व यामि? तातो, बद्ध्वा धरामीति मन्मनमुग्धस्तन्तुभिस्तं पादयोर्वेष्टयति सः। तस्य तया चेष्टया हृष्टस्तातोऽपि चिन्तयति—यावतो वेष्टानसौ दास्यति तावन्ति वर्षाणि मया स्थेयम्। तन्तोर्द्वादश वेष्टान्गण-यित्वा स्थितो द्वादशवर्षाण्यार्द्रः पुनर्गेहे। तदन्ते च चिन्तयति—प्राङ्मनसैव विराद्धश्रामण्योऽनार्येषूत्पन्नः, सम्प्रति तु सर्वथा भग्नव्रतः किं भविष्यामीति न जाने, किञ्च—

.... ....

"पच्छा वि ते पयाया, खिप्पं गच्छंति अमरभवणाइं। जेसिं पिओ तवो संजमो अ खंती य बंभचेरं च ॥१॥"

[ दश० ४—२८

इत्यधुनाऽपि तपः श्रेय इति विचार्य वार्यमाणोऽपि भार्यया निष्क्रान्तः कुमारार्द्रः। इतश्च ये राज्ञा पञ्चशतराजकुमारा कुमाररक्षार्थं दत्ता अभूवंस्ते कुमारे पलाय्य गते लज्जाभयादिभिरुपराजं गन्तुमशक्नुवन्तः कुमारं गवेषयन्तः कस्मिंश्चिदटव्यां प्राप्यानिर्वहन्तश्चौर्यवृत्त्या तत्रैव तिष्ठन्ति, ते च कुमारर्षिणा पूर्वाधीतविचित्रश्रुतोपदेशलब्ध्या प्रतिबोध्य दीक्षां ग्राहिताः। तत पुरतः श्रीवीरपार्श्वे गच्छन्तं आर्द्रमुनिं गोशालको मिलितः, स चोल्लण्ठवचनैः श्रीवीरदोषान् भाषमाणो वादे निर्जित्य महामतिनाऽनेन तथा निरुत्तरीकृतो यथा नंष्ट्वा गतः। अथ यावत्पुरः कुमारर्षी राजगृहपुरसमीपमायाति तावत्तत्र तापसानामाश्रमोऽस्ति, ते च 'कि बहुभिर्बीजादिभिर्विनाशितैः?, वरमेकं गजं हत्वा बहून् दिवसानश्नीम' इति कुविकल्पेन हस्तिनं घातं घातं खादन्ति—भक्षयन्ति, तदा च तैरेको वनकरी भारवत्शृङ्खलाशृङ्खलितांह्रिर्मदालसस्कन्धनिबद्धस्कन्धो दृढार्गलाऽर्गलितस्तत्राश्रमे तिष्ठति स च हस्ती मार्गप्रतिबोधितभक्तजनाद्गीयमानगुणग्रामं तं मुनिं निरीक्ष्य चिन्तयत्यहमप्येनं मुनिं वन्दे, तदैव च मुनिप्रभावाज्झटिति त्रुटितशृङ्खलादिबन्धनः करी तं प्रणम्य वनं गतः, तेन चाश्चर्येणामर्षोद्विग्नमानाः सर्वे तापसा निर्जित्यार्द्रमे स्थापिताः। इतश्च श्रीश्रेणिकः श्रीअभयश्च अनाभनाद्गजबन्धनोन्मोचनादि तत्प्रातिशय्यं श्रुत्वा तत्रैवाश्रमे वन्दनाय समायातौ, नत्वा स्तुत्वा च राजा प्राह—भगवन्! अतिदुष्करं यद् दृढलोहबन्धनात्त्वयाऽपि करी मोचितो निजमहिम्ना। मुनिराह—

"न दुक्करं वंधणपासमोअणं, गयस्स मत्तस्स वणम्मि राय ! ।
जहा उ चत्ता वलिएण तंतुणा, सुदुक्करं मे पडिहाइ मोअणं ॥१॥"

राजाऽऽह—किमिदं ? मुने !, भगवानपि स्वव्यतिकरं सर्वं सविस्तरमुक्त्वा प्राह– राजन् ! अव्यक्तमुच्छ्वता तेन बालेन यैः सूत्रतन्तुभिरहं बद्धस्ते स्नेहतन्तव एव मयाऽपि दुःखेन त्रोटिताः, तदपेक्षया गजबन्धनत्रोटनं किमदेतत् ?। ततश्च धर्मदेशनां श्रुत्वा निर्बुद्धसाफल्येन हृष्टौ श्रेणिकाभयौ प्रणम्य स्वगृहं गतौ। मुनिश्च श्रीवीरजिनान्तिके गतः, प्रणतो भगवान्, प्रतिबोधितांश्च सर्वानपि राजपुत्रप्रमुखान् श्रीवीरपार्श्वे दीक्षां ग्राहयित्वा स्वयं चालोचितप्रतिक्रान्तो निस्सङ्ग उग्रं तपः कृत्वा केवलज्ञानमुत्पाद्य मोक्षमनन्तसौख्यं प्राप्त, इत्यार्द्रकुमारकथा समाप्ता ॥

अथ वणिक्तनयकथोच्यते–वसन्तपुरे अग्निशर्मनामा द्विजो धर्मं श्रुत्वा सभार्यः स्थविरान्तिके प्राव्राजीत्। तद्द्वयमपि रत्नत्रयनिष्ठं, परं साधुः पूर्वाभ्यासाद्भार्यायामनुरागं न त्यजति, साध्वी तु द्विजजातिमदमुद्वहते, ते स्थाने अनालोच्य गतौ द्वावपि देवलोके, साधुजीवस्ततश्च्युत्वाऽत्र भरते इलावर्द्धनपुरे [धनदत्त] इभ्यधारिण्योरिलादेव्युपयाचनेन जातत्वादिलासुतनामा सुतो जातः। साध्वीजीवस्तु जातिमददोषात्स्वरूपोपहसिततिलोत्तमाऽपि नृत्येऽतिचतुरा नटसुता जाता। अन्यदा यौवनोन्मादी यौवनोन्मादिनीं तां नटीं दृष्ट्वेलासुतस्तथा तस्यामनुरागं बबन्ध यथा कुलकलङ्काद्यवगणय्य नटेभ्यस्तामयाचत। ते त्वाहुः—अक्षयनिधिकल्पां सुवर्णकोटिदानेऽपि नैनां दद्मः, यदि परं तवास्यां निर्बन्धस्तदाऽस्मासु मिल, शिक्षस्वास्मत्कलां, तदासावनुरक्तेनैतेन मातृपितृमित्रादिस्नेहं

१ तर्कोमरिस्थनिर्बलेन तन्तुना.

विहाय तदेव कृतं, शिक्षितं सातिशयं शिल्पं। ततस्ते भणन्ति—अर्जय विवाहार्थं धनं, ततः परिणयेमां, तदप्यभ्युपगम्य नटपेटकेन सार्द्धमिलापुत्रो गतो बेन्नातटं, राज्ञोऽग्रे नर्त्तितुं सामग्र्या गतः, निखातश्चात्र महावंशः, तदूर्ध्वं महत्काष्ठं, तस्य प्रान्तयोर्द्वौ द्वौ लोहकीलकौ, तत्रारुह्येलापुत्रोऽसिखेटकव्यग्रकश्छिद्रपादुके परिधाय सप्तकरणाग्रतसि पश्चादभिमुखं सप्त चाग्राभिमुखं, एवं चतुर्दश करणान् ददाति, प्रतिकरणं च पादुकाछिद्रयोः कीलकौ निवेशयति, सा नटकन्या च वंशमूले तिष्ठति, तद्रूपाक्षिप्तचेताश्चिन्तयति नृपतिः—यद्यसौ पतित्वा म्रियते तदाऽहं परिणयामीति, लोकः स्माह—साधु साधु नृत्यं, ददातु पारितोषिकं देवो यथा वयमपि दद्मः किञ्चित्, नृपः शठतया स्माह— न मया सम्यगवलोकितं, पुनर्नृत्यतु. ततो राज्ञो भावं विज्ञाय जनः श्याममुखीभूतः, इलासुतस्तु प्राग्वच्चतुर्दशकरणान्क्षोभाद्दत्ते, राजा पतनेच्छया पुनर्न सम्यग्दृष्टं इति प्राह। ततः प्रद्विष्टो जन इतरः, पुनर्नृत्यति, एवमष्टाविंशतौ करणेषु दत्तेष्वपि राजा तयैवेच्छया तथैवाह, ततो राज्ञि सर्वो जनस्तथा विरक्तो जातो यथा समक्षमेव नृपमाक्रोशते। इलापुत्रेण च ज्ञातो राज्ञो मनोगतो भावः। प्रत्यासन्ने चेभ्यगेहे भक्तिव्यक्तिमिलत्स्फारशृङ्गारसुन्दरीभिः प्रतिलाभ्यमाना शुद्धैषणोपयुक्ताः केऽपि साधवो दृष्टाः। तत इलापुत्रः संवेगमुपगतश्चिन्तयत्येवं—अहो!! मोहस्य महाविलासः, येनाहं तथाविधोत्तमकुलोत्पन्नोऽप्येवं दुःखावस्थां प्रापितोऽस्मि। तत एते एव धन्या मुनयो, ये दूरोत्सारितविकारलेशाः प्रशान्तमनसो ब्रह्मव्रतं चरन्ति, एतेषामेव मार्गो ममापि प्रमाणं, इति भावनां भावयतः पारिणामिकं चारित्रं जातं, समुत्पन्नं च केवलज्ञानं, नटयुवतिरपि नृपस्य भावं तथाविधं विज्ञाया-चिन्तयत्, यथा—धिगिमे यौवनं, येनायं इलापुत्र एतादृशमनर्थं प्रापितः, संसारश्च सर्वोऽपि दुःखाकर इति भावयन्त्यास्तस्याः केवलज्ञानमुत्पन्नं, इतश्च नृपपार्श्वस्थाया अग्रमहिष्याश्च राज्ञश्चित्ताभिप्रायपरिज्ञानाद्वैराग्यं गतायाः केवलं समुत्पन्नं, राजाऽपि च

जनविरागं ज्ञात्वा स्वं निन्दन् तथा विशुद्धभावोऽजनि यथोत्पन्नं तस्यापि केवलज्ञानं। तत इलापुत्रः केवली यथा प्रियाया-मनुरागोऽनालोचितो दुःखदो जातः, प्रियायाश्च जातिमदोऽनालोचितो नीचकुलहेतुर्जातस्तत्सर्वं सर्वजनस्योक्त्वा ततः प्रतिबोध्य बहुजनं चत्वारोऽपि कर्मक्षयादनन्तं मोक्षसुखं प्राप्ताः, इति इलापुत्रकथा समाप्ता ॥

अथ लज्जादिभिः स्वदुश्चरितं गुरुभ्योऽनिवेदयतां यो दोषस्तमाह—

लज्जाए गारवेण व, बहुस्सुयमएण वा वि दुच्चरियं। जे न कहंति गुरूणं, न हु ते आराहगा हुंति ॥२६९॥

व्याख्या— लज्जया आत्मनो गौरवेण वा बहुश्रुतमदेन वाऽपि ये गुरूणां स्वदुश्चरितं न कथयन्ति ते नरा नैवाराधका भवन्तीति गाथार्थः ॥२६९॥ किञ्च—

न वि तं सत्थं व विसं, दुप्पउत्तो व कुणइ वेयालो। जं कुणइ भावसल्लं, अणुद्धियं सव्वदुहमूलं ॥२७०॥

व्याख्या—नैव शस्त्रं विषं वा प्रतीतं, दुष्प्रयुक्तः— प्रकोपितो वेतालो वा तद्दुःखं करोति, यत्सर्वदुःखमूलं भावशल्यमनुद्धृतं सत्करोतीति गाथार्थः ॥२७०॥

अथालोचनाप्रदानोपस्थितेन वर्जनीयान् दोषानाह—

आकंपइत्ता अणुमाणइत्ता, जं दिट्ठं बायरं व सुहुमं वा। छन्नं सद्दाउयं, बहुजणअव्वत्ततस्सेवी ॥२७१॥

व्याख्या — आवर्जितो गुरुः स्तोकं मे प्रायश्चित्तं दास्यतीति बुद्ध्या गुरुं वैयावृत्त्यादिना आकम्प्य—आवर्ज्यालोचनं दोष
तथा अनुमान्य—अनुमानं कृत्वा लघुतरापराधिनां मृदुदण्डप्रदायकत्वादिस्वरूपमाकलय्यालोचनं, एवं यदाचार्यादिना दृष्टमपराधजा
तदेवालोचयति, नापरं, तथा बादरमेवालोचयति, न सूक्ष्मं, तत्रावज्ञापरत्वात्, तथा सूक्ष्ममेव दोषमालोचयति, न बादरं, यः कि
सूक्ष्ममप्यालोचयति स कथं बादरं नालोचयेदित्येवं भावज्ञापनार्थमाचार्यस्येति; तथा छन्नं—प्रच्छन्नमालोचयति, लज्जादिकारण
तोऽत्यव्यक्तवचनेन वक्तीत्यर्थः; तथा शब्दाकुलं बृहच्छब्दं यथा भवत्येवमालोचयति, अगीतार्थादीनामपि श्रावयतीत्यर्थः, तथ
बहवो जना आलोचनार्था यत्र तद्बहुजनं, एकस्याप्यपराधस्य बहुभ्यो निवेदनमित्यर्थः; तथा अव्यक्तो-ऽगीतार्थस्तस्य यद्दोषालोचनं
तदप्यव्यक्तमिह विवक्षितं; "तस्सेवि" त्ति शिष्यो यं दोषमालोचयति तमेव सेवते यो गुरुरसौ तत्सेवी, तस्मै यदालोचनं
सोऽप्यालोचनादोष इति गाथार्थः ॥२७१॥

यद्येते आलोचनादोषास्तर्हि किम्? इत्याह—

एयद्दोसविमुक्कं, पइसमयं वड्ढमाणसंवेगो। आलोएज्ज अकज्जं, न पुणो काहंति निच्छइओ ॥२७२॥

व्याख्या — एतद्दोषविमुक्तं यथा भवति तथा प्रतिसमयं वर्द्धमानसंवेगस्सन् पुनरप्यहं दोषं न करिष्यामीति कृतनिश्चयः
सकलमकार्यमालोचयेत, अन्यथा आलोचनादानस्य वैयर्थ्यप्रसङ्गादिति गाथार्थः ॥२७२॥

नन्विदानीं प्रायश्चित्तं तद्दातारश्च न सन्त्येव, तत्कः कस्यालोचनां दास्यतीति ये प्राहुस्तत्सम्बोधनार्थमाह—

जो भणइ नत्थि इण्हिं, पच्छित्तं तस्स दायगा वा वि। सो कुव्वइ संसारं, जम्हा सुत्ते विणिद्दिट्ठं ॥२७३॥

व्याख्या—यः कश्चिदेवं ब्रवीति, यदुतेदानीं प्रायश्चित्तप्रतिपादकग्रन्थाभावात्प्रायश्चित्तं तद्दातारश्च गीतार्था न सन्त्येव, स उन्मार्गदेशकत्वादात्मनो दीर्घसंसारमेव करोति, यस्मात्सूत्रेऽपि छेदग्रन्थलक्षणे निर्दिष्टं-भणितमिति गाथार्थः ॥२७३॥ किं तदित्याह-

सव्वंपि य पच्छित्तं, नवमे पुव्वम्मि तइयवत्थुम्मि। तत्तो वि य निज्जूढा, कप्पपकप्पो य ववहारो ॥२७४॥

व्याख्या - सर्वमपि प्रायश्चित्तं तावन्नवमे च प्रत्याख्यान[प्रवाद]नाम्नि पूर्वे तदन्तर्गते च तृतीयवस्तुनि पूर्व्यैर्निबद्धं। ततोऽपि च प्रायश्चित्तप्रतिपादकनवमपूर्वगततृतीयवस्तुनो मध्यान्निर्यूढाः-समुद्धृताः कल्पः प्रकल्पो व्यवहारश्च, तत्र प्रकल्पो निशीथ इति गाथार्थः ॥२७४॥ तेऽपि च कल्पादय इदानीं न सन्तीति चेत्? आह-

ते वि य धरंति अज्जवि, तेसु धरंतेसु कह तुमं भणसि?। वोच्छिन्नं पच्छित्तं, तद्दायारो य जा तित्थं ॥२७५॥

व्याख्या —तेऽपि च कल्पादयोऽद्यापि धरन्त्यनेकार्थत्वाद्धातूनामवतिष्ठन्ते, अतस्तेषु धरत्स्ववतिष्ठमानेष्वेवं कथं त्वं भणसि?, यदुत-व्यवच्छिन्नं प्रायश्चित्तमिति असम्बद्धमेवेत्यर्थः। अथ प्रायश्चित्तदातारो गीतार्था व्यवच्छिन्नास्तदप्ययुक्तमित्याह-तद्दातारः-प्रायश्चित्तदातारोऽपि यावत्तीर्थं- दुष्पसहाचार्यपर्यन्तं यावत्प्राप्स्यन्ते इत्यागमेऽप्युक्तं भणितमिति गाथार्थः ॥२७५॥

अथालोचनाप्रदाने यो गुणस्तद्भणनलक्षणं परमद्वारमाह—

कयपावो वि मणूसो, आलोइयनिंदिउं गुरुसगासे। होइ अइरेगलहुओ, ओहरियभरुव्व भारवहो ॥२७६॥

व्याख्या—कृतपापोऽपि मनुष्यो गुरोः सकाशे स्वदोषान् विधिवदालोच्य निन्दित्वा-पश्चात्तापं कृत्वा "अइरेगलहुओ" त्ति गतबहुकर्मत्वात् कर्मणो मिथ्यातिरेकलघु-रतीवलघुकर्मा भवति, क इव? इत्याह-अपहृतभरो भारवह इवेति गाथार्थः ॥२७६॥

अथालोचनाप्रदानेनैवानन्तानां मोक्षप्राप्तिर्जातेत्याह—

**निट्ठवियपावपंका, सम्मं आलोइउं गुरुसगासे। पत्ता अणंतजीवा, सासयसुक्खं अणाबाहं ॥२७७॥**

व्याख्या—गुरोः सकाशे-समीपे स्वदोषान् सम्यगालोच्य-कथयित्वा क्षपितपापपङ्काः सन्तोऽनन्ता एव जीवा अनाबाधं शाश्वतं सौख्यं प्राप्ताः, सिद्धा इत्यर्थः इति गाथार्थः ॥२७७॥

इत्थं विभाव्य भगवद्वचनेन शुद्धे-र्दोषान्गुणांश्च सुकृती स्वकृतापराधान्।
आलोच्य सम्यगिह सद्गुरुपादमूले, शुद्धः प्रयाति परमं पदमद्वितीयम् ॥१॥

इति पुष्पमाला विवरणे भावनाद्वारे दोषविकटनालक्षणं प्रतिद्वारं समाप्तम् ॥११॥

अथ भवविरागद्वारं विवक्षुः पूर्वद्वारेण सम्बन्धगर्भां गाथामाह—

**एवं विसुद्धचरणो, सम्मं विरमेज्ज भवसरूवाओ। नरगाइभेयभिन्ने, नत्थि सुहं जेण संसारे ॥२७८॥**

व्याख्या—एवं-यथोक्तविधिना प्रायश्चित्तप्रतिपत्तिद्वारेण विशुद्धं चरणं यस्य स विशुद्धचरणस्सन् सम्यग् विरमेत्-विरागं गच्छेत्, कस्मादित्याह- भवस्वरूपात्, न पुनरालोचनादानेनैव तुष्टस्तिष्ठेदिति भावः। कुतः? इत्याह- येन नरकादिभेदभिन्ने नास्ति

सुखं संसारे, एतेनालोचनाप्रदानेऽपि भवविराग एवेत्यर्थसाधक इत्यालोचनाद्वारानन्तरं भवविरागद्वारमुच्यते, इति गाथार्थः ॥२७८॥

तत्र नरकेषु यथा न सुखं तथाऽऽह—

**दीहं ससंति कलुणं, भणंति विरसं रसंति दुक्खत्ता । नेरइया परोप्पर-सुरविहियसमुत्थवियणाहिं ॥२७९॥**

व्याख्या—दीर्घं श्वसन्ति-श्वासान् गृह्णन्ति, करुणं-दीनं भाषन्ते, विरसं रसन्ति-आरटन्ति, दुःखार्त्ता नारकाः। काभिः? इत्याह-परस्परं च सुराश्च क्षेत्रं च परस्परसुरक्षेत्राणि, तेभ्यस्समुत्थाः- प्रादुर्भूता या वेदनास्ताभिः। नारकाणां हि नरकत्रयं यावत्त्रिविधा वेदना, पुरतस्तु परमाधार्मिकसुरजनाभावाद् द्विविधैवेति गाथार्थः ॥२७९॥

अथ नारकदुःखानां प्रत्येकं भणितुमशक्यत्वात्संक्षिप्याह—

**जं नारयाण दुक्खं, उक्कत्तणदहणछिंदणाईयं । तं वरिससहस्सेहि वि, न भणेज्ज सहस्सवयणो वि ॥२८०॥**

व्याख्या—यन्नारकाणां दुःखं उत्कर्त्तनदहनछेदनादिकं तद्वर्षसहस्रैरपि न भणेत् सहस्रवदनः-शक्रोऽपीति गाथार्थः ॥२८०॥

इदं तावन्नारकाणां दुःखं केवलिवचनगम्यं, तिरश्चां तु दुःखं लोकस्यापि प्रत्यक्षमेवेत्याह—

**सीउण्हखुप्पिवासा-दहणंकणवाहदोहदुक्खेहिं । दूमिज्जंति तिरिक्खा, जह तं लोए वि पच्चक्खं ॥२८१॥**

व्याख्या—शीतोष्णक्षुत्पिपासाः प्रतीताः, दहनं वन्ह्यादिना, अङ्कनं-त्रिशूलाद्याकारेण दम्भदानादि, वाहः-स्कन्धादिना

भारवहनं, दोहो- गोमहिष्यादिस्तनेभ्यो दुग्धाकर्षणं, एतेषां सम्बन्धि यानि दुःखानि तैर्दन्ते तिर्यञ्चो यथा तल्लोकेऽपि प्रत्यक्षमेवेति गाथार्थः ॥३८१॥

मनुष्येष्वपि नानाप्रकारं दुःखं सर्वजनप्रत्यक्षमेव। अथ सुखतया प्रतीतानां लक्ष्म्यादीनामपि च दुःखरूपतां बिभणिषुराह—

**लच्छी पिम्मं विसया, देहो मणुयत्तणे वि लोयस्स। एयाइं वल्लहाइं, ताणं पुण एस परिणामो ॥३८२॥**

व्याख्या—लक्ष्मीर्धनं, प्रेम-स्वजनादिषु स्नेहः, विषयाः शब्दादयो, देहः-शरीरं, एतानि मनुजत्वेऽपि सुखभ्रान्तिजनकत्वेन लोकस्य किल वल्लभानि, तेषां पुनरेष वक्ष्यमाणः परिणामः-स्वरूपमिति गाथार्थः ॥३८२॥ तत्र लक्ष्मीस्वरूपमाह—

**न भवइ पत्थंताण वि, जायइ कइया वि कहवि एमेव। विहडइ पिच्छंताण वि, खणेण लच्छी कुमहिल व्व ॥३८३॥**

व्याख्या—यथा कुमहिला-दुःशीला नारी, एवं लक्ष्मीरपि कदाचित्प्रार्थ्यमानानामपि पुरुषाणां न भवति, कदाचित्तु तेषामेवाप्रार्थ्यमानानामपि एवमेव-स्वत एव कुतोऽपि कथमपि जायत एव, जाताऽपि क्षणेनैव कदाचित्पश्यतामेव विघटत इति कस्तस्यां विवेकिनः प्रतिबन्धः? इति गाथार्थः ३८३॥ किञ्चैवं जाताऽपि प्रायोऽनर्थफलैवेत्याह—

**जह सलिला वड्ढंति, कूलं पाडेइ कलुसए अप्पं। इह विहवे वड्ढंते, पायं पुरिसो वि दट्ठव्वो ॥३८४॥**

व्याख्या—यथा सलिला-नदी वर्षासु प्रचुरपयःपूरेण वर्द्धमाना- विस्तरन्ती स्वकीयमेव कूलं-तटं पातयति, पुराकृष्टाशुचिकचवरकादिना कलुषयति चात्मानं, उत्लङ्घनशङ्कितजनानभिगमनीया च जायते, इह विभवे प्रवर्द्धमाने पुरुषोऽपि प्राय एवमेव

द्रव्यः, अपरिह्रि-प्रकोणि दण्डादिसूत्रादिमुद्ग्रतया स्वकुलकल्पं स्वजनादिकं तावदुपहन्ति, नानारम्भपापव्यापारोपार्जितकर्मरजसा च कलुषयत्यात्मानं, कार्पण्यादिभिश्चासम्भोग्यलक्ष्मीकत्वेन शिष्टानभिगमनीयः सम्पद्यते, प्रायो ग्रहणं तु केषाञ्चिदासन्नभवसिद्धिकानां विभवसद्भावेऽप्युक्तस्वरूपवैपरीत्यदर्शनादिति गाथार्थः ॥२८४॥ अथ प्रेमस्वरूपं दर्शयन्नाह—

होऊण वि कह वि निरं-तराइं दूरंतराइं जायंति। उम्मोइयरसणंऽतो-वमाइं पेम्माइं लोयस्स ॥२८५॥

व्याख्या—उन्मोचिता-छोटिता याऽसौ रसना-कटिसूत्रं, तस्या अन्तावुन्मोचितरसनान्तौ, ताभ्यामुपमा-सादृश्यं येषां तानि उन्मोचितरसनान्तोपमानि प्रेमाणि-स्नेहा लोकस्य, कथं? इत्याह—यतो भूत्वाऽपि क्वचित्कथमपि केषाञ्चिन्निरन्तराणि-निबिडानि प्रेमाणि पुनरपि कदाचित्केनापि कारणेन दूरान्तराणि जायन्ते। इदमुक्तं भवति—यथा कटीबन्धनकाले रसनाया अन्तौ निरन्तरौ भूत्वाऽपि पुनरेव तच्छोटनकाले तौ दूरान्तरौ जायेते, एवं लोकस्यापि प्रयोजनापेक्षितया प्रथमं प्रेमाणि निरन्तराणि भूत्वाऽपि पुनरपि स्वप्रयोजनसिद्ध्यपराधश्रवणादिना क्षणिस्येव दूरान्तराणि सम्पद्यन्ते, तत्कस्तेष्वपि विवेकिनां प्रतिबन्धः? इति गाथार्थः ॥२८५॥

ननु मातापित्रादिषु निबिडं प्रेम, तच्च न व्यभिचरतीति चेदित्यत आह—

माइपिइबंधुभज्जा-सुएसु पेम्मं जणम्मि सविसेसं। चुलणीकहाए तं पुण, कणगरहविचिट्ठिएण य ॥२८६॥
तह भरहनिवइभज्जा-असोगचंदाइचरियसवणेणं। अइविरसं च्चिय नज्जइ, विचिट्ठियं मूढहिययाणं ॥२८७॥

व्याख्या—मातृपितृबन्धुभार्यासुतेष्वेव तावज्जने-लोके सविशेषं प्रेम इत्यस्माकमप्यभिमतमेव, केवलं तत्पुनर्व्यभिचारितया

ऽतिविरसं अतिनिर्वेदजनकं ज्ञायते, कथम्भूतम् ? इत्याह–मूढहृदयानां—बालप्रकृतीनां प्राणिनां विचेष्टितं–विजृम्भितं, कया हेतुभूतया चरितं ? इत्याह–ब्रह्मदत्तजनन्याश्चुलन्याः कथया मातृप्रेम तावदतिविरसं निश्चियते। कनकरथराजविचेष्टितेन च पितृप्रेम, तथा भरतनृपतिचरितश्रवणेन बन्धुप्रेम, प्रदेशीनामकनृपतिभार्याचरितश्रवणेन भार्याप्रेम, अशोकचन्द्रः–कूणिकस्तच्चरितश्रवणेन सुतप्रेम, आदिशब्दादपरैरपि समयलोकप्रसिद्धैर्जन्तुभिस्तद्विरसता भावनीयेति गाथाद्वयाक्षरार्थः ३८६–८७ ॥

अत्र कथानकानि पुनरेवं क्रमेणोच्यन्ते, यथा–आदौ चुलनीकथानकं, तच्चेदम्– साकेतपुरस्वामीचन्द्रावतंसकराजसूनुना मुनिचन्द्रेण प्रवचनेनाटव्यां चत्वारो गोपालदारकाः प्रतिबोध्य प्रव्राजिताः, तन्मध्ये जिनधर्मजुगुप्सया श्रामण्यं विराध्य द्वौ देवलोके समुत्पन्नौ, ततोऽपि च्युत्वा दशार्णपुरे दासौ, ततोऽपि विषधरदष्टौ मृत्वा कालिञ्जरपर्वते मृगौ, ततोऽपि गङ्गातटे हंसौ, ततो वाराणस्यां चित्रसम्भूतनामानौ मातङ्गदारकावुत्पन्नौ। तत्र सम्भूतः सनिदानचारित्रः चित्रस्तु निरतिचारचारित्रो, द्वावपि सौधर्मदेवलोके समुत्पन्नौ, ततोऽपि च्युत्वा चित्रः पुरिमतालपुरे इभ्यपुत्रतया समुत्पन्नः, सम्भूतस्तु पञ्चालजनपदे काम्पिल्यपुरे ब्रह्मनरेन्द्रराज्ञ्याश्चुलन्या ब्रह्मदत्तपुत्रः समुत्पन्नः, तद्बालत्वेऽपि म्रियमाणेन ब्रह्मराजेन 'भवद्भिरेवायं बालको राज्यं कारयितव्य' इत्युक्त्वा काशीजनपदाधिपतिकटक–गजपुरप्रभुकणेरुदत्त–कोशलाविषयस्वामिदीर्घ–चम्पापुरीप्रभुपुष्पचूलाभिधानानां निजमित्राणां ब्रह्मदत्तः समर्पितः। तन्मध्ये दीर्घे चुलनी समासक्ता, तदनु रागमूढमानसया च तयाऽभिनवपरिणीतं स्वपुत्रं ब्रह्मदत्तं सप्रियं जतुगृहमध्ये प्रक्षिप्य समन्ताद्दहनः प्रदीपितस्तन्मध्याच्च धनुर्मन्त्रिविरचितोपायेन तत्सुतवरधनुना सार्द्धं ब्रह्मदत्तोऽपि निर्गत्य देशान्तरेषु भ्राम्यंस्तेषु च बह्वीः ब्राह्मणवणिग्भूपालविद्याधरपुत्रिकाः संविधानपूर्वकं परिणीतवान्। क्रमेण च दीर्घराजं निहत्य भरतक्षेत्रं प्रसाध्य चक्रवर्तिपदं प्राप्तवान्। ततः प्रति-

पक्षवतेन पूर्वभवभ्रात्रा चित्रेण विविधवचनोक्तिभिर्बोध्यमानोऽपि न कथमप्यसौ प्रतिबुद्धः, पर्यन्ते परिक्षीणपुण्योदयेन प्रकुपितैक-ब्राह्मणमात्रनियुक्तगोपालाकर्षितनेत्रो रौद्रध्यानोपगतश्च मृत्वा सप्तमपृथिव्यामप्रतिष्ठाननरकावासे समुत्पन्नो, व्यासार्थश्चित्रसम्भूतीया-ध्ययनादवसेयः। यदीत्थं चुलन्यपि ब्रह्मदत्तस्य मारणाय प्रवृत्ता तदा कोऽत्र मातृप्रेम्णि प्रतिबन्धः ? इति चुलनीकथा समाप्ता ॥

अथ कनकरथ [नृप] कथानकं कथ्यते—तेतलिपुरे नगरे राजा कनकरथः, सकलान्तःपुरप्रधाना तज्जाया पद्मावती, तन्मन्त्री तेतलिसुतनामा राज्यचिन्तां करोति। अन्यदा राज्यसुखगृद्धेन राज्ञा विविधयातनाभिर्जाताः स्वसुता 'वर्द्धमाना मे राज्यं हरिष्यन्ती'-त्यभिप्रायेण सर्वे मारिताः। ततस्तेतलिसुतमन्त्रिणाऽन्यदा 'पद्मावत्या अथ दारिका जाता, साऽपि मृते'ति व्याजेन कनकध्वजस्तत्सुतः स्वगृहे निधाय रक्षितः, स च कनकरथे मृते राज्येऽभिषिक्त इति। इह यदीत्थं कनकरथोऽपि पुत्राणां व्यापादकोऽजनि तदा कः पितृजनप्रेम्णि प्रतिबन्धः ?, इति कनकरथकथा समाप्ता ॥

अथ भरताख्यानकमुच्यते—श्रीऋषभदेवपुत्रौ भरतबाहुबलिनौ, राज्यार्थं द्वावपि भ्रातरौ युद्धाय प्रवृत्तौ, तत्रादौ दृष्टियुद्धं ततो वाग्युद्धं ततोऽपि बाहुयुद्धं ततो मुष्टियुद्धं ततो दण्डयुद्धं जातं, किन्तु सर्वत्र बाहुबली जयति भरतो हारयति। ततः स विषण्णश्चिन्तयति–किमेष चक्री ? मम निष्फलप्रयासः ?। तावता देवताऽधिष्ठितं चक्ररत्नं स्फुरत् भरतकरतले समागत्योपविष्टं, ततः स चक्रेण बाहुबलिनं हन्तुं प्रधावितः। तावद्बाहुबली चिन्तयति–चक्रेण सममेवैनं चूर्णयामि। अथवा दण्डयुद्धे प्रारब्धे चक्रेणो-पस्थित एषः, ततो भ्रष्टप्रतिज्ञोऽयं स्वयं मृतो वराकः, तुच्छानां कामभोगानां कार्ये पयसी मूढात्मा अलज्जित एवं करोति, तथापि न मे युज्यते भ्रातृवधः कर्तुं, ततः प्राह–चक्रेण सममपि त्वां चूर्णयामि, परं लोका भणिष्यन्ति–श्रीऋषभसुत एवमकृत्यं कृतवान्,

तुच्छाश्च जीवितभोगादयोऽर्थाः, ततस्त्वमेव गृहाण राज्यं, अहं तु दीक्षां गृह्णामि। ततः कराहतं मुक्त्वा पञ्चमौष्टिकं लोचं कृत्वा दीक्षां प्रतिपन्नः। पर्यन्ते केवलं समुत्पन्नं।

"ता जइ चरमसरीरो, उत्तमपुरिसो वि उसभतणओ वि। भरहो वि बंधवाईणं, इय वत्तइ रज्जलोभेणं ॥१॥"

"तो सेसाण तुच्छाणं, कज्जावेक्खाए चेव पेमाइं। ताइं तु खणेण विसं-वयंति तो किमिह पडिबंधो ? ॥२॥"

इति भरताख्यानकं समाप्तम् ॥

अथ नृपतिभार्याकथोच्यते—श्वेताम्ब्यां नगर्यां श्रीप्रदेशी राजा, सूर्यकान्तानाम्नी तद्भार्या, चित्रो मन्त्री जैनः। स च बहिरुद्याने समवसृतं केशिनामानमाचार्यमाकर्ण्याचिन्तयत्–अयं राजा महामिथ्यात्वग्रहग्रस्तः पापानुष्ठानरतो, यद्यपि मन्त्रिणि यास्यति नरकं, तदेनं नयामि भगवन्मूलं, ततोऽश्ववाहनिकाव्याजेन नीतस्तत्प्रदेशं, खेदविनोदच्छलेनोपवेशितो यत्र बहुजनपरिष-न्मध्यगतो भगवान् धर्ममाचष्टे, स मन्त्रिणं प्रत्याह–किमयं मुण्डो रारटीति ?, मन्त्रिणोक्तं–न जानीमोऽभ्यर्णीभूयाकर्णयामो, ततो निकटे, ततः सूरिणा प्ररूपिते देवताविशेषस्वरूपे जीवादिषु च प्राह–सर्वमिदमसम्बद्धं, असत्त्वात्। असत्त्वं च प्रत्यक्षगोचरातीतत्वात्, वियदरविन्दवत्, विद्यमानं हि न प्रत्यक्षगोचरातीतं, भूतचतुष्टयवत्। सूरिराह–भद्र ! किमिदं भवतोऽध्यक्षविषयातीतमुत सर्वात्मनां ?, आद्यपक्षे तावत्स्तम्भादिमध्यपरभागादीनामभावप्रसङ्गो, भवद्दृशोऽर्वाग्भागवर्तित्वमात्रग्रहणतयैव व्यापारात्। नापि द्वितीयः पक्षः, तस्याप्यसिद्धत्वात्, तत्सिद्धौ तदैव सर्वज्ञजीवतासिद्धेर्देवताविशेषजीवादिप्रतिषेधानुपपत्तिः, जीवे सति बन्धादीनां पूर्वापरकल्पादित्वादिना वादेन निराकृतो जातसम्यग्दर्शनपरिणामः स प्राह–भगवन् ! एवमेव, नष्टो मे मोहपिशाचो युष्मद्वचनमन्त्रैः, केवलं कुलक्रमागता

अस्माकं नास्तिकता, सा कथं मोक्तव्या ?। गुरुराह–भद्र ! न किञ्चिदेतद् सति विवेके, किं कुलक्रमायातो व्याधिर्दारिद्र्यं वा न त्याज्यः ? इति, किं वा कुलमकुलं वा ?, प्राणिनामेकाकिनामेवानादौ भवे भ्रमणात्सर्वकुलेषूत्पादसम्भवात्। ततोऽसौ सञ्जाततत्त्वनिर्णयः प्रतिपद्य श्रावकधर्मं प्रतिपाल्य च निरतिचारं पश्चात्पुरुषान्तरासक्तया सूर्यकान्ताभिधया भार्यया पारणके दत्तविषो ज्ञातव्यतिकरोऽप्य-चलितचित्तोऽनशनं प्रतिपद्य समाधानेन मृत्वा सौधर्मे कल्पे सूर्याभे विमाने समुत्पन्नः सूर्याभनामा देवः। तत्र चत्वारि पल्योपमान्यायुः पालयित्वा महाविदेहे सेत्स्यति, इति भार्यया सममपि विरसपरिणामं प्रेम ज्ञात्वा कस्तत्रापि प्रतिबन्धो विवेकिनाम् ?।

इति सूर्यकान्ताऽऽख्यानकं समाप्तम् ॥

अशोकचन्द्रापरनाम्नः कूणिकस्य कथा कथ्यते, यथा–श्रीराजगृहे नगरे श्रीश्रेणिकराजपत्न्याश्चेल्लनाया गर्भदोषाद्भर्तुरन्त्रभक्षणे दोहदोऽभूत्, पूरितं तदन्धकारे कृत्रिमान्त्रैर्मन्त्रिणा, जातश्चोज्झितो दुष्टोऽयमिति तनयस्तया गृहोपवने, दृष्टः श्रेणिकराज्ञा, समर्पितो धात्र्याः, कृतमशोकचन्द्र इति तन्नाम, तस्य चोज्झितस्य कुक्कुटेनाङ्गुली मनाग् भक्षिताऽऽसीत्, तत्पीडया रुदतोऽतिस्नेहेन क्लेददिग्धां तां पिता चूषितवान्। प्रगुणीभूता च सा कूणा [सङ्कुचिता] जाता, तद्द्वारेणासौ कूणिक इत्याकारितः। पश्चात्कूणिकाय राज्यभारं दित्सुना राज्ञा हल्लविहल्लाभ्यामष्टादशचक्रो हारः कुण्डलयुग्मं हस्तिरत्नं च दत्तं, अज्ञाततदभिप्रायस्योत्पन्नः कूणिकस्य मत्सरः, सामन्तान्सहायीकृत्य बद्ध्वा क्षिप्तश्चारके स राजा तेन, कशानां शतेन कदर्थयति च प्रतिदिनं क्रोधात्। अन्यदा भुञ्जानस्योत्सङ्गोपविष्टेन तस्य सुतेन भाजने मूत्रितं मलमपसार्य भुक्तं तेन, चेल्लनां च प्रत्युक्तं–हे मातः! ईदृशो ममापत्यस्नेहः ?। सा सद्गद्गदमाह–वत्स ! तव पितुर्गुरुतर-स्नेहोऽभूत्, तत्फलमनुभवतीदानीं। स प्राह–कथं ?, ततः कथितो वृत्तान्तस्ततो जातपश्चात्तापः स्वयमेव गृहीत्वा परशुं निगडखण्डनार्थं गतः

कारागृहं, आगच्छन् दृष्टो गुप्तिपालैः, कथितस्तैः श्रेणिकाय, तेनापि 'दुःखमारेण मां मारयिष्यती'ति सञ्चिन्त्य भक्षितं तालपुटं विषं, प्राग्बद्धायुष्कत्वान्मृत्वा गतः प्रथमपृथिवीमितरोऽपि कालेन षष्ठीमिति।

"इय पुत्तेसु वि पिम्मं, विरसं नाऊण मुणियपरमत्था। मोत्तुं लप्पडिबंधं, सकज्जसिद्धिं पवज्जंति ॥१॥"

इति अशोकचन्द्राख्यानकम्। इति दर्शिता प्रेम्णोऽसारता ॥ अथ विषयासारतां दर्शयन्नाह—

होंति मुहेच्चिय महुरा, विसया किंपागभूरुहफलं व। परिणामे पुण तेच्चिय, नारयजलणिंधणं मुणसु ॥२८८॥

व्याख्या—भवन्ति मुख एव-आदावेव मधुरा-मनोज्ञा विषयाः- शब्दादयः, किं वदित्याह-किम्पाकवृक्षफलवत्, यथा किल किम्पाकफलं भक्षणसमय एव मधुरं, विपाके पुनर्दारुणस्वरूपं तथेत्यर्थः, परिणामे पुनस्त एव नारकज्वलनेन्धनं जानीहि, नरकवह्निर्विषयेन्धनैरेव नरकोत्पन्नप्राणिदहनाय प्रज्वलति, नान्यथा, विषयासेवां विना हि न कश्चिन्नरकं व्रजेत्, ततश्च निर्निमित्तो नरकवह्निर्न प्रज्वलेत्, इति विषया एव नरकवह्नेरिन्धनमिति गाथार्थः ॥२८८॥ अत एव विषयगृद्धिपरिहारार्थं सदृष्टान्तमुपदेशमाह—

विसयावेक्खो निवडइ, निरवेक्खो तरइ दुत्तरभवोहं। जिणवीरविणिद्दिट्ठो, दिट्ठंतो बंधुजुयलेणं ॥२८९॥

व्याख्या—विषयापेक्षो-विषयाभिलाषी निपतति-ब्रुडति, विषमे संसारसागरे इति शेषः। तन्निरपेक्षः पुनस्तरति दुस्तरभवौघं। अत्र च वीरजिनविनिर्दिष्टो बन्धुयुगलेन दृष्टान्तो ज्ञातव्यः, तद्यथा—चम्पापुर्यां माकन्दीनामा सार्थवाहः, तस्य जिनपालित—जिनरक्षित-सुतौ, तौ द्वावप्येकादशवाराः क्षेमेणागत्य द्वादशीं वारां पितृभ्यां वार्यमाणावपि प्रवहणं पूरयित्वा समुद्रे जग्मतुः। अभाग्याद्भग्ने पोते

लब्धैकफलकौ लग्नौ रत्नद्वीपम्। तत्र भ्रमन्तौ तद्द्वीपस्वामिन्याः क्षुद्रायाः देवतायाः रत्नमयं प्रासादं विलोक्य तत्र गतौ। तया सप्रणयं निजभर्तृत्वे स्थापितौ दूरीकृताशुभपुद्गलौ। अन्यदा देवतया शक्रादेशेन जलधिशोधनार्थं गच्छन्त्या प्रोक्तं–भो भो ! यावदहमागच्छामि तावद्युवाभ्यां प्रासाददक्षिणमुद्यानं मुक्त्वाऽपरोद्यानेषु स्थेयमिति। तस्यां गतायां तौ अपरं सर्वं विलोक्य कौतुकाद्दक्षिणोद्यानं गतौ, तत्र शूलिकाभिन्नं कञ्चित्पुरुषं क्रन्दन्तं दृष्ट्वा तत्कारणं पृच्छतः। सोऽवदत्–भो! भग्नपोतोऽहं फलकलग्नोऽत्रायातो देवतया बहुमानं दत्त्वा स्थापितः, तया समं भुक्ता भोगाः, अन्यदा तुच्छमपराधमुद्भाव्य क्षिप्तोऽहं विलपन् शूलायां। अन्येऽप्येवं बहवो व्यापादितास्तया नराः। ततो माकन्दीपुत्राभ्यां भीताभ्यामुक्तं वयमप्येवमेव तया सङ्गृहीतास्तिष्ठामः, तत्किमस्माकं भावि ?, शूलापुरुषेणोक्तं–एकोऽस्त्युपायः, अहं जानामि। ताभ्यामुक्तं–भो महाभाग ! प्रसादं कृत्वा वद, ततो भणितं तेन–पौरस्त्योद्याने धवलरूपधारी शैलकयक्षोऽस्ति सम्यग्दृष्टिः, स चाष्टम्यां चतुर्दश्यां पूर्णिमायां अमावस्यां च 'कं पालयामि ? कं तारयामि ?' इति भणति, यूयं च तदा तत्र गत्वा 'त्वमस्मान् पालय रक्षे'ति भणतः। ततस्स युष्मान् सुखान् करिष्यति, यदि देवीवाक्यं न करिष्यथेति। ततः पीयूषमिव तद्वचनमभ्युपगम्य तथैव कृतं ताभ्यां, यक्षेण 'कं तारयामी'त्यादि भणितं। 'इदानीं वयमेवाशरणास्ततोऽस्मान् पालय तारये'ति भणितं। यक्षः प्राह–करोम्येतत्परं मम पृष्ठौ समारूढान् दृष्ट्वा समुद्रे सा क्षुद्रदेवता समागत्य परुषैः स्निग्धमधुरैश्च वाक्यैर्युष्मच्चित्तं हरिष्यति, तद्यदि चित्ते कथमप्यनुरागं करिष्यथ तदा निजपृष्ठेर्विधूनयित्वा क्षेप्स्यामि। अथ तदपेक्षां न करिष्यथ तदा श्रीभाजनं करिष्यामि। अथ तौ द्वावपि 'यथा यूयं भणथ तथा करिष्याम' इति भणतः। ततो यक्षः प्रवरतुरगरूपं कृत्वा निजपृष्ठौ द्वावप्यारोप्य चलितः समुद्रमध्ये। अत्रान्तरे सा क्षुद्रदेवता ज्ञानेन विज्ञाय तत्रैव समुद्रमध्ये समागता प्राह–रे रे दुष्टौ !

मां त्यक्त्वा कथं शैलकेन सह गच्छथ ?। उक्तस्तया स्नेहवचनैर्मोहितो जिनरक्षितः, तया गृहीत्वा नानोपायैर्विडम्बितो दुःखभागभवत्। जिनपालितः स्वगृहं प्राप्तो भोगान् भुक्त्वा श्रीवीरजिनान्तिके प्रव्रजितोऽतिसुखभागभूत्। एवं अन्योऽपि विषयग्राहितो दुःखी स्यात्। अस्य चायमुपनयः— यथा रत्नद्वीपदेवी तथाऽविरतिः; यथा लाभार्थिनो वणिजस्तथा सुखकामा जीवाः; यथा तैर्भीतैर्दृष्टः शूलीपुरुषस्तथा संसारभीता धर्मकथां पश्यन्ति; यथा तेन दुःखकारणं देवी उक्ता, ततश्च शैलकयक्षान्निस्तार उक्तस्तथा धर्मकथा भव्यानामविरतिस्वभावं वक्ति सकलदुःखकारणरूपं, शैलकपृष्ठोपमं चरणं वाञ्छितदेशसुखहेतुः; यथा पुनस्तरणीयसमुद्रस्तथा संसारः; यथा स्वगृहगमनं तथा निर्वाणमिति बन्धुयुग्मकथानकं समाप्तम्॥ अथ देहासारतामाह—

**आहारगंधमल्ला–इएहिं सुअलंकिओ सुपुट्ठो वि। देहो न सुई न थिरो, विहडइ सहसा कुमिसोव्व ॥२९०॥**

व्याख्या—भोजनगन्धपुष्पदामादिभिरलङ्कृतः सुपुष्टोऽप्यभ्यङ्गादिभिर्देहो न शुचिर्नापि स्थिरः, किन्तु विघटते सहसा कुमिश्रमिवेति गाथार्थः ॥२९०॥ अथोपसंहरन् पुनर्मनुष्येषु सहेतुकं सुखाभावमाह—

**तम्हा दारिद्दजरा–परपरिभवरोगसोगतवियाणं। मणुयाण वि नत्थि सुहं, दविणपिवासाइनडियाणं ॥२९१॥**

व्याख्या — तस्माद्दारिद्र्यजरापरपरिभवरोगशोकतप्तानां द्रव्यतृष्णादिनटितानां मनुष्याणामपि सुखं नास्तीति गाथार्थः।

ननु न सर्वोऽपि संसारः सुखरहितः, सुराणां रत्नमयप्रासादनिवासादिमहासुखस्य प्रतीतत्वात्, सत्यं, तत्त्वतस्तेष्वपि सुखाभाव एवेति दर्शयन्नुपसंहारमाह—

व्याख्या—सत्यमिति परप्रतीतिमात्रेणाभ्युपगमे, सुराणां रत्नरचितभवनेषु दिव्याभरणानि च विलेपनानि च वरकामिन्यश्च नाटकानि च, तेषु रतानां-मासक्तानामनुत्तरो विभवः-सुखं विद्यते, किन्तु मदमानमत्सरविषादेर्ष्यानलेन सन्तप्तास्तेऽपि देवास्तस्माद्देवलोकाच्च्युत्वा केचिदनन्तं भवं भ्रमन्ति, तस्मादुक्तयुक्त्या तत्त्वतः सुराणामपि न किञ्चित्सुखं। अथवा इमानि महाविभवादीनि सुखानि भवभ्रमणनिबन्धनादिभ्योऽवसानदारुणान्येवातः किमेतैः साध्यते?, अनन्तशश्च प्राप्तपूर्वाण्येतानि, तत्कस्तेषु सुखाभिमानः?, इति गाथात्रयार्थः ॥२९२-९३-९४॥ एतदेवाह—

तं नत्थि किं पि ठाणं, लोए वालग्गकोडिमित्तं पि। जत्थ न जीवा बहुसो, सुहदुक्खपरंपरं पत्ता ॥२९५॥

व्याख्या—'लोके' चतुर्दशरज्ज्वात्मके वालाग्रकोटिमात्रमपि तत्स्थानं किमपि नास्ति, यत्र सर्वे जीवा बहुशो-ऽनेकवारान् सुखदुःखयोः परम्परां न प्राप्ता इति गाथार्थः ॥२९५॥ अथैतत्समर्थनासारं द्वारस्योपसंहारमाह—

सव्वा अवि रिद्धीओ, पत्ता सव्वे वि सयणसंबंधा। संसारे तो विरमसु, तत्तो जइ मुणसि अप्पाणं ॥२९६॥

व्याख्या—सर्वा अपि ऋद्धयः सर्वेऽपि स्वजनसम्बन्धाश्च संसारे प्राप्ताः, परं ते न च स्थिराः, अतस्तेभ्य ऋद्धिस्वजनसम्बन्धेभ्यो विरम[स्व], यदि जानासि किमप्यात्मानं नित्यस्वरूपादिना तेभ्यो भिन्नमिति गाथार्थः ॥२९६॥

इति निरवधिदुःखाश्लेषरोधैकदक्षः, कुशलशिवसुखपोषः प्रास्तनिःशेषदोषः।
अवगतगुरुवाच्यां सद्विवेकाश्रितानां, भवतु भवविरागः प्राणिनां नित्य एवं ॥१॥

इति श्रीपुष्पमालाविवरणे भावनाद्वारे भवविरागलक्षणं प्रतिद्वारं समाप्तम् ॥१२॥

अथ विनयद्वारं विभणिषुः पूर्वेण सह सम्बन्धगर्भां गाथामाह—

इय भवविरत्तचित्तो, विसुद्धचरणाइगुणजुओ निच्चं। विणए रमेज्ज सच्चे, जेण गुणा निम्मला हुंति ॥२९७॥

व्याख्या—इत्थं भवविरक्तचित्तो विशुद्धचरणादिगुणकलापेन युक्तो नित्यं सत्ये-मायाद्यदूषिते विनय एव रमेत, कुतः? इत्याह-येन विनयेन हेतुभूतेन सर्वे गुणा निर्मला भवन्ति, विनयस्य सर्वगुणालङ्कारहेतुत्वादित्यर्थः। इति भवविरागद्वारानन्तरं विनयद्वारमुच्यत इति गाथार्थः ॥२९७॥ तत्र शाब्दिकविनयशब्दस्यार्थमाह—

जम्हा विणयइ कम्मं, अट्ठविहं चाउरंतमोक्खाए। तम्हा उ वयंति विऊ, विणओ त्ति विलीणसंसारा ॥२९८॥

व्याख्या—यस्माद्विनयति-स्फेटयत्यष्टप्रकारं कर्म्म, तस्माद्विलीनसंसाराः विदो-ज्ञानिनस्तीर्थकरगणधरा विनय इति वदन्ति, किमर्थं पुनरसौ कर्म विनयति? इत्याह-चत्वारोऽन्ता नारकादिगतिलक्षणा यस्यासौ चतुरन्तः, चतुरन्त एव चातुरन्तः-संसारस्तस्य मोक्षो-ऽपगमस्तदर्थमिति गाथार्थः ॥२९८॥ अथ विनयप्रकारानाह—

लोगोवयारविणओ, अत्थे कामे भयम्मि मुक्खे य। विणओ पंचवियप्पो, अहिगारो मुक्खविणएणं ॥२९९॥

व्याख्या—लोकानामुपचारो-व्यवहारस्तत्र रूढो विनयो लोकोपचारविनयः, तद्यथा-तदुचितस्य कस्यचिदागच्छतोऽभ्युत्थानं आसनप्रदानं विज्ञापनादावञ्जलिबन्ध इत्यादि, तथा अर्थे-ऽर्थविषये तत्प्राप्तिनिमित्तं विनयस्तथा-अर्थलाभाकाङ्क्षया राजादीनां समीपेऽवस्थानं छन्दोऽनुवर्त्तनं अभ्युत्थानाञ्जलिबन्धासनप्रदानादि चेति। एतान्येव समीपस्थानादीनि कामिना वेश्या-

याश्रित्य कुर्वतां कामविनयः। एतान्येव भृत्यादीनां स्वामिनो भयेन कुर्वतां भयविनयः। वक्ष्यमाणस्वरूपस्तु मोक्षविनयः। एवं पञ्चप्रकारो विनयः। अत्र धर्मोपदेशानामेवाधिकृतत्वात् मोक्षविनयेनैवाधिकार इति गाथार्थः ॥३९९॥ अथाधिकृतस्य मोक्षविनयस्यैव स्वरूपमाह—

**दंसणनाणचरित्ते, तवे य तह ओवयारिए चेव। मोक्खविणओ वि एसो, पंचविहो होइ नायव्वो ॥४००॥**

व्याख्या—न केवलं विनयः सामान्येनैव पञ्चधा, तद्भेदरूपो मोक्षविनयोऽप्येष पञ्चविधो ज्ञातव्यो भवति। कथं? इत्याह— दर्शने ज्ञाने चारित्रे तपसि च विनयः, तथा औपचारिकश्चेति गाथार्थः ॥४००॥ अथ दर्शनादिविनयस्वरूपं तावदाह—

**दव्वाइसद्दहंतो, नाणेण कुणंतयस्स किच्चाइं। चरणं तवं च सम्मं, कुणमाणे होइ तव्विणओ ॥४०१॥**

व्याख्या—द्रव्यक्षेत्रकालास्तत्पर्यायांश्च समस्तान् समयोक्तनीत्या श्रद्दधतो दर्शनविनयः। ज्ञानमनुक्षणमेवाभ्यस्यतस्तदुक्तानुसारेणैव च सर्वाणि संयमकृत्यानि कुर्वतो ज्ञानविनयः। चरणं—चारित्रं तपश्च सम्यग् जिनाज्ञया कुर्वतस्तद्विनयश्चारित्रविनयस्तपोविनय श्चेति गाथार्थः ॥४०१॥ अथौपचारिकमोक्षविनयस्वरूपं बिभणिषुराह—

**अह ओवयारिओ उण, दुविहो विणओ समासओ होइ। पडिरूवजोगजुंजण, तह य अणासायणाविणओ ॥४०२॥**

व्याख्या—अथ गुर्वाद्युपचारे भव औपचारिकः पुनर्विनयः समासतः—सङ्क्षेपतो द्विविधो भवति। प्रतिरूपा—उचिता योगा—मनोवाक्कायलक्षणास्तेषां योजनं—यथास्थानव्यापारणं प्रतिरूपयोगयोजनं, तथा अनाशातनाविनयश्चेति गाथासङ्क्षेपार्थः ॥४०२॥

विस्तरार्थं तु ग्रन्थकार एवाह—

पडिरूवो खलु विणओ, काइयजोगे य वायमाणसिओ। अट्ठचउव्विहदुविहो, परूवणा तस्सिमा होइ ॥४०३॥

व्याख्या—'प्रतिरूपः' स्वानौचित्येन योगव्यापारलक्षणो विनयः खलु—निश्चयेन, काययोगविषयो वाग्योगविषयो मनोयोगविषयश्चेति तात्पर्यम्। तत्र काययोगोऽष्टविधः, वाग्योगश्चतुर्विधः, मनोयोगो द्विविधः, इति यथाक्रमं सम्बन्धः। तस्य चाष्टविधकायिकादिविनयस्य प्ररूपणा इय—मनन्तरवक्ष्यमाणरूपा भवतीति गाथार्थः ॥४०३॥ तत्र कायिकस्याष्टविधत्वं तावदाह—

अब्भुट्ठाणं अंजलि, आसणदाणं अभिग्गहं किई य। सुस्सूसण अणुगच्छण, संसाहण कायअट्ठविहो ॥४०४॥

व्याख्या—तदर्हस्य साध्वादेरभ्युत्थानं १, गुरुपश्चादाञ्जलिबन्धः २, श्रुतवृद्धादीनां आसनप्रदानं ३, अभिग्रहो—गुर्वादेशकरणनिश्चयः सांकाचस्करणं च ४, कृतिकर्म—सूत्रार्थश्रवणादौ वन्दनकं ५, शुश्रूषणं—विधिवदूरासन्नतया गुर्वादिसेवनं ६, अनुगमनं—आगच्छतोऽभिमुखयानं ७, संसाधनं तु—व्रजतो—गच्छतोऽनुव्रजनं ८, इत्यष्टविधः कायिको विनयः। लोकोपचारविनयस्यास्य च भेदो व्यवहारादिमात्रेणेत्यपरजनैः क्रियमाणत्वेन मोक्षाकाङ्क्षया मुमुक्षुभिः क्रियमाणत्वेन च द्रष्टव्य इति गाथार्थः ॥४०४॥

अथ वाग्योगस्य चातुर्विध्यं मनोयोगस्य च द्वैविध्यमाह—

हियमियअफरुसवाई, अणुवीईभासि वाइओ विणओ। अकुसलमणो निरोहो, कुसलमणोदीरणं चेव ॥४०५

व्याख्या—वाक्शब्दस्य प्रत्येकं सम्बन्धात् हितवाक्—परिणामसुन्दरवचनः १, मितवाक्—स्तोकाक्षरवचनः २, अपरुषवाक्—अनिष्ठुरवचनः ३, अनुविचिन्त्य भाषी—स्वालोचितवक्ता ४, इति वाचिको विनयः। अकुशलस्य आर्त्तध्यानादियुक्तस्य मनसो निरोधः १,

कुशलस्य-धर्मध्यानादियुक्तस्य मनस उदीरणं-प्रवर्त्तनं २, इति द्विविधो मानसो विनय इति गम्यते, इति गाथार्थः ॥४०५॥

ननु किमात्मकोऽसौ प्रतिरूपविनयः ? कस्य चायं भवति ? इत्यत्राह—

**पडिरूवो खलु विणओ, पराणुवित्तिमइओ मुणेयव्वो। अप्पडिरूवो विणओ, नायव्वो केवलीणं तु ॥४०६॥**

व्याख्या—प्रतिरूप-उचितः खलु विनयः परानुवृत्त्यात्मको ज्ञातव्यः, अप्रतिरूपो-ऽपरानुवृत्त्यात्मकः केवलिनामेव ज्ञातव्यः, एतेन च प्रतिरूपविनयश्छद्मस्थानां भवतीति गाथार्थः ॥४०६॥ अथैतदुपसंहरन् अनाशातनाविनयं तु विभणिषुराह—

**एसो भे परिकहिओ, विणओ पडिरूवलक्खणो तिविहो। बावन्नविहिविहाणं, बिंति अणासायणाविणयं ॥४०७॥**

व्याख्या—एषो-ऽनन्तरोक्तो भे-भवतां परिकथितः प्रतिरूपलक्षणो विनयस्त्रिविधः, अनाशातनाविनयं पुनर्द्विपञ्चाश-द्विधिविधानं ब्रुवते तीर्थकृद्गणधरा इति गाथार्थः ॥४०७ एतदेवाह—

**तित्थयरसिद्धकुलगण-संघकिरियधम्मनाणनाणीणं। आयरियथेरुवज्झाय-गणीणं तेरस पयाणि ॥४०८॥**

व्याख्या—तीर्थकरसिद्धौ प्रतीतौ, कुलं नागेन्द्रादिः, गणं कौटिकादिः, सङ्घः प्रसिद्धः, क्रियाऽस्तिवादरूपा, धर्मो यति-धर्मादिः, ज्ञानं मत्यादिः, ज्ञानिनस्तद्वन्तः, आचार्यः प्रतीतः, स्थविरः सीदतां स्थिरीकरणहेतुः, उपाध्यायः प्रसिद्धः, किंयतोऽपि साधुसमुदायस्याधिपतिर्गणी-गीतार्थः, इति तावत्त्रयोदश पदानीति गाथार्थः ॥४०८॥ ततः किम् ? इत्याह—

**अणासायणा य भत्ती, बहुमाणो तह य वन्नसंजलणा। तित्थयराई तेरस, चउग्गुणा होंति बावन्ना ॥४०९॥**

व्याख्या—आशातना—आत्मादिहीलना, तदभावोऽनाशातना तीर्थकरादीनां सर्वदैव कर्तव्या, तथा भक्तिस्तेष्वेवोचितोपचाररूपा, बहुमानस्तेष्वेवान्तरङ्गभावप्रतिबन्धरूपः । वर्णसञ्ज्वलना—तेषामेव सद्भूतगुणोत्कीर्तनरूपा । अनेन प्रकारेण तीर्थकराद्यस्त्रयोदश चतुर्गुणाः अनाशातनाद्युपाधिभेदेन द्विपञ्चाशद्भेदा भवन्ति, एतेषां चाष्टविधकर्मविनयादिनयत्वमिति गाथार्थः ॥४०९॥

अथ सर्वगुणेषु विनयस्य प्राधान्यमाह—

अमयसमो नत्थि रसो, न तरू कप्पद्दुमेण परितुल्लो। विणयसमो नत्थि गुणो, न मणी चिंतामणिसरिच्छो ॥४१०

व्याख्या—यथा किल रसेष्वमृतसमो रसो नास्ति, तरुषु कल्पद्रुमेण तुल्यस्तरुर्मणिषु चिन्तामणिसदृशो मणिर्नास्ति, तथा गुणेषु मध्ये विनयसमो गुणो नास्ति, विनय एव प्रधान इति तात्पर्यमिति गाथार्थः ॥४१०॥

केषां पुनरेष विनयो भवतीति सदृष्टान्तमाह—

चंदणतरूण गंधो, जुण्हा ससिणो सियत्तणं संखे। सह निम्मियाइं विहिणा, विणओ य कुलप्पसूयाणं ॥४११

व्याख्या—यथा चन्दनतरूणां गन्धः, शशिनो ज्योत्स्ना, शङ्खे श्वेतत्वं, एतानि विधिना सह—उत्पत्तिसमयादप्यारभ्य निर्मितानि, तथा कुलप्रसूतानां विनयोऽपि जन्मना सहैव जायत इति गाथार्थः ॥४११॥ विनीतानां किमप्यसाध्यमेव नास्तीत्याह—

होज्ज असज्झं मन्ने, मणिमंतोसहिसुराण वि जयम्मि। नत्थि असज्झं कज्जं, किंपि विणीयाण पुरिसाणं ॥४१२

व्याख्या—अचिन्त्यो हि मणिमन्त्रौषधीनां प्रभावः, "मणसा देवाण"मित्यादिवचनान्मणिप्रभृतीनां किमप्यसाध्यं

नास्ति; तथाप्यहमेवं मन्ये—भवेदसाध्यं किमपि कार्यं जगति तेषामपि, परं विनीतानां पुरुषाणां नास्ति किमप्यसाध्यं कार्यं, विनीतो हि स्वर्गापवर्गावपि साधयति, न तु मणिमन्त्रादिरिति गाथार्थः ॥४१२॥ ऐहिकं पारत्रिकं च विनयफलं सदृष्टान्तमाह—

**इह लोएच्चिय विणओ, कुणइ विणीयाण इच्छियं लच्छि। जह सीहरहाईणं, सुगइनिमित्तं च परलोए ॥४१३॥**

व्याख्या—इहलोक एव तावद्विनयो विनीतानां ईप्सितां लक्ष्मीं करोति, यथा सिंहरथादीनां, परलोके पुनः सुगतिनिमित्तं च भवतीति गाथार्थः ॥४१३॥

कथानकं तूच्यते—सुगन्धपुरे पुण्डरीकनृपः, तस्य सुतः सिंहरथनामाऽपरगुणयुक्तोऽपि दुर्विनीतत्वाद्राज्ञोऽशेषजनस्य चानिष्टोऽजनि, राज्ञा स परित्यक्तो दुःखी क्वापि पुरे भ्रमन् क्वाप्येकं तुरङ्गं सर्वप्रकारैरर्च्यमानं द्वितीयं कुट्यमानं दृष्ट्वा विस्मितः कुमारः कश्चनापृच्छत्, स नरः प्राह—भो ! असौ विनीतः, स्वस्वामिनो मनोऽभिप्रायेण चलति, अतः पूज्यते, अपरो दुर्विनीतस्तेन कुट्यते। तद्दुर्विनयफलं श्रुत्वा प्रबुद्धो विनयं तथा चकार यथा [तत्रत्य] नृपं जनांश्च रञ्जयामास सः। तेन च राज्ञा सत्स्वपि बहुषु पुत्रेषु विनीतत्वात्तस्य स्वं राज्यमदायि। पित्रा पुण्डरीकनृपेणापि सुतं विनीतं जातं श्रुत्वा बहुमानपूर्वकमाकार्य सुगन्धपुरराज्यं तस्यादायि। नृपाभ्यां दीक्षा गृहीता। श्रीसिंहरथो विनयाश्रयणात्प्राप्तप्रौढप्रतिष्ठ आश्रितसर्वगुणः क्रमेण लब्धश्रीसंयमसाम्राज्यः सर्वार्थसिद्धिमगमत्। महाविदेहेषु सेत्स्यति। इति ऐहलौकिकपारलौकिकसुखानां कारणं विनयः, इति सिंहरथराजकथा समाप्ता ॥

अथोपसंहरन्नाह—

**किं बहुणा ? विणओच्चिय, अमूलमंतं जए वसीकरणं। इहलोयपारलोइय-सुहाण वंछियफलाण ॥४१४॥**

व्याख्या—किम्बहुना ? तात्पर्यमेवोच्यते—विनय एव अपूर्वमन्त्रं—पूर्वि कामन्त्रकत्वा इत्यपूर्वं, अपूर्वमेव किञ्चिदित्यर्थः, जगति परमं वशीकरणं, केषां वशीकरणं ? इत्याह—ऐहिकामुत्रिकसुखानां सौभाग्यारोग्यादिस्वर्गापवर्गादीनां । कथम्भूतानां ? मनोवाञ्छितानां पुण्यस्य फलानां, सर्वसुखानां विधायी विनय एवेति तात्पर्यमिति गाथार्थः ॥४१४॥

इति सुकृतसुरद्रोर्मूलमानन्दकन्दः, सुरनरशिवलक्ष्मीकार्मणं कर्मभेदी ।
प्रतिदिनमनघः पुण्यवृद्धिर्विधेयो, विनय इह तदर्हैः सर्वतः स्वेष्टसिद्धयै ॥१॥

इति पुष्पमालाविवरणे भावनाद्वारे विनयलक्षणं प्रतिद्वारं समाप्तम् ॥१३॥

अथ वैयावृत्त्यं विभणिषुः पूर्वेण [सह] सम्बन्धगर्भां गाथामाह—

**विणयविसेसो य तहा, आयरियगिलाणसेहमाईणं। दसविहवेयावच्चं, करिज्ज समए जओ भणियं ॥४१५॥**

व्याख्या—यथा विनयस्तथा आचार्यादिषु दशसु स्थाने[षु] क्रियमाणत्वाद्दशविधं, व्यापृतस्य भावो वैयावृत्त्यं—भक्तपानौषधप्रदानादिरूपं, तदपि कुर्यात्त्वं, केषां ? इत्याह—आचार्यग्लानशैक्षकादीनां, उक्तं च—

“आयरियउवज्झाए, थेरतवस्सीगिलाणसेहाणं । साहम्मियकुलगणसंघ—संगयं तमिह कायव्वं ॥१॥”

कथम्भूतं यद्वैयावृत्त्यं ? इत्याह—विनयविशेष एव, समयप्रसिद्धेन केनचित्प्रकारेण वैयावृत्त्यमपि विनय एवेत्यर्थः, अनयैव च प्रत्यासत्त्या विनयद्वारानन्तरं वैयावृत्त्यद्वारमुक्तं, इत्यधिकृतद्वारस्य सम्बन्धः सूचितः । कुत इदं कर्त्तव्यं ? इत्याह—समये—सिद्धान्ते यतो भणितमिति गाथार्थः ॥४१५॥ समयोक्तमेवाह—

भरहेरवयविदेहे, पन्नरस वि कम्मभूमिगा साहू। इक्कम्मि [वि] पूइयम्मि, सव्वे [वि] ते पूइया हुंति ॥४१६॥

व्याख्या—भरतैरवतविदेहेषु पञ्चदशस्वपि कर्मभूमिषु गच्छन्ति–तिष्ठन्तीति पञ्चदशकर्मभूमिगा, ये केचन साधवस्ते सर्वेऽपि पूजिता भवन्ति, क्व सति?, एकस्मिन्नपि साधौ पूजिते सति, यतः समप्रवचनं। ततो यथाशक्ति(?) भक्तपानादिना साधूनां वैयावृत्त्यं कर्त्तव्यमिति भाव, इति गाथार्थः ॥४१६॥ व्यतिरेकमित्याह—

एक्कम्मि हीलियम्मि वि, सव्वे ते हीलिया मुणेयव्वा। नाणाईण गुणाणं, सव्वत्थ वि तुल्लभावाओ ॥४१७॥

व्याख्या—(न) केवलमेकस्मिन् पूजिते सर्वे पूजिता भवन्त्यपित्वेकस्मिन् आत्यादिना हीलितेऽप्य–पमानितेऽपि सर्वेऽपि ते साधवो हीलिता ज्ञातव्याः। कथमेतदित्याशङ्कयोपपत्तिमाह–ज्ञानादिगुणानां सर्वत्र तुल्यत्वात्, पुरुषा एव किल भिन्नाः, ज्ञानादिगुणास्तु सर्वत्र त एव, पूजाऽपि च ज्ञानादिगुणानामेव, न तु पुरुषमात्रस्येत्येकस्मिन्साधौ पूजिते सर्वेऽपि तद्वन्तः पूजिता एव, एवं ज्ञानादिगुणवतां हीलनमपीति भाव, इति गाथार्थः ॥४१७॥ प्रकृतमुपसंहरन्नाह—

तम्हा जइ एस गुणो, साहूणं भत्तपाणमाईहिं। कुज्जा वेयावच्चं, धणयसुओ रायतणउव्व ॥४१८॥

व्याख्या—तस्माद्यद्येष गुण एकस्मिन् पूजिते समस्तपूजासिद्धिलक्षणस्तदा साधूनां भक्तपानादिभिः कुर्यास्त्वं वैयावृत्त्यं। अयम्भावः–पञ्चदशस्वपि कर्मभूमिषु जघन्यपदेऽपि कोटिसहस्रपृथक्त्वं चारित्रिणां सर्वदैव प्राप्यते, उक्तं च प्रज्ञप्त्यां–"सामाइय-संजयाणं भंते! एगसमएणं केवइया होज्जा?, गोयमा! पडिवज्जमाणए पडुच्च सिय अत्थि सिय नत्थि; जइ अत्थि, जहन्नेणं एक्को वा

दो वा तिन्नि वा" एवं सर्वत्र प्रश्नालापः प्रतिपद्यमानकान् प्रतीत्य जघन्यपदोच्चारणात्र द्रष्टव्यः। "उक्कोसेणं सहस्सपुहुत्तं, पुव्वपडिवन्नए पडुच्च जहन्नेणं कोडिसहस्सपुहुत्तं उक्कोसेण वि कोडिसहस्सपुहुत्तं, छेओवट्ठावणियसंजया० गोयमा! पडिवज्जमाणए पडुच्च सिय अत्थि सिय नत्थि, जइ अत्थि, जहन्नेणं एक्को वा दो वा तिन्नि वा, उक्कोसेणं सयपुहुत्तं, पुव्वपडिवन्नए पडुच्च सिय अत्थि सिय नत्थि, जइ अत्थि, जहन्नेणं कोडिसयपुहुत्तं उक्कोसेण वि कोडिसयपुहुत्तं" इहोत्कृष्टं छेदोपस्थापनीयसंयतपरिमाणं आदितीर्थकरतीर्थान्याश्रित्य सम्भवति, जघन्यं तु तत्सम्यग् नावगम्यते। दुष्षमान्ते भरतादिषु दशसु क्षेत्रेषु प्रत्येकं तद्द्वयस्य भावाद्विंशतिरेव तेषां श्रूयते। केचित्पुनराहुः–इदमप्यादितीर्थकराणां यस्तीर्थकालस्तदपेक्षयैव समवसेयम्, कोटिशतपृथक्त्वं च जघन्य–मल्पतरं, उत्कृष्टं च बहुतरमि"ति 'भगवतिवृत्तौ' [९१८ पत्रे] "परिहारविसुद्धियसंजया० गोयमा! पडिवज्जमाणए पडुच्च सिय अत्थि सिय नत्थि, जइ अत्थि, जहन्नेणं एक्को वा दो वा तिन्नि वा, उक्कोसेणं सयपुहुत्तं, पुव्वपडिवन्नए पडुच्च सिय अत्थि सिय नत्थि, जइ अत्थि, जहन्नेणं एक्को वा दो वा तिन्नि वा, उक्कोसेणं सहस्सपुहुत्तं ३। सुहुमसंपरायसंजया वि पडिवज्जमाणए पडुच्च सिय अत्थि सिय नत्थि, जइ अत्थि, जहन्नेणं एक्को वा दो वा तिन्नि वा, उक्कोसेणं बावट्ठिसयं, अट्ठोत्तरसयं खवगाणं, चउप्पन्नं उवसामगाणं; पुव्वपडिवन्नए पडुच्च सिय अत्थि सिय नत्थि, जइ अत्थि, जहन्नेणं एक्को वा दो वा तिन्नि वा, उक्कोसेण सयपुहुत्तं ४। अहक्खायसंजयाणं पुच्छा, गोयमा! पडिवज्जमाणए पडुच्च सिय अत्थि सिय नत्थि, जइ अत्थि, जहन्नेणं एक्को वा दो वा तिन्नि वा, उक्कोसेणं बावट्ठिसयं, अट्ठुत्तरसयं खवगाणं चउप्पन्नं उवसामगाणं, जहा सुहुमसंपरायसंजया; पुव्वपडिवन्नए पडुच्च जहन्नेणं कोडिपुहुत्तं उक्कोसेण वि कोडिपुहुत्तं ५।" इत्येकस्मिन्नपि साधौ पूजिते वर्त्तमानकालापेक्षयाऽपि निश्चितं कोटिसहस्रपृथक्त्वं पूजितं भवतीति, अनागतकालापेक्षया त्वनन्ता

अपि साधवः पूजिताः स्युः। तदेतावतीं गुणसिद्धिमालोच्य सदैव वैयावृत्त्यं कुर्यास्त्वं। क इव? इत्याह–राजपुत्र इव, कस्य सत्कोऽसावित्याह–धनदराजसुत, इति गाथार्थः ॥४१८॥

कथानकं त्वेवम्–कुसुमपुरे धनदनृपः, पद्मावतीदेवी, तयोः पुत्रो भुवनतिलकनामा विद्यापारङ्गतो रूपसौभाग्यादिकलितो विश्वविख्यातो रत्नपुरस्वामिनोऽमरचन्द्रनृपस्य यशोमतीं सुतां कुमारगुणश्रवणमोहितां परिणेतुं गच्छन् ससैन्यो यावत्प्राप्तः सिद्धपुरं तावदकस्माद्रोगैर्ग्रस्तः, कण्ठीरवाभिधसामन्तादिभिः क्रियमाणविविधोपचारोऽपि न सज्जोऽभूत्। इतश्च तदैव दैवयोगाद्रत्नभानुकेवली तत्र समवासार्षीत्, सामन्तादिभिर्नत्वा केवली तद्रोगकारणं पृष्टः प्राह–धातकीखण्डभरते भवनाकरपुरे एकस्मिन् गच्छे वासवनामा साधुः सुकुलभवोऽपि क्रियाप्रमादी, साधुभिः शिक्ष्यमाणो रुष्टो गच्छप्रतिकूलो यतिमारणार्थं नीरे तालपुटं विषं चिक्षेप। कयाचित्साधुभक्त-देवतया विषमपनिन्ये, स च निर्भर्त्सितोऽरण्येऽयात्। मार्गे दवदग्धः सप्तमं नरकं जगाम, तत उद्धृत्य मत्स्येषु, पुनर्नरकेषु, पुनस्तिर्यक्षु, पुनर्नरके, एवं सप्तसु नरकेषु भ्रान्त्वा ततः क्वापि कृतपुण्यो भुवनतिलककुमारो जातः, अविधातपरिणामेन यत्तदा कर्मोपार्जितं तच्छेष एतस्येदानीमुदयप्राप्तस्तेनायं रोगसमुदायोऽस्य। इदानीमेव कालादिवशेन क्षीणतत्कर्मा सोऽत्रागमिष्यति, तावदायातः कुमारः, प्रणतः केवली, पूर्वभवादिव्यतिकरं केवलिपार्श्वे श्रुत्वा जातजातिस्मरणः तत्रासमयितरा वैराग्यात्प्राव्राजीत्। प्राक्कर्मफलविपाकं स्मारं स्मारं साधुभक्तिपरो दशविधवैयावृत्त्यं कुर्वन् सुरैर्बहुधा वैयावृत्त्ये परीक्षितोऽपि नाचलत्। द्वासप्ततिपूर्वलक्षाणि वैयावृत्त्यं कृत्वा अशीति-पूर्वलक्षाणि सर्वायुः परिपाल्य शुभभावनातः केवलज्ञानमुत्पाद्य मोक्षमगात्, इति वैयावृत्त्ये धनदनृपसुतकथा समाप्ता ॥

अथानन्यसाधारणतन्माहात्म्यगर्भं वैयावृत्त्यकरणोपदेशमाह—

वेयावच्चं नियय़ं, करेह उत्तमगुणे धरंताणं । सव्वं किर पडिवाई, वेयावच्चं अपडिवाई ॥४१९॥

व्याख्या—वैयावृत्त्यं नियतं-निश्चितं कुरुत यूयं, केषां ? इत्याशङ्क्याह-उत्तमान् ज्ञानदर्शनचारित्रगुणान् ये धरन्ति तेषां, यतः कारणात्, किलेत्याप्तोपदेशे, सर्वं चारित्रश्रुतादिकं प्रतिपतनशीलं, वैयावृत्त्यं पुनरप्रतिपाति-अविनाशीति गाथार्थः ॥४१९॥

एतदेव भावयति—

पडिभग्गस्स मयस्स व, नासइ चरणं सुयं अगुणणाए । न हु वेयावच्चकयं, सुहोदयं नासए कम्मं ॥४२०॥

व्याख्या—प्रतिभग्नस्य-उत्प्रव्रजितस्य सतो मृतस्य-अविरतत्वमापन्नस्य नश्यति तावच्चरणं, 'वा' पुनरर्थे, श्रुतं पुनरगुणनया-अपरावर्त्तनया नश्यति, अतस्सर्वमपीदं प्रतिपाति, न तु वैयावृत्त्योऽपि, तुल्यमेवैतदिति चेच्चरणश्रुतशब्देनात्र तज्जनितं शुभ कर्मोच्यते, ततश्चरणश्रुतगुणेनोपार्जितं यच्छुभं कर्म तत्प्रतिभग्नाद्यवस्थायामविरतस्य विस्मृतसूत्रस्य च सतः किञ्चित्प्रदेशोदयेनैव वेद्यमानं स्वकीयविपाकमदत्त्वा एवमेव नश्यति । वैयावृत्त्ये तु नैवमित्याह—'न हु' नैव वैयावृत्त्येन हेतुभूतेन कृतं शुभ उदयो-विपाको यस्य तच्छुभोदयं-शुभविपाकं कर्म तीर्थंकरनामोच्चैर्गोत्रादिकं प्रदेशोदयमात्रेणैव वेद्यमानं स्वविपाकमदत्त्वा एवमेव न क्षयमुपगच्छति, हेतोः प्रबलसामर्थ्येन प्रतिभग्नाद्यवस्थायामपि स्वविपाकेनैव तत्प्रायो वेद्यते, नान्यथेति भावः । इति वैयावृत्त्यमप्रतिपातीति बुध्यामहे, तत्त्वं पुनः केवलिनो विदन्तीति गाथार्थः ४२०॥ ननु यद्येतावान्गुणो वैयावृत्त्यस्य तर्हि गृहस्थादीनामपि तत्कुर्म इत्याह—

गिहिणो वेयावडिए, साहूणं वन्निया बहु दोसा । जह साहुणीसुभद्दाए, तेग विसए तयं कुज्जा ॥४२१॥

व्याख्या—साधूनां गृहिणो वैयावृत्त्ये—गृहस्थस्य वैयावृत्त्यं कुर्वतां आगमे बहवो दोषा वर्णिताः, यथा साध्वीसुभद्रायाः, तेन कारणेन विषये—यथाऽर्हमेव तकं—वैयावृत्त्यं कुर्यान्न यथेष्टं ।

का पुनरसौ सुभद्रा? इत्युच्यते—वाराणस्यां भद्रबाहुः सार्थवाहः, तस्य सुभद्रा भार्या, परं निरपत्या, तद्दुःखेन साध्वीपार्श्वे प्राव्राजीत्, महातपः करोति, परं तत्रोपाश्रये समागतश्राविकाणां डिम्भान् मालयति उत्पाटयेति उत्सङ्गे लाति, साध्वीनिवारिताऽपि तत्कथाओपरमते, ततः पृथगुपाश्रयस्था निरङ्कुशा सविशेषं डिम्भोदनिरता कालं गमयति। तदनालोच्य प्रान्तेऽष्टमासान् यावदनशनं कृत्वा मृता सौधर्मकल्पे देवी जाता। अन्यदा कृतानेकडिम्भरूपैः परिवृता श्रीवीरवन्दनार्थमागता, डिम्भरूपैर्नृत्यन्ती साधुसाध्वीजनान् व्यस्मापयत्। श्रीगौतमेन पृष्टो भगवान् वीरः—कैषा? प्रभो!, प्रभुराह—हे गौतम! प्राग्भवे [सु]भद्रैषा सुचारित्रिणी, धात्रीकर्म नाकरिष्यत्तदा केवलज्ञानमवाप्य सिद्धिसौख्यभागभविष्यत्, प्रभुणा तस्याः प्राग्भवे प्रोक्ते बहुभिः साधुसाध्वीभिरनर्थफलं गृहस्थ-वैयावृत्त्यं प्रत्याख्यातम्। ततो गौतमपृष्टः प्रभुस्तस्या आगामि[भव]स्वरूपं प्राह—एषाऽत्र चत्वारि पल्योपमान्यायुः परिपाल्यात्रैव भरते विन्ध्यगिरिमूले वेभेलसन्निवेशे सोमानाम्नी द्विजपुत्री भविष्यति, राष्ट्रकूटविप्रस्तां परिणेष्यति, तस्याः सप्तवर्षान्तेऽपत्ययुगलं भविष्यति, एवं द्वितीयेऽपि वर्षे, एवं षोडशभिर्वर्षैर्द्वात्रिंशत्सुतान् जनिष्यति, तैरुद्वाटिता कथमपि पतिमनुज्ञाप्य दीक्षां ग्रहीष्यति, एकादशाङ्गान्य-धीत्य विविधं तपः कृत्वा संलेखनापूर्वं मासमनशनं कृत्वा सौधर्मशक्रस्य सामानिकदेवत्वं प्राप्य महाविदेहेषु सेत्स्यति। "इय सोउं जिणवयणं, वेयावच्चं करेज्ज समयम्मि। विसएच्चिय विहियाओ, किरियाओ हवंति सहलाओ ॥१॥" इति सुभद्रासाध्वीकथा समाप्ता।

ननु वैयावृत्त्यकरणोद्यतेन केनचिद्भक्तपानाद्यानयनेन निमन्त्रितोऽपि साधुर्यदि तन्निमन्त्रणां नेच्छेत्ततः किम्? इत्याह—

इच्छेज्ज न इच्छेज्ज व, तह वि हु पयओ निमंतए साहू। परिणामविसुद्धीए, उ निज्जरा होइ अगहिए वि ॥४२२॥

व्याख्या—निमन्त्र्यमाणः साधुस्तां निमन्त्रणामिच्छेन्नेच्छेद्वा तथापि वैयावृत्त्यकर्त्ता साधुः प्रयतः—सादरस्तं साधुं निमन्त्रयेद्भक्तपानाद्यानयनेन। ननु यदि कथमप्यसौ तन्न गृह्णीयात्तदा निष्फल एवायं प्रयासः? इत्याह—करोम्यहमस्य वैयावृत्त्यमित्येवंरूपया परिणामविशुद्ध्या त्वगृहीतेऽपि तेनाहारादिके वैयावृत्त्यकर्तुः कर्मनिर्जरा भवत्येव, मुख्यतया भावशुद्धेरेव कर्मनिर्जराहेतुत्वादिति गाथार्थः॥

इति सकलयतीनां भक्तपानप्रदान-प्रभृति कुरुत वैयावृत्त्यमेकाग्रभक्त्या।
भवति जगति यस्मान्निश्चलः पुण्यलाभः, परमपदसुखानि स्युस्ततो हस्तगानि ॥१॥

इति पुष्पमालाविवरणे भावनाद्वारे वैयावृत्त्यलक्षणं प्रतिद्वारं समाप्तम् ॥१४॥

अथ स्वाध्यायरतिद्वारं विभणिषुः पूर्वेण सम्बन्धगर्भां गाथामाह—

वेयावच्चे अब्भु-ज्जएण तो वायणाइपंचविहो। विच्चम्मि उ सज्झाओ, कायव्वो परमपयहेऊ ॥४२३॥

व्याख्या—वैयावृत्त्येऽभ्युद्यतेनापि साधुना "विच्चम्मि"त्ति अन्तराऽन्तरा वाचना-पृच्छना-परिवर्तना-अनुप्रेक्षा-धर्मकथारूपः पञ्चविधः स्वाध्यायः कर्त्तव्यः, इति वैयावृत्त्यद्वारानन्तरं स्वाध्यायद्वारमिति भावः। यतः, कथम्भूतोऽसावित्याह-परमपदहेतुरिति गाथार्थः ॥४२३॥ वैयावृत्त्यादिभ्योऽपि स्वाध्याय एव परमं मोक्षाङ्गमित्याह—

एत्तो सव्वन्नुत्तं, तित्थयरत्तं च जायइ कमेण। इय परमं मुक्खंगं, सज्झाओ तेण विन्नेओ ॥४२४॥

व्याख्या—इतः—स्वाध्यायात्सर्वज्ञत्वं तीर्थकरत्वं च क्रमेण जायते, इति परमं मोक्षाङ्गं स्वाध्यायः, तेन कारणेन विशेषः कर्त्तव्यतयेति शेष इति गाथार्थः ॥४२४॥ किञ्च—

**तं नत्थि जं न पासइ, सज्झायविऊ पयत्थपरमत्थं। गच्छइ य सुगइमूलं, खणे खणे परमसंवेगं ॥४२५॥**

व्याख्या—तन्नास्त्येव यत्पदार्थपरमार्थं स्वाध्यायविन्न पश्यति, यत्किञ्चिदस्ति तत्सर्वं पश्यतीत्यर्थः। गच्छति च क्षणे क्षणे सुगतिमूलं परमसंवेगमिति गाथार्थः ॥४२५॥

ननु स्वाध्याय इवान्यस्मिन्नपि प्रत्युपेक्षणादौ योगे असङ्ख्येयभविकं कर्म क्षपयत्येव, तत्कोऽत्र विशेषः? इत्याह—

**कम्मं संखिज्जभवं, खवेइ अणुसमयमेव आउत्तो। अन्नयरम्मि वि जोगे, सज्झायम्मि विसेसेण ॥४२६॥**

व्याख्या—प्रत्युपेक्षणा-प्रमार्जना-भिक्षाचर्या-वैयावृत्त्यादियोगानां मध्येऽन्यतरस्मिन्नपि योगे—संयमव्यापारे आयुक्तः—आदरेण प्रवृत्तः साधुः प्रतिसमयमसङ्ख्येयभवस्थितिकं कर्म क्षपयति, परं स्वाध्याये वर्त्तमानस्तदपि विशेषेण—स्थितिरसाभ्यां विशेषतरं क्षपयति। यथा स्वाध्याये कर्मक्षयः सम्पद्यते न तथा प्रायः प्रत्युपेक्षणादाविति स्वाध्यायस्य गरीयस्त्वमिति भावः, उत्कर्षतोऽपि सप्ततिसागरोपमकोटाकोटिपरतः कर्म[स्थि]तेरभावादनन्तभवापरिपूर्तेरसङ्ख्येयभवस्थितिकं कर्म क्षपयतीत्युक्तं, नानन्तभविकमिति गाथार्थः ॥४२६॥ अथ किं परिमाणः स्वाध्यायो भवतीत्यत्राह—

**उक्कोसो सज्झाओ, चउदसपुव्वीण बारसंगाइं। तत्तो परिहाणीए, जाव तयत्थो नमोक्कारो ॥४२७॥**

व्याख्या—उत्कृष्टः स्वाध्यायश्चतुर्दशपूर्विणो द्वादशाङ्गानि, चतुर्दशपूर्वधरा हि महाप्राणध्यानादिसामर्थ्यतोऽन्तर्मुहूर्तादिना कालेन चतुर्दशापि पूर्वाणि परावर्त्तयन्ति, दशपूर्वधराणां तु दशपूर्वाणि स्वाध्यायो, नवपूर्विणां तु नव। एवं परिहाण्या तावज्ज्ञेयं यावद्यस्यापरं किमपि नागच्छति तस्य पञ्चपरमेष्ठिलक्षणो नमस्कारः स्वाध्यायः। कथम्भूतोऽयमित्याह—तदर्थो—द्वादशाङ्गार्थ इति गाथार्थः ॥४२७॥ ननु कथमयं नमस्कारो द्वादशाङ्गार्थः इत्याह—

**जलणाइभए सेसं, मोत्तुं एक्कं पि जह महारयणं। घेप्पइ संगामे वा, अमोहसत्थं जह तहेह ॥४२८॥**

**मोत्तुं पि बारसंगं, स एव मरणम्मि कीरए जम्हा। अरहंतनमोक्कारो, तम्हा सो बारसंगत्थो ॥४२९॥**

व्याख्या—ज्वलनादिभये समुपस्थिते शेषं—शेद्धुमशक्यं कर्पासादिकं मुक्त्वा एकमपि यथा महारत्नं गृह्यते, सङ्ग्रामे वा शेषं लकुटादिकं मुक्त्वा यथैकमप्यमोघं—रिपुवधे अस्खलितं बाणशक्त्यादिकं शस्त्रं गृह्यते, तथेहापि मरणे समुपस्थिते तस्यामवस्थायां स्मर्त्तुमशक्यं मुक्त्वाऽपि द्वादशाङ्गं स एवार्हदादिनमस्कारो यस्मात्क्रियते, तस्माद्द्वादशाङ्गस्थाने क्रियमाणत्वादन्यथाऽनुपपत्तेरसौ द्वादशाङ्गार्थः। अयम्भावः—ज्ञानदर्शनचारित्राण्येव हि द्वादशाङ्गार्थः, तानि च पञ्चस्वर्हदादिष्वेव स्युर्नान्यत्र, नमस्कारे चार्हदादय एवाभिधेया, अतो द्वादशाङ्गस्मरणोचितेष्वपि तेषु तेषु मरणादिस्थानेषु सुखानुस्मरणीयत्वादिकारणद्वयं स्मरणीयत्वेनोपदिष्टस्ततो युक्तैवास्य द्वादशाङ्गार्थतेति गाथाद्वयार्थः ॥४२८-२९॥ एतदेवावश्यकभाष्योक्तयुक्त्या दर्शयन्नाह—

**सव्वं पि बारसंगं, परिणामविसुद्धिहेउमित्तागं। तक्कारणमेत्ताओ, किह न तयत्थो नमुक्कारो ? ॥४३०॥**

व्याख्या—सर्वमपि द्वादशाङ्गं तावत्परिणामविशुद्धिहेतुमात्रकमेव, ततस्तत्कारणमात्रत्वात्पञ्चपरमेष्ठिद्वारेण परिणामविशुद्धि-कारणमात्रत्वात्कथं न तदर्थो—द्वादशाङ्गार्थो नमस्कारः ?, अपितु तदर्थ एवेति गाथार्थः ॥४२०॥

अथ मरणाद्यवस्थायामपि अर्थेन स्मर्यते कारणमाह—

**न हु तम्मि देसकाले, सक्को बारसविहो सुयक्खंधो। सव्वो अणुचिंतेउं, धंतंपि समत्थचित्तेण ॥४२१॥**

व्याख्या—न हु—नैव तस्मिन् देशकाले—मरणादिप्रदेशकाले द्वादशविधोऽपि श्रुतस्कन्धोऽनुचिन्तयितुं शक्यः। केन ? इत्याह—'धन्तं' अत्यर्थं समर्थचित्तेनापि, सतो द्वादशाङ्गसाध्यसाधकत्वात् सुखस्मरणीयत्वाच्च तदवस्थायामेष एव स्मरणीय इति गाथार्थः ॥४२१॥ अथ नमस्कारस्यैव माहात्म्यमाह—

**नामाइमंगलाणं, पढमं चिय मंगलं नमोक्कारो। अवणेइ वाहितक्कर-जलणाइभयाइं सव्वाइं ॥४२२॥**

**हरइ दुहं कुणइ सुहं, जणइ जसं सोसए भवसमुद्दं। इहलोअपारलोइअ-सुहाण मूलं नमुक्कारो ॥४२३॥**

व्याख्या—नामस्थापनाद्रव्यभावमङ्गलानां मध्ये प्रथमं-प्रधानं मङ्गलं नमस्कार एव, यतः कथम्भूतोऽसौ ? इत्याह—अपनयति व्याधितस्करज्वलनादिभयानि सर्वाणि, तथा दुःखं हरति, सुखं करोति, यशो जनयति, भवसमुद्रं शोषयति, किम्बहुना ? ऐहलौकिकपारलौकिकसुखानां मूलं नमस्कार इति गाथाद्वयार्थः ॥४२२-२३॥ अथैहिकेषु पारत्रिकेषु च नमस्कारगुणेषु दृष्टान्तानाह—

**इहलोयम्मि तिदंडी, सादिव्वं माउलिंगवणमेव। परलोए चंडपिंगल-हुंडियजक्खो य दिट्ठंता ॥४२४॥**

व्याख्या —ऐहलौकिके नमस्कारमाहात्म्ये त्रिदण्ड्युदाहरणं, तथाहि—जिनदाससुतः शिवकुमार उत्तमोऽपि द्यूतव्यसनी, पित्रा गुरुपार्श्वे नीतोऽपि धर्मं न प्रतिपद्यते, अन्यदा पित्रोक्तं—वत्स ! अमुं मन्त्रं महाप्रभावं महाभयापहारप्रवणं गृहाण, स्मरणमात्रात्कार्यसिद्धिः स्यात्। ततो लोभावेशेन पितृसकाशाद्गृहीतः पञ्चपरमेष्ठिनमस्कारः। क्रमेण पितर्युपरतेऽप्यस्य तथैव व्यसनरसिकस्य द्रविणं न पूर्यते। ततस्तेनैकस्त्रिदण्डी धनार्थमभ्यर्थितः प्राह—दारिद्र्येऽथायं धनं यदि परमक्षतमृतकमानेष्यसि, ततो लुब्धेन शिवेन कृष्णशाखोल्लम्बितचौरमृतकं तस्योपनीतं। सोऽप्युत्तमश्मशानं खड्गकरं मृतकं तदङ्घ्रिसंवाहकं च तं संस्थाप्य मण्डले स्थितः स्वविद्यां स्मरति, भीतः शिवस्तु नमस्कारं, पूर्णे जापे खड्गं गृहीत्वोत्थितं मृत(तो)कं नमस्कारप्रभावाच्छिवस्याप्रभ(को)त्वैवापतत्। ततः पुनरपि सविशेषं त्रिदण्डी स्वविद्यां शिवोऽपि नमस्कारं जपति, पूर्णे जापे पुनरुत्थाय तथैवापतत्, ततः शङ्कितः स शिवं पप्रच्छ—किं त्वमपि वत्स ! वेत्सि काञ्चिद्विद्यां ?, स प्राह—यदि त्वं तुष्यसि, ततः पुनस्त्रिदण्डी साक्षेपं तां स्मरति, पूर्णे जापे शिवायाप्रभवन्नुत्थितमृतकावतीर्णो वेतालः खड्गेन त्रिदण्डीनं द्विधा विधाय श्मशानेऽक्षेप्सीत्, स च हेममयं जातं। तं पुरुषं हर्षाद्गृहीत्वा गृहमगाच्छिवः। ततः प्रभृति तत्प्रभावाज्जातोऽयं महेभ्यः, तदेवं नमस्कारप्रभावं साक्षाद्विलोक्य जिनधर्माराधनोद्यतमतिः शिवकुमारः सम्यक्त्वव्रताभिग्रहप्रतिपालनपरस्तीर्थयात्रोद्धारादिभिः शासनं भासयामास, इतीहलोकफले त्रिदण्ड्युपलक्षितः शिवकुमारदृष्टान्तः समाप्तः॥

'स्यादिह्यं' ति नमस्कारप्रभावतो देवतासान्निध्यमपि जायत इति भावस्तथा—

श्राद्धसुता श्रीमती परमश्राविका मिथ्यादृक्परिणीता, तया विनयगुणेनावर्जितः श्वशुरवर्गः, प्रियेण वारिताऽपि जैनधर्मं मधुकवती, अन्यदा तस्यां विरक्तो भर्त्ताऽन्यां परिणेतुमिच्छति, परं न कोऽपि गुणवत्या भार्याया उपरि स्वकन्यां प्रयच्छति, तत

स निर्घृणः श्रीमतीमारणाय कुतोऽपि कृष्णसर्पमानीय घटे चिक्षेप। ततस्तां प्रदोषसमये समादिशत्-प्रिये! घटस्थां कुसुममालां समर्पयेति कथनानन्तरमेवान्धकारस्थापितं घटं दृष्ट्वा तया नमस्कारस्मरणपूर्वं करे क्षिप्ते सन्निहितदेवतया सर्पमपहृत्य संस्थापिता कुसुममाला, तामादाय भर्तुर्ददौ सा, सोऽप्यतिविस्मितश्चिन्तयति-अहो!! किमेतत्?, गत्वा यावद् घटं विलोकयति तावत्पुष्पाणि पश्यति, न पुनर्भुजङ्गं, ततो भार्यागुणैर्हृष्टस्तन्माहात्म्यं च विचार्य भीतस्तां क्षामयित्वा दृष्टनमस्कारफलो जिनधर्मं प्रतिपद्य श्रीमतीं सर्वगृहस्वामिनीं कृतवान्। ततो विपुलान् भोगान् भुक्त्वा बहुदिनप्रान्ते द्वावपि वैराग्याद्दीक्षां प्रतिपद्य सम्यक् प्रतिपाल्य ब्रह्मलोकङ्गतौ, महाविदेहे सेत्स्यतः। "एवं च नमुक्कारो, जीवियरक्खं च कामलाभं च। इहलोयम्मि वि साहइ, जीवाणं भत्तिजुत्ताणं ॥१॥" इति श्रीमतीकथा समाप्ता॥

मातुलिङ्गवनं-बीजपूरवनं, तदुदाहरणम्, तथाहि-एकस्मिन्नगरे नदीतीरे एकेन स्वर्णकारिकेणैकं महाप्रमाणं सुगन्धिवर्णाढ्यं बीजपूरं पतितं प्राप्याद्भुतं ज्ञात्वा राज्ञः समर्पितं। पृष्टश्च राज्ञा क्व लब्धं?, तेनाप्युक्तं-नदीप्रवाहे, ततस्तुष्टिदानं दत्त्वा विसृष्टः सः राजा तस्मिन्नपूर्वं भुङ्क्ते स्वपुरुषैर्नदीतीरं शोधितं, यावदेकमपूर्वं वनं दृष्टं श्रुतं च-यः कुतोऽप्यमूनि फलानि गृह्णाति स म्रियते, ततस्तैः प्रत्यागत्योक्तं नृपतेस्तत्। तथाप्यनिवृत्ताभिलाषो राजा नगरलोकनामगर्भगोलकान् घटे प्रक्षिप्य प्रतिदिनमेकगोलकाकर्षणे तन्नाम्ना पुंसा बीजपूरमानाययति, सोऽप्यनारमवशात्तत्र वने प्रविश्य बीजपूरं त्रोटयित्वा बहिः क्षिपति, अन्यस्तद्गृहीत्वा नृपतेर्ददाति, इतरस्तत्रैव म्रियते। एवं बहुभिर्दिनैरेकस्य श्रावकस्य वारकः प्राप्तः गतश्च स तत्र, श्रीजिनप्रणिधानं विधाय नमस्कारं भणित्वा नैषेधिकीं च कृत्वा यावद्वने प्रविशति तावत्तत्रस्थो व्यन्तरो नमस्काराद्याकर्णनात्प्रतिबुद्धः श्रावकं प्रत्याह-भो महानुभाव! साधुकृतं त्वया,

यदहं भवादुद्धृतो नमस्कारस्मरणेन, तद्ब्रूण यत्तव प्रियं, करोमि, श्राद्धेनोक्तं–किमन्येन मे ? तथा त्वं कुरु यथा न म्रियते नगरनरः, ततस्तुष्टः सुरः प्राह–तत्रैव स्थितस्य तवोच्छीर्षके प्रत्यहमहमेकैकं बीजपूरं स्थापयिष्ये, तन्नृपतेर्देयं, एवं च राजा त्वयि तुष्टो भविष्यति, न च नगरजनो मरिष्यति, इति वरं प्राप्य स स्वगृहं प्राप्तः। ततो राज्ञा लोकेन चातिविस्मितेन पृष्टः पूर्वोक्तं सर्वं जिननमस्कार-माहात्म्यमाह। ततो बहुलोको जिनधर्मं प्रपेदे। राजाऽपि तुष्टो धनं धनं दत्त्वा श्राद्धमदरिद्रं चकार। एवं इहलोकेऽपि विशुद्धचित्तानां जन्तूनां जीवितधनावहो नमस्कारो नियमाज्जायते, इति मातुलिङ्गवनाख्यानकं समाप्तम् ॥

पारलौकिके नमस्कारमाहात्म्ये चण्डपिङ्गलकथानकम्, तच्चेदम्—वसन्तपुरे चण्डपिङ्गलश्चौरः श्राविकावेश्यागृहे वसति तदनुरक्तः, अन्यदाऽनेन राज्ञो गृहान्महामूल्यो मौक्तिको हारश्चोरयित्वाऽतियत्नेन वेश्यागृहे गोपितः, अन्यदा महोत्सवे सर्वा वेश्याः स्वस्वसमृद्धिसमुदयेनालङ्कृता बहिर्व्रजन्ति, अथ सर्वास्वहमेवातिशयतः शृङ्गारा स्यामिति तस्करवेश्या तमेव हारं कण्ठे क्षिप्त्वो-द्यानं गता नृपपत्नीचेट्या दृष्टा, उपलक्षितो हारस्तया, ज्ञापितं च देव्याः, तया च राज्ञस्तेन च गवेषयित्वा गृहीतस्तस्करो विडम्ब्य शूलिकया भिन्नः। तच्छ्रुत्वा वेश्या स्वं निन्दन्ती महादुःखिता तत्र गत्वा चौरं नमस्कारमनुशास्ति 'इह नृपपुत्रो भवेय'मिति निदानं चाकारयत्तस्मात्। ततोऽयं नमस्कारं पठन् मृत्वा तेन निदानेनाग्रमहिषीगर्भे पुत्रत्वेनोत्पन्नः, यावत्सा वेश्या भवितव्यतावशेन क्रीडापनधात्रीत्वं प्राप्ता। अथ सा चिन्तयति–गर्भस्य चण्डपिङ्गलमरणस्य च तावत्तुल्य एव कालः, तस्मात्सम्भाव्यते स एवायं, इति विचार्य रुदतस्तस्य कुमारस्य भणति–मा रोदिश्चण्डपिङ्गल !, पुनः पुनरित्यालपन्त्यां जातं जातिस्मरणमस्य, जिनधर्मः प्रतिपन्नः, स च कालेन राज्यं प्रतिपाल्य तया वेश्यया समं प्रव्रज्यां प्रतिपद्य तत्सममेव सिद्धः। एवं नमस्कारो भोगफलः शिवफलश्च

भावप्रधानजीवानां जायत इति चण्डपिङ्गलकथानकं समाप्तम् ॥ हुण्डिकयक्षस्य दृष्टान्तः कथितः, स चैवमुच्यते —

मथुरायां हुण्डिकश्चौरः सर्वामपि नगरीं मुष्णाति, अन्यदा कोट्टपालेन सलोप्त्रः प्राप्तः स क्षिप्तः शूलायां नृपादेशेन । ततस्तेनातिपिपासितेन समीपे गच्छन्तो जिनदत्तश्रावकस्योक्तं—'भो ! भवतां दयामयो धर्मस्तत्त्वो महाभाग ! दीनस्य तृषितस्य मे पानीयं याहि 'परकार्ये एव धरन्ति जीवितव्यं धीराः' इति जिनदत्तः प्राह—यदि त्वं नमस्कारं निरन्तरं पठसि तदाऽहं पानीमानीय पाययामि, एवं च प्रतिपन्ने जलमानेतुं गते श्राद्धे नमस्कारोद्धोषं कुर्वन्नेव कालं कृत्वा तदनुभावाद्यक्षो जातः । श्राद्धः पुनर्नीरमादाय तत्रागतस्तावद्राजपुरुषैर्गृहीत्वा राज्ञः कथितश्चौराणां भक्तदातायमिति, राज्ञा सोऽपि शूलारोपणार्थमादिष्टः, हुण्डिकयक्षश्चावधिना पूर्वभवव्यतिकरं जानन्महागिरिमेकं गृहीत्वोपर्युपरि स्थितो भणति—अरे ! न जानीथ यूयं ?, यदेतस्येह माहात्म्यं, तन्मुञ्चत शीघ्रमन्यथा सकलां पुरीं चूरयिष्यामि, ततो राजा सपरिच्छदो भीतो हुण्डिकयक्षं पूजयन्ति कारयति च तस्यायतनं, जिनदत्तं च क्षामयित्वा विसृजति । यक्षश्च जिनदत्तं नत्वा भणति—तथा सर्वपापास्पदमप्यहं यद्दिव्यां ऋद्धिं प्राप्तवान् स तवैव नमस्कारदानकृतः प्रसादः, ततः पुनः कार्ये विषमेऽहं स्मर्तव्यः' इत्युक्त्वा यक्षः स्वस्थानमगात् । इति द्रव्यतोऽपि गृहीतो नमस्कारः सुरर्द्धिहेतुर्जायत इति गाथार्थः ॥४२८॥ इति हुण्डिकयक्षकथानकं समाप्तम् ॥

इति कुरुत स्वाध्यायं, जिनेन्द्रभणितेषु कुशविमलभावाः । येनेह चित्तशान्तिः, प्रभवति गुणवृद्धिसंसिद्धिः ॥१॥

इति पुष्पमालाविवरणे भावनाद्वारे स्वाध्यायरतिलक्षणं प्रतिद्वारं समाप्तम् ॥१५॥

अथानायतनत्यागद्वारं विभणिषुः पूर्वेण सम्बन्धमर्थं गाथामाह—

नामपि मनो विद्रवति। ब्रह्मचर्यं दृढमपि शिथिली भवतीति गाथार्थः ॥४३८॥ किञ्च—

नीयंगमाहिं सुपओहराहिं, उप्पिच्छमंथरगईहिं। महिलाहिं निन्नयाहि व, गिरिवरगुरुयावि भिज्जंति ॥४३९॥

व्याख्या—महिलाभिः—स्त्रीभिर्निम्नगाभि—र्नदीभिरिव गिरिवरगुरवोऽपि भिद्यन्ते—ऽधरीक्रियन्ते, आस्तामितरे लघवः। कथम्भूताभिः स्त्रीभिः?, नीचं—जात्यादिहीनं गच्छन्तीति नीचगास्ताभिः, नदीपक्षे तु नीचो—निम्नः प्रदेशस्तेन गच्छन्ति—वहन्तीति नीचगास्ताभिः, शोभनाः पयोधराः—स्तना यासां तास्ताभिः, नदीपक्षे तु शोभनं पयः पानीयं धरन्तीति सुपयोधरास्ताभिः, पक्षद्वयेऽपि उत्पिच्छा—मनोहारिणी मन्थरा गतिर्यासां तास्ताभिरित्यतस्त्याज्या एवैता इति गाथार्थः ॥४३९॥ अपि च—

घणमालाउ व दूर—न्नमंतसुपओहराओ वड्ढंति। मोहविसं महिलाओ, दुन्निरुद्धविसं व पुरिसस्स ॥४४०॥

व्याख्या—घना—मेघास्तेषां मालाः—परम्परास्ता इव दूरं—अत्यर्थं उन्नमन्तं—उन्नतिभाजः शोभनाः पयोधरा यासां ता दूरोन्नमत्सुपयोधरा महिलाः—स्त्रियः पुरुषस्य मोह एव विषं, तद्वर्धयन्ति; अत्र मेघमालापक्षे पयोधराः—जलदाः, स्त्रीपक्षे तु स्तना इति, किमिव काः? इत्याह—मेघमाला एव दुर्निरुद्धविषमिव, यथा कुमन्त्रवादिना केनचिद्दुरुच्चारितं विषं पुरुषस्य दूरोन्नमत्सुपयोधरा—मेघमाला दृष्टाः सत्यः पुनरपि वृद्धिं नयन्ति, तथा स्त्रियोऽपि मोहविषमिति तात्पर्यमिति गाथार्थः ॥४४०॥ अपरञ्च—

सिंगारतरंगाए, विलासवेलाए जोव्वणजलाए। के के जयम्मि पुरिसा, नारिनईए न वुज्झंति? ॥४४१॥

व्याख्या—नार्येव नदी, तया के के जगति पुरुषा नोह्यन्ते—नापह्रियन्ते?, अपितु सर्वे एवोह्यन्ते, कथम्भूतया नद्या?

सज्झायं पि करेज्जा, वज्जंतो जत्तओ अणाययणं । तं इत्थिमाइयं पुण, जईण समए जओ भणियं ॥४३५॥

व्याख्या—उक्तस्वरूपं स्वाध्यायमपि यत्नतोऽनायतनं वर्जयन्नेव कुर्यान्न त्वनायतने, इति स्वाध्यायद्वारानन्तरमनायतनत्यागद्वारमुच्यत इति भावः । तत्रायतने—मोक्षाय प्रयतन्ते साधवो यत्र तदायतनं—गुरुचरणमूलादि, कुत्सितमायतनं स्त्रीजनादि, अत आह—तत्पुनरनायतनं यतीनां स्त्र्यादिकं द्रष्टव्यं । यतः समये भणितमिति गाथार्थः ॥४३५॥ सिद्धान्तोक्तमेवाह—

विभूसा इत्थिसंसग्गी, पणीयं रसभोयणं । नरस्सऽत्तगवेसिस्स, विसं तालउडं जहा ॥४३६॥ [दश० ८-५६]

व्याख्या—विभूषा—वस्त्रादिराढा, येन केनचित्प्रकारेण स्त्रीणां [संसर्गस्तथा] प्रणीतरसभोजनं—गलत्स्नेहरसाभ्यवहारः, एतत्सर्वमेव विभूषादिः नरस्यात्मगवेषिण—आत्महितान्वेषणपरस्य विषं तालपुटं यथा, तालमात्रव्यापत्तिकरविषकल्पमहितकरमिति गाथार्थः ॥४३६॥

ननु जिनवचनभावितानां जितेन्द्रियत्वादिगुणयुक्तानां स्त्र्यादिसंसर्गोऽपि न क्लेशाय भविष्यति, किं पुनरनया तर्जनया ? इत्याह—

सिद्धंतजलहिपारं, गओ वि विजिइंदिओ वि सूरो वि । थिरचित्तो वि छलिज्जइ, जुवइपिसाईहिं खुद्दाहिं ॥४३७॥

व्याख्या—सिद्धान्त एव जलधिस्तस्य पारङ्गतोऽपि विजितेन्द्रियोऽपि श[शू]रोऽपि स्थिरचित्तोऽपि छल्यते युवतीपिशाचीभिः क्षुद्राभिरिति गाथार्थः ॥४३७॥ पुनर्दृष्टान्तद्वारेण स्त्रीसंसर्गस्य दुष्टत्वमाह—

मयणनवणीयविलओ, जह जायइ जलणसन्निहाणम्मि । तह रमणिसन्निहाणे, विद्दवइ मणो मुणीणं पि ॥४३८॥

व्याख्या—यथा ज्वलनसन्निधाने मदननवनीतयोर्विलयो—द्रावः सञ्जायते, तथा रमणीनां सन्निधाने मुनीनामपि—सुसाधू-

ावप्रधानजीवानां जायत इति चण्डपिङ्गलकथानकं समाप्तम् ॥ हुण्डिकयक्षस्य दृष्टान्तः कथितः, स चेदमुच्यते —

मथुरायां हुण्डिकश्चौरः सर्वामपि नगरीं मुष्णाति, अन्यदा कोट्टपालेन सलोप्त्रः प्राप्तः स क्षिप्तः शूलायां नृपादेशेन । तत-तेनातिपिपासितेन समीपे गच्छतो जिनदत्तश्रावकस्योक्तं—'भो ! भवतां दयामयो धर्मस्ततो महाभाग ! दीनस्य तृषितस्य मे पानीयं ाहि ' परकार्ये एव चरन्ति जीवितव्यं धीराः ' इति जिनदत्तः प्राह—यदि त्वं नमस्कारं निरन्तरं पठसि तदाऽहं पानीमानीय ास्यामि, एवं च प्रतिपन्ने जलमानेतुं गते श्राद्धे नमस्कारोद्घोषं कुर्वन्नेव कालं कृत्वा तदनुभावाद्यक्षो जातः । श्राद्धः पुनर्नीरमादाय त्रागतस्तावद्राजपुरुषैर्गृहीत्वा राज्ञः कथितश्चौराणां भक्तदाताऽयमिति, राज्ञा सोऽपि शूलारोपार्थमादिष्टः, हुण्डिकयक्षश्चावधिना र्वभवव्यतिकरं जानन्नवधिनिरीक्ष्य गृहीत्वोपर्युपरि स्थितो भणति—अरे ! न जानीथ यूयं ?, यदेतस्येदं माहात्म्यं, तन्मुञ्चत शीघ्र-न्यथा सकलां पुरीं चूरयिष्यामि, ततो राजा सपरिच्छदो भीतो हुण्डिकयक्षं पूजयति कारयति च तस्यायतनं, जिनदत्तं च ामयित्वा विसृजति । यक्षश्च जिनदत्तं नत्वा भणति-तथा सर्वपापास्पदमप्यहं यद्दिव्यां ऋद्धिं प्राप्तवान् स तवैव नमस्कारदानकृतः साद:, ततः पुनः कार्ये विषमेऽहं स्मर्त्तव्यः' इत्युक्त्वा यक्षः स्वस्थानमगात् । इति दुष्टेनापि गृहीतो नमस्कारः सुरर्द्धिहेतुर्जायत ति गाथार्थः ॥४३८॥ इति हुण्डिकयक्षकथानकं समाप्तम् ॥

इति कुरुत स्वाध्यायं, जिनेन्द्रभणितेषु कुरुत विमलभावाः । येनेह चित्तशान्तिः, प्रभवति गुणवृद्धिसंसिद्धिः ॥१॥

इति पुष्पमालाविवरणे भावनाद्वारे स्वाध्यायरतिलक्षणं प्रतिद्वारं समाप्तम् ॥१८॥

अथानायतनत्यागद्वारं विभणिषुः पूर्वेण सम्बन्धमदर्शी गाथामाह—

क इव ? इत्याह–प्रोषितो–[विदेशङ्गतो] धनाढ्यवणिक्, तस्य भवनं–गृहं, तत्समीपे उषितो–विश्रामहेतोः स्थितः, स चासौ मुनिश्च प्रोषितभवनोषितमुनिस्तद्वत् । कः पुनरसावित्युच्यते—

तगरापुर्यां देवदत्तो वणिक्, तस्य भार्या भद्रा, सुतोऽर्हन्नकः, अन्यदा देवदत्तो वैराग्यादर्हन्मित्राचार्यसमीपे ससुतभार्यः प्राव्राजीत् । सुचारित्रपालनपरोऽपि पुत्रं स्नेहेन लालयन् साधुभिर्वारितोऽपि न व्यरंसीत् । अर्हन्नको बहुलालितत्वात्सुखशीलो जातः । अन्यदा पितरि मृतेऽतिदुःखितः स्वयमेव भिक्षार्थं भ्रमन् सुकुमालः परीषहोपसर्गैर्बाढं बाध्यते । अथ ग्रीष्मे परितप्तसकलभुवने भिक्षार्थं भ्रमन्नसौ दृढं परिश्रान्तः सर्वाङ्गस्वेदपूर्णः प्रोषितैकसार्थवाहमहागृहच्छायायां यावद्विश्राम्यति क्षणमेकं तावद्बहुदिनभर्तृवियोगजनितमदनाग्निसन्तापा तद्गृहस्वामिनी वातायनस्था तपःशोषितगात्रमप्यर्हन्नकं सुरूपं सुकुमालं विलोक्याकार्य प्रचुरतरमोदकाद्याहारान् दत्वा शृङ्गारसारवचनाङ्गविकारप्रकारैः स्वानुरक्तं तं कृत्वा स्वगृहे प्रच्छन्नमस्थापयत् । सोऽथ सर्वैः कामाङ्गैस्समग्रस्तया समं भोगान् भुञ्जन् दिनानि गमयति । इतश्च स सर्वतः साधुभिर्गवेषितोऽपि न दृष्टः, तज्जननी च साध्वी सुतस्नेहेन तं विलोकयन्ती अर्हन्नक अर्हन्नक इति विलपन्ती 'दृष्टः क्वाप्यर्हन्नक' इति प्रतिजनं पृच्छन्ती भ्रान्तचित्ता पुरे बभ्रमीति । अन्यदा राजपथस्था प्रच्छन्नगवाक्षस्थेन सुतेन दृष्टा सा, ततो लज्जितोऽसावित्यचिन्तयत्—

"पेच्छह अहो !! कुपुत्तो, सोऽहं इय जस्स कारणे एसा । एयावत्थं पत्ता, सुण्णा परिभमइ नयरीए ॥१॥"
"अहवा दुप्पुत्तेहिं, जाएहिं किं फलं हवइ अहं ? । जाओ अरणीए सिही, दाहं मोत्तूण किं कुणइ ? ॥२॥"

इत्यादि स्वं निन्दन् झगिति गेहान्निर्गत्य मातुरन्तिकमगात् । तं सहसा दृष्ट्वा सा हृष्टा पूर्वव्यतिकरमपृच्छत् । ततोऽत्याग्रहे

रुणदुःखान्वितं प्रचुरतरं पर्यटन्ति, बोधिं तु सर्वथा न लभन्ते, यदि तु केचिल्लभन्ते तेऽप्यतिकष्टेनेति गाथार्थः ॥४४७॥

ननु सन्तु संयतीचतुर्थव्रतभङ्गादयो विरुद्धाः, देवस्यापि निष्प्रयोजनस्य चैत्यद्रव्यस्य भक्षणं निर्दूषणमेवेत्याशङ्क्याह—

चेइयदव्वं साहा-रणं च जो मुसइ× जाणमाणो वि। धम्मं पि सो न याणइ, अहवा बद्धाउओ नरए ॥४४८॥

व्याख्या—चैत्यद्रव्यं प्रसिद्धं, साधारणं च—जीर्णचैत्योद्धारादिनिमित्तमेकत्र स्थापितं द्रव्यं च यो जानन्नपि मुष्णाति—स्वयं भक्षयति अन्यैर्वा भक्षयति भक्षयतो वाऽन्यांस्समनुजानीते स एवम्भूतो जन्तुरनयैव चेष्टया ज्ञायते यदुत—सर्वज्ञोक्तं धर्ममपि न जानाति, अथवा ज्ञातजिनधर्मोऽपि यद्येवंविधपापेषु प्रवर्तते तदा ज्ञायते यदुत—पूर्वमेव नरके बद्धायुष्कोऽयं, अन्यथा तत्प्रवृत्त्ययोगादिति गाथार्थः ॥४४८॥ अथ चैत्यद्रव्योपेक्षिणां सदृष्टान्तं दोषमाह—

जमुवेहंतो पावइ, साहू वि भवं दुहं च सोऊणं। संकासमाइयाणं, को चेइयदव्वमवहरइ? ॥४४९॥

व्याख्या—यच्चैत्यद्रव्यमुपेक्षमाणः—सति सामर्थ्ये देशनादिद्वारेण तद्रक्षामकुर्वन् साधुरपि, आस्तामन्यः स्वयं भक्षकादिः, भवं—संसारमनन्तं प्राप्नोति, उक्तं च श्रीनिशी [थभाष्ये] थे—

"चेइयदव्वविणासे, तद्दव्वविणासगे दुविहभेए। साहु उविक्खमाणो, अणंतसंसारिओ होइ ॥१॥"

ततश्चैत्यद्रव्यापहारिणां सङ्काशश्रावकादीनां दुःखं चानन्तं श्रुत्वा कश्चैत्यद्रव्यमपहरति?, न कोऽपीत्यर्थः। सङ्काशकथानकं त्वेवमुच्यते-

---

× द्वाः "सयं च भक्खेइ। सइ सामत्थे उवेक्खइ, जाणंतो सो महापावी ॥" इति बृहद्वृत्त्यन्वितमुद्रितप्रतौ।

कृते तेन सर्वमप्युक्तं तदग्रे, ततोऽतिविचक्षणया तया संसारभ्रमणभयं दर्शयित्वा स जिनदीक्षाऽभिमुखः कृतः, सोऽपि संविग्नो गुरुपाद-मूले [पुनः] प्राव्राजीत्। ततो गुरूंस्त्वाऽवदत्–भगवन्! गतमदोऽहं, न चिरं दीक्षां रक्षितुं क्षमः, तद्यदि भवतामनुमतिः स्यात्तदाऽनशनं कृत्वा शीघ्रमेव स्वकार्यं साधयामि, आराधक इति ज्ञात्वा गुरुभिरनुज्ञातः पापान्यालोच्य शैलशिखरमारुह्य तत्रशिलातले कायोत्सर्गे स्थितो ग्रीष्मे मध्याह्ने सर्वतस्तापितः सुकुमालो नवनीतपिण्डवद्विलयं गतः। शुभध्यानाद्वैमानिकसुरोऽभूत्। एवं संसर्गमात्रेऽपि बहुलानर्थफला महिला ज्ञात्वा तत्संसर्गं दूरतस्त्यजेदिति अर्हन्नककथा समाप्ता॥

सम्प्रति संयतीसंसर्गस्य विशेषतोऽनायतनत्वमाह—

## इयरत्थीण वि संगो, अग्गिं सत्थं विसं विसेसेइ। जो संजईहिं संगो, सो पुण अइदारुणो भणिओ ॥४४६॥

व्याख्या—तदेवं सूक्तप्रकारेण इतरासामपि गृहस्थकुलिङ्गिस्त्रीणां सङ्गः–सम्बन्धः अग्निं शस्त्रं विषं च विशेषयति–अतिशेते, अग्न्यादीनामेकभविकदुःखमात्रदायकत्वात् स्त्रीसंसर्गस्य त्वनन्तभविकानन्तदुःखदायकत्वादिति भावः। यः पुनः संयतीनां साध्वीनां सङ्गः, सोऽतिदारुणोऽनन्तानन्तरौद्रदुःखदायको भणित आगम इति विशेषेणासौ वर्जनीय इति गाथार्थः ॥४४६॥ आगमोक्तमेवाह—

## चेइयदव्वविणासे, इसिघाए पवयणस्स उड्डाहे। संजइचउत्थभंगे, मूलग्गी बोहिलाभस्स ॥४४७॥

व्याख्या—इह चैत्यं–सामान्येन जिनायतनं, तस्य सम्बन्धिद्रव्यं, तद्विनाशे कृते, तथा ऋषिघाते–संयतविनाशे कृते, प्रवचनस्य चोड्डाहे प्रकटाकृत्यकरणेन कृते, संयत्याश्चतुर्थव्रतभङ्गे कृते प्राणिना मूलाग्निर्दत्तो भवति, कस्य? बोधिलाभस्य–सम्यक्त्वलाभतरोरिति सर्वत्र योज्यते। अयम्भावः–अन्येनापि महापापकरणेन प्राणिनोऽनन्तं भवं बम्भ्रम्येत, एभिः पुनर्विशेषतस्तमेव

क इव ? इत्याह—प्रोषितो—[विदेशङ्गतो] धनाढ्यवणिक्, तस्य भवनं—गृहं, तत्समीपे उषितो—विश्राममहेतोः स्थितः, स चासौ मुनिश्च प्रोषितभवनोषितमुनिस्तद्वत्। कः पुनरसावित्युच्यते—

तगरापुर्यां देवदत्तो वणिक्, तस्य भार्या भद्रा, सुतोऽर्हन्नकः, अन्यदा देवदत्तो वैराग्यादर्हन्मित्राचार्यसमीपे ससुतभार्यः प्राव्राजीत्। सुचारित्रपालनपरोऽपि सुतं स्नेहेन लालयन् साधुभिर्वारितोऽपि न व्यरंसीत्। अर्हन्नको बहुलालितत्वात्सुखशीलो जातः। अन्यदा पितरि मृतेऽतिदुःखितः स्वयमेव भिक्षार्थं भ्रमन् सुकुमालः परीषहोपसर्गैर्दृढं बाध्यते। अथ ग्रीष्मे परितप्तसकलभुवने भिक्षार्थं भ्रमन्नसौ दृढं परिश्रान्तः सर्वाङ्गस्वेदपूर्णः प्रोषितैकसार्थवाहमहागृहच्छायायां यावद्विश्राम्यति क्षणमेकं तावद्बहुदिनभर्तृवियोगजनितमदनाग्निसन्तापा तद्गृहस्वामिनी वातायनस्था तपःशोषितगात्रमप्यर्हन्नकं सुरूपं सुकुमालं विलोक्याकार्य प्रचुरतरमोदकाद्याहारान् दत्त्वा शृङ्गाररसारचनाङ्गविकारप्रकारैः स्वानुरक्तं तं कृत्वा स्वगृहे प्रच्छन्नमस्थापयत्। सोऽथ सर्वैः कामाङ्गैस्समग्रस्तया समं भोगान् भुञ्जन् दिनानि गमयति। इतश्च स सर्वतः साधुभिर्गवेषितोऽपि न दृष्टः, तज्जननी च साध्वी सुतस्नेहेन तं विलोकयन्ती अर्हन्नक अर्हन्नक इति विलपन्ती 'दृष्टः क्वाप्यर्हन्नक' इति प्रतिजनं पृच्छन्ती भ्रान्तचित्ता पुरे बम्भ्रमीति। अन्यदा राजपथस्था प्रच्छन्नगवाक्षस्थेन सुतेन दृष्टा सा, ततो लज्जितोऽसावित्यचिन्तयत्—

"पेच्छह अहो !! कुपुत्तो, सोऽहं इय जस्स कारणे एसा। एयावत्थं पत्ता, सुन्ना परिभमइ नयरीए ॥१॥"
"अहवा कुप्पुत्तेहिं, जाएहिं किं फलं हवइ अन्नं ?। जाओ अरणीए सिही, दाहं मोत्तूण किं कुणइ ? ॥२॥"

इत्यादि स्वं निन्दन् झगिति गेहान्निर्गत्य मातुरन्तिकमगात्। तं सहसा दृष्ट्वा सा हृष्टा पूर्वव्यतिकरमपृच्छत्। ततोऽस्याग्रे

व्याख्या—यो लिङ्गिनीं–साध्वीं निषेवते, स कथम्भूतो ?, लुब्धो–गृद्धः निःशूकस्तथा महापापः, तेन सर्वजिनानां ध्येयः सङ्घ आशातित इति गाथार्थः ॥४५०॥ किञ्च—

**पावाणं पावयरो, दिट्ठिऽब्भासे वि सो न कायव्वो । जो जिणमुद्दं समणिं, नमिउं तं चेव धंसेइ ॥४५१॥**

व्याख्या—पापानां पापतरोऽसौ, दृष्ट्यभ्यासेऽपि–दृष्टिसमीपेऽपि स न कर्त्तव्यो, यः किम् ? इत्याह–जिनस्य मुद्रा यस्याः सा जिनमुद्रा, तां जिनमुद्रां श्रमणीं ज्ञानादिगुणाधारत्वेन नत्वा पुनस्तामेव ध्वंसयति–चरणजीवितनाशेन च नाशयतीति गाथार्थः ॥४५१॥

तस्यैव जिनमुद्राघातिनः पारत्रिकं दोषमाह—

**संसारमणवयग्गं, जाइजरामरणवेयणापउरं । पावमलपडलच्छन्ना, भमंति मुद्दाधरिसणेण ॥४५२॥**

व्याख्या—संसारमनवदग्रं–अपर्यवसितं जातिजरामरणवेदनाप्रचुरं, प्राणिनो भ्रमन्तीति शेषः । पापमलपटलच्छन्नाश्च भवन्ति । केन ? इत्याह–जिनमुद्राया–जैनव्रतरूपाया धर्षणेन–लोपेनेति गाथार्थः ॥४५२॥

ननु शीलक्षणमेवानायतनं वर्जनीयं उतान्यदपि ?, तद्वर्जने च किं (अपरं) सेवनीयमित्याशङ्क्याह—

**अन्नं पि अणाययणं, परतित्थियमाइयं विवज्जेज्जा । आययणं सेवेज्जसु, वुड्ढिकरं नाणमाईणं ॥४५३॥**

व्याख्या—अन्यदप्यनायतनं परतीर्थिकादिकं विवर्जयेत्–परिहरेत्, आयतनं च सेवेत ज्ञानदर्शनचारित्राणां वृद्धिकरमिति गाथार्थः ॥४५३॥ यतः—

भावुगदव्वं जीवो, संसग्गीए गुणं च दोसं च। पावइ एत्थाहरणं, सोमा तह दियवरो चेव ॥४५४॥

व्याख्या—जीवो हि भावुकद्रव्यं, अतः योगिनेतरसंसर्गेण गुणं च दोषं च प्राप्नोति, अत्रोदाहरणं सोमा तथा द्विजवरश्चेति गाथार्थः ॥४५४॥ कथानकं तूच्यते—

भोगपुरे नगरे ज्वलनशिखो विप्रस्तस्य सूरानाम्नी भार्या युग्मं प्रसूता, चित्रभानुनामा पुत्रः सोमानाम्नी सुता। तौ कलाकुशलौ प्राप्तयौवनौ पित्रा उत्तमकुले परिणाय्य शिक्षितौ–वत्सौ! कुसंसर्गरतौ मा भवेतां, यतः—

"तं न कुणइ वेयालो, अग्गी सत्थं महाविसो सप्पो। जं कुणइ कुसंसग्गो, माणुसस्स इह परभवविरुद्धो ॥१॥"

किञ्च—"पेच्छसु संसग्गीए, माहप्पं जेण कहवि एमेव। मिलिओ दुज्जणमज्झे, लहइ कुसंभावणं अन्नो ॥२॥

सज्जणमज्झगओ पुण, महंतसंभावणाए इयरो वि। संभाविज्जइ लोए, किमेत्थ भणिएण अन्नेण? ॥३॥"

इत्यादिपितृशिक्षां प्रतिपद्य सर्वजनैः समं आलापमात्रं सङ्गं त्यक्तवन्तौ। अन्यदा पितरि मृते प्रातिवेश्मिकयाः शीलवतीनाम्न्याः श्राविकायाः आसन्नवासद्वाक्यानि जैनधर्मानुगानि स्वकुम्बाद्धे भण्यमाणान्याकर्ण्य प्रबुद्धा सोमा चिन्तयति–पितृप्रोक्तः सुसंसर्गस्तदा सम्यग्जायते यद्यस्याः सङ्गतिः स्यादिति। ततः सा शीलवत्याः सखी जाता, जिनधर्मं प्रपेदे। शीलवती प्राह–सखे! जिनधर्ममासाद्य यदि अविवेकिजनवचनैर्म्लक्ष्यसि तदा संसारेऽतिभ्रमिष्यसि, अतः कन्थासिद्धवदस्थिरचित्ता मा भवेः, यथा—

कश्चिद्वृद्धिजो दरिद्रः कश्चन विद्यासिद्धमाराध्य विद्यां लब्धवान्, साधिता तेन विद्या, विद्यादेवी तस्यैकां कन्थां समर्प्य प्राह–

भो! एषा कन्था सर्वसुखावहा, प्रत्यहं स्फोट्यमाना पञ्च रत्नानि प्रत्येकं लक्षमूल्यानि गिरिष्यति, परं स्वाङ्गेन भोग्या। यदि कदाचित्त्यक्षसि तदाऽपराध इत्युक्त्वा देवता तिरोदधे। द्विजः कन्थावेषो जनैर्हसितस्तां त्यक्तवान् दुःखीभूतः, एवं मा त्यजेद्धर्ममिति प्रतिपन्ने द्वादशव्रतानि गुरुपार्श्वे श्राद्धिना सोमा सुसंसर्गात्सर्वजनप्रशंसिता पश्चाद्दीक्षां गृहीत्वा सिद्धिसुखभागभवत्। अथ चित्रभानुः पितुः शिक्षां पालयन् स्वगुणै राजमान्योऽभवत्। कस्यचिदधमजातेः पुरुषस्य स्नेहवाक्यैस्तुष्टस्तं मित्रत्वे[न]प्रतिपन्नवान्। अथ तस्याधमजातेरधमकृत्यैश्चित्रभानुर्जैनैरभक्ष्यभक्षणादिकलङ्कैः कलङ्कितो दुःखी जातः। पितृवचने जातपश्चात्तापश्चिन्तयति—सा सोमा धन्या, यस्यास्तथा सुसङ्गतिर्जाता। अथाप्यहमपि धन्यो यत्कुसङ्गतो मरणं न प्राप्तस्तद्यापि सत्सङ्गतिं करोमीति विचिन्त्यातिशयज्ञानिमुनिपार्श्वे प्रत्यहं धर्मश्रवणात्प्रतिपन्नजिनधर्मश्चिरं गृहे स्थित्वा ततः प्रव्रज्यां प्रतिपद्य परमपदं प्राप्तः। इति शुभाशुभसङ्गतेः फलं ज्ञात्वा सत्सङ्गतिः कार्येति सोमाद्विजवरयोः कथानकं समाप्तम् ॥

इत्यनायतनवर्जनं, सिद्धिसौख्यजनकं निशम्य भोः!। नित्यमायतनसेवने, मनो निश्चलं कुरुत कायवाग्युतम् ॥१॥

इति पुष्पमालाविवरणे भावनाद्वारे अनायतनत्यागलक्षणं प्रतिद्वारं समाप्तम् ॥१६॥

अथ परपरिवादनिवृत्तिद्वारं विवक्षुः पूर्वेण सम्बन्धगर्भां गाथामाह—

**सुट्ठु वि गुणे धरंतो, पावइ लहुयत्तणं अकित्तिं च। परदोसकहानिरओ, उक्करिसपरो य सगुणेसु ॥४५५॥**

व्याख्या—सुष्ठ्वपि गुणान् धरन् लघुत्वं अवहीलनारूपं अकीर्तिं च प्राप्नोति, कः? इत्याह—परदोषकथानिरतः, उत्कर्षपरश्च स्वगुणेषु, इति परपरिवादात्मोत्कर्षाववश्यं त्याज्यावित्यनायतनत्यागद्वारानन्तरं परपरिवादनिवृत्तिद्वारमिति गाथार्थः ॥४५५॥

नन्वकार्यमाचरन्तं परं दृष्ट्वा कथं परपरिवादमन्तरेण स्थातुं शक्यते ? इत्यत्राह—

**आयरइ जइ अकज्जं, अन्नो किं तुज्झ तत्थ चिंताए? । अप्पाणं चिय चिंतसु, अज्ज वि वसगं भवदुहाणं ॥४५६॥**

व्याख्या—आचरति यद्यकार्यमन्यः कश्चित्तर्हि तत्र किं तव चिन्तया प्रयोजनमैहिकं पारत्रिकं वा ?, न किञ्चिदित्यर्थः, ततश्चात्मानमेव चिन्तय । कथम्भूतं ?, अद्यापि वशगं भवदुःखानां, कथं कथमेतैर्मद् दुःखैर्मदीयजीवो मोक्ष्यत इतीदमेव चिन्तय, किं परचिन्तया ? इति गाथार्थः ॥४५६॥ अथ परदोषग्रहणेऽर्थाभावानर्थप्राप्ती एवेति प्राह—

**परदोसे जंपंतो, न लहइ अत्थं जसं न पावेइ । सुअणं पि कुणइ सत्तुं, बंधइ कम्मं महाघोरं ॥४५७॥**

व्याख्या—परदोषान् जल्पन् लभते अर्थं—धनं, यशश्च क्वापि न प्राप्नोति, स्वजनमपि शत्रुं करोति, तथा महाघोरं—अतिरौद्रं कर्म बध्नातीति गाथार्थः ॥४५७॥

नन्वस्तु सगुणस्यैव दोषाग्रहणं, निर्गुणस्य तु यथावस्थितभणने को दोषः ? इत्याशङ्क्याह—

**समयम्मि निग्गुणेसु वि, भणिया मज्झत्थभावया चेव । परदोसगहणं पुण, भणियं अन्नेहि वि विरुद्धं ॥४५८॥**

व्याख्या—समये—सिद्धान्ते निर्गुणेष्वपि मध्यस्थभावतैव भणिता । यत्तु परदोषग्रहणं, तन्न केवलं समये, किन्त्वन्यैरपि तीर्थिकैर्विरुद्धमेव भणितमिति गाथार्थः ॥४५८॥ अन्योक्तमेवाह—

**लोओ परस्स दोसे, हत्थाहत्थिं गुणे य गिण्हंतो । अप्पाणमप्पणो चिय, कुणइ सदोसं च सगुणं च ॥४५९॥**

व्याख्या—लोक आत्मानमात्मनैव सदोषं च सगुणं च करोति, किं कुर्वन्नित्याह—परस्य दोषान् गुणांश्च क्रमेण गृह्णन्, कथं? "इत्थाइत्थि"ति साक्षात्स्वयमेवेत्यर्थः। यो हि यद्गृह्णाति स तद्युक्त एव भवतीति भावः, तस्माद्गुणिन्नमात्मनः समीहमानेन परेषां गुणा एव ग्राह्या इति गाथार्थः ॥२५९॥

इदं च माध्यस्थ्यं निर्गुणेष्वेव द्रष्टव्यम्, 'सर्वेऽपि प्रशंसनीया एवे'ति तीर्थान्तरीयोक्तमेवेति दर्शयन्नाह—

भूरिगुणा विरलच्चिय, एक्कगुणो वि हु जणो न सव्वत्थ। निद्दोसाण वि भद्दं, पसंसिमो थेवदोसे वि ॥२६०॥

व्याख्या—भूयः—प्रचुरा गुणा येषां ते भूरिगुणा विरला एव केचित्प्राप्यन्ते, अतस्ते प्रशंसनीया एव, तथा एको ज्ञानादिकः पुष्टो गुणो यस्य स तथाभूतोऽपि जनो न सर्वत्र प्राप्यते, अतस्सोऽपि प्रशस्यत एव, निर्दोषाणामपि भद्रं, येषां गुणाभाववद्दोषाभावोऽपि, तेषामपि कल्याणमेवेत्यतस्तेऽपि प्रशस्या एवेति भावः। येषां च गुणाभावेऽपि दोषा अपि स्तोका एव, तानपि स्तोकदोषान् दोषबहुले लोके प्रशंसाम इति गाथार्थः ॥२६०॥ ननु वचनमात्ररूपायां परदोषोक्तौ कथमिव दोषसम्भवः? इत्याह—

परदोसकहा न भवइ, विणापओसेण सो य भवहेऊ। खवओ कुंतलदेवी, सूरी य इहं उदाहरणा ॥२६१॥

व्याख्या—बादरं सूक्ष्मं वा प्रद्वेषमन्तरेण परदोषकथा न भवति, स च प्रद्वेषः प्राणिनां भवहेतुरेव निर्दिष्टः, अत्र क्षपकः कुन्तलदेवी सूरिश्चोदाहरणानि, कोऽसौ तावत्क्षपकः? इत्युच्यते—

क्वापि गच्छे सूरिर्बहुआगमपारगोऽपि कर्मवशाच्छिथिलक्रियः । एकः पुनस्तच्छिष्यः सकलागमपारगः क्रियासु चाद्यतः । ततो गुणबहुमानेन शिष्याः श्रावकाश्चा[चा]र्यं मुक्त्वा शिष्यस्यैव पार्श्वे धर्मं शृण्वन्ति, भक्तिं बहुमानं च कुर्वन्ति । ततः कर्मवशात्प्रद्वेषं वहति सूरिस्तथापि शिष्यः स्वोचितप्रतिपत्तिं न मुञ्चति । इति व्रजति काले [सूरिः] तथैव कलुषितचित्तो मृत्वोद्याने विषधरो जातः । शिष्य आचार्योऽभूत् । अन्यदा वने बहिर्भूमिगमने सोऽहिः शेषान् साधूंस्त्यक्त्वा तमाचार्यं प्रति पूर्वप्रद्वेषानुसन्धितो धावति नित्यं, स्थविरैराचार्यैः प्रोक्तं—कोऽपि विराधितश्रामण्योऽसौ । अथ तत्रैवागत्य समवसृतः केवली साधुभिस्तद्भुजङ्गमव्यतिकरं पृष्टः प्राह—पूर्वभवेऽसौ सूरिरासीत्, सोऽस्मिन् समवसरो विराधितचरणोऽहिर्जात इति । ततः संवेगमुपगताः साधवः केवलिवचनात्तदुपशमनोपायं प्राग्भवप्ररूपणमेव मत्वा तथैव च कृते सर्पः प्राग्भवव्यतिकरज्ञानेन सञ्जातजातिस्मृतिः कृतमिथ्यादुष्कृत उपशान्तोऽनशनविधिं विधायोत्पन्नः सुरेष्विति प्रोक्तव्यः प्रद्वेषः परपरिवादश्च भवहेतुरिति । इति सूरिकथा समाप्ता ॥

इति परपरिवादं प्रास्तसाधुप्रवादं, परिहरत हिताय स्यात्ततः सव्यपायम् ।
शुभिगुणगणनायां साधुवादप्रथायां, कुरुत शिवसुखाप्त्यै जैनधर्मे च चित्तम् ॥ १ ॥

इति पुष्पमालाविवरणे भावनाद्वारे परपरिवादनिवृत्तिरूपं प्रतिद्वारं समाप्तं ॥ १७ ॥

अथ धर्मस्थिरतारूपं प्रतिद्वारं विभणिषुः पूर्वेण सम्बन्धयन्नाह—

पुव्वुत्तगुणसमग्गं, धरिउं जइ तरसि नेय चारित्तं । सावयधम्मम्मि दढो, हवेज्ज जिणपूयणुज्जुत्तो ॥४६२॥

कुसुमपुरे अग्निशिखनामा क्षपको वर्षारात्रे समागतः कस्यापि गेहेऽधस्तनभूमौ स्थितः। तावत्तत्रान्योऽपि अरुणनामा साधुः संयमयोगेषु शिथिलः प्राप्तः। सोऽपि तत्रैव गृहे उपरि भूमौ स्थितः। ततः स क्षपको नानाविधं तपस्तप्यते, इतरः पुनर्नित्यं भुङ्क्ते। ततः क्षपकः प्रद्वेषमुद्वहति, चिन्तयति चैषो निर्धर्मा प्रत्यहं भुङ्क्ते लिङ्गोपजीवनरतः, किञ्चिदनुष्ठानं न करोति, उपरि धमधमशब्दान् कुर्वन्नरतिकारणमिति प्रभूतं प्रद्वेषं वहति जातो निश्चयः। अरुणः पुनश्चिन्तयति-धन्यं क्षपकमुनिं, यदेष अतिदुष्करं तपः करोति, जिनोक्तं पालयति, नित्यं सर्वान् परीषहान् सहते। अहं पुनरल्पकीटो जिनाज्ञापरिभ्रष्टो विभूषानिरतो निर्धर्मा मुधा भ्रमामीति तद्गुणगणं प्रशंसन्नात्मानं निन्दन् भवं स्वल्पं करोति शुभभावेन। क्षपकस्तथाप्रद्वेषभावेन भूरिभवं जनयति। एवं वर्षारात्रे द्वावपि विहृतावन्यत्र। अथ क्षपकाश्रयकगुणरञ्जितैर्जनैस्तत्रागतः केवली द्वयोः कर्मक्षयस्वरूपं पृष्टः प्राह-भो जनाः! क्षपकस्य द्वेषवतोऽल्पकर्मक्षयोऽपरस्य शिथिलस्यापि अनुमोदनया बहुकर्मक्षयः, अतो विषमा जीवानां गतिरिति विज्ञाय विस्मितचित्तैर्भवहेतुः प्रद्वेषो बहुभिः प्रत्याख्यात इति क्षपकोपाख्यानं समाप्तम् ॥

अवनिपुरे जितशत्रुनृपस्य बहुराज्ञीभिर्जिनप्रासादाः कारिताः। तासु कुन्तलानाम्नी मुख्या तासां प्रासादेषु महोत्सवं दृष्ट्वा विद्वेषं वहति। अन्यास्तु न स्वपरभावं चिन्तयन्ति। अन्यदा कुन्तलादेवी रोगग्रस्ताऽऽर्त्तध्यानोपगता सपत्नीचैत्येषु पूजाप्रद्वेषेण च मृत्वा निजप्रासादे शुनी जाता द्वारे तिष्ठति। केनचिज्ज्ञानिना तत्स्वरूपं ज्ञात्वा कृपया प्राग्भवस्वरूपं ज्ञापिता जातजातिस्मृतिरनशनेन मृता स्वर्गं गता, इति प्रद्वेषो दुःखफलो ज्ञात्वा त्याज्य, इति कुन्तलादेवीकथा समाप्ता ॥

व्याख्या—लोक आत्मानमात्मनैव सदोषं च सगुणं च करोति, किं कुर्वन्नित्याह—परस्य दोषान् गुणांश्च क्रमेण गृह्णन्, कथं? "इत्थाहरिथ"ति साक्षात्स्वयमेवेत्यर्थः। यो हि यद्गृह्णाति स तद्युक्त एव भवतीति भावः, तस्माद्गुणिन्वमात्मनः समीहमानेन परेषां गुणा एव ग्राह्या इति गाथार्थः ॥४५९॥

इदं च माध्यस्थ्यं निर्गुणेष्वेव द्रष्टव्यम्, 'सर्वेऽपि प्रशंसनीया एवे'ति तीर्थान्तरीयोक्तमेवेति दर्शयन्नाह—

**भूरिगुणा विरलच्चिय, एक्कगुणो वि हु जणो न सव्वत्थ। निद्दोसाण वि भद्दं, पसंसिमो थेवदोसे वि ॥४६०॥**

व्याख्या—भूरयः—प्रचुरा गुणा येषां ते भूरिगुणा विरला एव केचित्प्राप्यन्ते, अतस्ते प्रशंसनीया एव, तथा एको ज्ञानादिकः पुष्टो गुणो यस्य स तथाभूतोऽपि जनो न सर्वत्र प्राप्यते, अतस्सोऽपि प्रशस्त एव, निर्दोषाणामपि भद्रं, येषां गुणाभाववद्दोषाभावोऽपि, तेषामपि कल्याणमेवेत्यतस्तेऽपि प्रशस्या एवेति भावः। येषां च गुणाभावेऽपि दोषा अपि स्तोका एव, तानपि स्तोकदोषान् दोषबहुले लोके प्रशंसाम इति गाथार्थः ॥४६०॥ ननु वचनमात्ररूपायां परदोषोक्तौ कथमिव दोषसम्भवः? इत्याह—

**परदोसकहा न भवइ, विणापओसेण सो य भवहेऊ। खवओ कुंतलदेवी, सूरी य इहं उदाहरणा ॥४६१॥**

व्याख्या—बादरं सूक्ष्मं वा प्रद्वेषमन्तरेण परदोषकथा न भवति, स च प्रद्वेषः प्राणिनां भवहेतुरेव निर्दिष्टः, अत्र क्षपकः कुन्तलदेवी सूरिश्चोदाहरणानि, कोऽसौ तावत्क्षपकः? इत्युच्यते—

व्याख्या—पुष्पेषु तावत्कीरयुगलं—शुकमिथुनमुदाहरणं, गन्धादिषु विमलशङ्खवरसेनाः शिववरणप्रमुखप्रमुखाः क्रमेण पूजायामुदाहरणानीति गाथार्थः ॥४६४॥ तानि चामूनि—

अत्र भरते मध्यमखण्डे वनविशालाटव्यां खेचरकारितरत्नमयजिनभवनद्वारे सहकारे कीरयुग्मं स्थितं, श्राद्धान् श्रीजिनं पूजयन्तो दृष्ट्वा हृष्टं, तदपि वनकुसुमैर्जिनमपूजयत्, शुभभावप्रकर्षाल्लब्धं बोधिबीजं, तत्पुण्याच्छुकजीवः पृथिवीतिलकपुरे जितशत्रु-नृपपुत्रोऽजनि। तस्मिन् गर्भस्थे मातुः स्वप्ने कुण्डलयुगलदर्शनात्पितुर्निधिप्राप्तेश्च निधिकुण्डल इति तन्नाम कृतं, कीरभार्याऽपि मृत्वाऽन्यत्र पुरे पुरन्दरयशानाम्नी नृपनन्दना दैववशान्निधिकुण्डलस्य राज्ञी जाता। तत्र तौ भोगान् भुक्त्वा जिनधर्मपरौ द्वितीयकल्पे शक्रसामानिकौ जातौ, ततश्च्युतौ, निधिकुण्डलजीवो ललिताङ्गनामा नृपपुत्रोऽभूत्। अन्योऽप्यमरो नृपगृहे उमादेवी पुत्री जाता। तत्रापीयं स्वयंवरा ललिताङ्गेन परिणीता। ततो राज्यं प्रपाल्य तीर्थकरपार्श्वे प्रव्रज्य सम्यगाराध्य द्वावपीशानदेवलोके देवौ जातौ। ततो ललिताङ्गजीवो देवसेनाख्यो राजसुतः सञ्जातः, इतरोऽपि वैताढ्ये चन्द्रकान्ताभिधा खेचरपुत्रीत्वेन सञ्जातः। तत्रापि देवसेनो दैववशात्तां परिणीय राज्यं भुक्त्वा पश्चात्प्रव्रज्यां प्रतिपद्य परिपाल्य ब्रह्मलोके द्वावपीन्द्रसामानिकौ सुरौ जातौ। ततश्च्युत्वा देवसेन-सुरो महाविदेहे पूर्वभागे प्रियङ्कराभिधश्चक्रवर्ती इतरस्तस्यैव मन्त्री जातः। पूर्वभवाभ्यासतस्तयोरत्यन्तं प्रेमासीत्। ततो विस्मितचित्ताभ्यां ताभ्यामन्यदा स्नेहकारणं पृष्टस्तीर्थकरः कीरभवादारभ्य जिनपूजनादिवृत्तान्तं तयोस्सर्वमचीकथत्। तच्छ्रुत्वा संवेगाताभ्यां तस्यैव तीर्थकरस्य पादमूले प्रव्रज्या प्रतिपन्ना, कालेन तौ गीतार्थौ भूत्वा तीव्राभिग्रहान् प्रपाल्य केवलज्ञानमुत्पाद्यापगत-कर्मांशौ सिद्धौ। इति कीरयुग्माख्यानकं समाप्तम्।

अथ जम्बूद्वीपे महाविदेहे पुण्डरीकिण्यां पुर्यां वरसेनचक्री, सोऽन्यदा समवसरणे जिनदेशनां शृणोति, तावत्सप्तमकल्पादष्टौ सुरान् दीप्तिभासुरान् सुरभिगन्धवासितसर्वपर्षदो वन्दनार्थमागतान् दृष्ट्वा विस्मितश्चक्री जिनमपृच्छत्—भगवन्! एते देवाः कुत आगताः?, के च पूर्वभवे आसन्?, किमेतैः सुकृतं कृतं?, यद्विजितसुन्दरा अस्मानपि सुरगणं परिभवन्ति। जिनः प्राह—धातकीखण्डभरते महालयपुरे वसुश्रेष्ठी, तस्य धन—विमल—श्रीकृष्ण—वरसेन—शिव—वरुण—सुयशः—सुव्रतनामानोऽष्टसुताः। सर्वे कलासु कुशला रूपलावण्यगुणकलिताः स्थिरचित्तास्तीर्थंकरपार्श्वेऽष्टविधपूजाफलं श्रुत्वाऽष्टावपि प्रत्येकं तां विधाय कुसुमादिभेदेष्वेकैकं भेदं विशेषतः सम्पाद्य पञ्चविंशतिलक्षपूर्वाणि जिनपूजां विधाय तथा द्वादशव्रतानि निरतिचाराणि प्रतिपाल्य पर्यन्ते मासं मासमनशनं कृत्वा सप्तमकल्पे सर्वेऽप्येकस्मिन्नेव विमाने सप्तदशसागरायुषः सुरा जाताः, जिनपूजामाहात्म्यतस्त्रिभुवनजनमनोहारिरूपादिगुणाः प्राप्ताः। अवधिना पूर्ववृत्तान्तं ज्ञात्वाऽस्मद्दर्शनार्थमागता एते, अतश्च्युत्वा विदेहेषु सेत्स्यन्ति, इति श्रुत्वा चक्रवर्त्तिप्रभृतिप्रभूतजनो जिनपूजाद्यभिग्रहान् गृहीत्वा प्रतिपाल्य परमफलं प्राप्तवान्। इति पूजाफले विमलादिकथानकं समाप्तम्॥

इह च कुसुमपूजोदाहरणे धननाम्नि विद्यमाने यत्पूर्वं कुसुमेषु कीरयुग्मोदाहरणमुक्तं, तत्तथाविधविवेकविकलानां तिरश्चामपि भावशुद्ध्या जिनपूजा विधीयमाना महते गुणाय स्यात्, किं पुनर्मनुष्याणामित्यस्यार्थस्य दर्शनार्थं मन्तव्यम्। तस्मिंश्च तत्रोक्ते यदिह सूत्रेऽनुपात्तमपि कुसुमे धनोदाहरणं तत्प्रस्तुतकथासम्पूर्णतासम्पादनार्थमवसेयमिति।

अथ जिनदीक्षां कर्तुमसमर्थो यदि श्रावकत्वमपि जिनपूजनादिना सम्यग् नाराधयेत्तदा तेन हारितमेव जन्मेति दर्शयन्नाह—

**अन्नो मुक्खम्मि जओ, नत्थि उवाओ जिणेहिं निद्दिट्ठो। तम्हा दुहओ चुक्का, चुक्का सव्वाण वि गईणं ॥९६॥**

व्याख्या—यतो-यस्माद्विशिष्टयतिधर्मश्रावकधर्मावन्तरेणान्यो मोक्षविषये नास्त्युपायः कोऽपि जिनैर्निर्दिष्टः, तस्मात् “दुहओ”त्ति विशिष्टयतिधर्म-श्रावकधर्माभ्यां प्रकाराभ्यां ये “चुक्क”त्ति भ्रष्टास्ते सर्वेभ्योऽपि गतिभ्यः-प्रकारेभ्यो भ्रष्टा एव द्रष्टव्या इति गाथार्थः ४६६॥ यद्येवं ततः किमित्याह—

**तो अवगयपरमत्थो, दुविहे धम्मम्मि होज्ज दढचित्तो। समयम्मि जओ भणिया, दुलहा मणुयाइसामग्गी॥४६७॥**

व्याख्या—ततोऽवगतपरमार्थः सन् यतिश्रावकभेदाभ्यां द्विविधे धर्मे दृढचित्तो भवेस्त्वं, यतः समये-सिद्धान्ते दुर्लभा मनुष्यत्वादिसामग्री भणितेति गाथार्थः ४६७॥ तथातिदुर्लभं मनुजत्वं कथमप्यवाप्य यो धर्मविषये प्रमाद्यति स मरणकाले शोचतीत्याह-

**अइदुलहं पि लद्धुं, कहमवि मणुयत्तणं पमायपरो। जो न कुणइ जिणधम्मं, सो झूरइ मरणकालम्मि॥४६८॥**

उक्तार्था ॥४६८॥ कथं शोचतीत्याह—

**जह वारिमज्झछूढो व्व, गयवरो मच्छउ व्व गलगहिओ। वग्गुरपडिओ व्व मओ, संवट्टइओ जह व पक्खी॥४६९॥**

व्याख्या—गजबन्धनोपायभूतं यत्कूटं विरच्यते तद्वारीत्युच्यते, ततो यथा तन्मध्यक्षिप्तो गजः शोचति-पश्चात्तापं करोति, यथा वा वंशाग्रवर्तिपर्यन्तप्रोतामिषखण्डलोहमयचक्रकीलकरूपेण गलेन-बिडिशेन गृहीतो गलगृहीतो मत्स्यः शोचति, यथा वागुरा पाशाखेटिकजनप्रसिद्धायां पतितो मृगः शोचति, संवर्तितो वा-पाशेन बद्धः पञ्जरे क्षिप्तो यथा पक्षी शोचति तथा जीवोऽप्यकृतधर्मसञ्चयो मरणकाले शोचतीति गाथार्थः ॥४६९॥ यस्तु विभवादिष्वस्थिरेषु प्रतिबद्धो धर्मे प्रमाद्यति सोऽप्यज्ञ एवेत्याह—

जललवचलम्मि विहवे, विज्जुलयाचंचलम्मि मणुयत्ते। धम्मम्मि जोऽवसीयइ, सो काउरिसो न सप्पुरिसो ॥४७०॥

व्याख्या—कुशाग्रवर्त्तिजलबिन्दुर्जललवस्तद्वच्चञ्चले—क्षणध्वंसिनि विभवे, तथा विद्युल्लताचञ्चले मनुजत्वे, उपलक्षणाद्यौवनस्नेहादिष्वस्थिरेषु सत्सु यो धर्मेऽवसीदति स कापुरुषो, न सत्पुरुषः, इति गाथार्थः ॥४७४॥

किञ्च यदि विषयादीन् वाञ्छसि तथापि धर्म एवोद्यमं कुर्वित्याह—

वरविसयसुहं सोहग्ग-संपयं पवररूवजसकित्तिं। जइ महसि जीव! निच्चं, ता धम्मे आयरं कुणसु ॥४७१॥

व्याख्या—वरं विषयसुखं, सौभाग्यसम्पदः, प्रवरं रूपं, यशः कीर्त्तिं च यदि महसि—श्लाघसे वाञ्छसीत्यर्थः, रे जीव! तर्हि धर्मे आदरं कुरु, यतस्तत्सम्पद्यते, तत्कारणत्वाद्धर्मस्येति गाथार्थः ॥४७१॥ ननु धर्मेण विनाप्यमूनि वाञ्छितानि भविष्यन्तीत्यत्राह

धम्मेण विणा परिचिं-तियाइं जइ हुंति कहवि एमेव। ता तिहुयणम्मि सयले, न हुज्ज इह दुक्खिओ कोई॥४७२॥

व्याख्या—धर्मेण विनाऽपि यदि कथमप्येवमेव चिन्तितानि भवन्ति, तर्हि इह सकले त्रिभुवने कोऽपि दुःखितो न भवेत्, दृश्यन्ते च नानादुःखानुभवभाजिनो जीवा इति चिन्तितार्थिना धर्म एव कार्य इति गाथार्थः ॥४७२॥

न च वाच्यं धर्माधर्मौ न स्तः, सुखदुःखादेस्तत्कार्यस्य दर्शनादित्याह—

तुल्ले वि माणुसत्ते, के वि सुही दुक्खिया य जं अन्ने। तं निउणं परिचिंतसु, धम्माधम्मफलं चेव ॥४७३॥

व्याख्या—तुल्येऽपि मानुषत्वे केऽपि सुखिता दृश्यन्ते दुःखिताश्च यदन्ये तद्धर्माधर्मफलमेवेति निपुणं—सम्यक् परिचिन्तय।

अयं चार्थो विमलयशाकथायां प्राक् प्रपञ्चित इति नेह प्रतन्यत इति गाथार्थः ॥४७३॥ अथ सदृष्टान्तं प्रस्तुतोपसंहारमाह—

**ता जइ मणोरहाण वि, अगोयरं उत्तमं फलं महसि । ता धणमित्तोव्व दढं, धम्मे चिय आयरं कुणसु ॥४७४॥**

व्याख्या—यत एवं तद्यदि मनोरथानामप्यगोचरं किमप्युत्तमं [फलं] वाञ्छसि, तर्हि धनमित्र इव दृढं धर्म एव कुर्विति गाथार्थः ॥४७४॥ कथानकं तूच्यते—

इह जम्बुद्वीपे भरते विनयपुरे वसुश्रेष्ठी, भद्रा भार्या, तयोः पुत्रो धनमित्रः, बाल्येऽपि तस्य कियद्दिनैर्द्रविणं कुटुम्बं च क्षयमगतं, कथमपि कष्टेन वृद्धिङ्गतः । प्राप्तयौवनस्य तस्य द्रव्योपार्जनोपाया निष्फला अभवन्, दुःखाद्वने गतः, क्षीरवृक्षे प्ररोहद्वयं दृष्ट्वाऽधो निधानद्वयमज्ञासीत् । भुवं खनित्वा विलोकयति तदाऽभाग्याच्चयोरङ्गारान् पश्यति, ततो धनार्थे पुनर्बहुषु जलस्थलगिरि-नगरेषु भ्रमन् हस्तिनागपुरे सहस्राम्रवने केवलज्ञानिनं श्रीगुणसागरसूरिं स्वप्राग्भवमपृच्छत्, किञ्च मया चक्रे ? येनेदृशोऽहं दुःखीति । सूरिराह–अत्रैव विजयपुरे नगरे प्राक् त्वं मङ्गलदत्तनामा गाथापतिरासीत्, स च धर्मस्य नामापि न वेत्ति, धर्मकरणप्रवृत्तानां च विघ्नं करोति, स्वभावात् क्रोधनः, कस्यापि कपर्दिकामात्रं लाभं द्रष्टुं न शक्नोति, विविधोपायैर्लाभविघ्नं जनयति, यदि पुनः कस्यापि लाभं प्रेक्षते तदा दाघज्वरादिभिर्गृह्यते । अन्यदा सुन्दरनाम्ना श्रावकेण कृपया कथमपि नीतो मुनीनां पार्श्वं, तैरप्युक्तो धर्मः, ततः किञ्चित्स्वभावेन श्रावकोपरोधेन च नित्यचैत्यवन्दनाभिग्रहेण समं द्वादशव्रतानि प्रतिपद्य गृहं गतो मङ्गलदत्तः । ततः कानिचिदति-चारमलिनानि करोति व्रतानि कानिचिन्मूलतो नाशयति, एकं पुनर्नित्यचैत्यवन्दनाभिग्रहं द्रव्यभावाभ्यां प्रतिपालितवान्, परेषां लाभविघ्नादि कुर्वन् समत्सरो मृत्वा धनमित्रस्त्वं जातः, व्रतभङ्गादिसमुत्थपापपटलेनोत्तमकुलोऽपि निःस्वोऽसि । ततस्तदालोच्य

शुद्धं धर्मं कुर्वन्नन्यदा कञ्चन नरं निधिं त्यजन्तं दृष्ट्वाऽपृच्छत्-भोः ! किं करोषि ?, स प्राह-मलिनाऽश्मरूपाः स्वर्णं प्रोक्तं परमङ्गाराः सन्तीति त्यजामि, नूनं वञ्चितोऽहं, धनमित्रो विलोकयति तावत्स्वर्णं पश्यति, ततस्तस्योचितं मूल्यं दत्त्वा ते घटदेन गृहीताः, गृहे गत्वा यावत्सम्भालयति तावत्त्रिंशत्सहस्राणि सुवर्णस्य जातानि, तन्निधानादिधनेन बहुधनमर्जयित्वा धर्मे एव व्ययति, पूर्णिमाऽमावास्याऽष्टमीचतुर्दशीषु प्रतिमया तिष्ठति, तद्धर्मप्रभावात्कीर्त्तिर्लक्ष्मीश्चातिविस्तारं प्राप्ताः। अनेकधा शासनप्रभावनाः कृत्वा प्रव्रज्यां प्रतिपद्योग्रं तपस्तप्त्वा दीर्घकालं पर्यायं प्रतिपाल्य सिद्धः श्रीधनमित्रः, एवं समतिक्रान्तान्यपि सौख्यानि धर्मादेव जायन्त इति धर्ममेव कुरुत, इति धनमित्रकथानकं समाप्तम् ॥

इति हि शर्मदे भवन्तः शर्मसम्पत्सतृष्णाः, स्वमनसि विकसन्तः सन्तु धर्मैकनिष्ठाः।
न खलु किमपि यस्मादन्यदस्त्यर्थसिद्धौ, प्रवरकरणमूनं भूतले प्राणभाजाम् ॥१॥

इति पुष्पमालाविवरणे भावनाद्वारे धर्मस्थिरतालक्षणं प्रतिद्वारं समाप्तम् ॥१८॥

अथ परिज्ञाद्वारं, तत्र परिज्ञानं परिज्ञा, सा च द्विधा-ज्ञानतः फलतश्च, तत्राद्या हेयोपादेयवस्तुपरिज्ञानरूपा, फलतस्तु विरत्याराधनात्मिका, "ज्ञानस्य फलं विरति" रिति वचनात्। विरत्याराधनाऽपि द्विविधा-पर्यायपरिपालनकाले पर्यन्तसमये च तत्र पर्यन्ताराधनामधिकृत्य पूर्वग्रन्थेन सम्बन्धगर्भमुपदेशमाह—

**इय सव्वगुणविसुद्धं, दीहं परिपालिऊण परियायं। तत्तो कुणंति धीरा, अंते आराहणं जम्हा ॥४७५॥**

व्याख्या इति पूर्वोक्तैर्धर्मस्थिरतापर्यन्तैः सर्वैरपि गुणैर्विशुद्धं दीर्घं-चिरकालं परिपाल्य चारित्रपर्यायं, ततश्चान्ते-मरणकाले

प्रत्यासन्ने धीरा—महासत्त्वाः संलेखनापूर्वं पादपोपगमनादिरूपामाराधनां कुर्वन्ति तीर्थकरादयः, अत एव हि धर्मस्थिरतापर्यन्तानि द्वाराण्यभिधाय तदन्ते परिज्ञाद्वाराभिधानमिति सम्बन्धभणनं । कुतस्ते पर्यन्ते आराधनां कुर्वन्ति ? इत्याह—"जम्हा"त्ति यस्मादिदमागमे प्रोक्तमिति गाथार्थः ॥४७५॥ आगमोक्तमेवाह—

**सुचिरं पि तवो तवियं, चिन्नं चरणं सुयं च बहुपढियं । अंते विराहइत्ता, अणंतसंसारिणो भणिया ॥४७६॥**

व्याख्या—यैः सुचिरमपि तपस्तप्तं, चरणं चीर्णं, श्रुतं च बहुपठितं, तथाप्यन्ते तपःप्रभृतीन् विराधयित्वा अनन्तसंसारिणो भणिता इति गाथार्थः ॥४७६॥ दुर्लभं चान्ते समाधिमरणमित्याह—

**काले सुपत्तदाणं, चरणे सुगुरूण बोहिलाभं च । अंते समाहिमरणं, अभव्वजीवा न पावंति ॥४७७॥**

व्याख्या—काले—यथाविधावसरे सुपात्रदानं, तथा सुगुरूणां चरणे—समीपे इत्यर्थः, बोधिलाभं च, तथा अन्ते समाधिमरणं, अभव्यजीवा उपलक्षणाद्दूरभव्या अपि न प्राप्नुवन्तीति गाथार्थः ॥४७७॥ अथाधिकृतमरणस्यैव स्वरूपमाह—

**सपरक्कमेयरं पुण, मरणं दुविहं जिणेहिं निद्दिट्ठं । एक्केक्कं पि य दुविहं, निव्वाघायं सवाघायं ॥४७८॥**

व्याख्या—इह प्रस्तुतमरणं पुनर्जैनेन्द्रैर्द्विविधं निर्दिष्टं, सपराक्रममितरदपराक्रममिति । तत्र सह पराक्रमेण—भिक्षाचर्यादिगमनगणान्तरसङ्क्रमणादिरूपेण वीर्येण वर्तत इति सपराक्रमस्तथाभूतो यन्मरणं प्रतिपद्यते तत्सपराक्रमं, तद्विपरीतमपराक्रमं पुनरेकैकं द्विधा—निर्व्याघातं सव्याघातं च । अयमर्थः—रोगपीडासर्पदंशनाग्निदाहखड्गघातादिकेन व्याघातेन विनाऽपि स्वस्थावस्थायां यो मरणं प्रतिपद्यते तत्सपराक्रमस्यापराक्रमस्य च निर्व्याघातं । तद्विपर्यये तु सव्याघातमिति गाथार्थः ॥४७८॥

अथ सूत्रकृदेव सपराक्रममरणस्वरूपमाह—

सपरक्कमं तु तहियं, निव्वाघायं तहेव वाघायं । जीयकप्पम्मि भणियं, इमेहिं दारेहिं नायव्वं ॥४७९॥

व्याख्या—तत्र मरणयोर्मध्ये सपराक्रमं तु निर्व्याघातं तथैव व्याघातयुक्तं च 'जीतकल्पभाष्ये' एतैरनन्तरवक्ष्यमाणैर्द्वारैर्भणितं ज्ञातव्यमिति गाथार्थः ४७९॥ तान्येव द्वाराण्याह—

सगणनिस्सरण[1]परगणे[2], सिति[3] संलेहे[4] अगीय[5]संविग्गे[6] । एगो[7]ऽभोयण[8]मन्ने[9], अणपुच्छ[10] परिच्छया[11] लोए[12] ॥४८०॥

ठाण[13]वसही[14]पसत्थे, निज्जवगा[15] दव्वदायणे[16] चरिमे । हाणि[17]परितंत[18]निज्जर[19]-संथार[20]उव्वत्तणाईणि[21] ॥४८१॥

सारेऊण य कवयं[22], निव्वाघाएण चिंधकरणं[23] च । वाघाए जायणया, भत्तपरिण्णाएँ कायव्वा ॥४८२॥

व्याख्या—इह-भक्तप्रत्याख्यानं चिकीर्षुणा आचार्यादिना स्वगणान्निस्सरणा-निर्गमनं समयोक्तयुक्त्या कर्तव्या १ परगणे च विधिना सङ्क्रमणं कार्यं, कुत एतदित्युच्यते—स्वगच्छे हि निषण्णं संलिखितशरीरं परलोकप्रस्थितं आचार्यादिकं दृष्ट्वा साध्व्यादयो रोदनाक्रन्दनादिकं कुर्वन्ति, ततस्तस्याचार्यादेर्ध्यानविघ्नः सम्पद्यते, तथोपकरणादिव्यतिकरे कलहयतः साधून् दृष्ट्वा तस्यासमाधिरुत्पद्यते, इत्यादिकारणकलापः सिद्धान्तादवसेय इति २ । 'सिति'त्ति श्रेणिर्विशेषतः पर्यन्ताराधनासमये प्रशस्ताध्यवसायपरम्परालक्षणैव भावश्रेणिः प्रतिपत्तव्या ३ । 'संलेहे'त्ति संलेखनं संलेखः, शरीराद्यपकर्षणरूपा संलेखनेत्यर्थः, सा च त्रिधा—जघन्या षाण्मासिकी मध्यमा सांवत्सरिकी उत्कृष्टा द्वादशवार्षिकी । सा चैवं—

“चत्तारि विचित्ताइं, विगईनिज्जूहियाइं चत्तारि । संवच्छराइं दुन्नि य, एगंतरियं च आयामं ॥ १ ॥”
“नाइविगिट्ठं च तवो, छम्मासे परिमियं च आयामं । अन्ने वि य छम्मासे, कुणइ विगिट्ठं तवोकम्मं ॥ २ ॥”
“वासं कोडीसहियं, आयामं कुणइ आणुपुव्वीए । बारस वासा संले-हणाए इय हुंति उक्कोसा ॥ ३ ॥”

इह च द्वादशे वर्षे पारणादिने भोजनं कुर्वन् प्रतिदिनमूनोदरतां तावत्करोति यावदेकमेव सिक्थं भुङ्क्ते, किञ्चिद पर्यन्तवर्ति-
नश्चतुर्मासान् यावदेकान्तरितेषु पारणकदिनेषु चिरं तैलगण्डूषमसौ मुखे धार्यते, ततः खेलमल्लके भस्मनि प्रक्षिप्य मुखमुष्णोदकेन
शोधयति, यद्येवं न कार्यते तदा वायुना मुखमीलनसम्भवेऽन्त्यसमये नमस्कारमुच्चारयितुं न शक्नोति, तदेवमेतदनुसारेण जघन्य-
मध्यमेऽपि संलेखने कार्ये, तदन्ते च भक्तप्रत्याख्यानाद्यन्यतरन्मरणं प्रतिपद्यते इति ४। ‘अगीय’त्ति अगीतार्थान्तिके भक्तं न
प्रत्याख्यातव्यं, ते हि क्षुत्पिपासादिना बाध्यमानं भक्तादियाचमानं भक्तप्रत्याख्यातारं दृष्ट्वा सहसैव परित्यजन्ति, न सूत्रोक्तयतनया
जाग्रति, ततोऽयमार्तध्यानपतितो व्रतमपि त्यजेत्, मिथ्यात्वं गच्छेत्, मृत्वा च व्यन्तरादिषु चोत्पन्नस्तेषामुपघाताय प्रवर्तते, इत्याद्य-
भ्यूह्यं, गीतार्थास्तु तथाविधं तं दृष्ट्वा समाश्वास्य स्थिरीकृत्य समाधिमुत्पादयन्ति, ततः सुगतिगामिनमसुं कुर्वन्तीत्याद्यन्यतरं ज्ञात्वा
गीतार्थान्तिके एव भक्तं प्रत्याख्यातव्यमिति ५। ‘संविग्गो’त्ति गीतार्थस्यापि संविग्नस्यान्तिके भक्तं प्रत्याख्यातव्यं, न शिथिलस्य,
स ह्याधाकर्माद्याहारौषधपथ्यादि समानीय प्रयच्छति, यशःकीर्तिकामितया जनविज्ञातं करोति, ततो लोकः पुष्पाद्यारम्भं करोतीत्यादि
दोषा अभ्यूह्याः ६। ‘एग’त्ति गीतार्थसंविग्नोऽप्येको निर्यापको न कार्यः, किन्तु वक्ष्यमाणसङ्ख्योपेता अनेके, अन्यथा भक्त-
प्रत्याख्यातुर्नियापके पानकादिप्रयोजनेन गते सति तस्यार्तध्यानादयो दोषाः स्युरिति ७। ‘आभोयणा’त्ति आभोगनमाभोगोऽनि-

शयज्ञानाद्युपयोगः, अयमर्थः—भक्तं प्रत्याख्यातुमुद्यते साध्वादौ सूरिणा स्वयमतीन्द्रियज्ञाने उपयोगो दातव्यः, किमयं स्वप्रतिज्ञायाः पारगो न वा ?, आयुः परिपमासिवास्यामुकदिने समाप्स्यते ? इत्यादि। अथैतत्परिज्ञानं स्वयं नास्ति तदान्ये पृच्छ्यन्ते, तदभावे तु मन्त्रसामर्थ्याकृष्टा देवताः पृच्छ्यन्ते, तदभावे शकुनानि विलोक्यन्ते, एवमपरैरपि प्रकारैरतीन्द्रियं पर्यालोचनीयमिति ८। 'अन्ने' त्ति अन्यस्मिन् साधौ भक्तपरिज्ञार्थमुपस्थिते विधिर्वाच्यः, यथा—यद्येककाले द्वौ साधू भक्तपरिज्ञार्थमुपस्थितौ, तदैकः संलेखनां करोत्यपरस्तु भक्तप्रत्याख्यानं कार्यते, तृतीयादयोऽपि च यद्युपतिष्ठन्ति तदा यथायोग्यतया। अपि निर्यामकादिसामग्र्याः सद्भावे तेऽप्यङ्गीक्रियन्ते, अन्यथा ऽऽर्त्तध्यानादिसम्भवान्निषिध्यन्ते, यश्च भक्तप्रत्याख्याता अङ्गीकृतोऽस्ति स यदि कथञ्चित्प्रत्याख्यानाद्भ्रश्यते अन्ये च भक्तप्रत्याख्यातृतया ज्ञातो दृष्टश्च भवति तदा यः संलेखनां कुर्वंस्तिष्ठति स एव तत्स्थाने क्रमितस्थेनोपवेश्यते, चिलिमिली चान्तरा बध्यते, यैश्च पूर्वं ज्ञातो दृष्टश्च ते यदि वन्दनार्थमागच्छन्ति तदा तेषां पार्श्वस्थो न दर्श्यते, किन्तूच्यते—सुखस्था एव वन्दध्वमित्यागमोक्तयतना वक्तव्येति ९। 'अणापुच्छ' त्ति स्वगणमनापृच्छ्याचार्येण भक्तपरिज्ञोद्यतः सहसैव नाङ्गीकर्तव्यः, गच्छस्य तस्य च बृहत्समाधिप्रसङ्गादिति प्रतीतमेवेति १०। 'परिच्छय' त्ति अथ परीक्षणं परीक्षा, सा चागन्तुकस्याचार्येण गच्छसाधुभिश्च कार्या, किमसौ जितेन्द्रियत्वादिगुणैर्युक्तो न वेति, आगन्तुकेनापि च तेषां साधूनां परीक्षा कार्या, किमेते परिणत-जिनवचना न वेति, तथाहि—भक्तं प्रत्याचिख्यासुः समागतमात्रोऽपि तान् वक्ति—कलमशालिदुग्धादिकं मम भोजनार्थं समानयत यूयं, ततश्चाहो ! ! जितेन्द्रियो भक्तप्रत्याख्यापनार्थमागतोऽस्तीत्यादि सोल्लुण्ठमभिधाय यदि हसन्ति कुप्यन्ति वा तदा अभाविता-ईदृशा एते मम समाध्युत्पादका न भविष्यन्तीत्याकलय्य परिहर्त्तव्याः। अथेच्छाम इत्युक्त्वा तत्प्रतिपद्यन्ते तदाऽर्हद्वचनभावि-

तस्मादङ्गीकर्तव्याः । आनीते च कमलशाल्यादौ सुन्दरमिदं भुञ्जामीति गृद्धो यद्यसौ भोक्तुमारभते तर्हि यद्याहारे गृद्धिं त्यक्ष्यसि तदा भक्तपरिज्ञायोग्यो भविष्यसीत्याद्युक्त्वा अजितेन्द्रियत्वादागन्तुकोऽपि तैः साधुभिस्त्याज्यः, अथैवं वक्ति, यदुत—पूर्वगृहीताहारैर्यद्यहं न तृप्तस्तत्किमिदानीमनेन तृप्तिं प्राप्स्यामि ?, तस्माद्यद्यपि मया कथञ्चिदिदमानायि तथापि न भोक्ष्यामीत्यादि, तदा योग्यत्वात्स्वीकर्तव्यः । आचार्येणाप्यागन्तुकः परीक्षार्थमित्थं वक्तव्यो—देवानुप्रिय ! संलेखना त्वया सम्यक्कृता नवेति, ततश्च कोपादङ्गुलीं भङ्क्त्वा पश्याचार्य ! अद्यापि मम शरीरे किञ्चिच्छोणितादि दृश्यते ?, हन्त !! किमीदृशदेहमपि मां कृतसंलेखनं न वेत्सि ?, येनेत्थं पृच्छसि ?। ततश्च सूरिणा वाच्यं—किं द्रव्यसंलेखनया ?, भावसंलेखनैव कर्तव्या, सा च त्वयाऽद्यापि न कृता, कोपस्यैवासंलिखितत्वादित्याद्युक्तः सन् यदि मिथ्यादुष्कृतं दत्त्वा क्षमयति तदा स्वीकर्तव्यो, नान्यथा, एवमन्याऽप्यत्र परीक्षा कर्तव्येति ११। 'आलोए' त्ति आलोचनमालोचना, सा च तस्मिन्समये विशेषतः सम्यग् दीक्षाग्रहणकालादारभ्य दातव्या, तस्यां च दत्तायां ये गुणास्तदप्रदाने च ये दोषास्तद्ग्रहणविधिश्चेत्येवमादिसर्वं पूर्वमालोचनाद्वारोक्तं द्रष्टव्यम् १२। 'ठाण' त्ति, प्रशस्तशब्दः प्रत्येकमभिसम्बध्यते, ततश्च प्रशस्ते स्थाने भूभागलक्षणेऽसौ अनशनविधिः कार्यते। अयम्भावः—यत्र गीतनृत्यादीन्यासन्नानि स्युस्तथा यक्षगृहादिप्रत्यासत्तिर्यत्राऽऽरामोदकादिप्रत्यासत्तिश्च यत्र च कल्पपालरजकचण्डालघञ्चिकाद्यासत्तिस्तत्स्थानं त्याज्यम्, ध्यानव्याघातजुगुप्साक्षुद्रोपद्रवादिदोषसम्भवात् १३। तत्राप्युद्गमादिदोषरहितं प्रशस्तं चतुःशालं त्रिशालं वा विस्तीर्णं वसतिद्वयं गृह्यते, तत्रैकस्यां भक्तप्रत्याख्याता ध्रियते, अन्यस्यां साधवो भोजनादि कुर्वते, अन्यथा भक्तगन्धादिना तत्प्रत्याख्यातुस्तदभिलाषः स्यात्, ततोऽनेकदोषसम्भवादिति द्वारं १४। 'निज्जव' त्ति पार्श्वस्थादयोऽगीतार्थाश्च निर्यापका न कर्तव्याः, किन्तु

कालोचितस्थैर्यगीतार्थत्वादिगुणयुक्तास्ते चाष्टचत्वारिंशत्, तद्यथा—येऽनशनिनमुद्वर्त्तयन्ति परावर्त्तयन्ति च, ते चत्वारो १, ये चाभ्यन्तर-द्वारमूले तिष्ठन्ति तेऽपि चत्वारः २, एवं संस्तारककर्त्तारः ३, तस्यैव चातुरस्यापि धर्मकथकाः ४, [वादिनः ५,] अग्रद्वारमूलावस्थायकाः ६, तदुचितभक्तानयनयोग्याः ७, पानकानयनयोग्याः ८, उच्चारपरिष्ठापकाः ९, प्रस्रवणपरिष्ठापकाः १०, बहिर्धर्मकथकाः ११, प्रत्येकमेकैकस्यां चत-सृष्वपि दिक्षु क्षुद्रोपद्रवनिवारणाय चत्वारः सहस्रयोधिनो महामल्लाः १२, एवमेतेषु द्वादशसु स्थानेषु प्रत्येकं चत्वार इति सर्वेऽप्यष्टच-त्वारिंशत्। अन्ये तूच्चारप्रस्रवणपरिष्ठापने मिलितेऽपि चतुरोऽभिधाय ततो दिक्षु द्वौ द्वाविति महायोधान्मन्यन्ते, इत्येवमष्टचत्वारिंशतं प्रतिपादयन्ति। अथैतावन्त एते न लभ्यन्ते? तदैकैकहान्या तावद्वक्तव्यं यावज्जघन्यं द्वौ निर्यापकौ कार्यौ, तत्रैको भक्तपानकाद्यानयनार्थं पर्यटत्यन्यस्तु सावधान एव तत्समीपे तिष्ठतीति द्वारम् १५। 'दव्वदायणे चरिमे' त्ति चरमे—पर्यन्ते मरणकाल इत्यर्थः, तत्र च मुमूर्षोः प्रायेण भोजनाभिलाषः समुच्छलत्यतस्तस्य समाधानोत्पादनार्थं सर्वाण्यपि स्तोकस्तोकानि दधिदुग्धघृतपक्वान्नशालिदालिव्यञ्ज-नादीनि द्रव्याणि प्रदर्श्यन्ते, यानि च तस्य प्रतिभासन्ते तानि विशेषतो दर्श्यन्ते, यदि चैषणीयानि न लभ्यन्ते तदा पञ्चकादि-परिहाण्या अन्यान्यप्यानीयन्ते। तानि च यद्यसौ भुङ्क्ते तदा को गुणः? उच्यते—तस्याहारतृष्णाव्यवच्छेदस्तस्मिंश्च सति स्वस्थो वैराग्यमुपगत आहारस्यासारतादिस्वरूपं परिभावयन्सुखेनैव त्यजति प्राणान्, अन्यथा आर्त्तध्यानादयो दोषा इति द्वारं १६। 'परिहीयमाण (हाणि)' त्ति यथाऽऽनीतं तद्यो भुङ्क्ते तदा द्वितीयेऽह्नि परिहीयमाणं स्तोकमानीयते, यच्च तस्य प्रियं तद्विपरीत-

---

+ “ सत्यामनशनिनः प्रभावनामतिशायिनीं श्रावकलोकैः क्रियमाणां दृष्ट्वा केचिद्दुरात्मानस्तामसहमानाः सर्वज्ञमतनिराकरणाय वाददानायो-पतिष्ठन्ते, ततस्तेषां तिरस्करणाय वादिनो वावदूकाश्चत्वारः प्रमाणप्रवीणाः प्रगुणीभूतास्तिष्ठन्ति।” प्रव० सारो० बृहद्वृत्ति, पत्र १७७।

रात्रिर्दिनं वा ? इत्यादि, एवं च सारितो यद्यसौ प्रस्तुतं ब्रवीति तदा ज्ञायते न देवताऽधिष्ठितः, किन्तु परीषहबाधित इति ज्ञात्वा समाध्युत्पादनार्थं तोमरादिप्रहारकल्पक्षुदादिपरीषहावगणनहेतुत्वात्कवचमिव कवचमाहारो दीयते, ततस्तद्बलेन परीषहान् जित्वा प्रस्तुतपारगामी भवत्यसाविति द्वारम् २१। अनेन विधिना निर्व्याघातेन कालगतस्य साधोश्चिह्नं कर्त्तव्यं, तच्च द्विधा-शरीरत उपकरणतश्च, तत्र शरीरतस्तावदुक्तं प्रत्याचिख्यासोः प्रथममेव लोचः कार्यः, गृहीते चानशने यद्बहुदिनैः केशवृद्धिसम्भवे पुनर्लोचः कार्यः, उपकरणतस्तु कालगतस्यापि समीपे मुखपोतरजोहरणचोलपट्टरूपमुपकरणं मुच्यत एव, येन दिव्यमपि गतस्तदनुरूपं दृष्ट्वा सम्यक्त्वं प्रतिपद्यते, अन्यथा सुराष्ट्राश्रावकवन्मिथ्यात्वगमनसम्भवात्, चिह्नं-चिह्नमन्तरेण परिष्ठापने चौरैः कोऽप्ययं मलमोटना-दिना विनाशित इत्याशङ्कया ग्रामाणां राजनिग्रहादयो दोषा इति द्वारम् २२। व्याघाते-भक्तप्रत्याख्याने पराभवस्वरूपे पुनर्यांचना-अन्वेषणा, संलेखनाकरणप्रवृत्तस्य द्वितीयस्य पूर्वोक्तविधिना तत्स्थाने उपवेशनार्थं क्रियते, अथ नास्त्यसौ तदा समयोक्तविधिरत्र द्रष्टव्यः। एतच्च सर्वं भक्तपरिज्ञाप्रत्याख्यानलक्षणे मरणे द्रष्टव्यम्, पादपोपगमनेङ्गिनीमरणयोस्तु विधिर्वक्ष्यते, एषां चायं विषयविभागः-

"सव्वाओ अज्जाओ, सव्वे वि य पढमसंघयणवज्जा। सव्वे य देसविरया, पच्चक्खाणे उ मरंति ॥१॥"

इति गाथार्थः ॥४८२॥ उक्तं द्विधाऽपि सपराक्रमं, अथापराक्रममाह—

**अपरक्कमो बलहीणो, निव्वाघाएण कुणइ गच्छम्मि। वाघाओ रोगविसा-इएहिं तह विज्जुमाईहिं ॥४८३॥**

व्याख्या— अपराक्रमः कः ? इत्याह-बलहीनः-परगणं गन्तुमशक्त इत्यर्थः, स एवम्भूतो निर्व्याघातेन रोगाद्युपद्रवाभाव-रूपेण शरीरसुखमार्थं स्वगच्छेऽपि, न त्वन्यगणं गच्छतीत्यर्थः, व्याघातमेवाह-व्याघातो रोगविषादिभिस्तथा विद्युदादिभिश्च द्रष्टव्यः।

मप्यत्किमप्यानीयते, प्रार्थ्यमानस्य च 'त्वत्प्रियं नाथ लब्ध'मित्याद्युत्तरं क्रियते, आहारगृद्धिविच्छेदो च देशना क्रियते, तृतीयदिनेऽप्येष एव विधिर्नवरं-स्तोकतरमानीयते, ततः परं सर्वथैव न किञ्चिदानीयते प्रतिबोध्यते च। अथ पराभग्नत्वात् गृद्धो न प्रतिबुध्यते तदा पूर्वमेवान्यद्वारनिर्णीतो विधिराश्रियते इति १७॥ 'अपरितंत' त्ति अपरितान्तैरप्यनिर्विण्णैः प्रतिचरकैर्निर्जरार्थिभिर्यथाबलं यथापरिज्ञानं च सर्वं तद्विषयंकृत्यं विधेयमित्यर्थः १८। 'निज्जर' त्ति भक्तपरिज्ञानिनः परिचरकाणां च समक्षं गुणाः-कर्मनिर्जरा प्ररूपणा कार्या, यथा—

"कम्ममसंखिज्जभवं, खवेइ अणुसमयमेव आउत्तो। अन्नयरम्मि वि जोगे, सज्झायम्मि विसेसेण ॥१॥"

इत्यतो यावत् "(कम्ममसंखिज्जभवं, खवेइ अणुसमयमेव आउत्तो। अन्नयरम्मि वि जोगे), विसेसओ उत्तमट्ठम्मि॥१॥"

तदेवं उत्तमार्थस्यानशनलक्षणस्य सर्वोपरि निर्जराहेतुत्वात् सम्यगेवोद्यतैरयं विधेय इति द्वारं १९। 'संथारय' त्ति संस्तारकविधिर्वक्तव्यः, तत्र भूमौ शिलातले वा अस्फुटिते सोत्तरपट्टः संस्तारक आस्तीर्यते' तत्रोपविष्टः सुप्तो वा समाधिना तिष्ठति। अथेत्थं स्थातुं न शक्नोति, तदेकखण्डे, तदलाभे द्विखण्डादिकेऽपि पट्टे संस्तारक आस्तीर्यते, तथापि स्थातुं न शक्नोति तदा एककल्पादयः कल्पा आस्तीर्यन्ते, तथापि समाध्यसम्भवे तूलिराप्तीर्यत इति द्वारम् २०। उद्वर्तनादीनीति, आदिशब्दात्परावर्तनबहिः प्रवातार्थनिस्सारणादिपरिग्रहः, एतानि च कोमलकराणां स्थिरगम्भीराणा-स्थिरसमर्थानां साधूनां पार्श्वात्कार्यन्ते, तस्य च समाध्युत्पादनार्थं देशनां कुर्वन्ति साधव इति २१। 'सारेऊण य कवयं' त्ति प्रत्याख्यातेऽप्याहारे यद्यसौ कथमप्याहारं प्रार्थयते तदा मा कथञ्चिदसौ प्रत्यनीकदेवतयाऽधिष्ठितो याचते इति परीक्षार्थं प्रथमं तावत्सारणा क्रियते, कोऽसि त्वमगीतार्थो गीतार्थो वा? इदानीं

तत्र क्षणमात्रेणैव मरणकारी शूलादिरोगो विशुच्यादिभयं वा तेनैव स्थिरतरोपजायते तत्क्षणमपि प्रतिरुध्यते इति भाव इति गाथार्थः ॥४८३॥ अथ पण्डितमरणस्यैव माहात्म्यमाह—

एक्कं पंडियमरणं, छिंदइ जाईसयाइं बहुयाइं। एक्कं पि बालमरणं, कुणइ अणंताइं दुक्खाइं ॥४८४॥

व्याख्या—एकं पण्डितमरणं छिनत्ति जन्मशतानि बहूनि, एकमपि बालमरणं करोत्यनन्तदुःखानीति गाथार्थः ॥४८४॥

मरणे चोपस्थिते धीरतैव कर्त्तव्येत्याह—

धीरेण वि मरियव्वं, काउरिसेण वि अवस्समरियव्वं। ता निच्छियम्मि मरणे, वरं खु धीरत्तणे मरियं ॥४८५॥

व्याख्या—धीरेणापि मर्त्तव्यं, कापुरुषेणाप्यवश्यं मर्त्तव्यं, तन्निश्चिते मरणे धीरत्वे एव मृतं वरमिति गाथार्थः ॥४८५॥

ननु पादपोपगमनादिपण्डितमरणेन मृताः प्राणिनः क्व यान्तीत्याह—

पाओवगमेण इंगिणि-भत्तपरिण्णाइविसुद्धमरणेणं। जंति महाकप्पेसुं, अहवा पाविंति सिद्धिसुहं ॥४८६॥

व्याख्या—पादपोपगमनेङ्गिनीभक्तपरिज्ञाऽऽदिविशुद्धमरणेन मृताः प्राणिनो यान्ति महाकल्पेषु—अनुत्तरविमानेषु, अथवा निष्ठितकर्माणः प्राप्नुवन्ति सिद्धिसुखमिति। पादपोपगमनादिस्वरूपं तु—

"सव्वत्थापडिबद्धो, दंडाययमाइठाणमाइमिह ठाउं। जावज्जीवं चिट्ठइ, निच्चिट्ठो पायवसमाणो ॥१॥"

"इंगियदेसम्मि सयं, चउव्विहाहारचायनिप्फन्नं। उव्वत्तणाइजुत्तं, नन्नेण उ इंगिणिमरणं ॥२॥"

"भत्तपरिण्णाऽणसणं, चउव्विहाहारचायनिप्फन्नं। सप्पडिकम्मं नियमा, जहासमाही विणिद्दिट्ठं ॥३॥"

इति गाथार्थः ॥४८६॥ ननु किं सिद्धौ सौख्यमस्ति? यदर्थमेवं कष्टमाचेष्यत इत्याह—

**सुरगणसुहं समग्गं, सव्वद्धापिंडियं जइ हविज्जा। नवि पावइ मुत्तिसुहं-ऽणंताहिं वि वग्गवग्गूहिं ॥४८७॥**

व्याख्या—सुरगणस्य-सर्वस्यापि देवसङ्घातस्य सम्बन्धि यदतीतानागतवर्त्तमानकालभावि समग्रं-समस्तं सुखं तदपि सर्वाद्धापिण्डितं-सर्वकालसमयराशिना गुणितं यदि भवेत्, उपलक्षणं चेदं, ततः पुनरप्यनन्तगुणं क्रियते, यावत्समस्तलोकालोकनभःप्रदेशसङ्ख्यास्तद्राशयः कृत्वैकत्र मील्यन्ते, तथाप्येवमपि प्रकर्षमपि गतमिदं सुरसुखं कर्तृकर्मतापन्नं मुक्तिसुखं न प्राप्नोति। अस्यापि राशेर्वर्गस्यापि पुनर्वर्गः, एतस्यापि पुनर्वर्गः, इत्येवमनन्तैरपि वर्गवर्गैर्वर्गितं सन्न तत्तुल्यं स्यादिति गाथार्थः ॥४८७॥

किञ्च तत्त्वतः सिद्धा एव सुखिनो, नान्ये इत्याह—

**दुक्खं जराविओगो, दारिद्दं रोगसोगरागाइ। तं च न सिद्धाण तओ, तेच्चिय सुहिणो न रागंधा ॥४८८॥**

व्याख्या—जराऽभीष्टवियोगो दारिद्र्यं रोगशोकरागादयो दुःखहेतुत्वाद्दुःखं, तच्चेत्थम्भूतं दुःखं सिद्धानां नास्ति, ततस्त एव सुखिनो, न रागान्धा देवादयः। अयं चार्थो भवविरागादिद्वारेषु भावितप्राय इति गाथार्थः ॥४८८॥ यत एवं ततः किमित्याह—

**निच्छिन्नसव्वदुक्खा, जाइजरामरणबंधणविमुक्का। अव्वाबाहं सुक्खं, अणुहुंति सासयं सिद्धा ॥४८९॥**

व्याख्या—नितरां छिन्नसर्वदुःखा जन्मजरामरणबन्धनैर्विमुक्ताः सिद्धा एवाव्याबाधं शाश्वतं सुखमनुभवन्तीति गाथार्थः ॥४८९॥

इत्थं विशम्य सम्यग्, जिनागमाद्विबुधमरणमाहात्म्यं । सर्वे भवन्तु भव्याः !, पण्डितमरणेऽतिकृतयत्नाः ॥१॥

इति पुष्पमालाविवरणे भावनाद्वारे [भक्त] परिज्ञानलक्षणं प्रतिद्वारं समाप्तमिति ॥१०॥]

अथ शास्त्रोपसंहाराधिकारस्तत्र तावदनन्तरोक्तार्थमेवाश्रित्याह—

संते वि सिद्धिसोक्खे, पुव्वुत्ते दंसियम्मि वि उवाए । लद्धे वि माणुसत्ते, पत्ते वि जिणिंदवरधम्मे ॥४९०॥

जं अज्ज वि जीवाणं, विसएसु दुहासवेसु पडिबंधो । तं नज्जइ गुरुआण वि, अलंघणिज्जो महामोहो ॥४९१

व्याख्या—अनन्तरोक्तरूपे सत्यपि सिद्धिसौख्ये, पूर्वोक्ते चाभयप्रदानादिके दर्शितेऽपि तत्राप्त्युपाये, लब्धेऽपि मानुषत्वे, प्राप्तेऽपि जिनेन्द्रवरधर्मे, यदद्यापि जीवानां विषयेषु दुःखाश्रवेषु-दुःखप्रदेषु प्रतिबन्धो दृश्यते, तज्ज्ञायते-गुरूणामपि प्रायोऽलङ्घनीयो महामोह इति गाथाद्वयार्थः ॥४९०-४९१॥ किञ्च—

नाऊण सुयबलेणं, करयलमुत्ताहलं व भुवणयलं । केवि निवडंति तहवि हु, पिच्छसु कम्माणबलियत्तं ॥४९२॥

व्याख्या—ज्ञात्वा श्रुतबलेन करतलमुक्ताफलमिव भुवनतलं, तथापि केचिन्निपतन्ति चारित्रादिगुणभ्रंशात्संसारे, तत्प्रेक्षस्व अहो !! कर्मणां मोहनीयादीनां बलीयस्त्वमिति गाथार्थः ॥४९२॥ अन्ये पुनः किमित्याह—

एक्कं पि पयं सोउं, अन्ने सिज्झंति समरनिवइव्व । संजायकम्मविवरा, जीवाण गई अहो !! विसमा ॥४९३॥

व्याख्या—एकमपि पदं–मोक्षसाधकं स्थानं श्रुत्वा अन्ये केचित्सिध्यन्ति, समरनृपतिरिव, कथम्भूताः सन्तः ? इत्याह–सञ्जातकर्मविवरा–अपगतकर्माणः, ततश्चाहो !! विषमा मतिर्जीवानामिति [गाथार्थः] ॥४९३॥

कोऽयं पुनः समरनृपः ? इत्युच्यते–संसारीजीवो मोहनृपबलेनानन्तं कालं कदर्थितश्चारित्रनृपसैन्यावसरमलभमान उभयदल-मिलन्त्या कर्मपरिणामभूपभार्यया भवितव्यतया तदीयेनैव केनापि प्रबलसुचरितेन रञ्जितया पुण्योदयं सहायं दत्त्वा समानीतोऽसौ संसारिजीवः साकेतपुरे विश्वम्भरराजस्य पुत्रः कृतः समरः, विश्वम्भरनृपेण व्रतं जिघृक्षता राज्ये स्थापितः, साधितानेन पितुरप्यसिद्धा बहवो विषयाः, सञ्जातः समुदीर्णप्रतापो महानरपतिः, अन्यदा समुत्पन्नाऽस्य शरीरे प्रबला दाहवेदना, तया पीडितः कृच्छ्रेण दिनानि गमयति। अत्रान्तरे चारित्रधर्मनृपस्योत्पन्ना चिन्ता, यथा अहो !! अयं संसारिजीवः सुचिरं कदर्थितो मोहराजसैनिकैः, करुणापराश्च वयं, तत्कथमप्यसौ तेभ्यो मोचयितुं युक्त इति विचिन्त्याहूतः सद्बोधमन्त्री, प्रोक्तः स्वाभिप्रायः, तावता भवितव्यतया पाठितश्चैकः पुरुष एतां गाथां, यथा—

"पुरिसाण पवित्तीओ, सुहाभिलासीण ताव सव्वाओ। धम्मं विणा य न सुहं, धम्मो य न संगमूढाणं ॥१॥"

श्रुता च [समर] राज्ञा, अवधारितं चैकं पदं 'धम्मं विणा य न सुहं' ति, न शेषं, वेदनाविधुरितत्वात् । अत्रान्तरे समागतः सद्बोधो राज्ञः समीपे, क्षणं स्थितः, ततो भीतभीता निलीना मोहराजादयः । ततश्च राज्ञा चिन्तितं–धर्मं विना कस्यापि सुखं न भवतीति ममाप्यनुभवसिद्धमेव, यतो बालकालादारभ्य धर्मस्य वार्ताऽपि मया न कृता, तत इत्थं दुःखभाजनं जातस्तिष्ठामि, तस्मादिदानीमपि युज्यते मम धर्मः कर्तुमिति, प्रभाते एव व्रतं ग्रहीष्यामीति निश्चयः कृतः । पुनः प्रभाते जाते मोहराजप्रेषितरागकेसरी–

प्रभृतिभिः कृतः कर्णजापः। ततो राज्ञा चिन्तितं–सम्प्रति पुत्रो मे लघुर्भार्या तरुणी, ततः कियद्दिनपर्यन्ते व्रतं गृहीष्यामीति। तथ सद्बोधमन्त्रिणा कुतोऽपि विज्ञाय राज्ञः प्रोक्तं—'देव! एकोऽपि मुहूर्तो बहुविघ्न एवेत्यवधार्य परित्यज्यतां प्रस्तुतधर्मकार्ये विलम्ब' इत्यादिवचनैः समुत्साह्य समाहूता भवितव्यता, कथितश्च तस्याः सर्वोऽपि व्यतिकरः, ततो मोहराजकटकोपरि रुष्टयाऽनया संसारीजीवहस्ते दत्तो जीववीर्यकृपाणस्तेन च ताडितानि मर्माण्यपि मोहमानुषाणि, ततो दाघज्वरे शान्ते पुत्रं राज्ये संस्थाप्य अनक-केवलिपार्श्वे प्रव्रज्य चारित्रधर्मराजसामिप्यं प्रतिपन्नोऽल्पकालेन सूत्रार्थावधीत्य धर्मबुद्धिसदागमसद्बोधसम्यग्दर्शनादिसाहाय्या-त्रिहत्य समस्तमपि मोहराजबलं सम्प्राप्य केवलं प्राप्तो निर्वृतिपुरीं समरराजर्षिः, इति समरराजकथानकं समाप्तम् ॥

यत एवं ततः किमित्याह—

तम्हा सकम्मविवरे, कज्जं साहंति पाणिणो सव्वे। तो तह जएज्ज सम्मं, जह कम्मं खिज्जइ असेसं॥४९४॥

व्याख्या—तस्मात्स्वकर्मविवरे–स्वकर्मक्षये एव सर्वे प्राणिनः कार्यं मोक्षगमनलक्षणं साधयन्ति, ततस्तथा यतेत सम्यग् यथाऽशेषं कर्म क्षीयत इति गाथार्थः ॥४९४॥ केनोपायेन पुनः कर्म क्षीयते ? इत्याह—

कम्मक्खए उवाओ, सुयाणुसारेण पगरणे इत्थ। लेसेण मए भणिओ, अणुट्ठियव्वो सुबुद्धीहिं ॥४९५॥

व्याख्या—कर्मक्षये पुनरुपायः श्रुतानुसारेणात्र प्रकरणे लेशेन मया भणितः, अनुष्ठेयः सुबुद्धिभिरिति गाथार्थः ॥४९५॥

केषां पुनरिदं प्रकरणमुपकाराय भविष्यतीत्याह—

**पायं धम्मत्थीणं, मज्झत्थाणं सुनिउणबुद्धीणं । परिणमइ पगरणमिणं, न संकिलिट्ठाण जंतूणं ॥५१६॥**

व्याख्या—प्रायो-बाहुल्येन धर्मार्थिनां तथा मध्यस्थानां सुनिपुणबुद्धीनां-अतिविचारचतुराणां परिणमति-रोचते प्रकरणमिदं, न पुनः सङ्क्लिष्टानां-रागद्वेषदूषितानां जन्तूनामिति गाथार्थः ॥५१६॥ अथ ग्रन्थकारः स्वनाम प्रकारान्तरेणाह—

**हेममणिचंददप्पण-सूररिसिपढमवण्णनामेहिं । सिरिअभयसूरिसीसेहिं, विरइयं पयरणं इणमो ॥५१७॥**

व्याख्या—हेम-मणि-चंद-दप्पण-सूर-रिसि एषां शब्दानां प्रथमवर्णनामभिः, हेमचन्द्रसूरिभिरित्यर्थः, तथा 'सिरिअभय' त्ति पदे समुदायोपचारात् श्रीअभयदेवसूरिशिष्यैर्विरचितं प्रकरणमिदमिति गाथार्थः ॥५१७॥ किं नामकं किं फलं चेदं प्रकरणमित्याह—

**उवएसमालनामं, पूरियकामं सया पढंताणं । कल्लाणरिद्धिसंसिद्धि-कारणं सुद्धहिययाणं ॥५१८॥**

व्याख्या—उपदेशमालानामकं प्रकरणमेतत्पूरितमनोरथं सदा पठतां शुद्धहृदयानां कल्याणऋद्धिसंसिद्धीनां कारणमिति गाथार्थः ॥५१८॥ अत्रैवाधिकारसङ्ख्यां ग्रन्थसङ्ख्यां चाह—

**इत्थ वीसऽहिगारा, जीवदयाईहिं विविहअत्थेहिं । गाहाणं पंचसया, पणुत्तरा होंति संखाए ॥५१९॥**

व्याख्या—जीवदयादिभिर्विविधैरर्थैः कृत्वा इह प्रकरणे विंशतिरधिकारा भवन्ति, तथाहि—दानं त्रिधा, शीलं तपश्च, "सम्मत्तचरणसुद्धा" त्यादि भावनाद्वारसम्बन्धिनश्चतुर्दशाधिकारा इति सर्वेऽप्येकोनविंशतिः, विंशतितमस्तु प्रकरणोपसंहाराधिकार इति । गाथानां च सङ्ख्या पञ्च शतानि पञ्चोत्तराणि भवन्ति ज्ञातव्यानीति गाथार्थः ॥५१९॥

न चैतत्प्यन्यस्य सम्बन्धिना पुण्येनान्यस्याधिकारस्तथाप्युदारधियां प्रधानं वचः कर्मोपशमायेति वृद्धवादादित्याह—

**उवएसमालकरणे, जं पुन्नं अज्जियं मए तेण । जीवाणं होज्ज सया, जिणोवएसम्मि पडिवत्ती ॥५००॥**

व्याख्या—उपदेशमालायाः करणे यत्पुण्यमर्जितं मया तेन पुण्येन जीवानां 'सदा' नित्यं जिनोपदेशप्रतिपत्तिरादरोऽङ्गीकारो भूयादिति गाथार्थः ॥ ५०० ॥ अथ श्रुतबहुमानार्थमपश्चिमं मङ्गलमाह—

**जाव जिणसासणमिणं, जाव य धम्मो जयम्मि विप्फुरइ । ताव पढिज्जउ एसा, भवेहिं सयासुहत्थीहिं ।५०१।**

व्याख्या—यावज्जिनशासनमिदं यावच्च धर्मो जगति विस्फुरति तावत्पठ्येत एषा उपदेशमाला भव्यैः सदासुखार्थिभि–र्नित्यसुखार्थिभिरिति गाथार्थः ॥ ५०१× ॥

## टीकाकृत्प्रशस्तिः ।

श्रीमच्चन्द्रकुलार्णवोज्ज्वलकुलोद्भूतिः पृथुप्राभवः, पुण्यप्रौढफलः प्रफुल्लसुमनःश्रेणिश्रिया सङ्कुलः ।
पाथोदास्तरो गणः खरतरो गीर्वाणकारस्करो, विस्तारप्रवरो चिरमस्ति विलसन्नुच्चैः स्थितः सर्वतः ॥ १ ॥

---

× यद्यपि ग्रन्थकृता स्वयमस्य ग्रन्थस्य प्रमाणं गाथानां पञ्चाधिकशतपञ्चकं निर्दिष्टं परं प्रतिष्वनेकास्वपि गाथानामेकोत्तरंशतपञ्चकमेवोपलभ्यते, यद्यपि मुद्रितबृहद्वृत्तौ प्रान्ते गाथानां पञ्चोत्तरशतपञ्चकाङ्को लिखितः किन्तु मध्ये मध्ये गाथाङ्कानामव्यवस्थितत्वात्समुदिता एतावत्य एव गाथाः समस्तीति केनाप्यज्ञातकारणेन मध्ये कश्चित् २ गाथाः पतिता भविष्यन्तीत्यनुमानम् ।

तत्र नवाङ्गीविवरण-कर्तुः श्रीअभयदेवसूरिसुगुरोः । शिष्यः श्रीजिनवल्लभ-सूरिः सूरीन्द्रमुकुटमणिः ॥ २ ॥

शिष्यस्तदीयोऽद्भुतभाग्यभूरि-र्युगप्रधानो जिनदत्तसूरिः ।
तदन्वये दीप्तचरित्रतेजा, रेजे गुरुः श्रीजिनराजसूरिः ॥ ३ ॥

तत्पट्टोद्भटपुण्डरीकनिबिडक्रोडैकहंसश्रियां, तत्त्वज्ञानविशुद्धसंयमजुषां सम्यक्चर्यं प्रोचुषाम् ।
निस्सङ्गत्वनिरीहताग्रिमगुणग्रामावधीनां सुधा-सारोदारगिरां गभीरिमरमावारांनिधीनां तथा ॥ ४ ॥

सौम्यत्वेन शशाङ्कसुन्दरतरश्रीणां क्षमाधारिणां, श्रीजैनेन्द्रमतप्रभासनपुषां दुर्वादिकक्षप्लुषाम् ।
निःशेषश्रुततत्त्वनैपुणवतामग्रेसराणां प्रभुः, श्रीमच्छ्रीजिनभद्रसूरिसुगुरूणां शिष्यवर्याग्रणीः ॥ ५ ॥

तेषामेव विनेयै-र्नृपतिसमालब्धवादिवृन्दजयैः । श्रीसिद्धान्तरुचिमहो-पाध्यायैः पाठितो यत्नात् ॥ ६ ॥

समयमकरन्दबिन्दूनां, दायादाय कतिपयानेषः । साधुर्वृत्तिमकार्षी-न्मधुकर इव पुष्पमालायाः ॥ ७ ॥

उत्सूत्रमासूत्रितमत्र किञ्चित्, प्रमादमान्द्यादिवशाद्यदि स्यात् ।
शोध्यं स्वतस्तत्प्रयतैर्बहुश्रुतै-रेषोऽञ्जलिस्तेषु विजृम्भितो मे ॥ ८ ॥

सम्प्रापिता वृत्तिरियं प्रमाणतां, युगप्रधानैर्जिनभद्रसूरिभिः ।
तद्वृद्धैर्वाचकसोमकुञ्जरै-र्विशोध्य वैयाकरणप्रकाण्डैः ॥ ९ ॥

साधुसोमसमुत्पन्नां, विबुधाः सत्सुधामिव । पायं पायमिमां वृत्तिं, तृप्ताः स्युरजरामराः ॥ १० ॥

वर्षेऽर्कबाणचन्द्रे (१५१२), वृत्तिः श्रीभीमराजशालायाम् ।
श्रीद्विप(५२)शतमितिरेषा, समर्थिताऽहम्मदाबादे ॥ ११ ॥

इति श्रीखरतरगणेश्वरश्रीजिनभद्रसूरिशिष्यश्रीसिद्धान्तरुचिमहोपाध्यायशिष्य-
साधुसोमगणिविरचिता श्रीपुष्पमालावृत्तिः समाप्ता ।

नाम्ना मोहनलालेति, विख्याता भुवनीतले । श्रीखरतरगणोत्तंसा, जैनशासनभूषणाः ॥ १ ॥

## इति श्रीलघुवृत्तियुता पुष्पमाला समाप्ता ।

तेषां प्रशिष्यपंन्यास-गणिकेशरसन्मुनेः । शिष्यं बुद्ध्यधिनामानं, भद्रं तन्वन्तु तेऽन्वहम् ॥२॥